(२) सर्व्वत्र चेतसि नवानुपूर्व्वविहारसमापत्तिलक्षणे स्वातन्त्र्यादवशिनस्ते च ते परमपारमिं स्वगोत्रप्रकर्षपर्य्यन्तगतिं प्राप्ताश्चेति सर्व्वचेतोवशि-परमपारमि प्राप्ताः । अत्र पूर्व्वपूर्व्वस्योत्तरोत्तरं कारणं । कुतः क्षीणाश्रवाः ? निःक्लेशत्वात् । एवं सर्व्वत्र योज्यं । अतः सर्व्वपुरुषार्थ-समाप्तत्वान्नापरं विशेषणं वाच्यमिति । तदनेन अष्टसाहस्रीटीकायां परमपारमि प्राप्तैः इति पाठोव्याख्यातः अष्टसाहस्र्यां स एव पाठो-दृश्यते । अत्र तु पुस्तकचतुष्टये परमपारमिताप्राप्तैः इति पाठो-दृश्यते ।

(३) नित्यस्य कार्य्यकारणलक्षणस्य वास्यवासकभावानुपपत्तेः शुभाशुभवासनाभिः पूर्णोऽनित्यस्तदनुरूपां गतिं लातिगच्छतीति निरुक्ताभिधानात् प्रबन्ध तथैव पुद्गलः । पुनःपुनर्गतिषु लीयते इति पुद्गलः इति स्थाना-न्तरे उक्तं ।

।।ऽवभासेन स्फुरन्ति
कोपमां लोकधातुं
न्दशि गङ्गानदीवालु-
स्म। अधस्ताद्दिशि
भासेन स्फुरन्ति स्म।
कधातुं महताऽवभासेन
ष्टो ये च तेनावभासेन
सम्यक्सम्बोधौ॥
भ्यः प्रभां प्रामुञ्चत्। यया
हताऽवभासेन स्फुट*म-
कधातवोमहताऽवभा-
नकोपमा लोक-
गि गङ्गानदी-
तर-
स्फुटा
स्फुट-
स्फु

नियुतशतसहस्राणि निश्चरन्ति स्म। हृदयश्रीवत्सान्महापुरुषलक्षणात् षष्टिषष्टिरश्मिकोटीनियुतशतसहस्राणि निश्चरन्ति स्म । दशभ्यो हस्ताङ्गुलिभ्यः षष्टिषष्टिरश्मिकोटीनियुतशतसहस्राणि निश्चरन्ति स्म । द्वाभ्यां बाहुभ्यां षष्टिषष्टिरश्मिकोटीनियुतशतसहस्राणि निश्चरन्ति स्म । द्वाभ्यामंसाभ्यां षष्टिषष्टिरश्मिकोटीनियुतशतसहस्राणि निश्चरन्ति स्म । ग्रीवायाः षष्टिषष्टिरश्मिकोटीनियुतशतसहस्राणि निश्चरन्ति स्म । चतसृभ्यो दंष्ट्राभ्यः षष्टिषष्टिरश्मिकोटीनियुतशतसहस्राणि निश्चरन्ति स्म । चत्वारिंशतो दन्तेभ्यः षष्टिषष्टिरश्मिकोटीनियुतशतसहस्राणि निश्चरन्ति स्म । द्वाभ्यां चक्षुर्भ्यां षष्टिषष्टिरश्मिकोटीनियुतशतसहस्राणि निश्चरन्ति स्म । द्वाभ्यां श्रोत्राभ्यां षष्टिषष्टिरश्मिकोटीनियुतशतसहस्राणि निश्चरन्ति स्म । द्वाभ्यां घ्राणाभ्यां षष्टिषष्टिरश्मिकोटीनियुतशतसहस्राणि निश्चरन्ति स्म । मध्ये भ्रुवोः ऊर्णायाः षष्टिषष्टिरश्मिकोटीनियुतशतसहस्राणि निश्चरन्ति स्म । उपरिष्टादुष्णीषात् षष्टिषष्टिरश्मिकोटीनियुतशतसहस्राणि निश्चरन्ति स्म । मुखद्वाराच्च षष्टिषष्टिरश्मिकोटीनियुतशतसहस्राणि निश्चरन्ति स्म । सर्वाणि च तानि रश्मिकोटीनियुतशतसहस्राणि निश्चरन्ति स्म । सर्वावन्तमिमन्त्रिसाहस्रमहासाहस्रं लोकधातुं महताऽवभासेन स्फुरित्वा पूर्वस्यान्दिशि गङ्गानदीवालुकोपमां *लोकधातुं महताऽवभासेन स्फुरन्ति स्म । दक्षिणस्यान्दिशि गङ्गानदीवालुकोपमां लोकधातुं महताऽवभासेन

---

* लोकधातुशब्दविशेषणपदस्य क्वचित् स्त्रियां क्वचित् पुंसिप्रयोगो दृश्यते वस्तुतः पुंसिप्रयोग एवयुक्तः ।

न्त स्म। पश्चिमायान्दिशि गङ्गानदीवालुकोपमां लोकधातुं
ऽवभासेन स्फुरन्ति स्म। उत्तरपूर्वस्यान्दिशि गङ्गानदीवालु-
मां लोकधातुं महताऽवभासेन स्फुरन्ति स्म। पूर्वदक्षिणस्या-
गङ्गानदीवालुकोपमां लोकधातुं महताऽवभासेन स्फुरन्ति
दक्षिणपश्चिमायान्दिशि गङ्गानदीवालुकोपमां लोकधातुं
ऽवभासेन स्फुरन्ति स्म। पश्चिमोत्तरस्यान्दिशि गङ्गानदीवालु-
मां लोकधातुं महताऽवभासेन स्फुरन्ति स्म। अधस्ताद्दिशि
दीवालुकोपमां लोकधातुं महताऽवभासेन स्फुरन्ति स्म।
ष्टाद्दिशि गङ्गानदीवालुकोपमां लोकधातुं महताऽवभासेन
न्ति स्म। यैश्च सत्त्वैः सोऽवभासो दृष्टो ये च तेनावभासेन
ते सर्वे नियता अभूवन् अनुत्तरायां सम्यक्सम्बोधौ ॥

थ खलु भगवान् पुनरेव सर्वरोमकूपेभ्यः प्रभां प्रामुञ्चत्। यया
ऽयन्त्रिसाहस्रमहासाहस्रो लोकधातुर्महताऽवभासेन स्फुट[*]म-
पूर्वस्यान्दिशि गङ्गानदीवालुकापमा लोकधातवोमहताऽवभा-
फुटा अभूवन्। दक्षिणस्यान्दिशि गङ्गानदीवालुकोपमा लोक-
तो महताऽवभासेन स्फुटा अभूवन्। पश्चिमायान्दिशि गङ्गानदी-
कोपमा लोकधातवो महताऽवभासेन स्फुटा अभूवन्। उत्तर-
दिशि गङ्गानदीवालुकोपमा लोकधातवो महताऽवभासेन स्फुटा

स्फुतमभूत् इति क पुस्तके स्फुटेन भूत् इति ख, घ, पुस्तके स्फुट-
मभूदिति ग पुस्तके पाठः। एकोपि पाठो न समीचीनः। स्फुटो-
ऽभूदिति पाठः सङ्गतः प्रतिभाति।

क पुस्तके वालिकोपमा इति पाठो बहुस्थले दृश्यते।

अभूवन्। उत्तरपूर्वस्यां दिशि गङ्गानदीवालुकोपमा लोकधातवो महताऽवभासेन स्फुटा अभूवन्। पूर्वदक्षिणस्यां दिशि गङ्गानदीवालुकोपमा लोकधातवो महताऽवभासेन स्फुटा अभूवन्। दक्षिणपश्चिमायां दिशि गङ्गानदीवालुकोपमा लोकधातवो महताऽवभासेन स्फुटा अभूवन्। पश्चिमोत्तरस्यां दिशि गङ्गानदीवालुकोपमा लोकधातवो महताऽवभासेन स्फुटा अभूवन्। अधस्ताद्दिशि गङ्गानदीवालुकोपमा लोकधातवो महताऽवभासेन स्फुटा अभूवन्। उपरिष्टाद्दिशि गङ्गानदीवालुकोपमा लोकधातवो महताऽवभासेन स्फुटा अभूवन्। यैश्च सत्त्वैः सोऽवभासो दृष्टो ये च तेनाऽवभासेन स्पृष्टास्ते सर्वे नियता अभूवन् अनुत्तरायां सम्यक्सम्बोधौ(१)॥

अथ खलु भगवान् पुनरपि या सा तथागतस्य प्रकृतिप्रभा तया [illegible] त्रिसाहस्रमहासाहस्रं लोकधातुं महताऽवभासेन स्फुरति स्म। पूर्वस्यां दिशि गङ्गानदीवालुकोपमान् लोकधातूंस्तेन महताऽवभासेन स्फुरति स्म। दक्षिणस्यां दिशि गङ्गानदीवालुकोपमान् लोकधातूंस्तेन महताऽवभासेन स्फुरति स्म। पश्चिमायां दिशि गङ्गानदीवालुकोपमान् लोकधातूंस्तेन महताऽवभासेन स्फुरति स्म उत्तरस्यां दिशि गङ्गानदीवालुकोपमान् लोकधातूंस्तेन महताऽ

[illegible]

[illegible]

भासेन स्फुरन्ति स्म। उत्तरपूर्वस्यान्दिशि गङ्गानदीवालुकोपमान् लोकधातूंस्तेन महताऽवभासेन स्फुरन्ति स्म। पूर्वदक्षिणस्यान्दिशि गङ्गानदीवालुकोपमान् लोकधातूंस्तेन महताऽवभासेन स्फुरन्ति स्म। दक्षिणपश्चिमायान्दिशि गङ्गानदीवालुकोपमान् लोकधातूंस्तेन महताऽवभासेन स्फुरन्ति स्म। पश्चिमोत्तरस्यान्दिशि गङ्गानदीवालुकोपमान् लोकधातूंस्तेन महताऽवभासेन स्फुरन्ति स्म। अधस्ताद्दिशि गङ्गानदीवालुकोपमान् लोकधातूंस्तेन महताऽवभासेन स्फुरन्ति स्म। उपरिष्टाद्दिशि गङ्गानदीवालुकोपमान् लोकधातूंस्तेन महताऽवभासेन स्फुरन्ति स्म। यैश्च सत्त्वैः सोऽवभासो दृष्टो ये च तेनाऽवभासेन स्पृष्टास्ते सर्वे नियता अभूवन् अनुत्तरायां सम्यक्सम्बोधौ।

अथ खलु भगवान् मुखद्वारा जिह्वेन्द्रियं निर्णामय्य सर्वावन्तमिमन्त्रिसाहस्रमहासाहस्रं लोकधातुं जिह्वेन्द्रियेण स्फुरित्वा स्मितं प्रादुरकार्षीत्। ततश्च जिह्वेन्द्रियादनेकानिनानावर्णानिरश्मिकोटीनियुतशतसहस्राणि निश्चरन्ति स्म। सर्वत्र च रश्म्यां नानारत्नमयानि सुवर्णनिर्भासानि सहस्रपत्राणि पद्मानि सन्तिष्ठन्ते स्म। चित्राणि च दर्शनीयानि मनोरमाणि सुवर्णानि सुगन्धीनि मृदूनि काचिलिन्दिक* सुखसंस्पर्शानि। तत्र च पद्मेषु तथागतविग्रहानिषण्णाधर्मन्देशयन्ति स्म। यदुतेमामेवषट्पारमिताप्रतिसंयुक्तां धर्मदेशनां। ते पूर्वस्यान्दिशि गङ्गानदीवालुकोपमां लोकधातुं गच्छन्ति स्म। तत्रापि गत्वा धर्मं देशयन्ति स्म। यदुतेमामेवषट्पारमिताप्रतिसंयुक्तां

* काचिलिन्दिक इति पाठः पुस्तकचतुष्टये दृश्यते।

अभूवन्। उत्तरपूर्वस्यान्दिशि गङ्गानदीवालुकोपमा लोकधातवो महताऽवभासेन स्फुटा अभूवन्। पूर्वदक्षिणस्यान्दिशि गङ्गानदीवालुकोपमा लोकधातवो महताऽवभासेन स्फुटा अभूवन्। दक्षिणपश्चिमायान्दिशि गङ्गानदीवालुकोपमा लोकधातवो महताऽवभासेन स्फुटा अभूवन्। पश्चिमोत्तरस्यान्दिशि गङ्गानदीवालुकोपमा लोकधातवो महताऽवभासेन स्फुटा अभूवन्। अधस्ताद्दिशि गङ्गानदीवालुकोपमा लोकधातवो महताऽवभासेन स्फुटा अभूवन्। उपरिष्टाद्दिशि गङ्गानदीवालुकोपमा लोकधातवो महताऽवभासेन स्फुटा अभूवन्। यैश्च सत्त्वैः सोऽवभासो दृष्टो ये च तेनाऽवभासेन स्फुटास्ते सर्वे नियता अभूवन अनुत्तरायां सम्यक्सम्बोधौ(१)॥

अथ खलु भगवान् पुनरपि या सा तथागतस्य प्रकृतिप्रभा एतया *यन्त्रिसाहस्रमहासाहस्रं लोकधातुं महताऽवभासेन स्फुरन्ति स्म। पूर्वस्यान्दिशि गङ्गानदीवालुकोपमान् लोकधातूंस्तेन महताऽवभासेन स्फुरन्ति स्म। दक्षिणस्यान्दिशि गङ्गानदीवालुकोपमान् लोकधातूंस्तेन महताऽवभासेन स्फुरन्ति स्म। पश्चिमायान्दिशि गङ्गानदीवालुकोपमान् लोकधातूंस्तेन महताऽवभासेन स्फुरन्ति स्म। उत्तरस्यान्दिशि गङ्गानदीवालुकोपमान् लोकधातूंस्तेन महताऽव

* एतया यन्त्रिसाहस्र इति पुस्तकचतुष्टये पाठः। एतये सन्त्रिसाहस्रेति पाठोयुक्तः।

(१) नास्त्युत्तरं प्रधानं यस्याः सेयमनुत्तरा सम्यक् अविपरीता सम्बोधिः सर्वाकाराभिसम्बोधिर्बुद्धभूमिरितियावत्।

*कामावचरिसंमुखाऽभ्यर्दिता । उपरिष्टाद्दिशि गङ्गानदीवालुकोपमा लोकधातवः शब्देन स्म गताभि गाथा एवं देशयन्ति स्म यदुत-सहितेन दुःखसंस्कारनिरोधसंमुखाभ्यर्दितानि । इदं कर्मः लब्धः गृहीतं सर्वं निर्याणं जनयन् तथागतानां शब्दं धर्मोर्मी ॥

अथ खलु भगवान् सर्वाभिभू त्रिसाहस्रे निवेशः विजितानी-दृशं भावं पूर्वकालि समासनं नभसः पञ्चविंशतिसहस्रप्रति-संख्यानीति स्म । तथाभ्युन्नतविसंख्याय अविसंस्कृतिभावं विमलमञ्जसमाकर्षी लोकधातुः षड्विकारं*प्रकम्पत प्राकम्पत प्राचलत । अकम्पत् प्राकम्पत् सम्प्राकम्पत् अचलत्प्राचलत्सम्प्राचलत् । अवेधत् प्रावेधत् सम्प्रावेधत् । अरणत्प्रार-णत्सम्प्रारणत् । अन्तोन्नमति स्म मध्येऽवनमति स्म अन्तेऽवनमति स्म स्फुटः स्फुटः सर्वलोकश्चित्रसमन्तानन्दोऽभूत् ॥

अथ तेन क्षणलवमुहूर्तेन यावन्तोऽस्मिंस्त्रिसाहस्रमहासाहस्रे लोकधातौ नरकतिर्यग्योनियमलोकाक्षणापायदुर्गतिविनिपातास्ते सर्वे प्रमुदिताः‡ अभूवन् । सर्वे च ते सत्त्वा मनुष्याणां सभा-गतायां§ उपपन्ना अभूवन् सर्वे च ते सत्त्वाश्चातुर्महाराजकायिकानां

* (ख, ग, घ) पुस्तके प्रकम्पतः इति पाठः ख पुस्तके प्रकम्पते इति पाठः । परात्मिलिखित प्रकम्पत इति पाठः समीचीनः प्रतिभाति ।

† महानम इति पुस्तकचतुष्टये दृश्यते महानाम इति पाठोयुक्तः ।

‡ सर्वांत्तमारोत्तमिताः इति ख पुस्तके पाठोऽधिकः ।

§ सभागताया इति पुस्तकचतुष्टये पाठः । सभागता इति पाठोयुक्तः ।

(१) षड्भावविकारा भवन्तीति वार्ष्यायणिः, जायते अस्ति वर्द्धते विप-रिणमते अपक्षीयते नश्यति । इति निरुक्ते नैगमकाण्डे ।

देवानां त्रायत्रिंशानां तुषितानां निर्माणरतीनां परनिर्मितव

वर्त्तिनां देवानां सभागताया उपपन्ना अभूवन् ॥

अथ ते मनुष्यास्ते च देवास्तेनैव प्रीतिप्रसादप्रामोद्येन पौर्वि

जातिं समनुस्मरन्ति स्म । समनुस्मृत्य प्रीतिप्रसादप्रामोद्यप्रतिलब्ध

भगवांस्तेनोपसङ्क्रामन्ति स्म । उपसङ्क्रम्य भगवन्तं नमस्यन्ति स्म

अथ तेन क्षणलवमुहूर्त्तेन पूर्वस्यान्दिशि गङ्गानदीवालुको

लोकधातुषु सर्वनरकाः सर्वतिर्यग्योनयः सर्वयमलोकाः समुच्छि

सर्वाक्षणायासमिता अभूवन् सर्वे च ते सत्त्वामनुष्याणां देवा

सभागताया उपपन्ना अभूवन् ॥

अथ ते मनुष्यास्ते च देवास्तेनैव च प्रीतिप्रसादप्रामोद्य

पौर्विकीं जातिं समनुस्मरन्ति स्म । समनुस्मृत्य प्रीतिप्रसादप्रा

प्रतिलब्धाः स्वकस्वकेषु बुद्धक्षेत्रेषु ये तत्र तथागता अर्हन्तः स

सम्बुद्धास्तिष्ठन्ति तानुपसङ्क्रामन्ति स्म । उपसङ्क्रम्य पादान् व

[illegible]तांस्तथागतानर्हतः सम्यक्सम्बुद्धान्नमस्यन्ति स्म ॥

अथ तेन क्षणलवमुहूर्त्तेन दक्षिणस्यान्दिशि गङ्गानदी

[illegible] लोकधातुषु सर्वनरकाः सर्वतिर्यग्योनयः सर्वयम

[illegible] सर्वाक्षणायासमिता अभूवन् । सर्वे च ते सत्त्वा

[illegible] सभागताया उपपन्ना अभूवन् ॥

अथ ते मनुष्यास्ते च देवास्तेनैव प्रीतिप्रसादप्रामोद

[illegible] समनुस्मरन्ति स्म । समनुस्मृत्य प्रीति

[illegible] [illegible] बुद्धक्षेत्रेषु ये तत्र त

[illegible] [illegible] तानुपसङ्क्रामन्ति स्म । उ

पादान् वन्दित्वा प्राञ्जलीभूतास्तांस्तथागतानर्हतः सम्यक्सम्बुद्धान्न-मस्यन्ति स्म ॥

अथ तेन क्षणलवमुहूर्त्तेन पश्चिमायान्दिशि गङ्गानदीवालुकोपमेषु लोकधातुषु सर्वनरकाः सर्वतिर्यग्योनयः सर्वयमलोकाः समुच्छिन्नाः सर्वाक्षणाश्चास्तमिता अभूवन् । सर्वे च ते सत्त्वा मनुष्याणाञ्च देवानाञ्च सभागताया उपपन्ना अभूवन् ॥

अथ ते मनुष्यास्ते च देवास्तेनैव प्रीतिप्रसादप्रामोद्यजातेन पौर्विकीं जातिं समनुस्मरन्ति स्म। समनुस्मृत्य प्रीतिप्रसादप्रामोद्य-प्रतिलब्धाः स्वकस्वकेषु बुद्धक्षेत्रेषु ये तत्र तथागता अर्हन्तः सम्यक्-सम्बुद्धास्तिष्ठन्ति। तानुपसङ्क्रामन्ति स्म। उपसङ्क्रम्य पादान् वन्दित्वा प्राञ्जलीभूतास्तांस्तथागतानर्हतः सम्यक्सम्बुद्धान्नमस्यन्ति स्म ॥

अथ तेन क्षणलवमुहूर्त्तेन उत्तरस्यान्दिशि गङ्गानदीवालु-कोपमेषु लोकधातुषु सर्वनरकाः सर्वतिर्यग्योनयः सर्वयमलोकाः समुच्छिन्नाः सर्वाक्षणाश्चास्तमिता अभूवन्। सर्वे च ते सत्त्वामनुष्याणां देवानाञ्च सभागताया उपपन्ना अभूवन् ॥

अथ ते मनुष्यास्ते च देवास्तेनैव प्रीतिप्रसादप्रामोद्यजातेन पौर्विकीं जातिं समनुस्मरन्ति स्म । समनुस्मृत्य प्रीतिप्रसादप्रामोद्य-प्रतिलब्धाः स्वकस्वकेषु बुद्धक्षेत्रेषु ये तत्र तथागता अर्हन्तः सम्यक्-सम्बुद्धास्तिष्ठन्ति तानुपसङ्क्रामन्ति स्म । उपसङ्क्रम्य पादान् वन्दित्वा प्राञ्जलीभूतास्तांस्तथागतानर्हतः सम्यक्सम्बुद्धान्नमस्यन्ति स्म ॥

अथ तेन क्षणलवमुहूर्त्तेनोत्तरपूर्वस्यान्दिशि गङ्गानदीवालु-कोपमेषु लोकधातुषु सर्वनरकाः सर्वतिर्यग्योनयः सर्वयमलोकाः

देवानां त्रायत्रिंशानां तुषितानां निर्माणरतीनां परनिर्मि
वर्त्तिनां देवानां सभागताया उपपन्ना अभूवन्॥

अथ ते मनुष्यास्ते च देवास्तेनैव प्रीतिप्रसादप्रामोद्येन प
जातिं समनुस्मरन्ति स्म। समनुस्मृत्य प्रीतिप्रसादप्रामोद्यप्रति
भगवांस्तेनोपसङ्क्रामन्ति स्म। उपसङ्क्रम्य भगवन्तं नमस्यन्ति

अथ तेन क्षणलवमुहूर्त्तेन पूर्वस्यान्दिशि गङ्गानदीवालु
लोकधातुषु सर्वनरकाः सर्वतिर्यग्योनयः सर्वयमलोकाः समु
सर्वाक्षणाश्चास्तमिता अभूवन् सर्वे च ते सत्त्वामनुष्याणां
सभागताया उपपन्ना अभूवन्॥

अथ ते मनुष्यास्ते च देवास्तेनैव च प्रीतिप्रसादप्राम
पौर्विकीं जातिं समनुस्मरन्ति स्म। समनुस्मृत्य प्रीतिप्रसाद
प्रतिलब्धाः स्वकस्वकेषु बुद्धक्षेत्रेषु ये तत्र तथागता अर्हन्तः
सम्बुद्धास्तिष्ठन्ति तानुपसङ्क्रामन्ति स्म। उपसङ्क्रम्य पादान्
प्राञ्जलीभूतास्तांस्तथागतानर्हतः सम्यक्सम्बुद्धान्नमस्यन्ति स्म

अथ तेन क्षणलवमुहूर्त्तेन दक्षिणस्यान्दिशि गङ्गा
कोपमेषु लोकधातुषु सर्वनरकाः सर्वतिर्यग्योनयः सर्व
समुच्छिन्नाः सर्वाक्षणाश्चास्तमिता अभूवन्। सर्वे च ते स
ष्याणां देवानाञ्च सभागताया उपपन्ना अभूवन्॥

अथ ते मनुष्यास्ते च देवास्तेनैव प्रीतिप्रसादप्राम
पौर्विकीं जातिं समनुस्मरन्ति स्म। समनुस्मृत्य प्री
प्रामोद्यप्रतिलब्धाः स्वकस्वकेषु बुद्धक्षेत्रेषु ये तत्र
अर्हन्तः सम्यक्सम्बुद्धास्तिष्ठन्ति तानुपसङ्क्रामन्ति स्म।

पादान् वन्दित्वा प्राञ्जलीभूतास्तांस्तथागतानर्हतः सम्यक्सम्बुद्धान्न-मस्यन्ति स्म ॥

अथ तेन क्षणलवमुहूर्त्तेन पश्चिमायान्दिशि गङ्गानदीवालु-कोपमेषु लोकधातुषु सर्वनरकाः सर्वतिर्यग्योनयः सर्वयमलोकाः समुच्छिन्नाः सर्वाक्षणाश्चास्तमिता अभूवन् । सर्वे च ते सत्त्वा मनुष्याणाञ्च देवानाञ्च सभागताया उपपन्ना अभूवन् ॥

अथ ते मनुष्यास्ते च देवास्तेनैव प्रीतिप्रसादप्रामोद्यजातेन पौर्विकीं जातिं समनुस्मरन्ति स्म । समनुस्मृत्य प्रीतिप्रसादप्रामोद्य-प्रतिलब्धाः स्वकस्वकेषु बुद्धक्षेत्रेषु ये तत्र तथागता अर्हन्तः सम्यक्-सम्बुद्धास्तिष्ठन्ति । तानुपसङ्क्रामन्ति स्म । उपसङ्क्रम्य पादान् वन्दित्वा प्राञ्जलीभूतास्तांस्तथागतानर्हतः सम्यक्सम्बुद्धान्नमस्यन्ति स्म ॥

अथ तेन क्षणलवमुहूर्त्तेन उत्तरस्यान्दिशि गङ्गानदीवालु-कोपमेषु लोकधातुषु सर्वनरकाः सर्वतिर्यग्योनयः सर्वयमलोकाः समुच्छिन्नाः सर्वाक्षणाश्चास्तमिता अभूवन् । सर्वे च ते सत्त्वामनुष्याणां देवानाञ्च सभागताया उपपन्ना अभूवन् ॥

अथ ते मनुष्यास्ते च देवास्तेनैव प्रीतिप्रसादप्रामोद्यजातेन पौर्विकीं जातिं समनुस्मरन्ति स्म । समनुस्मृत्य प्रीतिप्रसादप्रामोद्य-प्रतिलब्धाः स्वकस्वकेषु बुद्धक्षेत्रेषु ये तत्र तथागता अर्हन्तः सम्यक्-सम्बुद्धास्तिष्ठन्ति तानुपसङ्क्रामन्ति स्म । उपसङ्क्रम्य पादान् वन्दित्वा प्राञ्जलीभूतास्तांस्तथागतानर्हतः सम्यक्सम्बुद्धान्नमस्यन्ति स्म ॥

अथ तेन क्षणलवमुहूर्त्तेनोत्तरपूर्वस्यान्दिशि गङ्गानदीवालु-कोपमेषु लोकधातुषु सर्वनरकाः सर्वतिर्यग्योनयः सर्वयमलोकाः

प्रतिलब्धाः स्वकस्वकेषु बुद्धक्षेत्रेषु ये तत्र तथागता अर्हन्तः सम्यक्-
सम्बुद्धास्तिष्ठन्ति तानुपसंक्रामन्ति स्म । उपसंक्रम्य पादान् वन्दित्वा
प्राञ्जलीभूतास्तांस्तथागतानर्हतः सम्यक्सम्बुद्धान्नमस्यन्ति स्म ॥

अथ तेन क्षणलवमुहूर्त्तेन उपरिष्टाद्दिशि गङ्गानदीवालुकोप-
मेषु लोकधातुषु सर्वनरकाः सर्वतिर्यग्योनयः सर्वयमलोकाः समु-
च्छिन्नाः सर्वाक्षणाश्चास्तमिता अभूवन् । सर्वे च ते सत्त्वा मनुष्याणां
देवानां च सभागताया उपपन्ना अभूवन् ॥

अथ ते मनुष्यास्ते च देवास्तेनैव प्रीतिप्रसादप्रामोद्यजातेन
पौर्विकीं जातिं समनुस्मरन्ति स्म । समनुस्मृत्य प्रीतिप्रसादप्रामोद्य-
प्रतिलब्धाः स्वकस्वकेषु बुद्धक्षेत्रेषु ये तत्र तथागता अर्हन्तः सम्यक्-
सम्बुद्धास्तिष्ठन्ति तानुपसङ्क्रामन्ति स्म । उपसंक्रम्य पादान् वन्दित्वा
प्राञ्जलीभूतास्तांस्तथागतानर्हतः सम्यक्सम्बुद्धान्नमस्यन्ति स्म ॥

अथ खलु तेन तत्क्षणेनैव ये त्रिसाहस्रमहासाहस्रे लोक-
धातौ जात्यन्धाः सत्त्वास्तेऽपि सर्वे चक्षुषा रूपाणि पश्यन्ति स्म ।
बधिराः श्रोत्रेण शब्दान् शृण्वन्ति स्म । उन्मत्ताः स्मृतिं प्रतिलभन्ते
स्म । विक्षिप्तचित्ताः अविक्षिप्तचित्ततां प्रतिलभन्ते स्म । नग्ना-
श्चीवराणि प्रतिलभन्ते स्म । दरिद्रा धनानि प्रतिलभन्ते स्म ।
जिघत्सिता भोजनानि प्रतिलभन्ते स्म । पिपासिताः पानीयं प्रति-
लभन्ते स्म । रोगस्पृष्टा अरोगा अभूवन् । हीनकाया विकलेन्द्रियाः
परिपूर्णकायेन्द्रिया अभूवन् । क्लान्तकाया अक्लान्तकाया अभूवन् ।
अविरताकुशलकायवाङ्मनस्कर्मान्ताश्चेता विगताकुशलकायवाङ्-
मनस्कर्मान्ताश्चैव भवन्ति स्म । सर्वसत्त्वाश्च सर्वसत्त्वेषु समचित्ता-

अभूवन् । यदुत मातापितृभ्रातृभगिनीमित्रज्ञातिसहायसमचित्ताः सर्वसत्त्वाश्च कुशलकर्मपथसमन्वागता अभूवन्। ब्रह्मचारिणः शुचयो-निरामगन्धाः सर्वाकुशलवितर्कविगताः सर्वसत्त्वाश्च तस्मिन् समये सर्वसुखसमर्पिता अभूवन्। एवं रूपेण सुखेन समन्वागताः। तद्यथाऽपि नाम तृतीयध्यानसमापन्नस्य भिक्षोः सुखम्। सर्वसत्त्वाश्च तस्मिन् समये एवंरूपया प्रज्ञया समन्वागता अभूवन्। यदेवं जानन्ति स्म। साधु दानं साधु धर्मः साधु संयमः साधु सत्यं साध्वप्रमादः साधु मैत्री साधु करुणा साध्वविहिंसा साधु सर्वप्राणिभूतेषु ॥

अथ भगवान् तस्मिन्नेव सिंहासने निषण्ण इमं त्रिसाहस्र-महासाहस्रं लोकधातुं सुमेरुं चक्रवाडं सदेवभवनं सेन्द्रकं सेन्दुसूर्य-गभस्तिकं सदेवदानवकायं सब्रह्मकं सशुद्धावासमभिभूय स्थितः शोभते भासते तपति विरोचते आभया वर्णेन तेजसा श्रिया ॥

तद्यथाऽपि नाम बलवान्दिवाकरः परिशुद्धगगणतले पौर्ण-मास्यां वा चन्द्रमण्डलं, तथाच भगवानिमन्त्रिसाहस्रमहासाहस्रं लोकधातुमभिभूय स्थितः शोभते भासते तपति विरोचते। आभया वर्णेन तेजसा श्रिया ॥

एवं पूर्वस्यान्दिशि गङ्गानदीवालुकोपमान् लोकधातूनभि-भूय स्थितः शोभते भासते तपति विरोचते आभया वर्णेन तेज-सा श्रिया ॥

एवं दक्षिणस्यान्दिशि गङ्गानदीवालुकोपमान् लोकधातूनभि-भूय स्थितः शोभते भासते तपति विरोचते आभया वर्णेन तेज-सा श्रिया ॥

एवं पश्चिमायान्दिशि गङ्गानदीवालुकोपमान् लोकधातूनभि-
भूय स्थितः शोभते भासते तपति विरोचते। आभया वर्णेन तेज-
सा श्रिया ॥

एवमुत्तरस्यान्दिशि गङ्गानदीवालुकोपमान् लोकधातूनभिभूय
स्थितः शोभते भासते तपति विरोचते। आभया वर्णेन तेज-
सा श्रिया ॥

एवमुत्तरपूर्वस्यान्दिशि गङ्गानदीवालुकोपमान् लोकधातूनभि-
भूय स्थितः शोभते भासते तपति विरोचते। आभया वर्णेन तेज-
सा श्रिया ॥

एवं पूर्वदक्षिणस्यान्दिशि गङ्गानदीवालुकोपमान् लोकधातून-
भिभूय स्थितः शोभते भासते तपति विरोचते। आभया वर्णेन
तेजसा श्रिया ॥

एवं दक्षिणपश्चिमायान्दिशि गङ्गानदीवालुकोपमान् लोक-
धातूनभिभूय स्थितः शोभते भासते तपति विरोचते। आभया
वर्णेन तेजसा श्रिया ॥

एवं पश्चिमोत्तरस्यान्दिशि गङ्गानदीवालुकोपमान् लोकधातू-
नभिभूय स्थितः शोभते भासते तपति विरोचते। आभया वर्णेन
तेजसा श्रिया ॥

एवमधस्ताद्दिशि गङ्गानदीवालुकोपमान् लोकधातूनभिभूय
स्थितः शोभते भासते तपति विरोचते। आभया वर्णेन तेज-
सा श्रिया ॥

एवमुपरिष्टाद्दिशि गङ्गानदीवालुकोपमान् लोकधातूनभिभूय

स्थितः शोभते भासते तपति विरोचते । आभया वर्णेन तेज-
सा श्रिया ॥

तद्यथाऽपि नाम सुमेरुः पर्वतराजः सर्वान्नीलान्धान् काल-
पर्वतानभिभूय स्थितः शोभते भासते तपति विरोचते । आभया
वर्णेन तेजसा श्रिया ॥

तद्यथाऽपि नाम चन्द्रमण्डलं सर्वताराकपाण्यभिभूय स्थितं शोभते
भासते तपति विरोचते । आभया वर्णेन तेजसा श्रिया ॥

तद्यथाऽपि नाम सूर्यमण्डलं सर्वानन्यानवभासानभिभूय स्थितं
शोभते भासते तपति विरोचते । आभया वर्णेन तेजसा श्रिया ॥

एवमेव भगवान् दशसु दिक्षु सदेवकं लोकं सेन्द्रकं सब्रह्म
शुद्धावासानभिभूय स्थितः शोभते भासते तपति विरोचते । आभया
वर्णेन तेजसा श्रिया ॥

अथ भगवान् पुनरपि प्रादुर्भावितवतः सत्त्वात्मभावः तादृश
मस्मिंस्त्रिसाहस्रमहासाहस्रे लोकधातावुपदर्शयति स्म ॥

अथ यावन्तोऽस्मिन् त्रिसाहस्रमहासाहस्रे लोकधातौ शुद्धा-
वासकायिकादेवनिकाया आभास्वरा ब्रह्मकायिकाः परनिर्मितवश-
वर्त्तिनो निर्माणरतयः तुषिता यामास्त्रायस्त्रिंशाश्चातुर्महाराजकायि-
कादेवनिकायास्ते सर्वे सिंहासने निषण्णं तथागतमर्हन्तं सम्यक् सम्बु-
पश्यन्ति स्म†। ते तुष्टा उदग्रा आत्तमनस्काः प्रमुदिताः प्रीति-
सौमनस्यजाता दिव्यानि पुष्पाण्यादाय दिव्यानि माल्यानि दिव्यानि

---

* कुलपर्व्वतानिति पाठः सङ्गतः प्रतिभाति ।

† ग । पुष्करो पश्यन्ति इति पाठः ।

गन्धानि दिव्यानि विलेपनानि दिव्यानि चूर्णानि दिव्यानि मार्गा
दिव्यान्युत्पलकुमुदपुण्डरीकनलिनसौगन्धिकानि केशरतमालपत्राणि
दिव्यानि वस्त्राणि दिव्यान्याभरणानि दिव्यानि छत्राणि दिव्या
ध्वजा दिव्याः पताका गृहीत्वा येन भगवांस्तेनोपसंक्रामन्ति स्म, उप-
संक्रम्य* भगवन्तमभिपूजयन्ति स्म। सर्वाणि च तानि पुष्पमाल्यवि-
लेपनचूर्णादीनि गन्धवस्त्राभरणानि छत्रध्वजपताकाश्च समनन्तरक्षि
भगवतोऽधिष्ठानेन त्रिसाहस्रमहासाहस्रलोकधातुप्रमाणो भगवतः
उपरि वैहायसे सर्वसत्त्वमहापुण्यादिकूटागारः संस्थितोऽभूत्।
ततश्च कूटागाराद् दिव्यानि पुष्पाणि पुष्पपट्टदामानि लम्बन्ते स्म
प्रलम्बन्ते स्म अभिप्रलम्बन्ते स्म। तैश्च पुष्पपट्टदामाभिरयं
त्रिसाहस्रमहासाहस्रो लोकधातुरभिशोभते स्म। तेन च सुवर्णवर्णेन
भगवतः प्रभाऽवभासेनात्यर्थं शोभते भासते तपति विरोचते स्म।
यथा चायं त्रिसाहस्रमहासाहस्रो लोकधातुरेवं पूर्वस्यान्दिशि गङ्गा-
नदीवालुकोपमालोकधातवस्तेन भगवतः प्रभाऽवभासेन स्फुटा-

---

* तैः पुष्पैर्माल्यैर्गन्धैर्विलेपनैश्चूर्णैर्वासैरुत्पलपद्मकुमुदपुण्डरीकनलिनसौ-
गन्धिकैः केशरतमालपत्रवस्त्रैराभरणैः छत्रैर्ध्वजैः पताकाभिर्भगवन्त-
मवकिरन्ति स्म। अभ्यवकिरन्ति स्म। अभिप्राकिरन्ति स्म। ये च
त्रिसाहस्रमहासाहस्रे लोकधातौ मनुष्यास्ते विनेयाभाजनीभूतास्ते
जलजस्थलजानि पुष्पाणि गृहीत्वा येन भगवांस्तेनोपसंक्रामन्ति स्म।
उपसंक्रम्य भगवन्तमभिपूजयन्ति स्म। इत्यधिकः पाठः ख। ग। घ
पुस्तके दृश्यते।

† दामाभिरिति पुस्तकचतुष्टये पाठः। दामभिरिति पाठोयुक्तः।

अभूवन् । दक्षिणस्यान्दिशि गङ्गानदीवालुकोपमालोकधातवस्तेन भगवतः प्रभाऽवभासेन स्फुटा अभूवन् । पश्चिमायान्दिशि गङ्गानदीवालुकोपमालोकधातवस्तेन भगवतः प्रभाऽवभासेन स्फुटा अभूवन् । उत्तरस्यान्दिशि गङ्गानदीवालुकोपमालोकधातवस्तेन भगवतः प्रभाऽवभासेन स्फुटा अभूवन् । उत्तरपूर्वस्यान्दिशि गङ्गानदीवालुकोपमालोकधातवस्तेन भगवतः प्रभाऽवभासेन स्फुटा अभूवन् । पूर्वदक्षिणस्यान्दिशि गङ्गानदीवालुकोपमालोकधातवस्तेन भगवतः प्रभाऽवभासेन स्फुटा अभूवन् । दक्षिणपश्चिमायान्दिशि गङ्गानदीवालुकोपमालोकधातवस्तेन भगवतः प्रभाऽवभासेन स्फुटा अभूवन् । पश्चिमोत्तरस्यान्दिशि गङ्गानदीवालुकोपमालोकधातवस्तेन भगवतः प्रभाऽवभासेन स्फुटा अभूवन् । अधस्ताद्दिशि गङ्गानदीवालुकोपमालोकधातवस्तेन भगवतः प्रभाऽवभासेन स्फुटा अभूवन् । उपरिष्टाद्दिशि गङ्गानदीवालुकोपमालोकधातवस्तेन भगवतः प्रभाऽवभासेन स्फुटा अभूवन् । तत्र जाम्बुद्वीपकानां मनुष्याणां तत्तथागतस्यासेचनकदर्शनमात्मभावं दृष्ट्वा एतदभूदस्माकं पुरतस्तथागतो निषण्णो* धर्मं देशयति । यथा च जाम्बुद्वीपकानां मनुष्याणामेवं गोदानीयानां मनुष्याणान्तथागतस्यासेचनकदर्शनमात्मभावं दृष्ट्वा एतदभूदस्माकं पुरतः तथागतो निषण्णो धर्मं देशयतीति । पौर्वविदेहकानां मनुष्याणान्तत्तथागतस्यासेचनकदर्शनमात्मभावं दृष्ट्वा एतदभूदस्माकं पुरतस्तथागतो निषण्णो धर्मं देशयतीति । उत्तरकौरवाणां मनुष्याणां तत्तथागत-

* निषण्ण इति पुस्तकचतुष्टये पाठः ।

स्यासेचनकदर्शनमात्मभावं दृष्ट्वा एतदभूदस्माकं पुरतस्तथागतो
निषण्णो धर्मं देशयतीति। चातुर्महाराजकायिकानां देवानान्तथा-
गतस्यासेचनकदर्शनमात्मभावं दृष्ट्वा एतदभूदस्माकं पुरतस्तथागतो
निषण्णो धर्मं देशयतीति। त्रायस्त्रिंशानां देवानान्तथागतस्यासेचन-
कदर्शनमात्मभावं दृष्ट्वा एतदभूदस्माकं पुरतस्तथागतो निषण्णो धर्मं
देशयतीति। यामानान्देवानान्तथागतस्यासेचनकदर्शनमात्मभावं
दृष्ट्वा एतदभूदस्माकं पुरतस्तथागतो निषण्णो धर्मं देशयतीति। तुषि-
तानां देवानान्तथागतस्यासेचनकदर्शनमात्मभावं दृष्ट्वा एतदभूद-
स्माकं पुरस्तथागतो निषण्णो धर्मं देशयतीति। निर्माणरतीनां देवा-
नान्तथागतस्यासेचनकदर्शनमाभत्मावं दृष्ट्वा एतदभूदस्माकं पुरतस्त-
थागतो निषण्णो धर्मं देशयतीति। परनिर्मितवशवर्त्तिनां देवानान्-
तथागतस्यासेचनकदर्शनमात्मभावं दृष्ट्वा एतदभूदस्माकं पुरतस्तथा-
गतोनिषन्नो धर्मं देशयतीति। ब्रह्मकायिकानां देवानान्तथागत-
स्यासेचनकदर्शनमात्मभावं दृष्ट्वा एतदभूदस्माकं पुरतस्तथागतो निषण्णो
धर्मं देशयतीति। ब्रह्मपुरोहितानां देवानान्तथागतस्यासेचनक-
दर्शनमात्मभावं दृष्ट्वा एतदभूदस्माकं पुरतस्तथागतोनिषण्णो धर्मं देश-
यतीति। ब्रह्मपार्श्वद्यानां देवानान्तथागतस्यासेचनकदर्शनमात्म-
भावं दृष्ट्वा एतदभूदस्माकं पुरतस्तथागतो निषण्णो धर्मं देशयतीति।
महाब्रह्माणां देवानान्तथागतस्यासेचकनदर्शनमात्मभावं दृष्ट्वा एत-
दभूदस्माकं पुरतस्तथागतो निषण्णो धर्मं देशयतीति। आभानां देवा-
नान्तथागतस्यासेचनकदर्शनमात्मभावं दृष्ट्वा एतदभूदस्माकं पुरतस्त-
थागतो निषण्णो धर्मं देशयतीति। परीत्ताभानान्देवानान्तथागत

स्यासेचनकदर्शनमात्मभावं दृष्ट्वा एतदभूदस्माकं पुरतस्तथागतो निषण्णो धर्मन्देशयतीति । अप्रमाणाभानां देवानान्तथागतस्यासेचनकदर्शन-मात्मभावं दृष्ट्वा एतदभूदस्माकं पुरतस्तथागतो निषण्णो धर्मन्देशयतीति आभास्वराणां देवानान्तथागतस्यासेचनकदर्शनमात्मभावं दृष्ट्वा एतदभूदस्माकं पुरतस्तथागतो निषण्णो धर्मन्देशयतीति ॥

आभानांदेवानान्तथागतस्यासेचनकदर्शनमात्मभावं दृष्ट्वा एतद-भूदस्माकं पुरतस्तथागतो निषण्णो धर्मन्देशयतीति। परीत्तशु-भानां देवानान्तथागतस्यासेचनकदर्शनमात्मभावं दृष्ट्वा एतदभूद-स्माकं पुरतस्तथागतो निषण्णो धर्मन्देशयतीति । अप्रमाणशुभानां देवानान्तथागतस्यासेचनकदर्शनमात्मभावं दृष्ट्वा एतदभूदस्माकं पुर-तस्तथागतो निषण्णो धर्मन्देशयतीति । शुभकृत्स्नानां देवानान्तथा-गतस्यासेचनकदर्शनमात्मभावं दृष्ट्वा एतदभूदस्माकं पुरतस्तथागतो निषण्णो धर्मन्देशयतीति। वृहाणां देवानां तत्तथागतस्यासेचनकद-र्शनमात्मभावं दृष्ट्वा एतदभूदस्माकं पुरतस्तथागतोनिषण्णोधर्मन्देश-यतीति । परीत्तवृहाणां देवानान्तथागतस्यासेचनकदर्शनमात्म-भावं दृष्ट्वा एतदभूदस्माकं पुरतस्तथागतोनिषण्णोधर्मन्देशयतीति । अप्रमाणवृहाणां देवानान्तथागतस्यासेचनकदर्शनमात्मभावं दृष्ट्वा एतदभूदस्माकं पुरतस्तथागतो निषण्णोधर्मन्देशयतीति । वृहत्-फलानां देवानान्तथागतस्यासेचनकदर्शनमात्मभावं दृष्ट्वा एतदभूद-स्माकं पुरतस्तथागतो निषण्णोधर्मन्देशयतीति । अवृहाणां देवाना-न्तथागतस्यासेचनकदर्शनमात्मभावं दृष्ट्वा एतदभूदस्माकं पुरतस्तथा-गतो निषण्णोधर्मन्देशयतीति। अतपानां देवानान्तथागतस्यासेच-

नकदर्शनमात्मभावं दृष्ट्वा एतदभूदस्माकं पुरस्तथागतो निषण्णोधर्म-न्देशयतीति । सुदृशानां देवानान्तत्तथागतस्यासेचनकदर्शनमात्म-भावं दृष्ट्वैतदभूदस्माकं पुरतस्तथागतो निषण्णोधर्मन्देशयतीति । सुदर्शनानां देवानान्तत्तथागतस्यासेचनकदर्शनमात्मभावं दृष्ट्वा एतद-भूदस्माकं पुरतस्तथागतो निषण्णोधर्मन्देशयतीति । अकनिष्ठानां देवानान्तत्तथागतस्यासेचनकदर्शनमात्मभावं दृष्ट्वा [illegible] पुरतस्तथागतो निषण्णोधर्मन्देशयतीति ॥

एवं साहस्रे लोकधातौ सर्वमनुष्याणां सर्वदेवानान्तत् तथा-गतस्यासेचनकदर्शनमात्मभावं दृष्ट्वा एतदभूदस्माकं पुरतस्तथागतो निषण्णोधर्मन्देशयतीति । द्विसाहस्रे लोकधातौ सर्वमनुष्याणां सर्वदेवानान्तत्तथागतस्यासेचनकदर्शनमात्मभावं दृष्ट्वा एतदभूदस्माकं पुरतस्तथागतो निषण्णो धर्मं देशयतीति ॥

एवं त्रिसाहस्रमहासाहस्रे लोकधातौ सर्वमनुष्याणां सर्वदेवा-नान्तत्तथागतस्यासेचनकदर्शनमात्मभावं दृष्ट्वा एतदभूदस्माकं पुरत-स्तथागतो निषण्णो धर्मन्देशयतीति ॥

अथ भगवांस्तस्मिन्नेव सिंहासने निषण्णः पुनरेवप्रभां प्रामुञ्चद्यया प्रभया *पुनरेवं त्रिसाहस्रमहासाहस्रो लोकधातुरवभासितो भूत् पूर्वस्यां दिशि गङ्गानदीवालुकोपमा लोकधातवोऽवभासिता अभूवन् दक्षिणस्यां दिशि गङ्गानदीवालुकोपमा लोकधातवोऽवभासिता अभूवन् । पश्चिमायां दिशि गङ्गानदीवालुकोपमा लोकधातवो ऽवभासिता अभूवन् । उत्तरस्यां दिशि गङ्गानदीवालुकोपम

* [illegible] पाठः ।

लोकधातवोऽवभाषिताअभूवन्। उत्तरपूर्वस्यान्दिशि गङ्गानदीवालुकोपमा लोकधातवोऽवभाषिता अभूवन्। पूर्वदक्षिणस्यान्दिशि गङ्गानदीवालुकोपमा लोकधातवो अवभाषिता अभूवन्। दक्षिणपश्चिमायान्दिशि गङ्गानदीवालुकोपमालोकधातवोऽवभाषिता अभूवन्। पश्चिमोत्तरस्यान्दिशि गङ्गानदीवालुकोपमालोकधातवोऽवभाषिता अभूवन्। अधस्ताद्दिशि गङ्गानदीवालुकोपमालोकधातवोऽवभाषिताअभूवन्। उपरिष्टाद्दिशि गङ्गानदीवालुकोपमालोकधातवोऽवभाषिताअभूवन्। येनावभासेनय इमां* त्रिसाहस्रमहासाहस्रे लोकधातौ सत्त्वास्ते सर्वे पूर्वस्यान्दिशि गङ्गानदीवालुकोपमेषु लोकधातुषु तथागतानर्हतः सम्यक् सम्बुद्धान् सश्रावकसङ्घान् बोधिसत्त्वपरिवारान् पश्यन्ति स्म। तत्र च पूर्वस्यान्दिशि† गङ्गानदीवालुकोपमेषु लोकधातुषु सत्त्वास्तेपीमं त्रिसाहस्रमहासाहस्रं लोकधातुं भगवन्तं शाक्यमुनिं तथागतमर्हन्तं सम्यक् सम्बुद्धं सभिक्षुसङ्घं बोधिसत्त्वपरिवारं पश्यन्ति स्म। तत्र च दक्षिणस्यान्दिशि गङ्गानदीवालुकोपमेषु लोकधातुषु सत्त्वास्तेऽपीमं त्रिसाहस्रमहासाहस्रं लोकधातुं भगवन्तं शाक्यमुनिं तथागतमर्हन्तं सम्यक् सम्बुद्धं सभिक्षुसङ्घं बोधिसत्त्वपरिवारं पश्यन्ति स्म। तत्र च पश्चिमायान्दिशि गङ्गानदीवालिकोपमेषु लोकधातुषु सत्त्वास्तेऽपीमं त्रिसाहस्रमहासाहस्रं लोकधातुं भगवन्तं शाक्यमुनिं तथागतमर्हन्तं सम्यक् सम्बुद्धं सभिक्षुसङ्घं बोधिसत्त्वपरिवारं पश्यन्ति स्म। तत्र चोत्तरस्यान्दिशि गङ्गानदी-

* इमां इति पुस्तकचतुष्टये पाठः। इमे इति पाठोद्धृतः।

† पुस्तकचतुष्टये ये पाठः क्वचित् क्वचित् दृश्यते वस्तुतः सर्वत्रैव ते इत्यस्य स्थितिरुचिता।

वालुकोपमेषु लोकधातुषु सत्त्वास्तेऽपीमं त्रिसाहस्रमहासाहस्रं लोकधातुं भगवन्तं च शाक्यमुनिं तथागतमर्हन्तं सम्यक् सम्बुद्धं सभिक्षुसङ्घं बोधिसत्त्वपरिवारं पश्यन्ति स्म। तत्र चोत्तरपूर्वस्यान्दिशि ये गङ्गानदीवालुकोपमेषु लोकधातुषु सत्त्वास्तेऽपीमं त्रिसाहस्रमहासाहस्रं लोकधातुं भगवन्तं शाक्यमुनिं तथागतमर्हन्तं सम्यक् सम्बुद्धं सभिक्षुसङ्घं बोधिसत्त्वपरिवारं पश्यन्ति स्म। तत्र च पूर्वदक्षिणस्यान्दिशि ये गङ्गानदीवालुकोपमेषु लोकधातुषु सत्त्वास्तेऽपीमं त्रिसाहस्रमहासाहस्रं लोकधातुं भगवन्तं च शाक्यमुनिं तथागतमर्हन्तं सम्यक् सम्बुद्धं सभिक्षुसङ्घं बोधिसत्त्वपरिवारं पश्यन्ति स्म। तत्र च दक्षिणपश्चिमायान्दिशि ये गङ्गानदीवालुकोपमेषु लोकधातुषु सत्त्वास्तेऽपीमन्त्रिसाहस्रमहासाहस्रं लोकधातुं भगवन्तं शाक्यमुनिं तथागतमर्हन्तं सम्यक् सम्बुद्धं सभिक्षुसङ्घं बोधिसत्त्वपरिवारं पश्यन्ति स्म। तत्र च पश्चिमोत्तरस्यान्दिशि गङ्गानदीवालुकोपमेषु लोकधातुषु सत्त्वास्तेऽपीमन्त्रिसाहस्रमहासाहस्रं लोकधातुं भगवन्तं शाक्यमुनिं तथागमर्हतन्तं सम्यक् सम्बुद्धं सश्रावकं* सङ्घं बोधिसत्त्वपरिवारं पश्यन्ति स्म। तत्रचाधस्ताद्दिशि यें† गङ्गानदीवालुकोपमेषु लोकधातुषु सत्त्वास्तेपीमन्त्रिसाहस्रमहासाहस्रं लोकधातुं भगवन्तश्च‡ शाक्यमुनिस्तथागतमर्हन्तं सम्यक्

---

* क, ग पुस्तके सश्रावकसङ्घं इति पाठः। ख, घ पुस्तके सभिक्षुसङ्घं इति पाठः।

† ये इति पाठः सर्वस्थले पुस्तकचतुष्टये न दृश्यते।

‡ भगवन्तश्चेति चकारो न सर्वस्थले पुस्तकचतुष्टये दृश्यते। किन्तु सर्वत्रैव स्थातुमुचितः।

सम्बुद्धं सभिक्षुसङ्घं बोधिसत्त्वपरिवारं पश्यन्ति स्म। तत्र चोपरिष्टाद्दिशि ये गङ्गानदीवालुकोपमेषु लोकधातुषु सत्त्वास्तेऽपीमं त्रिसाहस्रमहासाहस्रं लोकधातुं भगवन्तञ्च शाक्यमुनिं तथागतमर्हन्तं सम्यक् सम्बुद्धं सभिक्षुसङ्घं सबोधिसत्त्वगणपरिवारं* पश्यन्ति स्म॥

अथ पूर्वस्यान्दिशि गङ्गानदीवालुकोपमान् लोकधातूनतिक्रम्य यः सर्व्वपश्चिमो लोकधातुः रत्नावती नाम तत्र रत्नाकरो नाम तथागतोऽर्हन् सम्यक् सम्बुद्धस्तिष्ठति ध्रियते यापयति स इमामेव प्रज्ञापारमितां बोधिसत्त्वेभ्यो महासत्त्वेभ्यः सम्प्रकाशयति॥

अथ तत्र लोकधातौ समन्तरश्मिर्नाम बोधिसत्त्वोमहासत्त्वस्तं महान्तमवभासन्तञ्च महान्तं पृथिवीचालन्तञ्च तथागतस्यासेचनकदर्शनमात्मभावं दृष्ट्वा येन भगवान् रत्नाकरस्तथागतोऽर्हन् सम्यक्सम्बुद्धस्तेनोपसंक्रान्तः। उपसंक्रम्य तं भगवन्तं तथागतमर्हन्तं सम्यक् सम्बुद्धमेतदवोचत्। को भगवन् हेतुः कः प्रत्ययः योऽस्य महतोऽवभासस्य लोके प्रादुर्भावाय अस्य च महतः पृथिवीचालस्य अस्य चेदृशस्य तथागतकायस्य सन्दर्शनाय॥

एवमुक्ते भगवान् रत्नाकरस्तथागतोऽर्हन् सम्यक् सम्बुद्धस्तं समन्तरश्मिं बोधिसत्वं महासत्वमेतदवोचत्। एष कुलपुत्र पश्चिमायान्दिशि गङ्गानदीवालुकोपमान् लोकधातूनतिक्रम्य सहा नाम लोकधातुस्तत्र शाक्यमुनिर्नाम तथागतोऽर्हन् सम्यक्सम्बुद्धस्तिष्ठति ध्रियते यापयति स बोधिसत्त्वेभ्यो महासत्त्वेभ्यः प्रज्ञापारमितां सम्प्रकाशयति। तस्यैष ईदृशोऽनुभावः॥

* सबोधिसत्त्वगणपरिवारमिति क, ग पुस्तके पाठः। बोधिसत्त्वपरिवारमिति ख, घ पुस्तके पाठः।

अथ समन्तरश्मिर्बोधिसत्त्वोमहासत्त्वस्तं भगवन्तं रत्नाकरन्तथा-
गतमर्हन्तं सम्यक् सम्बुद्धमेतदवोचत् । गच्छेयमहं भगवंस्तां स-
लोकधातुं तस्य भगवतः शाक्यमुनेस्तथागतस्यार्हतः सम्यक् सम्बुद्ध-
दर्शनाय वन्दनाय पर्य्युपासनाय तेषाञ्च बोधिसत्त्वानां महासत्त्वा-
सर्वेषां प्रायःकुमारभूतानां धारणीप्रतिसम्विन्निर्हार* प्रतिलब्धा-
सर्वसमाधिसमापत्तिवशिताप्राप्तानाम् । भगवान् रत्नाकरस्तथाग-
आह । गच्छत्वं कुलपुत्र तां सहां लोकधातुं यस्येदानीं कालं मन्य-

अथ रत्नाकरस्तथागतोऽर्हन् सम्यक् संबुद्धो नानारत्नमया-
सुवर्णनिर्भासानां सहस्रपत्राणां पद्मानां सहस्रं समन्तरश्मये बोधि-
सत्त्वाय महासत्त्वाय प्रादात् । एभिः कुलपुत्र पद्मैस्तं भगवन्-
शाक्यमुनिं तथागतमर्हन्तं सम्यक् संबुद्धं अभ्यवकिर सम्प्रजान विहारि-
च तत्र बुद्धक्षेत्रे भवेत् । तत्कस्य हेतोर्दुरासदा हि ते बोधिसत्त्वा-
महासत्त्वा ये तत्र लोकधातादुपपन्नास्मा तत्र क्षणेया ॥

अथ समन्तरश्मिर्बोधिसत्त्वोमहासत्त्वस्तस्य भगवतोरत्नाकरस्य त-
थागतस्यार्हतः सम्यक्संबुद्धस्यान्तिकात्तानि सुवर्णनिर्भासानि सहस्र-
पत्राणि पद्मानि गृहीत्वानेकैर्बोधिसत्त्व कोटीनियुतशतसहस्रैः सार्द्धं
गृहस्थैः प्रव्रजितैश्च दारकदारिकारूपिभिश्च ततो बुद्धक्षेत्रादन्तर्हितो
यावन्तः पूर्वस्यान्दिशि बुद्धा भगवन्तस्तिष्ठन्ति ध्रियन्ते यापयन्ति
तान् सर्वान् सत् कुर्वन् गुरुकुर्वन् मानयन् पूजयन् पुष्पधूपगन्ध-
माल्यविलेपनचूर्णचीवरच्छत्रध्वजपताकाभिर्महत्याबोधिसत्त्वर्ध्यामहता

---

* निर्हार इति ख, ग पुस्तके पाठः ।

† वसिता इति पुस्तकचतुष्टये पाठः । वशिता इति पाठोयुक्तः ।

बोधिमण्डानुभावेन । येन भगवान् शाक्यमुनिस्तथागतोऽर्हन् सम्यक् संबुद्धस्तेनोपसंक्रान्तः उपसंक्रम्य भगवतः पादौ शिरसाभिवन्द्य एकान्तेऽस्थात् । एकान्तस्थितः समन्तरश्मिर्बोधिसत्त्वो महासत्त्वो भगवन्तमेतदवोचत् । रत्नाकरो भगवंस्तथागतोऽर्हन् सम्यक् संबुद्धो भगवतोऽल्पाबाधतां परिपृच्छत्यल्पातङ्कतां च लघूत्थानतां बलं सुखस्पर्शविहारतां च । इमानि च तेन भगवता रत्नाकरेण तथागतेनार्हता सम्यक् संबुद्धेन सुवर्णनिर्भासानि सहस्रपत्राणि पद्मानि प्रहितानि भगवतः पूजाकर्मणे ॥

अथ भगवान् शाक्यमुनिस्तथागतोऽर्हन् सम्यक् संबुद्धस्तानि पद्मानि गृहीत्वा येन ते पूर्वस्यां दिशि गङ्गानदीवालुकोपमेषु लोकधातुषु तथागता अर्हन्तः सम्यक् संबुद्धास्तेनाक्षैप्सीत् ॥

अथ तैः पद्मैस्ते सर्वलोकधातवः स्फुटा अभूवन् तत्र च पद्मेषु तथागतविग्रहा निषण्णा धर्मं देशयन्ति स्म । यदुतेमामेव* षट्पारमिता आरभ्य यैश्च सत्त्वैः सा धर्मदेशना श्रुता ते सर्वे नियता अभूवन्ननुत्तरायां सम्यक् सम्बोधौ(१) । तेऽपि बोधिसत्त्वा गृहस्थाश्च प्रव्रजिताश्च दारकदारिकाश्च स्वकस्वकैः कुशलमूलैर्भगवन्तं शाक्यमुनिं तथागतमर्हन्तं सम्यक् संबुद्धं सत्कुर्वन्ति स्म । गुरुकुर्वन्ति स्म । मानयन्ति स्म । पूजयन्ति स्म । दक्षिणस्यां दिशि गङ्गानदीवालुकोपमांल्लोकधातूनतिक्रम्य यः सर्वपश्चिमो लोकधातुः सर्वशोकापगतो नाम

---

* इमामेव इति पुस्तकचतुष्टये पाठः । इमा एव इति पाठो युक्तः ।

---

(१) नास्त्युत्तरं प्रधानं यस्याः सेयमनुत्तरा सम्यक् अविपरीता सम्बोधिः सर्व्वाकाराभिसम्बोधिर्बुद्धभूमिरिति यावत् ।

तत्राशोकश्रीर्नाम तथागतोऽर्हन् सम्यक् संबुद्धस्तिष्ठति ध्रियते याप-यति । स इमामेव प्रज्ञापारमितां बोधिसत्त्वेभ्यो महासत्त्वेभ्यः सम्प्रकाशयति ॥

अथ तत्र लोकधातौ विगतशोको नाम बोधिसत्त्वो महासत्त्वस्तं महान्तमवभासं तं च महान्तं पृथिवीचालन्तस्य तथागतस्यासेचन-कदर्शनमात्मभावं दृष्ट्वा येन स भगवानशोकश्रीस्तथागतोऽर्हन् सम्यक् संबुद्धस्तेनोपसंक्रान्तः उपसंक्रम्यतं भगवन्तमशोकश्रियं तथागतं सम्यक् संबुद्धमेतदवोचत् । को भगवन् हेतुः कः प्रत्ययोऽस्य महतो-ऽवभासस्य लोके प्रादुर्भावायास्य च महतः पृथिवीचालस्य चेदृश-तथागतकायस्य सन्दर्शनाय । एवमुक्ते भगवानशोकश्रीस्तथागतोऽर्हन् सम्यक् संबुद्धस्तं विगतशोकं बोधिसत्त्वं महासत्त्वमेतदवोचत् । एष कुलपुत्र उत्तरस्यान्दिशि गङ्गानदीवालुकोपमाँल्लोकधातूनतिक्रम्य सहानाम लोकधातुस्तत्र शाक्यमुनिर्नाम तथागतोऽर्हन् सम्यक् संबुद्धस्तिष्ठति ध्रियते यापयति । स बोधिसत्त्वेभ्यो महासत्त्वेभ्यः प्रज्ञापारमितां सम्प्रकाशयति । तस्यैष ईदृशोऽनुभावः ॥

अथ विगतशोको बोधिसत्त्वो महासत्त्वस्तं भगवन्तमशोकश्रियं तथागतमर्हन्तं सम्यक् संबुद्धमेतदवोचत् । गच्छेयमहं भगवंस्तां सहां लोकधातुं तस्य शाक्यमुनेस्तथागतस्यार्हतः सम्यक् संबुद्धस्य दर्शनाय वन्दनाय पर्य्युपासनाय तेषां च बोधिसत्त्वानां महासत्त्वानां सर्वेषां प्रायः कुमारभूतानां धारणीप्रतिसम्विन्निर्हार प्रतिलब्धानां सर्वस-माधिसमापत्तिवशिता प्राप्तानाम् । स भगवानशोकश्रीस्तथागत आह । गच्छत्वं कुलपुत्र तां सहां लोकधातुं यस्येदानीं कालं मन्यसे ॥

अथ भगवानशोकश्रीस्तथागतोऽर्हन् सम्यक् संबुद्धो नानारत्न-दण्डानां सुवर्णनिर्भासानां सहस्रपत्राणां पद्मानां शतसहस्रं विगतशोकाय बोधिसत्त्वाय महासत्त्वाय प्रादात् । एभिः कुलपुत्र पद्मैस्त्वं भगवन्तं शाक्यमुनिं तथागतमर्हन्तं सम्यक् संबुद्धमवकिर अस्मद्वचनाच्च कुलपुत्र तव दुर्लभं भवेत् । तत्कस्य हेतोर्दुरासदा हि ते बोधि-सत्त्वा महासत्त्वाः ये तव लोकधातावुपपन्ना मा तव क्षणिकाः ॥

अथ विगतशोको बोधिसत्त्वो महासत्त्वस्तस्य भगवतोऽशोकश्रिय-स्तथागतस्यार्हतः सम्यक्संबुद्धस्यान्तिकात्तानि सुवर्णनिर्भासानि सहस्रपत्राणि पद्मानि गृहीत्वानेकैर्बोधिसत्त्वकोटीनियुतशतसहस्रैः सार्द्धं गृहस्थैः प्रव्रजितैश्च दारकदारिकादिभिश्च ततो बुद्धक्षेत्रा-दन्तर्हितो यावदस्यां दक्षिणस्यां दिशि बुद्धा भगवन्तस्तिष्ठन्ति ध्रियन्ते यापयन्ति* सत्कुर्वन् गुरुकुर्वन् मानयन् पूजयन् पुष्पधूपगन्धमाल्य-विलेपनचूर्णवस्त्राभरणच्छत्रध्वजपताकाभिर्महत्या बोधिसत्त्वर्द्ध्या महता बोधिसत्त्वानुभावेन येन भगवान् शाक्यमुनिस्तथागतोऽर्हन् सम्यक् संबुद्धस्तेनोपसंक्रान्तः उपसंक्रम्य भगवतः पादौ शिरसावन्दित्वा एकान्तेऽस्थात् एकान्तस्थितश्च विगतशोको बोधिसत्त्वो महासत्त्वो भगवन्तमेतदवोचत् । अशोकश्रीर्भगवंस्तथागतोऽर्हन् सम्यक् संबुद्धो भगवतोऽल्पाबाधतां परिपृच्छत्यल्पातङ्कतां लघूत्थानतां बलं सुख स्पर्शविहारताञ्च । इमानि च तेन भगवता अशोकश्रिया तथाग-तेनार्हता सम्यक् संबुद्धेन सुवर्णनिर्भासानि सहस्रपत्राणि पद्मानि प्रहितानि† भगवतः पूजाकर्मणे ॥

---

* तान् सर्वान् इति ख, घ, पुस्तके पाठोऽधिकः ।

† प्रतिप्रहितानि इति ग, घ, पुस्तके पाठः ।

अथ भगवान् शाक्यमुनिस्तथागतोऽर्हन् सम्यक् संबुद्धस्तानि पद्मानि गृहीत्वा येन ते दक्षिणस्यान्दिशि गङ्गानदीवालुकोपमेषु लोकधातुषु तथागता अर्हन्तः सम्यक् संबुद्धास्तेनाक्षैप्सीत् ॥

अथ तैः पद्मैस्तेसर्वलोकधातवः स्फुटा अभूवन् । तत्र च पद्मेषु तथागतविग्रहानिषण्णाधर्मं देशयन्ति स्म । यदुतेमामेव षट्पारमिता*मारभ्य यैश्च सत्त्वैः साधर्मदेशनाश्रुता ते सर्वे नियता अभूवन्ननुत्तरायां सम्यक् सम्बोधौ । तेपि बोधिसत्त्वागृहस्थाः प्रव्रजिताश्च दारकदारिकाश्च स्वकस्वकैः कुशलमूलैर्भगवन्तं शाक्यमुनिं तथागतमर्हन्तं सम्यक् संबुद्धं सत्कुर्वन्ति स्म गुरुकुर्वन्ति स्म मानयन्ति स्म पूजयन्ति स्म । पश्चिमायान्दिशि गङ्गानदीवालुकोपमांल्लोकधातूनतिक्रम्य यः सर्वपश्चिमोलोकधातुरुपशान्ता नाम लोकधातुस्तत्र रत्नार्चिर्नाम तथागतोऽर्हन् सम्यक् संबुद्धस्तिष्ठति ध्रियते यापयति । स इमामेव प्रज्ञापारमितां बोधिसत्त्वेभ्यो महासत्त्वेभ्यः सम्प्रकाशयति ॥

अथ तत्र लोकधातौ चारित्रमतिर्नाम बोधिसत्त्वस्तं महान्तमवभासन्तांश्च महान्तं पृथिवीचालन्तं च तथागतस्यासेचनकदर्शनमात्मभावं दृष्ट्वा येन स भगवान् रत्नार्चिस्तथागतोऽर्हन् सम्यक् संबुद्धस्तेनोपसंक्रान्तः उपसंक्रम्य भगवन्तं रत्नार्चिषं तथागतमर्हन्तं सम्यक् संबुद्धमेतदवोचत् । को भगवन् हेतुः कः प्रत्ययोऽस्य

---

* पारमिता मारभ्येति ख, ग, घ, पुस्तके पाठः ।

† [illegible]ऽस्मात् इति ख, ग, घ, पुस्तके पाठः ।

‡ [illegible] पाठोदृश्यते ।

महतोऽवभासस्य लोके प्रादुर्भावायास्य च महतः पृथिवीचालस्य ईदृशस्य तथागतकायस्य सन्दर्शनाय । एवमुक्ते भगवान् रत्नार्चि-स्तथागतोऽर्हन् सम्यक् संबुद्धश्चारित्रमतिं बोधिसत्त्वं महासत्त्व-मेतदवोचत् । इत कुलपुत्र पश्चिमायां दिशि गङ्गानदीवालुकोपमान् लोकधातूनतिक्रम्य सहा नाम लोकधातुस्तत्र शाक्यमुनिर्नाम तथागतोऽर्हन् सम्यक्संबुद्धस्तिष्ठति ध्रियते यापयति । स बोधि-सत्त्वेभ्यो महासत्त्वेभ्यः प्रज्ञापारमितां सम्प्रकाशयति । तस्यैष ईदृशोऽनुभावः ॥

अथ चारित्रमतिर्बोधिसत्त्वो महासत्त्वस्तं भगवन्तं रत्नार्चिषं तथा-गतमर्हन्तं सम्यक् संबुद्धमेतदवोचत् । गच्छेयमहं भगवंस्तां सहां लोकधातुं तस्य भगवतः शाक्यमुनेस्तथागतस्यार्हतः सम्यक् संबुद्धस्य दर्शनाय वन्दनाय पर्य्युपासनाय । तेषां च बोधिसत्त्वानां महा-सत्त्वानां सर्वेषां प्रायः कुमारभूतानां धारणीप्रतिसम्विन्निर्हार-प्रतिलब्धानां सर्वसमाधिसमापत्तिवशिताप्राप्तानाम् । स भगवान् रत्नार्चिस्तथागत आह । गच्छ त्वं कुलपुत्र तां सहां लोकधातुं यस्ये-दानीं कालं मन्यसे ॥

अथ रत्नार्चिस्तथागतोऽर्हन् सम्यक् संबुद्धो नानारत्नमयानां सुवर्णनिर्भासानां सहस्रपत्राणां पद्मानां सहस्रं चारित्रमतये बोधिसत्त्वाय महासत्त्वाय प्रादात् । एभिः कुलपुत्र पद्मैस्तं भगवन्तं शाक्यमुनिं तथागतमर्हन्तं सम्यक् संबुद्धमभ्यवकिर सम्प्रजानचारी च कुलपुत्र तत्र बुद्धक्षेत्रे भवेत् । तत्कस्य हेतोर्दुरासदा हि ते बोधिसत्त्वा महासत्त्वा ये तत्र लोकधातावुपपन्ना सा तत्र चर्णेयाः ॥

अथ चारित्रमतिर्बोधिसत्त्वोमहासत्त्वस्तस्य भगवतो रत्नार्चिष-स्तथागतस्यार्हतः सम्यक् सम्बुद्धस्यान्तिकात्तानि सुवर्णनिर्भासानि सहस्रपत्राणि पद्मानि गृहीत्वानेकैर्बोधिसत्त्वकोटीनियुतशतसहस्रैः सार्द्धं गृहस्थैः प्रव्रजितैश्चदारकदारिकाभिश्चततो बुद्धक्षेत्रादन्तर्हितः यावन्तः पश्चिमायान्दिशि बुद्धा भगवन्त स्तिष्ठन्ति ध्रियन्ते याप-यन्ति तान् सर्वान् सत्कुर्व्वन् गुरुकुर्व्वन्मानयन् पूजयन् पुष्पधूपगन्ध-माल्यविलेपनचूर्णवस्त्राभरणछत्रध्वजपताकाभिर्महत्यावोधिसत्त्वर्द्धा महता वोधिसत्त्वानुभभावेन। येन भगवान् शाक्यमुनिस्तथागतो-ऽर्हन् सम्यक् सम्बुद्धस्तेनोपसंक्रान्तः उपसंक्रम्य भगवतः पादौ शिरसा-वन्दित्वा एकान्तेऽस्थात् एकान्तेस्थितश्चारित्रमतिर्बोधिसत्त्वोमहा-सत्त्वोभगवन्तमेतदवोचत्। रत्नार्चिर्भगवंस्तथागतोऽर्हन् सम्यक् सम्बुद्धो भगवतोऽल्पावाधतां परिपृच्छत्यल्पातङ्कताञ्चलघूत्थानता वलं सुखस्पर्श-विहारताञ्च इमानि च तेन भगवतारत्नार्चिषातथागतेनार्हता सम्यक् सम्बुद्धेन सुवर्णनिर्भासानि सहस्रपत्राणि पद्मानि प्रहि-ण्हितानि भगवतः पूजाकर्मणे ॥

अथ भगवान् शाक्यमुनिस्तथागतोऽर्हन् सम्यक् सम्बुद्धस्तानि पद्मानि गृहीत्वा येन ते पश्चिमायान्दिशि गङ्गानदीवालुकोपमेषु लोकधातुषु तथागता अर्हन्तः सम्यक् सम्बुद्धास्तेनाक्षैप्सीत् ॥

अथ तैः पद्मैस्ते सर्वे लोकधातवः स्फुटा अभूवन्। तत्र पद्मेषु तथागतविग्रहास्तिष्ठन्तो धर्मं देशयन्ति स्म। यदुतेमामेव षट्पारमिताः आरभ्य यैश्च सत्त्वैः सा धर्मदेशनाश्रुता ते सर्वे नियता अनुत्तरायां सम्यक् सम्बोधौ तेऽपि बोधिसत्त्वा महा-

सत्त्वा सत्त्वाः प्रातिमाच्छादनवाटिकाभिश्च सर्वरत्नैः कुशलमूले-
शंगृह्य शाक्यमुनिं तथागतमर्हन्तं सम्यक् सम्बुद्धं सत् कुर्वन्ति स्म
गुरुकुर्वन्ति स्म मानयन्ति स्म पूजयन्ति स्म । उत्तरस्यान्दिशि
गङ्गानदीवालुकोपमान् लोकधातूनतिक्रम्य यः सर्वपश्चिमो लोक-
धातुर्जयानाम तत्र जयेन्द्रो नाम तथागतोऽर्हन् सम्यक् सम्बुद्ध-
स्तिष्ठति ध्रियते यापयति स इमामेव प्रज्ञापारमितां बोधि-
सत्त्वेभ्यो महासत्त्वेभ्यः सम्प्रकाशयति ॥

अथ तत्र लोकधातौ जयदत्तो नाम बोधिसत्त्वो महासत्त्वस्त-
म्महान्तमवभासन्तं च महान्तं पृथिवीचालन्तञ्च तथागतस्यासेचनक-
दर्शनमात्मभावं दृष्ट्वा येन भगवान् जयेन्द्रस्तथागतोऽर्हन् सम्यक्
सम्बुद्धस्तेनोपसंक्रान्तः उपसंक्रम्य तं भगवन्तं जयेन्द्रं तथागतमर्हन्तं
सम्यक् सम्बुद्धमेतदवोचत् को भगवन् हेतुः कःप्रत्ययोऽस्य महतोऽव-
भासस्य लोके प्रादुर्भावायास्य च महतः पृथिवीचालस्यास्यचेदृशस्य
तथागतकायस्य सन्दर्शनाय*वन्दनायपर्युपासनाय ॥

एवमुक्ते भगवान् जयेन्द्रस्तथागतोऽर्हन् सम्यक् सम्बुद्धस्तं जयदत्तं
बोधिसत्त्वं महासत्त्वमेतदवोचत् । एष कुलपुत्र दक्षिणस्यान्दिशि
गङ्गानदीवालुकोपमान् लोकधातूनतिक्रम्य सहा नाम लोकधातुस्तत्र
शाक्यमुनिर्नाम तथागतोऽर्हन् सम्यक् संबुद्धस्तिष्ठति ध्रियते यापयति
सबोधिसत्त्वेभ्यो महासत्त्वेभ्यः प्रज्ञापारमितां सम्प्रकाशयति । तस्यैष-
ईदृशोऽनुभावः ॥

अथ जयदत्तो बोधिसत्त्वो महासत्त्वस्तं भगवन्तं जयेन्द्रन्तथागत-

* वन्दनाय पर्य्युपासनायेति पाठोऽत्रैव स्थले पुस्तकचतुष्टये दृश्यते ॥

मर्हन्तं सम्यक्सम्बुद्धमेतदवोचत् । गच्छयमहं भगवंस्तां सहां
धातुन्तस्य भगवतः शाक्यमुनेस्तथागतस्यार्हतः सम्यक् स
दर्शनाय वन्दनाय पर्य्युपासनाय तेषाञ्च बोधिसत्त्वानां मह
सर्वेषां प्रायः कुमारभूतानां धारणी प्रतिसम्विनिर्हारप्रति
सर्वसमाधिसमापत्तिवशिताप्राप्तानां स भगवान् जायेन्द्र
आह । गच्छत्वं कुलपुत्र तां सहां लोकधातुं यस्येदानीङ्कालं म

अथ जायेन्द्र स्तथागतोऽर्हन् सम्यक् सम्बुद्धो नानारत्न
सुवर्णनिर्भासानां सहस्रपत्राणां पद्मानां सहस्रं जयदत्ताय
सत्त्वाय महासत्त्वाय प्रादात् । एभिः कुलपुत्र पद्मैस्तं भ
सम्यक् सम्बुद्धमभ्यवकिर । सम्प्रजान विहारीच कुलपुत्र तत्र
त्रे भवेत् तत् कस्य हेतोर्दुरासदाहिते बोधिसत्त्वा मह
ये तत्र लोकधातावुपपन्ना मा तत्र क्षणेथाः ॥

अथ जयदत्तो बोधिसत्त्वोमहासत्त्वस्तस्य भगवतो जा
तथागतस्यार्हतः सम्यक् संबुद्धस्यान्तिकात्तानि सुवर्णनिभ
सहस्रपत्राणि पद्मानि गृहीत्वानेकै र्बोधिसत्त्वकोटीनियुतशत
सार्द्धं गृहस्थैः प्रव्रजितैश्च दारकदारिकारूपिभिश्च ततो बुद्ध
दन्तर्हितोयावन्तः उत्तरस्यान्दिशि बुद्धा भगवन्तस्तिष्ठन्ति
यापयन्तितान् सर्वान् सत्कुर्वन् गुरुकुर्वन्मानयन् पूजयन् पुष्पधूपगन
न्धविलेपनचूर्णचीवरच्छत्रध्वजपताकाभिः महत्या बोधिसत्त्व
महता बोधिसत्त्वानुभावेन येन भगवान् शाक्यमुनिस्तथागतो
सम्यक् संबुद्धस्तेनोपसंक्रान्तः उपसंक्रम्य भगवतः पादौ शि
वन्दित्वा एकान्तेऽस्थात् एकान्तेस्थितोजयदत्तोबोधिसत्त्वोमहा

भगवन्तमेतदवोचत् । जायेन्द्रो भगवंस्तथागतोऽर्हन् सम्यक् संबुद्धो भगवतोऽल्पाबाधतां परिपृच्छत्यल्पातङ्कतां लघूत्थानतां बलञ्च सुखस्पर्शविहारतां च । इमानि च तेन भगवताजायेन्द्रेण तथागतेनार्हता सम्यक् संबुद्धेन सुवर्णनिर्भासानि सहस्रपत्राणि पद्मानि प्रहितानि भगवतः पूजाकर्मणे ॥

अथ भगवान् शाक्यमुनिस्तथागतोऽर्हन् सम्यक् संबुद्धस्तानि पद्मानि गृहीत्वा येन ते उत्तरस्यान्दिशि गङ्गानदीवालुकोपमेषु लोकधातुषु तथागता अर्हन्तः सम्यक् संबुद्धास्तेनाक्षैप्सीत् ॥

अथ तैः पद्मैस्ते सर्वे लोकधातवः स्फुटा अभूवन् । तत्र च पद्मेषु तथागतविग्रहा निषण्णा धर्मं देशयन्ति स्म । यदुतेमामेव षट्-पारमिता आरभ्य यैश्च सत्त्वैः सा धर्मदेशना श्रुता ते सर्वे नियता अभूवन्ननुत्तरायां सम्यक् सम्बोधौ तेऽपि बोधिसत्त्वाः गृहस्थाः प्रव्रजिताश्च दारिकदारिकाश्च स्वकस्वकैः कुशलमूलैर्भगवन्तं शाक्यमुनिं तथागतमर्हन्तं सम्यक् संबुद्धं सत् कुर्वन्ति स्म । गुरुकुर्वन्ति स्म मानयन्ति स्म पूजयन्ति स्म । उत्तरपूर्वस्यान्दिशि गङ्गानदीवालुकोपमान् लोकधातूनतिक्रम्य यः सर्व पश्चिमो लोकधातुः समाध्यलङ्कृतो नाम तत्र समाधिहस्त्युत्तरश्रीर्नाम तथागतोऽर्हन् सम्यक् संबुद्धस्तिष्ठति ध्रियते यापयति । इमामेव प्रज्ञापारमितां बोधिसत्त्वेभ्यो महासत्त्वेभ्यः सम्प्रकाशयति ॥

अथ तत्र लोकधातौ विजयविक्रामी नाम बोधिसत्त्वो महासत्त्वस्तमवभासन्तञ्च महान्तं पृथिवीचालन्तञ्च तथागतस्यासेचनकदर्शनमात्मभावं दृष्ट्वा येन स भगवान् समाधिहस्त्युत्तरश्रीस्तथागतो-

ऽर्हन् सम्यक् संबुद्धस्तेनोपसङ्क्रान्तः उपसंक्रम्यतं भगवन्तं
त्तरश्रियं तथागतमर्हन्तं सम्यक् संबुद्धमेतद्वोचत् । को
कः प्रत्ययोऽस्य महतोऽवभासस्य लोके प्रादुर्भावाया
पृथिवीचालस्य अस्य चेदृशस्य तथागतकायस्य सन्दर्शन
भगवान् समाधिहस्त्युत्तरश्रीस्तथागतोऽर्हन् सम्यक् संबु
क्रामिणं वोधिसत्त्वं महासत्त्वमेतद्वोचत् । एष कुलपु
मायान्दिशि गङ्गानदीवालुकोपमान् लोकधातूनतिक्र
लोकधातुस्तत्र शाक्यमुनिर्नामतथागतोऽर्हन् सम्यक्
ध्रियते यापयति । स वोधिसत्त्वेभ्यो महासत्त्वेभ्यः
सम्प्रकाशयति । तस्यैष ईदृशोऽनुभावः ॥

अथ विजयविक्रामी वोधिसत्त्वोमहासत्त्वस्तं भग
हस्त्युत्तरश्रियं तथागतमर्हन्तं सम्यक् संबुद्धमेतद्वोच
भगवं स्तां सहा लोकधातुं तस्य भगवतः शाक्यमुने
सम्यक् संबुद्धस्य दर्शनाय वन्दनाय पर्य्युपासनाय ।
सत्त्वानां महासत्त्वानां प्रायः कुमारभूतानां धारणीप्र
प्रतिलब्धानां सर्वसमाधिसमापत्तिवशिताप्राप्तानां ।
समाधिहस्त्युत्तरश्रीर्नाम तथागत आह । गच्छत्वं कु
लोकधातुं यस्येदानीं कालं मन्यसे ॥

अथ समाधिहस्त्युत्तरश्रीस्तथागतोऽर्हन् सम्यक् सं
शयानां सुवर्णनिर्भासानां सहस्रपत्राणां पद्मानां
क्रामिणे वोधिसत्त्वाय महासत्त्वाय प्रादात् । एभिः

विक्रामी च कुलपुत्र तत्र बुद्धक्षेत्रे भवेत् । तत् कस्य हेतोर्दुरा-
सदा हि ते बोधिसत्त्वा महासत्त्वा ये तत्र लोकधातावुपपन्नाः सा
न्न दुर्धर्षाः ॥

अथ विजयविक्रामी बोधिसत्त्वो महासत्त्वस्तस्य भगवतः समा-
धिहस्त्युत्तरश्रियस्तथागतस्यार्हतः सम्यक् संबुद्धस्यान्तिकात् तानि
सुवर्णनिर्भासानि सहस्रपत्राणि पद्मानि गृहीत्वाऽनेकैर्बोधिसत्त्व-
कोटीनियुतशतसहस्रैः सार्द्धं गृहस्थैः प्रव्रजितैश्च दारकदारिकाभिरपि-
भिश्च ततो बुद्धक्षेत्रादन्तर्हितो यावन्तः उत्तरपूर्वस्यान्दिशि बुद्धा-
भगवन्तस्तिष्ठन्ति ध्रियन्ते यापयन्ति तान् सर्वान् सत्कुर्वन् गुरुकुर्वन्
मानयन् पूजयन् पुष्पधूपगन्धमाल्यविलेपनचूर्णचीवरवस्त्रध्वजपता-
काभिर्महत्या बोधिसत्त्वर्द्ध्या महता बोधिसत्त्वाऽनुभावेन येन
भगवान्* शाक्यमुनिस्तथागतोऽर्हन् सम्यक् संबुद्धस्तेनोपसंक्रान्तः ।
उपसंक्रम्य भगवतः पादौ शिरसा वन्दित्वा एकान्तेऽस्थादेकान्ते
स्थितो विजयविक्रामी बोधिसत्त्वो महासत्त्वो भगवन्तमेतदवोचत् । स-
माधिहस्त्युत्तरश्रीर्भगवंस्तथागतोऽर्हन् सम्यक् संबुद्धो भगवतोऽल्पा-
बाधतां परिपृच्छत्यल्पातङ्कतां लघूत्थानतां बलञ्च सुखस्पर्शविहारि-
ताञ्च । इमानि च तेन भगवता समाधिहस्त्युत्तरश्रिया तथागते-
नाऽर्हता सम्यक् संबुद्धेन सुवर्णनिर्भासानि सहस्रपत्राणि पद्मानि
प्रणिहितानि† भगवतः पूजाकर्मणे ॥

अथ भगवान् शाक्यमुनिस्तथागतोऽर्हन् सम्यक् संबुद्धस्तानि

---

* भगवाञ्छाक्यमुनिरिति ग, घ, पुस्तके सन्धिनिर्देशः एवमन्यत्र ।

† प्रहितानि इति घ पुस्तके पाठः ।

पद्मानि प्रहितानि येन पुनः पश्चिमायान्दिशि गङ्गानदीवालुकोपमेषु लोकधातुषु तथागता अर्हन्तः सम्यक् संबुद्धास्तिष्ठन्ति ॥

अथ तैः पद्मैः सर्वे लोकधातवः स्फुटा अभूवन्। तत्र पद्मेषु तथागतविग्रहाः निषण्णा धर्मं देशयन्ति स्म। यदुतामि षट्पारमितामारभ्य। ये च सत्त्वाः सा धर्मदेशना श्रुता ते सर्वे नियता अभूवन्ननुत्तरायां सम्यक् संबोधौ। तेऽपि च बोधिसत्त्वाः गृहस्थाः प्रव्रजिताश्च दारकदारिकाश्च स्वकस्वकैः कुसुमैर्भगवन्तं शाक्यमुनिं तथागतमर्हन्तं सम्यक् संबुद्धं सत्कुर्वन्ति स्म गुरुकुर्वन्ति स्म मानयन्ति स्म पूजयन्ति स्म। एवं पश्चिमायान्दिशि गङ्गानदीवालुकोपमान् लोकधातूनतिक्रम्य यः सर्वपश्चिमो लोकधातुर्बोधिमण्डालङ्कारसुरुचिरा नाम तत्र पद्मोत्तरश्रीर्नाम तथागतोऽर्हन् सम्यक् संबुद्धस्तिष्ठति ध्रियते यापयति। स इमामेव प्रज्ञापारमितां बोधिसत्त्वेभ्यो महासत्त्वेभ्यः सम्प्रकाशयति ॥

अथ तत्र लोकधातौ पद्महस्तो नाम बोधिसत्त्वो महासत्त्वस्तं महान्तमवभासं तञ्च महान्तं पृथिवीचालन्तञ्च तथागतस्याऽसेचनकदर्शनमात्मभावं दृष्ट्वा येन भगवान् पद्मोत्तरश्रीस्तथागतोऽर्हन् सम्यक् संबुद्धस्तेनोपसंक्रान्तः। उपसंक्रम्य तं भगवन्तं पद्मोत्तरश्रियं तथागतमर्हन्तं सम्यक् संबुद्धमेतदवोचत्। को भगवन् हेतुः कः प्रत्ययोऽस्य महतोऽवभासस्य लोके प्रादुर्भावायाऽस्य च महतः पृथिवीचालस्याऽस्य चेदृशस्य तथागतकायस्य सन्दर्शनाय ॥

एवमुक्ते भगवान् पद्मोत्तरश्रीस्तथागतोऽर्हन् सम्यक् संबुद्धस्तं पद्महस्तं बोधिसत्त्वं महासत्त्वमेतदवोचत्। एष कुलपुत्र पश्चिमो-

उपरिष्टादितो गङ्गानदीवालुकोपमान् लोकधातूनतिक्रम्य सहा नाम लोकधातुस्तत्र शाक्यमुनिर्नाम तथागतोऽर्हन् सम्यक्संबुद्धस्तिष्ठति ध्रियते यापयति । स बोधिसत्त्वेभ्यो महासत्त्वेभ्यः प्रज्ञापारमितां प्रकाशयति । तस्यैष ईदृशोऽनुभावः ॥

अथ पद्महस्तो बोधिसत्त्वो महासत्त्वस्तं भगवन्तं पद्मोत्तरश्रियं तथागतमर्हन्तं सम्यक्संबुद्धमेतदवोचत् । गच्छाम्यहं भगवंस्तां सहां लोकधातुं तं भगवन्तं शाक्यमुनिं तथागतमर्हन्तं सम्यक्संबुद्धं दर्शनाय वन्दनाय पर्युपासनाय । तेषां च बोधिसत्त्वानां महासत्त्वानां सर्वेषां प्रायः कुमारभूतानां धारणीप्रतिलब्धसमाधिविहारप्रति-लब्धानां सर्वसमाधिविहारपारमिताप्राप्तानाम् । स भगवान् पद्मोत्तरश्रीस्तथागत आह । गच्छ त्वं कुलपुत्र तां सहां लोकधातुं यस्येदानीं कालं मन्यसे ॥

अथ पद्मोत्तरश्रीस्तथागतोऽर्हन् सम्यक् संबुद्धो नानारत्नमयानां सुवर्णनिर्भासानां सहस्रपत्राणां पद्मानां सहस्रं पद्महस्ताय बोधि-सत्त्वाय महासत्त्वाय प्रादात् । एभिः कुलपुत्र पद्मैस्तं भगवन्तं शाक्यमुनिं तथागतमर्हन्तं सम्यक् संबुद्धमभ्यवकिर । सम्प्रजानविहारी च कुलपुत्र तत्र बुद्धक्षेत्रे भवेत् । तत्कस्य हेतोर्दुरासदा हि ते बोधिसत्त्वा महासत्त्वा ये तत्र लोकधातावुपपन्नाः । सा तत्र दुर्धर्षाः ॥

अथ पद्महस्तो बोधिसत्त्वो महासत्त्वस्तस्य भगवतः पद्मोत्तरश्रिय-स्तथागतस्यार्हतः सम्यक् संबुद्धस्यान्तिकात्तानि सुवर्णनिर्भासानि सहस्रपत्राणि पद्मानि गृहीत्वाऽनेकैर्बोधिसत्त्वकोटीनियुतशतसहस्रैः

सार्द्धं गृहस्थैः प्रव्रजितैश्च दारकदारिकाभिरपिभिश्च ततोऽनुनैवाद-न्तर्हितो यावन्तः पूर्वस्यान्दिशि बुद्धाभगवन्तस्तिष्ठन्ति ध्रियन्ते याप-यन्ति, तान् सर्वान् सत्कुर्वन् गुरुकुर्वन् मानयन् पूजयन् पुष्पधू-पगन्धमाल्यविलेपनचूर्णचीवरच्छत्रध्वजपताकाभिर्महत्या बोधिसत्त्वर्द्ध्या महता बोधिसत्त्वाऽनुभावेन, येन भगवान् शाक्यमुनिस्तथागतो-ऽर्हन् सम्यक् संबुद्धस्तेनोपसंक्रान्त । उपसंक्रम्य भगवतः पादौ शिर-सा वन्दित्वा एकान्तेऽस्थात् । एकान्ते स्थितः पद्मकरो बोधिसत्त्वो महासत्त्वोभगवन्तमेतदवोचत् । पद्मोत्तरश्रीर्भगवन् सम्यक् सम्बुद्ध-स्तथागतोऽर्हन् भगवतोऽल्पाबाधतां परिपृच्छत्यल्पातङ्कताञ्च लघू-त्थानतां बलञ्च सुखस्पर्शविहारताञ्च । इमानि च तेन भगवता पद्मोत्तरश्रिया तथागतेनाऽर्हता सम्यक् संबुद्धेन सुवर्णनिर्भासानि सहस्रपत्राणि पद्मानि प्रणिहितानि* भगवतः पूजाकर्मणे ॥

अथ भगवान् शाक्यमुनिस्तथागतोऽर्हन् सम्यक् संबुद्धस्तानि पद्मानि गृहीत्वा येन पूर्वदक्षिणस्यान्दिशि गङ्गानदीवालुकोपमेषु लोकधातुषु तथागता अर्हन्तः सम्यक् संबुद्धास्तेनाऽक्षैप्सीत् ॥

अथ तैः पद्मैः सर्वे लोकधातवः स्फुटा अभूवन् । तत्र च पद्मेषु तथागतविग्रहानिषण्णाधर्मं देशयन्ति स्म । यदुतेमामेव षट्-पारमितामारभ्य । यैश्च सत्त्वैः सा धर्मदेशना श्रुता ते सर्वे नियता-अभूवननुत्तरायां सम्यक् सम्बोधौ । तेपि बोधिसत्त्वा महासत्त्वा-गृहस्थाः प्रव्रजिताश्च दारकदारिकाश्च स्वकस्वकैः कुशलमूलैर्भगवन्तं शाक्यमुनिं तथागतमर्हन्तं सम्यक् संबुद्धं सत्कुर्वन्ति स्म । गुरुकुर्वन्ति

* ग, घ, पुस्तके प्रहितानीति पाठः ।

स्म । मानयन्ति स्म । पूजयन्ति स्म । दक्षिणपश्चिमायां दिशि गङ्गानदीवालुकोपमान् लोकधातूनतिक्रम्य यः सर्वपश्चिमो लोकधातुर्विगतराजस्का नाम तत्र सूर्यमण्डलप्रतिभासोत्तमश्रीर्नाम तथागतोऽर्हन् सम्यक् संबुद्धस्तिष्ठति ध्रियते यापयति । स इमामेव प्रज्ञापारमितां बोधिसत्त्वेभ्यो महासत्त्वेभ्यः सम्प्रकाशयति ॥

अथ तत्र लोकधातौ सूर्यप्रतिभासो नाम बोधिसत्त्वो महासत्त्वस्तं महान्तमवभासं तांश्च महान्तं पृथिवीचालांस्तस्य तथागतस्याऽसेचनकदर्शनमात्मभावं दृष्ट्वा येन स भगवान् सूर्यमण्डलप्रतिभासोत्तमश्रीस्तथागतस्तेनोपसंक्रान्तः । उपसंक्रम्य तं भगवन्तं सूर्यमण्डलप्रतिभासोत्तमश्रियं तथागतमर्हन्तं सम्यक् संबुद्धमेतदवोचत् । को भगवन् हेतुः कः प्रत्ययोऽस्य महतोऽवभासस्य लोके प्रादुर्भावायास्य च महतः पृथिवीचालस्यास्य चेदृशस्य तथागतकायस्य सन्दर्शनाय ॥

एवमुक्ते भगवान् सूर्यमण्डलप्रतिभासोत्तमश्रीर्नाम तथागतोऽर्हन् सम्यक् संबुद्धस्तं सूर्यप्रतिभासम्बोधिसत्त्वं महासत्त्वमेतदवोचत् । एष कुलपुत्र उत्तरपूर्वस्यां दिशि गङ्गानदीवालुकोपमान् लोकधातूनतिक्रम्य सहा नाम लोकधातुस्तत्र शाक्यमुनिर्नाम तथागतोऽर्हन् सम्यक् संबुद्धस्तिष्ठति ध्रियते यापयति । स बोधिसत्त्वेभ्यो महासत्त्वेभ्यः प्रज्ञापारमितां सम्प्रकाशयति । तस्यैव ईदृशोऽनुभावः ॥

अथ सूर्यप्रतिभासो बोधिसत्त्वो महासत्त्वस्तं भगवन्तं सूर्यमण्डलप्रतिभासोत्तमश्रियं तथागतमर्हन्तं सम्यक् संबुद्धमेतदवोचत् । गच्छेयमहं भगवन् तां सहां लोकधातुं तस्य भगवतः शाक्यमुनेस्तथागतस्यार्हतः सम्यक् संबुद्धस्य दर्शनाय वन्दनाय पर्युपासनाय ।

सम्यक्सम्बुद्धमेतदवोचत्। को भगवन् हेतुः कः प्रत्ययोऽस्य महतो ऽवभासस्य लोके प्रादुर्भावायाऽस्य च महतः पृथिवीचालस्या- चेदृशस्य तथागतकायस्य सन्दर्शनाय ॥

एवमुक्ते भगवानेकछत्रस्तथागतोऽर्हन् सम्यक्सम्बुद्धस्तं रत्नोत्तमं बोधिसत्त्वं महासत्त्वमेतदवोचत्। एष कुलपुत्र दक्षिणपश्चिमाया- न्दिशि गङ्गानदीवालुकोपमान् लोकधातूनतिक्रम्य सहा नाम लोकधातुः, तत्र शाक्यमुनिर्नाम तथागतोऽर्हन् सम्यक्सम्बुद्धस्तिष्ठति ध्रियते यापयति। स बोधिसत्त्वेभ्यो महासत्त्वेभ्यः प्रज्ञापारमितां सम्प्रकाशयति। तस्यैषईदृशोऽनुभावः ॥

अथ रत्नोत्तमो बोधिसत्त्वो महासत्त्वस्तं भगवन्तमेकछत्रं तथा- गतमर्हन्तं सम्यक्सम्बुद्धमेतदवोचत्। गच्छेयमहं भगवंस्तां सहां लोकधातुं तस्य भगवतः शाक्यमुनेस्तथागतस्याऽर्हतः सम्यक्सम्बुद्धस्य दर्शनाय वन्दनाय पर्युपासनाय। तेषाञ्च बोधिसत्त्वानां महासत्त्वानां सन्दर्शनाय प्रायः कुमारभूतानां धारणीप्रतिसम्विद्द्वारप्रतिलब्धानां सर्वसमाधिसमापत्तिवशितापारगाणाम्। स भगवानेकछत्रस्तथागत- [illegible] गच्छ त्वं कुलपुत्र तां सहां लोकधातुं यस्येदानीं काल- [illegible]।

[illegible] सम्यक्सम्बुद्धोऽनारम्बनस्थानां सुवर्ण- [illegible] पद्मानि [illegible] रत्नोत्तमाय बोधिसत्त्वा- [illegible] आगच्छ शाक्य- [illegible] सम्यक्सम्बुद्ध [illegible]। [illegible] [illegible] ॥ [illegible] [illegible]

ते बोधिसत्त्वा महासत्त्वा ये तत्र लोकधातावुपपन्नाः मा तत्र हर्णेयाः।

अथ रत्नोत्तमोबोधिसत्त्वोमहासत्त्वस्तस्य भगवतएकछत्रस्य तथागतस्याऽर्हतः सम्यक्सम्बुद्धस्याऽन्तिकात्तानि सुवर्णनिर्भासानि सहस्रपत्राणि पद्मानि गृहीत्वाऽनेकैर्बोधिसत्त्वकोटीनियुतशतसहस्रैः सार्द्धं गृहस्थैः प्रव्रजितैश्च दारकदारिकारूपिभिश्च ततोबुद्धक्षेत्रा-दन्तर्हितोयावन्तः पश्चिमोत्तरस्यान्दिशि बुद्धाभगवन्तस्तिष्ठन्ति ध्रियन्ते यापयन्ति। तान् सर्व्वान् सत्कुर्व्वन् गुरुकुर्व्वन् मानयन् पूजयन् पुष्पधूपगन्धमाल्यविलेपनचूर्णचीवरछत्रध्वजपताकाभिर्महत्या बोधि-सत्त्वर्द्ध्या महता च बोधिसत्त्वाऽनुभावेन। येन भगवांच्छाक्यमुनि-स्तथागतोऽर्हन् सम्यक्सम्बुद्धस्तेनोपसंक्रान्तः। उपसंक्रम्य भगवतः पादौ शिरसा वन्दित्वा एकान्तेऽस्थात्। एकान्ते स्थितोरत्नोत्तमो बोधिसत्त्वोमहासत्त्वोभगवन्तमेतदवोचत्। एकछत्रोभगवंस्तथागतो-ऽर्हन् सम्यक्सम्बुद्धोभगवतोऽल्पाबाधतां परिपृच्छत्यल्पातङ्कतां लघू-त्थानतां बलञ्च सुखस्पर्शविहारताञ्च। इमानि च तेन भगवता एकछत्रेण तथागतेनाऽर्हता सम्यक्सम्बुद्धेन सुवर्णनिर्भासानि सहस्र-पत्राणि पद्मानि प्रहितानि भगवतः पूजाकर्म्मणे।

अथ भगवांच्छाक्यमुनिस्तथागतोऽर्हन् सम्यक्सम्बुद्धस्तानि पद्मानि गृहीत्वा येन ते पश्चिमोत्तरस्यान्दिशि गङ्गानदीवालुको-पमेषु लोकधातुषु तथागता अर्हन्तः सम्यक्सम्बुद्धास्तेनाऽक्षैप्सीत्।

अथ तैः पद्मैस्ते सर्व्वे लोकधातवः स्फुटा अभूवन्। तत्र च पद्मेषु तथागतविग्रहानिषण्णाधर्म्मं देशयन्ति स्म। यदुतेमामेव षट्-

पारमिता आरभ्य। यैश्च सत्त्वैः सा धर्मदेशना श्रुता ते सर्व्वे नियता अभूवन्ननुत्तरायां सम्यक्सम्बोधौ। तेऽपि बोधिसत्त्वा गृहस्थाः प्रव्रजिताश्च दारकदारिकाश्च स्वकस्वकैः कुशलमूलैर्भगवन्तं शाक्यमुनिं तथागतमर्हन्तं सम्यक्सम्बुद्धं सत्कुर्व्वन्ति स्म। गुरुकुर्व्वन्ति स्म। मानयन्ति स्म। पूजयन्ति स्म। अधस्तादृिशि गङ्गानदीवालुकोपमान्लोकधातूनतिक्रम्य यः सर्व्वपश्चिमोलोकधातुः पद्मा नाम तत्र पद्मश्रीर्नाम तथागतोऽर्हन् सम्यक्सम्बुद्धस्तिष्ठति ध्रियते यापयति। इमामेव प्रज्ञापारमितां बोधिसत्त्वेभ्योमहासत्त्वेभ्यः सम्प्रकाशयति।

अथ तत्र लोकधातौ पद्मोत्तरो नाम बोधिसत्त्वोमहासत्त्वस्तं महान्तमवभासं तञ्च महान्तं पृथिवीचालं तञ्च तथागतस्याऽसेचनकदर्शनमात्मभावं दृष्ट्वा येन स भगवान् पद्मश्रीस्तथागतोऽर्हन् सम्यक्सम्बुद्धस्तेनोपसंक्रान्तः। उपसंक्रम्य तं भगवन्तं पद्मश्रियं तथागतमर्हन्तं सम्यक्सम्बुद्धमेतदवोचत्। कोभगवन् हेतुः कः प्रत्ययोऽस्य महतोऽवभासस्य लोके प्रादुर्भावायाऽस्य च महतः पृथिवीचालस्याऽस्य चेदृशस्य तथागतकायस्य सन्दर्शनाय।

एवमुक्ते भगवान् पद्मश्रीस्तथागतोऽर्हन् सम्यक्सम्बुद्धस्तं पद्मोत्तरं बोधिसत्त्वं महासत्त्वमेतदवोचत्। एष कुलपुत्र उपरिष्टादृिशि गङ्गानदीवालुकोपमान् लोकधातूनतिक्रम्यसहानाम लोकधातुस्तत्र शाक्यमुनिर्नाम तथागतोऽर्हन् सम्यक्सम्बुद्धस्तिष्ठति ध्रियते यापयति। बोधिसत्त्वेभ्यो महासत्त्वेभ्यः प्रज्ञापारमितां सम्प्रकाशयति। तस्यैष ईदृशोऽनुभावः।

अथ पद्मोत्तरो बोधिसत्त्वो महासत्त्वो भगवन्तं पद्मश्रियं तथा-गतमर्हन्तं सम्यक्सम्बुद्धमिदमवोचत् । गच्छाम्यहं भगवंस्तां लोकधातुं तस्य भगवतः शाक्यमुनेस्तथागतस्यार्हतः सम्यक्सम्बुद्ध-स्यार्थाय दर्शनाय पर्युपासनाय । तेषां च बोधिसत्त्वानां महा-सत्त्वानां प्रायः कुमारभूतानां धारणीप्रतिलब्धानां सर्वनिर्णयानां सर्वसत्त्वप्रियवचनप्रतिभानप्रतिलब्धानाम् । स भगवान् पद्मश्रीस्तथा-गत आह । गच्छ त्वं कुलपुत्र तां लोकधातुं यस्येदानीं कालं मन्यसे ।

अथ पद्मश्रीस्तथागतोऽर्हन् सम्यक्सम्बुद्धो नानारत्नमयानां सुवर्ण-निर्भासानां सहस्रपत्राणां पद्मानां सहस्रं पद्मोत्तराय बोधिसत्त्वाय महासत्त्वाय प्रादात् । एभिः कुलपुत्र पद्मैस्तं भगवन्तं शाक्यमुनिं तथागतमर्हन्तं सम्यक्सम्बुद्धमभ्यवकिर । सप्रज्ञानविहारी च कुलपुत्र तत्र बुद्धक्षेत्रे भवेत् । तत्कस्य हेतोर्दुरासदा हि ते बोधिसत्त्वास्तस्याल्लोकधातावुपपन्नाः मा तव क्षणे भूः ।

अथ पद्मोत्तरो बोधिसत्त्वो महासत्त्वस्तस्य भगवतः पद्मश्रिय-स्तथागतस्यार्हतः सम्यक्सम्बुद्धस्यान्तिकात्तानि सुवर्णनिर्भासानि सहस्रपत्राणि पद्मानि गृहीत्वाऽनेकैर्बोधिसत्त्वकोटीनियुतशतसहस्रैः सार्धं गृहस्थैः प्रव्रजितैश्च दारकदारिकाभिश्च ततो बुद्ध-क्षेत्रादन्तर्हितो यावन्तोऽधस्तात् दिशि बुद्धा भगवन्तस्तिष्ठन्ति ध्रियन्ते यापयन्ति तान् सर्वान् सत्कुर्वन् गुरुकुर्वन् मानयन् पूजयन् पुष्पधूपगन्धमाल्यविलेपनचूर्णचीवरवस्त्राभरणच्छत्रध्वजपताकाभिर्महत्या बोधिसत्त्वर्द्ध्या महता बोधिसत्त्वानुभावेन । येन भगवान् शाक्य-

मुनिस्तथागतोऽर्हन् सम्यक्सम्बुद्धस्तेनोपसंक्रान्तः उपसंक्रम्य भगवतः पादौ शिरसावन्दित्वा एकान्तेऽस्थात्। एकान्तेऽस्थितः पद्मोत्तरो बोधिसत्त्वोमहासत्त्वोभगवन्तमेतदवोचत्। पद्मश्रीभर्गवंस्तथागतोऽर्हन् सम्यक्सम्बुद्धोभगवतोऽल्पावाधतां परिपृच्छत्यल्पातङ्कतां लघूत्यानतां बलञ्च सुखस्पर्शविहारताञ्च। इमानि च तेन भगवता पद्मश्रिया तथागतेनार्हता सम्यक्सम्बुद्धेन सुवर्णनिर्भासानि सहस्रपत्राणि पद्मानि प्रणिहितानि भगवतः पूजाकर्म्मणे।

अथ भगवाञ्छाक्यमुनिस्तथागतोऽर्हन् सम्यक्सम्बुद्धस्तानि पद्मानि गृहीत्वा येन तेऽधस्ताद्दिशि गङ्गानदीवालुकोपमेषु लोकधातुषु तथागताऽर्हन्तः सम्यक्सम्बुद्धास्तेनाऽचैप्सीत्।

अथतैः पद्मैस्ते सर्व्वलोकधातवः स्फुटाऽभूवन्। तत्र पद्मेषु तथागतविग्रहानिषण्णाधर्म्मं देशयन्ति स्म। यदुतेमामेव षट् पारमिता आरभ्य। यैश्च सत्त्वैः साधर्म्मदेशनाश्रुता ते सर्व्वे नियता अभूवन्ननुत्तरायां सम्यक्सम्बोधौ। तेऽपि च बोधिसत्त्वागृहस्थाः प्रव्रजिताश्च दारकदारिकाश्च स्वकस्वकैः कुशलमूलैर्भगवन्तं शाक्यमुनिं तथागतमर्हन्तं सम्यक्सम्बुद्धं सत्कुर्व्वन्ति स्म, गुरुकुर्व्वन्ति मानयन्ति स्म पूजयन्ति स्म। उपरिष्टाद्दिशि गङ्गानदीवालुकोपमान् लोकधातूनतिक्रम्य यः सर्व्वपश्चिमो लोकधातुर्नन्दानाम तत्र नन्दश्रीर्नाम तथागतोऽर्हन् सम्यक्सम्बुद्धस्तिष्ठति ध्रियते यापयति। स इमामेव प्रज्ञापारमितां बोधिसत्त्वेभ्यो महासत्त्वेभ्यः सम्प्रकाशयति।

अथ तत्र लोकधातौ नन्ददत्तो नाम बोधिसत्त्वोमहासत्त्वो

महान्तमवभासं तञ्च महान्तं पृथिवीचालं तञ्च तथागतस्याऽसेचनकदर्शनमात्मभावं दृष्ट्वा येन भगवान् नन्दश्रीस्तथागतोऽर्हन् सम्यक्सम्बुद्धस्तेनोपसंक्रान्तः। उपसंक्रम्य तं भगवन्तं नन्दश्रियं तथागतमर्हन्तं सम्यक्सम्बुद्धमेतदवोचत्। कोभगवन् हेतुः कः प्रत्ययोऽस्य महतोऽवभासस्य लोके प्रादुर्भावायाऽस्य च महतः पृथिवीचालस्याऽस्य च तथागतकायस्य सन्दर्शनाय।

एवमुक्ते भगवान् नन्दश्रीस्तथागतोऽर्हन् सम्यक्सम्बुद्धस्तं नन्ददत्तं बोधिसत्त्वं महासत्त्वमेतदवोचत्। एष कुलपुत्राऽधस्तादिशि गङ्गानदीवालुकोपमान् लोकधातूनति क्रम्य सहानामलोकधातुस्तत्र शाक्यमुनिर्नाम तथागतोऽर्हन् सम्यक्सम्बुद्धस्तिष्ठति ध्रियते यापयति। स बोधिसत्त्वेभ्योमहासत्त्वेभ्यः प्रज्ञापारमितां सम्प्रकाशयति तस्यैष ईदृशोऽनुभावः।

अथ नन्ददत्तोबोधिसत्त्वोमहासत्त्वस्तं नन्दश्रियं तथागतमर्हन्तं सम्यक्सम्बुद्धमेतदवोचत्। गच्छेयमहं भगवंस्तां सहां लोकधातुं तस्य भगवतः शाक्यमुनेस्तथागतस्याऽर्हतः सम्यक्सम्बुद्धस्य दर्शनाय वन्दनाय पर्य्युपासनाय तेषाञ्च बोधिसत्त्वानां महासत्त्वानां प्रायः कुमारभूतानां धारणीप्रतिसम्विन्निर्हारप्रतिलब्धानां सर्व्वसमाधिसमापत्तिवशिताप्राप्तानां। सभगवान् नन्दश्रीस्तथागत आह। गच्छ त्वं कुलपुत्र तां सहां लोकधातुं यस्येदानीं कालं मन्यसे।

अथ नन्दश्रीस्तथागतोऽर्हन् सम्यक्सम्बुद्धोनानारत्नमयानां सुवर्णनिर्भासानां सहस्रपत्राणां पद्मानां सहस्रं नन्ददत्ताय बोधिसत्त्वाय महासत्त्वाय प्रादात्। एभिः कुलपुत्र पद्मैस्तं भगवन्तं

शाक्यमुनिं तथागतमर्हन्तं सम्यक्सम्बुद्धमभ्यवकिर । संप्रजजान-
विहारी च कुलपुत्र तत्र बुद्धक्षेत्रे भवेत् तत् कस्य हेतोर्दुराम-
दा हि ते बोधिसत्त्वामहासत्त्वाये तत्र लोकधातावुपपन्नाः मा
तत्र क्षणेथाः ।

अथ नन्ददत्तोबोधिसत्त्वोमहासत्त्वस्तस्य भगवतोनन्दश्रिय-
स्तथागतस्याऽर्हतः सम्यक्सम्बुद्धस्याऽन्तिकात्तानि सुवर्णनिर्भासानि
सहस्रपत्राणि पद्मानि गृहीत्वाऽनेकैर्बोधिसत्त्वकोटीनियुतशतसहस्रैः
सार्द्धं गृहस्थैः प्रव्रजितैश्च दारकदारिकारूपिभिश्च ततो बुद्ध-
क्षेत्रादन्तर्हितः । यावन्त उपरिष्टाद्दिशि बुद्धा भगवन्तस्तिष्ठन्ति
ध्रियन्ते यापयन्ति तान् सर्व्वान् सत्कुर्व्वन् गुरुकुर्व्वन् मानयन्
पूजयन् पुष्पधूपगन्धमाल्यविलेपनचूर्णचीवरछत्रध्वजपताकाभिर्महत्या
बोधिसत्त्वर्द्ध्या महता बोधिसत्त्वानुभावेन । येन भगवांच्छाक्यमुनि-
स्तथागतोऽर्हन् सम्यक्सम्बुद्धस्तेनोपसंक्रान्तः । उपसंक्रम्य भगवतः
पादौ शिरसावन्दित्वा एकान्तेऽस्थात् । एकान्तेऽस्थितोनन्ददत्तो
बोधिसत्त्वोमहासत्त्वोभगवन्तमेतदवोचत् नन्दश्रीर्भगवंस्तथागतोऽर्हन्
सम्यक्सम्बुद्धोभगवतोऽल्पाबाधतां परिपृच्छत्यल्पातङ्कतां लघूत्थानतां
बलञ्च सुखस्पर्शविहारताञ्च । इमानि च तेन भगवता नन्दश्रिया
तथागतेनाऽर्हता सम्यक्सम्बुद्धेन सुवर्णनिर्भासानि सहस्रपत्राणि
पद्मानि प्रहितानि भगवतः पूजाकर्मणे ।

अथ भगवांच्छाक्यमुनिस्तथागतोऽर्हन् सम्यक्सम्बुद्धस्तानि
पद्मानि गृहीत्वा येन ते उपरिष्टाद्दिशि गङ्गानदीवालुकोपमेषु
लोकधातुषु तथागताऽर्हन्तः सम्यक्सम्बुद्धास्तेनाऽक्षेप्सीत् ।

अथ तैः पद्मैस्ते सर्व्वे लोकधातवः स्फुटा अभूवन् । तत्र च पद्मेषु तथागतविग्रहानिषण्णाधर्म्मं देशयन्ति स्म । यदुतेमामेव षट्पारामिता आरभ्य यैश्च सत्त्वैः साधर्म्मदेशनाश्रुता ; ते ; सर्व्वे नियताअभूवन्ननुत्तरायां सम्यक्सम्बोधौ । तेऽपि च बोधिसत्त्वा गृहस्थाः प्रव्रजिता दारकदारिकाश्च स्वकस्वकैः कुशलमूलैर्भगवन्तं शाक्यमुनिं तथागतमर्हन्तं सम्यक्सम्बुद्धं सत्कुर्व्वन्ति स्म गुरूकुर्व्वन्ति स्म मानयन्ति स्म पूजयन्ति स्म ॥

अथ तेन चणलवमूहूर्त्तेनाऽयं त्रिसाहस्रमहासाहस्रोलोकधातुः रत्नमयः संस्थितोऽभूत् विचित्रपुष्पावकीर्णोऽवसक्तपट्टदामकलापोनानागन्धघटिकानिर्धूपितः । कल्पवृचैर्नानालङ्कारफलाग्रविटपैः सर्व्वपुष्पवृचैः फलवृचैर्गन्धवृचैर्माल्यवृचैश्चूर्णवृचैः प्रतिमण्डितः । तद्यथापि नाम पद्मावतीलोकधातुः समन्तकुशुमस्य तथागतस्याऽर्हतः सम्यक्सम्बुद्धस्य बुद्धचेत्रे मञ्जुश्रीः कुमारः प्रतिवसति । सुस्थितमतिश्च देवपुत्रोऽन्ये सुमहोजस्कावोधिसत्त्वा महासत्त्वाः । यदा च भगवानाज्ञासीत् स देवकं लोकं समारकं सब्रह्मकं सश्रमणब्राह्मणीं प्रजां सदेवमानुषासुरां तांश्च बोधिसत्त्वान् महासत्त्वान् भूयस्त्वेन कुमारभूतान् । तदा भगवान् आयुष्मन्तं शारद्वतीपुत्रमामन्त्रयति स्म । इह शारद्वतीपुत्रबोधिसत्त्वेन महासत्त्वेन सर्व्वाकारान् सर्व्वधर्म्मानभिसम्बोद्धुकामेन प्रज्ञापारमितायां योगः करणीयः ।

अथ खल्वायुष्मान्छारद्वतीपुत्रो भगवन्तमेतदवोचत् कथं भगवन् बोधिसत्त्वेन महासत्त्वेन सर्व्वाकारान् सर्व्वधर्म्मानभिसम्बोद्धुकामेन प्रज्ञापारमितायां योगः करणीयः ॥

एवमुक्ते भगवान् आयुष्मन्तं शारद्वतीपुत्रमेतदवोचत् ।
शारद्वतीपुत्र बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां
अस्थानयोगेन दानपारमिता परिपूरयितव्या । परित्या
योगेन देयदायकपरिग्राहकाऽनुपलब्धितामुपादाय । शील रमि
परिपूरयितव्या आपत्त्यना*पत्त्यनध्यापत्तितामुपादाय । न्तिपा
मिता परिपूरयितव्या अक्षोभनतामुपादाय । वीर्य्यपारमिता परि
पूरयितव्या कायचित्तवीर्य्यास्रंसनता†मुपादाय । रमित
परिपूरयितव्या अविक्षेपा(१)शङ्करणता‡मुपादाय । रमित
परिपूरयितव्या सर्व्वधर्म्मानुपलब्धितामुपादाय । प्र रमिताय
शारद्वतीपुत्र स्थित्वा बोधिसत्त्वेन महासत्त्वेन चत्वारि स्मृत्युपस्थाना
नि(२)परिपूरयितव्यानि स्मृत्युपस्थानाऽनुपलब्धितामुपादाय । प्रज्ञा
पारमितायां शारद्वतीपुत्र स्थित्वा बोधिसत्त्वेन महासत्त्वेन चत्वारि
सम्यक्प्रहाणानि परिपूरयितव्यानि सम्यक्प्रहाणानुपलब्धितामु

---

* आपत्त्यनानापत्त्य इति ख, ग, घ, पुस्तके पाठः ।
† भ्रंसनता ख, घ, पाठः ।
‡ ग पुस्तके शङ्करणता इति पाठः । सङ्करणता इति युक्तम् ।

---

(१) व्याधिस्त्यानसंशयप्रमादालस्याविरतिभ्रान्तिदर्शनालब्धभूमिकत्वा
नवस्थितत्वानि चित्तविक्षेपास्तेऽन्तरायाः । पातञ्जलदर्शनसमाधि
पादे ३० सूत्रम् ॥ स्त्यानं अकर्म्मण्यता चित्तस्य अविरतिश्चित्तस्य
विषयसंप्रयोगात्मा गर्द्धः । अलब्धभूमिकत्वं समाधिभूमेरलाभः
अनवस्थितत्वं लब्धायां भूमौ चित्तस्याप्रतिष्ठा । टीका । विक्षेप
भावोऽविक्षेपम् ।

(२) चत्वारि स्मृत्युपस्थानानीति । कायवेदनाचित्तधर्म्माणां स्मृत्युपस्था
नानि चत्वारि ।

हाय। प्रज्ञापारमितायां शारद्वतीपुत्र स्थित्वा बोधिसत्त्वेन महासत्त्वेन चत्वार: ऋद्धिपादा: परिपूरयितव्या: ऋद्धिपादाऽनुपलब्धितामुपादाय। प्रज्ञापारमितायां शारद्वतीपुत्र स्थित्वा बोधिसत्त्वेन महासत्त्वेन पञ्चेन्द्रियाणि परिपूरयितव्यानि इन्द्रियाऽनुपलब्धितामुपादाय। प्रज्ञापारमितायां शारद्वतीपुत्र स्थित्वा बोधिसत्त्वेन महासत्त्वेन पञ्च-बलानि परिपूरयितव्यानि बलाऽनुपलब्धितामुपादाय। प्रज्ञापार-मितायां शारद्वतीपुत्र स्थित्वा बोधिसत्त्वेन महासत्त्वेन सप्तबोध्यङ्गानि परिपूरयितव्यानि बोध्यङ्गाऽनुपलब्धितामुपादाय। प्रज्ञापारमितायां शारद्वतीपुत्र स्थित्वा बोधिसत्त्वेन महासत्त्वेन आर्य्याष्टाङ्गमार्ग: परि-पूरयितव्य: मार्गाऽनुपलब्धितामुपादाय। प्रज्ञापारमितायां शार-द्वतीपुत्र स्थित्वा बोधिसत्त्वेन महासत्त्वेन शून्यतासमाधि: परिपूरयि-तव्य: शून्यताऽनुपलब्धितामुपादाय। प्रज्ञापारमितायां शारद्वतीपुत्र स्थित्वा बोधिसत्त्वेन महासत्त्वेनानिमित्त: समाधि: परिपूरयितव्य: आनिमित्ताऽनुपलब्धितामुपादाय। प्रज्ञापारमितायां शारद्वती-पुत्र स्थित्वा बोधिसत्त्वेन महासत्त्वेनाऽप्रणिहित: परिपूरयितव्य: अप्रणिहिताऽनुपलब्धितामुदाय। प्रज्ञापारमितायां शारद्वतीपुत्र स्थित्वा बोधिसत्त्वेन महासत्त्वेन चत्वारिध्यानानि[१] परिपूरयित-

(१) समापत्तिजातिरूपधातुस्वभावानि चत्वारिध्यानानि तत्रप्रथमं ध्यानं वितर्को विचार: प्रीति: सुखं चित्तैकाग्रतेति पञ्चाङ्गं। द्वितीयं ध्यानमात्मसम्प्रसाद: प्रीति: सुखश्चित्तैकाग्रतेति चतुरङ्गं। तृतीय-मुपेक्षा स्मृति: सम्प्रजन्यं सुखश्चित्तैकाग्रतेति पञ्चाङ्गं। चतुर्थं ध्यानमुपेक्षापरिशुद्धि: स्मृतिरदु:खासुखवेदना चित्तैकाग्रता चेति चतुरङ्गं। इत्यष्टसाहस्रीटीका।

एवमुक्ते भगवान् आयुष्मन्तं शारद्वतीपुत्रमेतदवोचत्। [illegible]
शारद्वतीपुत्र बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां [illegible]
अस्थानयोगेन दानपारमिता परिपूरयितव्या। [illegible]
योगेन देयदायकप्रतिग्राहकाऽनुपलब्धितामुपादाय। शी[illegible]पारमि
परिपूरयितव्या आपत्त्यना*पत्त्यनध्यापत्तितामुपादाय। क्षान्तिपार
मिता परिपूरयितव्या अक्षोभनतामुपादाय। वीर्य्यपारमिता परि
पूरयितव्या कायचित्तवीर्य्यास्रंसनता†मुपादाय। ध्या[illegible]रमि
परिपूरयितव्या अविक्षेपा(१)प्रकरणता‡मुपादाय। [illegible]पारमि
परिपूरयितव्या सर्व्वधर्म्मानुपलब्धितामुपादाय। [illegible]मिताय
शारद्वतीपुत्र स्थित्वा बोधिसत्त्वेन महासत्त्वेन चत्वारिस्मृत्युपस्थाना
नि(२)परिपूरयितव्यानि स्मृत्युपस्थानाऽनुपलब्धितामुपादाय। प्रज्ञा
पारमितायां शारद्वतीपुत्र स्थित्वा बोधिसत्त्वेन महासत्त्वेन चत्वारि
सम्यक्प्रहाणानि परिपूरयितव्यानि सम्यक्प्रहाणानुपलब्धितामुपा

* आपत्त्यनानापत्त्य इति ख, ग, घ, पुस्तके पाठः।
† अंसनता ख, घ, पाठः।
‡ ग पुस्तके प्रक्करणता इति पाठः। सङ्करणता इति युक्तम्।

(१) व्याधिस्त्यानसंशयप्रमादालस्याविरतिभ्रान्तिदर्शनालब्धभूमिकत्वा-नवस्थितत्वानि चित्तविक्षेपास्तेऽन्तरायाः। पातञ्जलदर्शनसमाधि-पादे ३० सूत्रम्॥ स्त्यानं अकर्म्मण्यताचित्तस्य अविरतिश्चित्तस्य विषयसंप्रयोगात्मागर्द्धः। अलब्धभूमिकत्वं समाधिभूमेरलाभः। अनवस्थितत्वं लब्धायां भूमौ चित्तस्याप्रतिष्ठा। टीका। विक्षेपा-भावोऽविक्षेपम्।

(२) चत्वारि स्मृत्युपस्थानानीति। कायवेदनाचित्तधर्म्माणां स्मृत्युपस्था-नानि चत्वारि।

दाय। प्रज्ञापारमितायां शारद्वतीपुत्र स्थित्वा बोधिसत्त्वेन महासत्त्वेन चत्वारः ऋद्धिपादाः परिपूरयितव्याः ऋद्धिपादाऽनुपलब्धितामुपादाय। प्रज्ञापारमितायां शारद्वतीपुत्र स्थित्वा बोधिसत्त्वेन महासत्त्वेन पञ्चेन्द्रियाणि परिपूरयितव्यानि इन्द्रियाऽनुपलब्धितामुपादाय। प्रज्ञापारमितायां शारद्वतीपुत्र स्थित्वा बोधिसत्त्वेन महासत्त्वेन पञ्चबलानि परिपूरयितव्यानि बलाऽनुपलब्धितामुपादाय। प्रज्ञापारमितायां शारद्वतीपुत्र स्थित्वा बोधिसत्त्वेन महासत्त्वेन सप्तबोध्यङ्गानि परिपूरयितव्यानि बोध्यङ्गाऽनुपलब्धितामुपादाय। प्रज्ञापारमितायां शारद्वतीपुत्र स्थित्वा बोधिसत्त्वेन महासत्त्वेन आर्य्याष्टाङ्गमार्गः परिपूरयितव्यः मार्गाऽनुपलब्धितामुपादाय। प्रज्ञापारमितायां शारद्वतीपुत्र स्थित्वा बोधिसत्त्वेन महासत्त्वेन शून्यतासमाधिः परिपूरयितव्यः शून्यताऽनुपलब्धितामुपादाय। प्रज्ञापारमितायां शारद्वतीपुत्र स्थित्वा बोधिसत्त्वेन महासत्त्वेनानिमित्तः समाधिः परिपूरयितव्यः आनिमित्ताऽनुपलब्धितामुपादाय। प्रज्ञापारमितायां शारद्वतीपुत्र स्थित्वा बोधिसत्त्वेन महासत्त्वेनाऽप्रणिहितः परिपूरयितव्यः अप्रणिहिताऽनुपलब्धितामुदाय। प्रज्ञापारमितायां शारद्वतीपुत्र स्थित्वा बोधिसत्त्वेन महासत्त्वेन चत्वारिध्यानानि[1] परिपूरयित-

---

(१) समापत्तिजातिरूपधातुस्वभावानि चत्वारिध्यानानि तत्रप्रथमं ध्यान वितर्को विचारः प्रीतिः सुखं चित्तैकाग्रतेति पञ्चाङ्गं। द्वितीयं ध्यानमात्मसम्प्रसादः प्रीतिः सुखञ्चित्तैकाग्रतेति चतुरङ्गं। तृतीयमुपेक्षा स्मृतिः सम्प्रजन्यं सुखञ्चित्तैकाग्रतेति पञ्चाङ्गं। चतुर्थं ध्यानमुपेक्षापरिशुद्धिः स्मृतिरदुःखासुखवेदना चित्तैकाग्रता चेति चतुरङ्गं। इत्यष्टसाहस्रीटीका।

व्यानि ध्यानाऽनुपलब्धितामुपादाय। प्रज्ञापारमितायां [illegible]
स्थित्वा बोधिसत्त्वेन महासत्त्वेन चत्वार्य्यप्रमाणानि(१) [illegible]
तव्यानि अप्रमाणाऽनुपलब्धितामुपादाय। प्रज्ञापारमितायां [illegible]
द्वतीपुत्र स्थित्वा बोधिसत्त्वेन महासत्त्वेन चतस्रः आरूप्यसमापत्तयः
परिपूरयितव्याः आरूप्याऽनुपलब्धितामुपादाय। [illegible]
शारद्वतीपुत्र स्थित्वा बोधिसत्त्वेन महासत्त्वेन अष्टौ विमोक्षाः [illegible]
पूरयितव्याः विमोक्षाऽनुपलब्धितामुपादाय। [illegible]
शारद्वतीपुत्र स्थित्वा बोधिसत्त्वेन महासत्त्वेन नवा[illegible]
समापत्तिः परिपूरयितव्याः अनुपूर्व्वविहाराऽनुपलब्धितामुपादा[illegible]
प्रज्ञापारमितायां शारद्वतीपुत्र स्थित्वा बोधिसत्त्वेन [illegible]
पञ्चाऽभिज्ञाः परिपूरयितव्याः अभिज्ञाऽनुपलब्धितामुपादाय। प्र[illegible]

---

(१) "चत्वार्य्यप्रमाणानि"। करुणा सर्व्वथाऽधमस्वभावेषु सत्त्वेषु दया[illegible] मुक्तद् [illegible] संयोगवियोगेच्छा मुदिता सम्यक्प्रतिपत्तिषु सत्त्वेषु सौमन[illegible] [illegible] प्रामोद्यं। उपेक्षा तु मित्रामित्रेष्वनुनयप्रतिघविर[illegible] [illegible]प्रमाणानि। इत्यष्टसाहस्रीटीका।

(२) [illegible]

स्थित्वा बोधिसत्त्वेन महासत्त्वेन चक्षुःसंज्ञा भावयितव्या चक्षुषोऽनु-
पलब्धितामुपादाय । प्रज्ञापारमितायां शारद्वतीपुत्र स्थित्वा बोधि-
सत्त्वेन महासत्त्वेन सर्व्वलोकेऽनभिरति[1]संज्ञा भावयितव्या अनभि-
रत्यनुपलब्धितामुपादाय । प्रज्ञापारमितायां शारद्वतीपुत्र स्थित्वा
बोधिसत्त्वेन महासत्त्वेन अविद्यासंज्ञा भावयितव्या अविद्याऽनुप-
लब्धितामुपादाय । प्रज्ञापारमितायां शारद्वतीपुत्र स्थित्वा बोधिसत्त्वेन
महासत्त्वेन दुःखसंज्ञा[2] भावयितव्यं दुःखाऽनुपलब्धितामुपादाय ।
प्रज्ञापारमितायां शारद्वतीपुत्र स्थित्वा बोधिसत्त्वेन महासत्त्वेन
समुदयज्ञानं भावयितव्यं समुदयाऽनुपलब्धितामुपादाय । प्रज्ञापार-

---

(१) सर्व्वलोकः लोकानां वैराग्यस्य धर्मो मतः ॥ धर्मदर्शी ।

(२) बुद्धानां सुगतो देवो विश्वञ्च क्षणभङ्गुरम् ।
आर्य्यसत्त्वाख्यया तत्त्वचतुष्टयमिदं क्रमात् ॥
दुःखमायतनञ्चैव ततः समुदयो मतः ।
मार्गश्चेत्यस्य च व्याख्या क्रमेण श्रूयतामतः ॥
दुःखं संसारिणः स्कन्धास्ते च पञ्च प्रकीर्त्तिताः ।
विज्ञानं वेदना संज्ञा संस्कारो रूपमेव च ॥
पञ्चेन्द्रियाणि शब्दाद्या विषयाः पञ्च मानसम् ।
धर्म्मायतनमेतानि द्वादशायतनानि तु ॥
रागादीनां गणो यस्मात् समुदेति नृणां हृदि ।
आत्मात्मीयस्वभावाख्यः स स्यात् समुदयः पुनः ॥
क्षणिकाः सर्व्वसंस्कारा इति या वासना स्थिरा ।
स मार्ग इति विज्ञेयः स च मोक्षोऽभिधीयते ॥

सर्व्वदर्शनसंग्रहः ।

सत्त्वेन महासत्त्वेन धर्म्मानुस्मृतिर्भावयितव्या धर्म्मानु[illegible]
दाय । प्रज्ञापारमितायां शारद्वतीपुत्र स्थित्वा वोधिसत्त्वेन म[illegible]
सत्त्वेन सङ्घाऽनुस्मृतिर्भावयितव्या सङ्घाऽनुपलब्धितामुपादाय । [illegible]
पारमितायां शारद्वतीपुत्र स्थित्वा वोधिसत्त्वेन महासत्त्वेन त्याग[illegible]
स्मृतिर्भावयितव्या त्यागाऽनुपलब्धितामुपादाय । [illegible]मिता
शारद्वतीपुत्र स्थित्वा वोधिसत्त्वेन महासत्त्वेन देवताऽ[illegible]स्मृ[illegible]र्भा[illegible]
तव्या देवताऽनुपलब्धितामुपादाय । प्रज्ञापारमितायां शारद्वती
पुत्र स्थित्वा वोधिसत्त्वेन महासत्त्वेन [illegible]ऽनुस्मृति[illegible]र्भावयि[illegible]
आनापानाऽनुपलब्धितामुपादाय । प्रज्ञापारमितायां [illegible]रद्वती[illegible]
स्थित्वा वोधिसत्त्वेन महासत्त्वेन उद्वेगाऽनुस्मृतिर्भावयितव्या उद्वेगा
ऽनुपलब्धितामुपादाय । प्रज्ञापारमितायां शारद्वतीपुत्र स्थित
वोधिसत्त्वेन महासत्त्वेन मरणाऽनुस्मृतिर्भावयितव्या मरणाऽनुप
लब्धितामुपादाय । प्रज्ञापारमितायां शारद्वतीपुत्र स्थित्वा वोधि
सत्त्वेन महासत्त्वेन कायगताऽनुस्मृतिर्भावयितव्या कायाऽनुपलब्धिता
मुपादाय । प्रज्ञापारमितायां शारद्वतीपुत्र स्थित्वा वो[illegible]
महासत्त्वेन अनित्यसंज्ञाभावयितव्या अनित्याऽनुपलब्धितामुपादाय
प्रज्ञापारमितायां शारद्वतीपुत्र स्थित्वा वोधिसत्त्वेन महासत्त्वेन दु[illegible]
संज्ञा भावयितव्या दुःखाऽनुपलब्धितामुपादाय । प्रज्ञापारमिता
शारद्वतीपुत्र स्थित्वा वोधिसत्त्वेन महासत्त्वेन अनात्मसंज्ञाभावयित
अनात्माऽनुपलब्धितामुपादाय । प्रज्ञापारमितायां शारद्वती

* एष एव पाठः ५ पुस्तके ।

स्थिता बोधिसत्त्वेन महासत्त्वेन अशुभसंज्ञाभावयितव्या अशुभाऽनु-
पलब्धितामुपादाय । प्रज्ञापारमितायां शारद्वतीपुत्र स्थिता बोधि-
सत्त्वेन महासत्त्वेन सर्व्वलोकाऽनभिर(१)तिसंज्ञाभावयितव्या अनभि-
रत्यनुपलब्धितामुपादाय । प्रज्ञापारमितायां शारद्वतीपुत्र स्थिता
बोधिसत्त्वेन महासत्त्वेन अविद्यासंज्ञाभावयितव्या अविद्याऽनुप-
लब्धितामुपादाय। प्रज्ञापारमितायां शारद्वतीपुत्र स्थिता बोधिसत्त्वेन
महासत्त्वेन दुःखसंज्ञानं(२) भावयितव्यं दुःखाऽनुपलब्धितामुपादाय।
प्रज्ञापारमितायां शारद्वतीपुत्र स्थिता बोधिसत्त्वेन महासत्त्वेन
समुदयज्ञानं भावयितव्यं समुदयाऽनुपलब्धितामुपादाय। प्रज्ञापार-

---

(१) ब्रह्मलोकतृणीकारो वैराग्यस्य परो मतः ॥ पञ्चदशी ।

(२) बुद्धानां सुगतो देवो विश्वञ्च क्षणभङ्गुरम् ।
आर्य्यसत्त्वाख्यया तत्त्वचतुष्टयमिदं क्रमात् ॥
दुःखमायतनञ्चैव ततः समुदयो मतः ।
मार्गश्चेत्यस्य च व्याख्या क्रमेण श्रूयतामतः ॥
दुःखं संसारिणः स्कन्धास्ते च पञ्चप्रकीर्त्तिताः ।
विज्ञानं वेदना संज्ञा संस्कारो रूपमेव च ॥
पञ्चेन्द्रियाणि शब्दाद्या विषयाः पञ्च मानसम् ।
धर्म्मायतनमेतानि द्वादशायतनानि तु ॥
रागादीनां गणो यस्मात् समुदेति नृणां हृदि ।
आत्मात्मीय स्वभावाख्यः स स्यात् समुदयः पुनः ॥
क्षणिकाः सर्व्वसंस्काराः इति या वासना स्थिरा ।
स मार्ग इति विज्ञेयः स च मोक्षोऽभिधीयते ॥

सर्व्वदर्शनसंग्रहः ।

...त्त्वेन महासत्त्वेन सर्वेन्द्रियध्यानानि(१) परिपूरयितव्यानि सर्वे-न्द्रियध्यानान्यनुपलब्धितामुपादाय। प्रज्ञापारमितायां शार-द्वतीपुत्र स्थित्वा बोधिसत्त्वेन महासत्त्वेन विद्यो(२)ऽविद्याः परिपूरयि-तव्याः अविद्याऽनुपलब्धितामुपादाय। प्रज्ञापारमितायां शारद्वती-पुत्र स्थित्वा बोधिसत्त्वेन महासत्त्वेन चतस्रः प्रतिसंविदः परि-पूरयितव्याः प्रतिसंविदो†ऽनुपलब्धितामुपादाय। प्रज्ञापारमितायां शारद्वतीपुत्र स्थित्वा बोधिसत्त्वेन महासत्त्वेन चत्वारि वैशारद्यानि(३) परिपूरयितव्यानि वैशारद्यानुपलब्धितामुपादाय। प्रज्ञापारमि-तायां शारद्वतीपुत्र स्थित्वा बोधिसत्त्वेन महासत्त्वेन अच्युताः पञ्चाऽ-भिज्ञाः परिपूरयितव्याः अच्युताऽनुपलब्धितामुपादाय। प्रज्ञापार-मितायां शारद्वतीपुत्र स्थित्वा बोधिसत्त्वेन महासत्त्वेन षट्पारमिताः

(१) पञ्चज्ञादिशब्दार्थोद्दिष्टं भगवद्यैः ध्यवहृताः। अन्येऽप्यष्टाङ्गयोगोपदेशे- मोक्ताः। यथाभासते। यज्ञतत्त्वावत् पश्यता तिष्ठता भिक्षु बोधधारणायुपयोगः। इति।

(२) पातञ्जले चतस्रोऽविद्या उक्ताः यथा। अनित्याशुचिदुःखानात्मसु नित्यशुचिसुखात्मख्यातिरविद्या। साधनपादे ५ सूत्रम्।

(३) निर्विचारवैशारद्येऽध्यात्मप्रसादः। तथा समाधिपादे ४७ सूत्रम्। अशुद्ध्यावरणमलापेतस्य प्रकाशात्मनो बुद्धिसत्त्वस्य रजस्तमोभ्या- मनभिभूतः स्वच्छः स्थितिप्रवाहो वैशारद्यमिति भाष्यं। रजस्तमो- रूपयोऽशुद्धिः सैवावरणमलस्तस्मादपेतस्य प्रकाशात्मनः स्वप्रकाशस्वभावस्य बुद्धिसत्त्वस्य॥ इति टीका।

* शुभस्य इति ख, ग, पाठः।

† प्रतिसंविदनुपलब्धितामिति युक्तः पाठः।

परिपूरयितव्याः षडभिज्ञाऽनुपलब्धितामुपादाय। प्रज्ञापार-
मितायां शारद्वतीपुत्र स्थित्वा बोधिसत्त्वेन महासत्त्वेन पञ्चचक्षूंषि
परिपूरयितव्यानि चक्षुरनुपलब्धितामुपादाय। प्रज्ञापारमिता-
शारद्वतीपुत्र स्थित्वा बोधिसत्त्वेन महासत्त्वेनाष्टौ विमोक्षाः
परिपूरयितव्याः विमोक्षोऽनुपलब्धितामुपादाय। प्रज्ञापारमिताया
शारद्वतीपुत्र स्थित्वा बोधिसत्त्वेन महासत्त्वेन समापत्तयः परि-
पूरयितव्याः समापत्त्यनुपलब्धितामुपादाय। प्रज्ञापारमिताया
शारद्वतीपुत्र स्थित्वा बोधिसत्त्वेन महासत्त्वेन दशबलानि परिपूर-
यितव्यानि बलाऽनुपलब्धितामुपादाय। प्रज्ञापारमितायां शारद्वती-
पुत्र स्थित्वा बोधिसत्त्वेन महासत्त्वेनाऽष्टादशावेणिकबुद्धधर्माः परि-
पूरयितव्याः आवेणिकबुद्धधर्माऽनुपलब्धितामुपादाय। प्रज्ञापार-
मितायां शारद्वतीपुत्र स्थित्वा बोधिसत्त्वेन महासत्त्वेन महामैत्री
परिपूरयितव्या महामैत्र्यनुपलब्धितामुपादाय। प्रज्ञापारमितायां
शारद्वतीपुत्र स्थित्वा बोधिसत्त्वेन महासत्त्वेन महाकरुणापरिपूरयि-
तव्या महाकरुणाऽनुपलब्धितामुपादाय। प्रज्ञापारमितायां शार-
द्वतीपुत्र स्थित्वा बोधिसत्त्वेन महासत्त्वेन महामुदितापरिपूरयितव्या
महामुदिताऽनुपलब्धितामुपादाय। प्रज्ञापारमितायां शारद्वती-
पुत्र स्थित्वा बोधिसत्त्वेन महासत्त्वेन महोपेक्षापरिपूरयितव्या महो-

(१) मैत्रीकरुणामुदितोपेक्षाणां सुखदुःखपुण्यापुण्यविषयानां भावना-
तश्चित्तप्रसादनम्॥ तथा समाधिपादे ३३ सूत्रम्।
तत्र सर्व्वप्राणिषु सुखसम्भोगापन्नेषु मैत्रीं भावायत्। दुःखितेषु
करुणां पुण्यात्मकेषु मुदितां अपुण्यात्मकेषूपेक्षामिति भाष्यम्॥

पेक्षाऽनुपलब्धितामुपादाय । प्रज्ञापारमितायां शारद्वतीपुत्र स्थित्वा बोधिसत्त्वेन महासत्त्वेन सर्व्वाऽऽकारवरोपेतं सर्व्वज्ञज्ञानमभिसम्बोद्धुकामेन बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां योगः करणीयः। मार्गाऽऽकारज्ञतां परिज्ञातुकामेन बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां योगः करणीयः। सर्व्वज्ञतां परिपूरयितुकामेन बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां योगः करणीयः। सर्व्वसत्त्वचित्तचरितज्ञानाऽऽकारतां परिपूरयितुकामेन बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां योगः करणीयः। सर्व्ववासनाऽनुसन्धिक्लेशान् प्रहातुकामेन बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां योगः करणीयः। एवं हि शारद्वतीपुत्र बोधिसत्त्वेन महासत्त्वेन। प्रज्ञापारमितायां शिक्षितव्यं। बोधिसत्त्वन्यामं* शारद्वतीपुत्रावक्रमितु† कामेन बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां शिक्षितव्यं। श्रावकभूमिप्रत्येकबुद्धभूमीप्रज्ञातुकामेन ते च भूमी अतिक्रमितुकामेन बोधिसत्त्वेनमहासत्त्वेन प्रज्ञापारमितायां शिक्षितव्यं। अवैवर्त्तिकभूमौस्थातुकामेन बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां शिक्षितव्यं। षडभिज्ञतायां(१) स्थातुकामेन बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां शिक्षितव्यं। सर्व्वसत्त्वचित्तचरितविस्पन्दितानि ज्ञातुकामेन बोधिसत्त्वेन महासत्त्वेन प्रज्ञापार-

* एष पाठः ५ पुस्तके।

† क्रमितु इति च पुस्तके पाठः।

(१) ऋद्धिर्दिव्यचक्षुर्दिव्यश्रोत्रं परचित्तज्ञानं पूर्व्वनिवासाऽनुस्मृतिराश्रवक्षयज्ञानमिति षडभिज्ञाः। इत्यष्टसाहस्रीटीका।

मितायां शिक्षितव्यं। सर्व्वश्रावकप्रत्येकबुद्धानां [illegible]
कामेन बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां शिक्षितव्यं
धारणीमुखसमाधिमुखानि प्रतिलब्धुकामेन बोधिसत्त्वेन म[illegible]
प्रज्ञापारमितायां शिक्षितव्यं। [illegible]श्रावकप्रत्येकबुद्धयानि[illegible]
कुलपुत्राणां कुलदुहितृणाञ्च दानं ददतां एकाऽनु[illegible]
गतेन चित्तोत्पादेन सर्व्वतत्कुशलमूलमभिभवितुकामेन बोधिसत्त्वेन
महासत्त्वेन प्रज्ञापारमितायां शिक्षितव्यं। सर्व्वश्रावकप्रत्येकबुद्धया-
निकानां कुलपुत्राणां कुलदुहितृणाञ्च शीलं रक्षतां एकाऽनु-
मोदनासहगतेन चित्तोत्पादेन सर्व्वतत्कुशलमूलमभिभवितुकामेन
बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां शिक्षितव्यं। सर्व्वश्रावक-
प्रत्येकबुद्धयानिकानां कुलपुत्राणां कुलदुहितृणाञ्च क्षान्तिं भाव-
यतामेकाऽनुमोदनासहगतेन चित्तोत्पादेन सर्व्वतत्कुशलमूलमभि-
भवितुकामेन प्रज्ञापारमितायां शिक्षितव्यं। सर्व्वश्रावकप्रत्येकबुद्ध-
यानिकानां कुलपुत्राणां कुलदुहितृणाञ्च वीर्य्यमारभ्यतामेकाऽनु-
मोदनासहगतेन चित्तोत्पादेन सर्व्वतत्कुशलमूलमभिभवितुका-
मेन बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां शिक्षितव्यं। सर्व्व-
श्रावकप्रत्येकबुद्धयानिकानां कुलपुत्राणां कुलदुहितृणाञ्च ध्यानं
समापद्यतामेकाऽनुमोदनासहगतेन चित्तोत्पादेन सर्व्वतत्कुशल-
मूलमभिभवितुकामेन बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमिता
शिक्षितव्यं। सर्व्वश्रावकप्रत्येकबुद्धयानिकानां कुलपुत्राणां कु

* पारमिता क, ख, ग, घ पाठः।

हितृणाञ्च[१] प्रज्ञां भावयतामेकाऽनुमोदनासहगतेन चित्तोत्पादेन सर्व्वं तत्कुशलमूलमभिभवितुकामेन वोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां शिचितव्यं। सर्व्वश्रावकप्रत्येकबुद्धानां शीलसमाधिप्रज्ञाविमुक्तिज्ञानदर्शनमेकाऽनुमोदनासहगतेन चित्तोत्पादेनाऽभिभवितुकामेन वोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां शिचितव्यं। सर्व्वश्रावकप्रत्येकवुद्धानां ध्यानविमोचसमापत्ती एकाऽनुमोदनासहगतेन चित्तोत्पादेनाऽभिभवितुकामेन वोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां शिचितव्यं। अल्पं दानं ददतः सर्व्वसत्त्वेभ्यः उपायकौशलपरिनामनायोगेन सर्व्वाऽऽकारज्ञतायां कथमप्रमेयाऽसंख्येयाऽपरिमाणं भवेदिति वोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां शिचितव्यं। अल्पं शीलं रचतः सर्व्वसत्त्वेभ्यः उपायकौशलपरिनामनायोगेन सर्व्वाऽऽकारज्ञतायां कथमप्रमेयाऽसंख्येयाऽपरिमाणं भवेदिति वोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां शिचितव्यं। अल्पं चान्तिं भावयतः सर्व्वसत्त्वेभ्यः उपायकौशलपरिनामनायोगेन सर्व्वाऽऽकारज्ञतायां कथमप्रमेयाऽसंख्येयाऽपरिमाणं भवेदिति वोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां शिचितव्यं। अल्पं वीर्य्यमारभमानः सर्व्वसत्त्वेभ्यः उपायकौशलपरिनामनायोगेन सर्व्वाऽऽकारज्ञतायां कथमप्रेयाऽसंख्येयाऽपरिमाणं भवेदिति वोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां शिचितव्यं। अल्पं ध्यानं समापद्यतः सर्व्वसत्त्वेभ्यः उपायकौशलपरिनामनायोगेन सर्व्वाऽऽकारज्ञ-

(१) कुलपुत्रः कुलदुहितेति शब्दः पूज्यावचनः। स्त्रीपुरुषयोरुपादानं पञ्चोद्घतनुष्काद्दीनामधिगमनिरासज्ञापनार्थं।

तायां कथमप्रमेयाऽसंख्येयाऽपरिमाणं भवेदिति प्रज्ञापारमितायां शिक्षितव्यं। अल्पप्रज्ञां भावयतः सर्व्वसत्त्वेभ्यः उपायकौशल्येन नायोगेन सर्व्वाऽऽकारज्ञतायां कथमप्रमेयाऽसंख्येयाऽपरिमाणं भवेदिति बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां शिक्षितव्यं। पुनरपरं शारद्वतीपुत्र बोधिसत्त्वेन महासत्त्वेन दानपारमितायां चरितुकामेन दानपारमितां परिपूरयितुकामेन प्रज्ञापारमितायां शिक्षितव्यं। पुनरपरं शारद्वतीपुत्र बोधिसत्त्वेन महासत्त्वेन शीलपारमितायां चरितुकामेन शीलपारमितां परिपूरयितुकामेन प्रज्ञापारमितायां शिक्षितव्यं। पुनरपरं शारद्वतीपुत्र बोधिसत्त्वेन महासत्त्वेन क्षान्तिपारमितायां चरितुकामेन क्षान्तिपारमितां परिपूरयितुकामेन प्रज्ञापारमितायां शिक्षितव्यं। पुनरपरं शारद्वतीपुत्र बोधिसत्त्वेन महासत्त्वेन वीर्य्यपारमितायां चरितुकामेन वीर्य्यपारमितां परिपूरयितुकामेन प्रज्ञापारमितायां शिक्षितव्यं। पुनरपरं शारद्वतीपुत्र बोधिसत्त्वेन महासत्त्वेन ध्यानपारमितायां चरितुकामेन ध्यानपारमितां परिपूरयितुकामेन प्रज्ञापारमितायां शिक्षितव्यं। पुनरपरं शारद्वतीपुत्र बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां चरितुकामेन प्रज्ञापारमितां परिपूरयितुकामेन प्रज्ञापारमितायां शिक्षितव्यं। पुनरपरं शारद्वतीपुत्र बोधिसत्त्वेन महासत्त्वेन एवं चित्तमुत्पादयितव्यं। कथं मे सर्व्वजातौ बुद्धविग्रहदर्शनं भवेत्। बुद्धसमन्वाहारो बुद्धानिरोधनं बुद्धपरिग्रहं भवेदिति प्रज्ञापारमितायां शिक्षितव्यं। पुनरपरं शारद्वतीपुत्र बोधिसत्त्वेन महासत्त्वेन बुद्धकायं परिनिष्पादयितुकामेन प्रज्ञापारमितायां शिक्षितव्यं। पुनरपरं शार-

तीपुत्र बोधिसत्त्वेन महासत्त्वेन द्वात्रिंशतो महापुरुषलक्षणानि प्रतिलब्धुकामेन प्रज्ञापारमितायां शिक्षितव्यं । पुनरपरं शारद्वतीपुत्र बोधिसत्त्वेन महासत्त्वेनाऽशीतिमनुव्यञ्जनानि प्रतिलब्धुकामेन प्रज्ञापारमितायां शिक्षितव्यं । पुनरपरं शारद्वतीपुत्र बोधिसत्त्वेन महासत्त्वेन सर्व्वत्र जातौ जातिस्मरतां प्रतिलब्धुकामेन प्रज्ञापारमितायां शिक्षितव्यं । पुनरपरं शारद्वतीपुत्र बोधिसत्त्वेन महासत्त्वेन बोधिचित्ताऽपरिभ्रमाशतां* प्रतिलब्धुकामेन प्रज्ञापारमितायां शिक्षितव्यं । पुनरपरं शारद्वतीपुत्र बोधिसत्त्वेन महासत्त्वेन सर्व्वबोधिसत्त्वचर्य्याऽसम्प्रमोषतां प्रतिलब्धुकामेन प्रज्ञापारमितायां शिक्षितव्यं । पुनरपरं शारद्वतीपुत्र बोधिसत्त्वेन महासत्त्वेन सर्व्वपापमित्रपापसहायान् विवर्जितुकामेन प्रज्ञापारमितायां शिक्षितव्यं । पुनरपरं शारद्वतीपुत्र बोधिसत्त्वेन महासत्त्वेन सर्व्वबुद्ध बोधिसत्त्वकल्याणमित्राण्याराधायितुकामेन प्रज्ञापारमितायां शिक्षितव्यं । पुनरपरं शारद्वतीपुत्र बोधिसत्त्वेन महासत्त्वेन सर्व्वमारकायिकादेवताविज्ञातुकामेन प्रज्ञापारमितायां शिक्षितव्यं । पुनरपरं शारद्वतीपुत्र बोधिसत्त्वेन महासत्त्वेन सर्व्वाऽऽवरणीयानि विशोधयितुकामेन प्रज्ञापारमितायां शिक्षितव्यं । पुनरपरं शारद्वतीपुत्र बोधिसत्त्वेन महासत्त्वेन सर्व्वधर्म्माऽनावरणतां प्रतिलब्धुकामेन प्रज्ञापारमितायां शिक्षितव्यं । पुनरपरं शारद्वतीपुत्र बोधिसत्त्वेन महासत्त्वेन बोधिसत्त्वकुलं परिनिष्पादयितुकामेन प्रज्ञापारमि-

---

* बोधिचित्तारिप्रमाणाशतामिति ख, घ पुस्तके पाठः । बोधिचित्तारिप्रयाशतामिति ग पुस्तके पाठः ।

तायां शिक्षितव्यं । पुनरपरं शारद्वतीपुत्र बोधिसत्त्वेन
बुद्धकुलमारागयितुकामेन प्रज्ञापारमितायां शिक्षितव्यं । ५
शारद्वतीपुत्र बोधिसत्त्वेन महासत्त्वेन चिरत्नवंशाऽनुपच्छेदाय
कामेन प्रज्ञापारमितायां शिक्षितव्यं । पुनरपरं
बोधिसत्त्वेन महासत्त्वेन कुमारभूमिमनुप्राप्तुकामेन
तायां शिक्षितव्यं । पुनरपरं शारद्वतीपुत्र बोधिसत्त्वेन
बुद्धबोधिसत्त्वैरविरहितेन भवितुकामेन प्रज्ञापारमितायां शिक्षि
तव्यं । [*पुनरपरं शारद्वतीपुत्र बोधिसत्त्वेन महासत्त्वेन बोधिसत्त्व
भूमिमतिक्रमितुकामेन प्रज्ञापारमितायां शिक्षितव्यं ।] पुनरपरं
शारद्वतीपुत्र बोधिसत्त्वेन महासत्त्वेन क्षिप्रन्तथागतभूमिं परिपूर
यितुकामेन प्रज्ञापारमितायां शिक्षितव्यं । पुनरपरं शारद्वतीपु
बोधिसत्त्वेन महासत्त्वेन यैर्यैः कुशलमूलैर्यैर्यैराकारैराकाङ्क्षेत सर्व
बुद्धान् भगवतः सत्कर्त्तुं गुरुकर्त्तुं मानयितुं पूजयितुं । तानि
मे कुशलमूलानि तथाकाराः समृध्येयुरितिप्रज्ञापारमिताया
शिक्षितव्यं । पुनरपरं शारद्वतीपुत्र बोधिसत्त्वेन महासत्त्वेन सर्व
सत्त्वान् सन्तोषयितुकामेन प्रज्ञापारमितायां शिक्षितव्यं । [पुन
रपरं शारद्वतीपुत्र बोधिसत्त्वेन महासत्त्वेन सर्व्वसत्त्वानामाशा
परिपूरयितुकामेन प्रज्ञापारमितायां शिक्षितव्यं ।] पुनरपरं
शारद्वतीपुत्र बोधिसत्त्वेन महासत्त्वेन सर्व्वसत्त्वानामाशाः परि
पूरयितुकामेन प्रज्ञापारमितायां शिक्षितव्यं । अन्नपानवस्त्रयान

* [illegible] पाठः ख, ग, घ पुस्तकेषु नास्ति ।
[illegible] पाठः ङ पुस्तके नास्ति ।

...स्तरणपुष्पधूपगन्धमाल्यविलेपनशयनाऽऽसनोपाश्रयग्लानप्रत्ययभैष-
ज्यपरिष्कारैः धनधान्याऽलङ्काररत्नमुक्तावैदूर्यशङ्खशिलाप्रवालजात-
रूपरजतोपमराज्यादिभिः सर्वोपकरणोपभोगैः सर्वसत्त्वान् सन्त-
र्पयितुकामेन बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां योगः
करणीयः । पुनरपरं शारद्वतीपुत्र बोधिसत्त्वेन महासत्त्वेन धर्म-
धातुपरमाणोरे आकाशधातुपर्य्यवसाने सर्व्वसत्त्वान् महायाने
समादापयितुकामेन दानपारमितायां प्रतिष्ठापयितुकामेन शील-
पारमितायां प्रतिष्ठापयितुकामेन क्षान्तिपारमितायां प्रतिष्ठाप-
यितुकामेन वीर्य्यपारमितायां प्रतिष्ठापयितुकामेन ध्यानपारमि-
तायां प्रतिष्ठापयितुकामेन प्रज्ञापारमितायां प्रतिष्ठापयितुकामेन
प्रज्ञापारमितायां शिक्षितव्यं । पुनरपरं शारद्वतीपुत्र बोधिसत्त्वेन
महासत्त्वेनैकमपि कुशलचित्तोत्पादमक्षयं कर्त्तुकामेन बोधि-
सत्त्वोपनिषदनात् बोधिसत्त्वेन महासत्त्वेन* प्रज्ञापारमितायां
शिक्षितव्यं । पुनरपरं शारद्वतीपुत्र बोधिसत्त्वेन महासत्त्वेन ये
पूर्व्वस्यान्दिशि गङ्गानदीवालुकोपमेषु लोकधातुषु बुद्धाभगवन्तस्ते
मे वर्णं भाषेरन्निति बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां
शिक्षितव्यं । ये दक्षिणस्यान्दिशि गङ्गानदीवालुकोपमेषु लोक-
धातुषु बुद्धाभगवन्तस्ते मे वर्णं भाषेरन्निति बोधिसत्त्वेन महा-
सत्त्वेन प्रज्ञापारमितायां शिक्षितव्यं । ये पश्चिमायान्दिशि गङ्गा-
नदीवालुकोपमेषु लोकधातुषु बुद्धाभगवन्तस्ते मे वर्णं भाषेरन्निति
बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां शिक्षितव्यं । ये उत्तर-

* बोधिसत्त्वेन महासत्त्वेनेति द्विः पाठः कपुस्तके । ख,ग, घपुस्तके च ।

स्यान्दिशि गङ्गानदीवालुकोपमेषु लोकधातुषु बुद्धाभगवन्तस्ते
वर्णं भाषेरन्निति बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां [illegible]
तव्यं। ये उत्तरपूर्व्वस्यान्दिशि गङ्गानदीवालुकोपमेषु [illegible]
बुद्धाभगवन्तस्ते मे वर्णं भाषेरन्निति बोधिसत्त्वेन महासत्त्वेन प्र[illegible]
पारमितायां शिक्षितव्यं। ये पूर्व्वदक्षिणस्यान्दिशि [illegible] नदी[illegible]
कोपमेषु लोकधातुषु बुद्धाभगवन्तस्ते मे वर्णं भाषेरन्निति बो[illegible]
सत्त्वेन महासत्त्वेन प्रज्ञापारमितायां शिक्षितव्यं। ये दक्षि[illegible]
यान्दिशि गङ्गानदीवालुकोपमेषु लोकधातुषु बुद्धाभगवन्तस्ते मे
भाषेरन्निति बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां शिक्षित[illegible]
ये पश्चिमोत्तरस्यान्दिशि गङ्गानदीवालुकोपमेषु लोकधातुषु बुद्धा
भगवन्तस्ते मे वर्णं भाषेरन्निति बोधिसत्त्वेन महासत्त्वेन प्रज्ञा
पारमितायां शिक्षितव्यं। येऽधस्ताद्दिशि गङ्गानदीवालुकोपमे[illegible]
लोकधातुषु बुद्धाभगवन्तस्ते मे वर्णं भाषेरन्निति बोधिसत्त्वेन महा
सत्त्वेन प्रज्ञापारमितायां शिक्षितव्यं। ये उपरिष्टाद्दिशि गङ्गानदी
वालुकोपमेषु लोकधातुषु बुद्धाभगवन्तस्ते मे वर्णं भाषेरन्निति प्रज्ञा
पारमितायां शिक्षितव्यं। पुनरपरं शारद्वतीपुत्र यानि पूर्व्व[illegible]
दिशि गङ्गानदीवालुकोपमानि बुद्धक्षेत्राणि तानि सत्त्वापेक्ष[illegible]
[illegible]पादनोपसंक्रमितुकामेन बोधिसत्त्वेन महासत्त्वेन प्रज्ञापार[illegible]
[illegible] शिक्षितव्यं। यानि दक्षिणस्यान्दिशि गङ्गानदीवालुकोपमा[illegible]
[illegible] तानि सत्त्वापेक्षचित्तोत्पादनोपसंक्रमितुकामेन बोधि[illegible]
[illegible] महासत्त्वेन प्रज्ञापारमितायां शिक्षितव्यं। यानि पश्चिमाया[illegible]
[illegible] गङ्गानदीवालुकोपमानि बुद्धक्षेत्राणि तानि सत्त्वापेक्ष[illegible]

पादेनोपसंक्रमितुकामेन बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां शिक्षितव्यं । यान्युत्तरस्यां दिशि गङ्गानदीवालुकोपमानि बुद्धक्षेत्राणि तानि सर्व्वाण्येकचित्तोत्पादेनोपसंक्रमितुकामेन बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां शिक्षितव्यं । यान्युत्तरपूर्व्वस्यां दिशि गङ्गानदीवालुकोपमानि बुद्धक्षेत्राणि तानि सर्व्वाण्येकचित्तोत्पादेनोपसंक्रमितुकामेन बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां शिक्षितव्यं । यानि पूर्व्वदक्षिणस्यां दिशि गङ्गानदीवालुकोपमानि बुद्धक्षेत्राणि तानि सर्व्वाण्येकचित्तोत्पादेनोपसंक्रमितुकामेन बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां शिक्षितव्यं । यानि दक्षिणपश्चिमायां दिशि गङ्गानदीवालुकोपमानि बुद्धक्षेत्राणि तानि सर्व्वाण्येकचित्तोत्पादेनोपसंक्रमितुकामेन बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां शिक्षितव्यं । यानि पश्चिमोत्तरस्यां दिशि गङ्गानदीवालुकोपमानि बुद्धक्षेत्राणि तानि सर्व्वाण्येकचित्तोत्पादेनोपसंक्रमितुकामेन बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां शिक्षितव्यं । यान्यधस्ताद्दिशि गङ्गानदीवालुकोपमानि बुद्धक्षेत्राणि तानि सर्व्वाण्येकचित्तोत्पादेनोपसंक्रमितुकामेन बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां शिक्षितव्यं । यान्युपरिष्टाद्दिशि गङ्गानदीवालुकोपमानि बुद्धक्षेत्राणि तानि सर्व्वाण्येकचित्तोत्पादेनोपसंक्रमितुकामेन बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां शिक्षितव्यं । पुनरपरं शारद्वतीपुत्र यानि पूर्व्वस्यां दिशि गङ्गानदीवालुकोपमानि बुद्धक्षेत्राणि तानि सर्व्वाण्येकस्वरघोषेण विज्ञापयितुकामेन बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां शिक्षितव्यं । यानि दक्षिणस्यां दिशि गङ्गानदीवा-

लुकोपमानि बुद्धक्षेत्राणि तानि सर्व्वाण्येकस्वरघोषेण विज्ञाप कामेन बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां शिक्षि यानि पश्चिमायां दिशि गङ्गानदीवालुकोपमानि बुद्धक्षेत्राणि सर्व्वाण्येकस्वरघोषेण विज्ञापयितुकामेन बोधिसत्त्वेन प्रज्ञापारमितायां शिक्षितव्यं। यान्युत्तरस्यां दिशि गङ्गानदीवा पमानि बुद्धक्षेत्राणि तानि सर्व्वाण्येकस्वरघोषेण विज्ञापयि बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां शिक्षितव्यं। यान्यु पूर्व्वस्यां दिशि गङ्गानदीवालुकोपमानि बुद्धक्षेत्राणि तानि स्वरघोषेण विज्ञापयितुकामेन बोधिसत्त्वेन महासत्त्वेन प्रज्ञापार तायां शिक्षितव्यं। यानि पूर्व्वदक्षिणस्यां दिशि गङ्गानदीवा मानि बुद्धक्षेत्राणि तानि सर्व्वाण्येकस्वरघोषेण विज्ञापयितु बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां शिक्षितव्यं। यानि क्षिणपश्चिमायां दिशि गङ्गानदीवालुकोपमानि बुद्धक्षेत्राणि ता सर्व्वाण्येकस्वरघोषेण विज्ञापयितुकामेन बोधिसत्त्वेन मह प्रज्ञापारमितायां शिक्षितव्यं। यानि पश्चिमोत्तरस्यां दिशि दीवालुकोपमानि बुद्धक्षेत्राणि तानि सर्व्वाण्येकस्वरघोषेण पयितुकामेन बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां शि तव्यं। यान्यधस्ताद्दिशि गङ्गानदीवालुकोपमानि बुद्धक्षेत्राणि सर्व्वाण्येकस्वरघोषेण विज्ञापयितुकामेन बोधिसत्त्वेन प्रज्ञापारमितायां शिक्षितव्यं। यान्युपरिष्टाद्दिशि गङ्गा कोपमानि बुद्धक्षेत्राणि तानि सर्व्वाण्येकस्वरघोषेण विज्ञा मेन बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां शिक्षितव्यं।

रपरं शारद्वतीपुत्र बुद्धोत्पादाऽनुपच्छेदाय* स्थातुकामेन बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां शिक्षितव्यं। पुनरपरं शारद्वतीपुत्र बोधिसत्त्वकुलरक्षितुकामेन बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां शिक्षितव्यं। पुनरपरं शारद्वतीपुत्र बुद्धवंशाऽनुपच्छेदायस्थातुकामेन बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां शिक्षितव्यं। पुनरपरं शारद्वतीपुत्र अध्यात्मशून्यतायां[१] स्थातुकामेन बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां शिक्षितव्यं। बहिर्द्धाशून्यतायां[२] स्थातुकामेन बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां शिक्षितव्यं। अध्यात्मबहिर्द्धाशून्यतायां[३] स्थातुकामेन बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां शिक्षितव्यं। शून्यताशून्यतायां[४] स्थातुकामेन बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां शिक्षितव्यं। महा-

---

* बुद्धोत्पादाय स्थातुकामेन च पुस्तके पाठः।

---

(१) आध्यात्मिकानां चक्षुरादीनामकूटस्थविनाशितामप्रकृतिमुपादायाध्यात्मशून्यता॥

(२) बाह्यानां रूपादीनां तथा प्रकृतिमुपादाय बहिर्धा शून्यता॥

(३) आध्यात्मिकबाह्यानामायतनानान्तथाप्रकृतिमुपादायाध्यात्मबहिर्धाशून्यता॥ तत्राध्यात्मिकमायतनं यदिन्द्रियरूपं संगृहीतं। बाह्यञ्च यद्विषयरूपं संगृहीतं। तद्धि आध्यात्मिकस्य चित्तेनापात्तत्वाद्बाह्येन्द्रियसंगृहीतत्वात् एतञ्च शून्यताद्वयमधिमुक्तिचर्य्याभूमौ॥

(४) सर्व्वधर्म्मशून्यताया अध्यात्मादिशून्यताया आलम्बनज्ञानस्वभावाया अपि शून्यत्वेन शून्यताशून्यता॥

शून्यतायां[१] स्थातुकामेन बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां शिक्षितव्यं। परमार्थशून्यतायां[२] स्थातुकामेन बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां शिक्षितव्यं। संस्कृतशून्यतायां[३] स्थातुकामेन बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां शिक्षितव्यं। असंस्कृतशून्यतायां[४] स्थातुकामेन बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां शिक्षितव्यं। अत्यन्तशून्यतायां[५] स्थातुकामेन बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां शिक्षितव्यं। अनवराग्रशून्यतायां[६] स्थातुकामेन बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां

---

(१) सर्व्वधर्म्मशून्यताज्ञानमत्र सर्व्वधर्म्मशून्यता तेन च शून्यताशून्या। तस्य ग्राहकविकल्प प्रहाणादियं प्रयोगमार्गे दशानां दिशान्दिग्भिः शून्यत्वेन महाशून्यता तासां महासन्निवेशत्वादियं सर्व्वत्रगार्थेन(?) प्रथमायां भूमौ॥

(२) परमस्य निर्व्वाणस्यार्थं रूपशून्यत्वेन परमार्थशून्यता तस्य विसंयोगमात्रत्वादियमग्रार्थेन(?) द्वितीयायां भूमौ॥

(३) संस्कृतस्य त्रैधातुकस्य कामादिधातुशून्यत्वेन संस्कृतशून्यता तस्यापरिनिष्पन्नस्वभावत्वेन श्र त(?) प्रतिपच्चत्वात्। इयं निष्यन्दाग्रायन(?) तृतीयायां॥

(४) असंस्कृतस्यानुत्पादानिरोधानन्यथात्वस्य तेन शून्यत्वादसंस्कृतशून्यता। अनुत्पादादीनामुत्पादादिप्रतियोगिप्रज्ञप्तिनिमित्ताभावात्। इयं निष्परिग्रहार्थेन चतुर्थ्यां॥

(५) अन्तस्यान्तेन शून्यत्वादतीतानान्तत्वेनात्यन्तता। अन्तोभागस्तनोच्छेदशाश्वतान्तयोर्मध्ये न तदस्ति किञ्चिद्येन तयोर्भागव्यवच्छेदनिमित्तेन स्वभावो व्यवस्थाप्यते। इयं सन्तानाभेदार्थेन पञ्चम्यां॥

(६) आदिमध्यपर्य्यवसानानां तैः शून्यत्वेनानवराग्रशून्यता। आद्यादीनां धर्म्मनामुल्लक्षितत्वादियं निःक्लेशविशुद्धार्थेन षष्ठ्यां।

शिक्षितव्यं । अनवकारशून्यतायां[१] स्थातुकामेन बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां शिक्षितव्यं । प्रकृतिशून्यतायां[२] स्थातुकामेन बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां शिक्षितव्यं । सर्व्वधर्म्मशून्यतायां[३] स्थातुकामेन बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां शिक्षितव्यं । स्वलक्षणशून्यतायां[४] स्थातुकामेन बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां शिक्षितव्यं । अनुपलम्भशून्यतायां[५] स्थातुकामेन बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां शिक्षितव्यं । अभावशून्यतायां[६] स्थातुकामेन बोधिसत्त्वेन महासत्त्वेन

---

(१) अवकरणोत्सर्गलक्षणस्य पकारस्य ?) विपर्य्ययेनानवकारस्तस्य तेन शून्यत्वादनवकारशून्यता । अवकरणादेः प्रक्रियारूपत्वेनानुत्सर्ग-प्रज्ञप्तिनिमित्तत्वायोगादियमनानात्वार्थेन(?) सप्तम्यां ॥

(२) सर्व्वार्य्यैरकृताप्रकृतिस्तस्यास्तया शून्यत्वात् प्रकृतिशून्यता । तस्याः संस्कृतासंस्कृतविकाराविकारानापत्तेः ॥

(३) धर्म्मस्य धर्म्मेण शून्यत्वात् सर्व्वधर्म्मशून्यतासर्व्वधर्म्माणां संस्कृता-संस्कृतराश्योरितरेतरापेक्षत्वेन स्वभावापरिनिष्पन्नत्वात् । एतच्च शून्यताद्वयमहीनानधिकार्थेन निर्विकल्पकक्षेत्रपरिशुद्धिवशिताद्वया-श्रयत्वेन चर्य्याफलभूमित्वात् प्रतिवेधपरिकर्म्मणाऽष्टम्यां ॥

(४) रूपणादिलक्षणस्य रूपादेस्तल्लक्षणशून्यत्वात् लक्षणशून्यता लक्षण-व्यवस्थानस्य सामान्यविशेषप्रज्ञप्तिमात्रत्वात् ॥

(५) अतीतादीनां धर्म्माणामतीतादिष्वध्वस्वितरेतरविपर्य्ययानुपलभ्य-त्वेनाऽनुपलम्भशून्यता । अध्वनां भावप्रज्ञप्तिमात्रत्वात् । एतच्च शून्यताद्वयं ज्ञानवशिताश्रयत्वेन तथैव नवम्यां ॥

(६) अभावशून्यता । अभावस्यासंस्कृतस्य शून्यतादेस्तेन शून्यत्वादभाव-शून्यता ॥

प्रज्ञापामितायां शिक्षितव्यं । स्वभावशून्यतायां[१] स्थातुकामेन बोधिसत्त्वेन महासत्त्वेन प्रज्ञापरमितायां शिक्षितव्यं। अभावस्वभावशून्यतायां[२] स्थातुकामेन बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां शिक्षितव्यं[३] । पुनरपरं शारद्वतीपुत्रालम्बनाधिपतेयसमनन्तरहेतुप्रत्ययता* अववोद्धुकामेन बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां शिक्षितव्यं । पुनरपरं शारद्वतीपुत्राकारलक्षणान्यवबोद्धुकामेन बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां शिक्षितव्यं

* एष पाठः पुस्तकपञ्चके दृश्यते ।

(१) स्वभावशून्यता । स्वभावस्य शून्यताख्यस्यार्य्याणां ज्ञानेन दर्शने वांह्यतकत्वात्(?) स्वभावशून्यता । ज्ञानदर्शनस्य यथाभूतार्थद्योतकत्वात् ॥

(२) यत्राभावसभावशून्यता नास्तिसंयोगिकस्य धर्मस्य भावः प्रतीत्यसमुत्पन्नत्वादिति संयोगस्य तेन शून्यत्वादभावस्वभावशून्यता सामग्रीमात्रं भाव इति ॥

भावस्य उपादानस्कन्धलक्षणस्य तेन शून्यत्वात् भावशून्यता । अस्थितैषा धर्माणां धर्मतेति परेण कर्त्रा शून्यत्वात् परभावशून्यता । शून्यताधिष्ठानो हि पुरुषव्यापारः केवलं विघातायेति कृत्वा । एतच्च शून्यतात्रयं यथाक्रमं सवासनक्लेशावरणप्रहाणाश्रयत्वेन सवासनज्ञेयावरणप्रहाणाश्रयत्वेन स्वयं भूत्वार्थेन च बुद्धभूमौ वेदितव्यं । इत्यष्टसाहस्रीटीकायां विंशतिप्रकाराः शून्यताद्याख्याता अत्र तु मूले अष्टादशप्रकाराः दृश्यन्ते ॥

पुनरपरं शारद्वतीपुत्र सर्व्वधर्म्माणां तथता अवबोद्धुकामेन बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां शिक्षितव्यं। अवितथता अवबोद्धुकामेन बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां शिक्षितव्यं। अनन्यतथतामवबोद्धुकामेन बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां शिक्षितव्यं। अविकारतथतामवबोद्धुकामेन बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां शिक्षितव्यं। यथावत्तथतामवबोद्धुकामेन बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां शिक्षितव्यं। पुनरपरं शारद्वतीपुत्र बोधिसत्त्वेन महासत्त्वेन सर्व्वधर्म्माणां तथतामवबोद्धुकामेन प्रज्ञापारमितायां शिक्षितव्यं। पुनरपरं शारद्वतीपुत्र सर्व्वधर्म्माणां भूतकोटिमवबोद्धुकामेन बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां शिक्षितव्यं। पुनरपरं शारद्वतीपुत्र यावन्त्यस्त्रिसाहस्रमहासाहस्रे लोकधातौ गङ्गानदीवालुकास्ताः सर्व्वाज्ज्ञातुकामेन बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां शिक्षितव्यं। पुनरपरं शारद्वतीपुत्र त्रिसाहस्रमहासाहस्रे लोकधातौ महासमुद्रेष्वप्स्कन्धोनदीषु महानदीषु कुनदीषु सरस्तड़ागेषु पल्वलेषु तत्सर्व्वं शतधाभिन्नया वालाग्रकोट्याऽभ्युत्क्षेप्तुकामेन च तन्निश्रियां* प्राणिनोविहेठयितुकामेन बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां शिक्षितव्यं। पुनरपरं शारद्वतीपुत्र यावांस्त्रिसाहस्रमहासाहस्रे लोकधातावग्निस्कन्धः ससर्व्वएकज्वालीभूतोभवेत्। तद्यथापि नाम कल्पोद्दाहे वर्त्तमाने तमेकेनमुखवायुनानिर्व्वापयितु-

---

* एष पाठः ५ पुस्तके। तदाश्रयानिति युक्तं प्रतिभाति।

कामेन बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां शिक्षितव्यं। पुनरपरं शारद्वतीपुत्र त्रिसाहस्रमहासाहस्रे लोकधातौ वातमण्डलाकाया इमं त्रिसाहस्रमहासाहस्रं लोकधातुं विधुनुयुर्विरेयुर्विध्वंसयेयुः तद्यथापि नाम बुसमुष्टितां सर्व्वामहाविक्षोभनावातमण्डलीयकानां गुल्याः प्रान्तकेनसंच्छादयितुकामेन बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां शिक्षितव्यं*। [†पुनरपरं शारद्वतीपुत्र यस्त्रिसाहस्रमहासाहस्रे लोकधातावाकाशधातुस्तं सर्व्वमेकपर्य्यङ्केन स्फुरितुकामेन बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां शिक्षितव्यं] पुनरपरं शारद्वतीपुत्र त्रिसाहस्रमहासाहस्रे लोकधातौ सुमेरुचक्रवाड़महाचक्रवाड़ाः पर्व्वतराजास्तान् सर्व्वानेकवालेन वह्वाऽभ्युत्क्षिप्याऽप्रमेयाऽसंख्येयान् - लोकधातून् समुत्क्षिपेयमिति‡ बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां शिक्षितव्यं । पुनरपरं शारद्वतीपुत्र यावान् त्रिसाहस्रमहासाहस्रे लोकधातौ वृक्षतृणगुल्मौषधिवनस्पतिमस्रयोलोष्ट्रशर्करपाषाणपर्व्वतमहापृथिवीसंचयस्तं सर्व्वं परमाणुरजोयोगेन ज्ञातुकामेन बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां शिक्षितव्यं । पुनरपरं शारद्वतीपुत्र यावन्तः पूर्व्वस्यान्दिशि गङ्गानदीवालुकोपमेषु लोकधातुषु§ बुद्धाभगवन्तः सबोधिसत्त्वपरिवाराः सश्रावकसंघास्तान् सर्व्वानेकपिण्डपातेन प्रतिपाद-

---

* एष पाठः पुस्तकपञ्चके ।

† [ ] एतच्चिह्नद्वयान्तर्गतपाठः क पुस्तके नास्ति ।

‡ समुत्क्षिपेयमिति ग, घ, च पाठः ।

§ लोकधातुष्विति ख, ग, घ पाठः । बुद्धक्षेत्रेष्विति क, च, पाठः ।

यितुकामेन एकपुष्पेणैकमाल्येनैकगन्धेनैकविलेपनेनैकचूर्णेनैकवस्त्रेणै-
काभरणेनैकच्छत्रेणैकध्वजेनैकपताकया सत्कर्त्तुकामेन गुरुकर्त्तु-
कामेन मानयितुकामेन पूजयितुकामेन बोधिसत्त्वेन महासत्त्वेन
प्रज्ञापारमितायां शिक्षितव्यं। यावन्तो दक्षिणस्यांदिशि गङ्गा-
नदीवालुकोपमेषु लोकधातुषु बुद्धाभगवन्तः सबोधिसत्त्वपरिवाराः
सश्रावकसंघास्तान् सर्व्वानेकपिण्डपातेनप्रतिपादयितुकामेनैकपुष्पे-
णैकमाल्येनैकगन्धेनैकविलेपनेनैकचूर्णेनैकवस्त्रेणैकाभरणेनैकच्छत्रेणैक-
ध्वजेनैकपताकया सत्कर्त्तुकामेन गुरुकर्त्तुकामेनमानयितुकामेन पूज-
यितुकामेन बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां शिक्षितव्यं।
यावन्तः पश्चिमायांदिशि गङ्गानदीवालुकोपमेषु लोकधातुषु बुद्धा-
भगवन्तः बोधिसत्त्वपरिवाराः सश्रावकसंघास्तान् सर्व्वानेकपिण्ड-
पातेन प्रतिपादयितुकामेनैकपुष्पेणैकमाल्येनैकगन्धेनैकविलेपनेनैक-
चूर्णेनैकवस्त्रेणैकाभरणेनैकच्छत्रेणैकध्वजेनैकपतकया सत्कर्त्तुकामेन
गुरुकर्त्तुकामेन मानयितुकामेन पूजयितुकामेन बोधिसत्त्वेन महा-
सत्त्वेन प्रज्ञापारमितायां शिक्षितव्यं। यावन्तउत्तरस्यांदिशि
गङ्गानदीवालुकोपमेषु लोकधातुषु बुद्धाभगवन्तः सबोधिसत्त्वपरि-
वाराः सश्रावकसंघास्तान् सर्व्वान् एकपिण्डपातेन प्रतिपादयितु-
कामेनैकपुष्पेणैकमाल्येनैकगन्धेनैकविलेपनेनैकचूर्णेनैकवस्त्रेणैकाभरणे-
नैकच्छत्रेणैकपताकया सत्कर्त्तुकामेन गुरुकर्त्तुकामेन मानयितुकामेन
पूजयितुकामेन बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां शिक्षितव्यं।
यावन्त उत्तरपूर्व्वस्यांदिशि गङ्गानदीवालुकोपमेषु लोकधातुषु
बुद्धाभगवन्तः सबोधिसत्त्वपरिवाराः सश्रावकसंघास्तान् सर्व्वानेक-

पिण्डपातेन [illegible]तिः [illegible]यितुका[illegible]नैकपुष्पे[illegible]क[illegible]ल्येनैक[illegible]
नैकवस्त्रेणैकाभरणेनैकच्छत्रेणैकध्वजेनैकपताकया सत्कर्त्तुकामेन गुरु-
कर्त्तुकामेन मानयितुकामेन पूजयितुकामेन बोधिसत्त्वेन महासत्त्वेन
प्रज्ञापारमितायां शिक्षितव्यं । यावन्तः पूर्व्वदक्षिणस्यां दिशि गङ्गा-
नदीवालुकोपमेषु लोकधातुषु बुद्धा भगवन्तः सबोधिसत्त्वपरिवाराः
सश्रावकसंघास्तान् सर्व्वानेकपिण्डपातेन प्रतिपादयितुकामेनैकपुष्पे-
णैकमाल्येनैकविलेपनेनैकचूर्णेनैकवस्त्रेणैकाभरणेनैकच्छत्रेणैकध्वजेनैक-
पताकया सत्कर्त्तुकामेन गुरुकर्त्तुकामेनमानयितुकामेन पूजयितु-
कामेन बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां शिक्षितव्यं ।
यावन्तो दक्षिणपश्चिमायां दिशि गङ्गानदीवालुकोपमेषु लोकधातुषु
बुद्धा भगवन्तः सबोधिसत्त्वपरिवाराः सश्रावकसंघास्तान् सर्व्वानेक-
पिण्डपातेन प्रतिपादयितुकामेनैकपुष्पेणैकमाल्येनैकविलेपनेनैकचूर्णे-
नैकवस्त्रेणैकाभरणेनैकच्छत्रेणैकध्वजेनैकपताकया सत्कर्त्तुकामेन गुरु-
कर्त्तुकामेनमानयितुकामेन पूजयितुकामेन बोधिसत्त्वेन महासत्त्वेन
प्रज्ञापारमितायां शिक्षितव्यं । यावन्तः पश्चिमोत्तरस्यां दिशि गङ्गा-
नदीवालुकोपमेषु लोकधातुषु बुद्धा भगवन्तः सबोधिसत्त्वपरिवाराः
सश्रावकसंघास्तान् सर्व्वानेकपिण्डपातेन प्रतिपादयितुकामेनैकपुष्पे-
णैकमाल्येनैकविलेपनेनैकचूर्णेनैकाभरणेनैकच्छत्रेणैकध्वजेनैकपताकया
सत्कर्त्तुकामेन गुरुकर्त्तुकामेन मानयितुकामेन पूजयितुकामेन
बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां शिक्षितव्यं । यावन्तो-
[illegible]दिशि गङ्गानदीवालुकोपमेषु लोकधातुषु बुद्धा भगवन्तः
स[illegible]रिवाराः सश्रावकसंघास्तान् सर्व्वानेकपिण्डपातेन

प्रतिपादयितुकामेनैकपुष्पेणैकमाल्येनैकगन्धेनैकविलेपनेनैकचूर्णेनैक-
वस्त्रेणैकाभरणेनैकच्छत्रेणैकध्वजेनैकपताकया सत्कर्त्तुकामेन गुरुकर्त्तु-
कामेनमानयितुकामेन पूजयितुकामेन बोधिसत्त्वेन महासत्त्वेन
प्रज्ञापारमितायां शिक्षितव्यं। यावन्त उपरिष्टाद्दिशि गङ्गानदी-
वालुकोपमेषु लोकधातुषु बुद्धाभगवन्तः सबोधिसत्त्वपरिवाराः
सश्रावकसंघास्तान् सर्व्वानेकपिण्डपातेन प्रतिपादयितुकामेनैक-
पुष्पेणैकमाल्येनैकगन्धेनैकविलेपनेनैकचूर्णेनैकवस्त्रेणैकाभरणेनैकच्छत्रे-
णैकध्वजेनैकपताकया सत्कर्त्तुकामेन गुरुकर्त्तुकामेन मानयितुकामेन
पूजयितुकामेन बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां शिक्षि-
तव्यं। पुनरपरं शारद्वतीपुत्र पूर्व्वस्यांदिशि गङ्गानदीवालुकोपमेषु
लोकधातुषु येसत्त्वास्तान् सर्व्वान् शीलस्कन्धे[1] प्रतिष्ठापयितुकामेन
समाधिस्कन्धे प्रतिष्ठापयितुकामेन प्रज्ञास्कन्धे प्रतिष्ठापयितुकामेन
विमुक्तिस्कन्धे प्रतिष्ठापयितुकामेन विमुक्तिज्ञानदर्शनस्कन्धे प्रति-
ष्ठापयितुकामेन श्रोत-आपत्तिफले प्रतिष्ठापयितुकामेन सकृदागा-
मिफले प्रतिष्ठापयितुकामेन अनागामिफले प्रतिष्ठापयितुकामेन
अर्हत्त्वे प्रतिष्ठापयितुकामेन प्रत्येकबोधौ प्रतिष्ठापयितुकामेन सर्व्व-
ज्ञतायां प्रतिष्ठापयितुकामेन* मार्गाऽऽकारज्ञतायां प्रतिष्ठापयितु-

* एष पाठः क पुस्तके नास्ति।

(१) अनास्रवं शीलं समाधिः प्रज्ञा च शीलस्कन्धः समाधिस्कन्धः प्रज्ञास्कन्धः। सर्व्वावरणप्रहाणादिमुक्तिस्कन्धः विशिष्टज्ञानसाक्षात्करणं विमुक्तिज्ञानस्कन्धः॥ इत्यष्टसाहस्रीटीका।

ज्ञतायां प्रतिष्ठापयितुकामेन अनुपधिशेषे निर्व्वाणधातौ प्रति-
पयितुकामेन बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां शिक्षि-
तव्यं। ये पूर्व्वदक्षिणस्यान्दिशि गङ्गानदीवालुकोपमेषु लोकधातुषु
सत्त्वास्तान् सर्व्वान् शीलस्कन्धे प्रतिष्ठापयितुकामेन समाधिस्कन्धे
प्रतिष्ठापयितुकामेन प्रज्ञास्कन्धे प्रतिष्ठापयितुकामेन विमुक्तिस्कन्धे
प्रतिष्ठापयितुकामेन विमुक्तिज्ञानदर्शनस्कन्धे प्रतिष्ठापयितुकामेन
स्रोत-आपत्तिफले प्रतिष्ठापयितुकामेन सकृदागामिफले प्रतिष्ठाप-
यितुकामेन अनागामिफले प्रतिष्ठापयितुकामेन अर्हत्त्वे प्रतिष्ठापयि-
तुकामेन प्रत्येकबोधौ प्रतिष्ठापयितुकामेन सर्व्वज्ञतायां प्रतिष्ठाप-
यितुकामेन मार्गाऽऽकारज्ञतायां प्रतिष्ठापयितुकामेन सर्व्वाऽऽकार-
ज्ञतायां प्रतिष्ठापयितुकामेन अनुपधिशेषे निर्व्वाणधातौ प्रतिष्ठाप-
यितुकामेन बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां शिक्षितव्यं।

ये दक्षिणपश्चिमायान्दिशि गङ्गानदीवालुकोपमेषु लोकधातुषु
सत्त्वास्तान् सर्व्वान् शीलस्कन्धे प्रतिष्ठापयितुकामेन समाधिस्कन्धे
प्रतिष्ठापयितुकामेन प्रज्ञास्कन्धे प्रतिष्ठापयितुकामेन विमुक्तिस्कन्धे
प्रतिष्ठापयितुकामेन विमुक्तिज्ञानदर्शनस्कन्धे प्रतिष्ठापयितुकामेन
स्रोत-आपत्तिफले प्रतिष्ठापयितुकामेन सकृदागामिफले प्रति-
ष्ठापयितुकामेन अनागामिफले प्रतिष्ठापयितुकामेन अर्हत्त्वे प्रति-
ष्ठापयितुकामेन प्रत्येकबोधौ प्रतिष्ठापयितुकामेन सर्व्वज्ञतायां प्रति-
ष्ठापयितुकामेन मार्गाऽऽकारज्ञतायां प्रतिष्ठापयितुकामेन सर्व्वाऽऽ-
कारज्ञतायां प्रतिष्ठापयितुकामेन अनुपधिशेषे निर्व्वाणधातौ
प्रतिष्ठापयितुकामेन बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां

शिचितव्यं। ये पश्चिमोत्तरस्यान्दिशि गङ्गानदीवालुकोपमेषु लोकधातुषु सत्त्वास्तान् सर्व्वान् शीलस्कन्धे प्रतिष्ठापयितुकामेन समाधिस्कन्धे प्रतिष्ठापयितुकामेन प्रज्ञास्कन्धे प्रतिष्ठापयितुकामेन विमुक्तिस्कन्धे प्रतिष्ठापयितुकामेन विमुक्तिज्ञानदर्शनस्कन्धे प्रतिष्ठापयितुकामेन स्रोत-आपत्तिफले प्रतिष्ठापयितुकामेन सकृदागामिफले प्रतिष्ठापयितुकामेन अनागामिफले प्रतिष्ठापयितुकामेन अर्हत्त्वे प्रतिष्ठापयितुकामेन प्रत्येकबोधौ प्रतिष्ठापयितुकामेन सर्व्वज्ञतायां प्रतिष्ठापयितुकामेन मार्गाऽऽकारज्ञतायां प्रतिष्ठापयितुकामेन सर्व्वाऽऽकारज्ञतायां प्रतिष्ठापयितुकामेन अनुपधिशेषे निर्व्वाणधातौ प्रतिष्ठापयितुकामेन बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां शिचितव्यं। येऽधस्ताद्दिशि गङ्गानदीवालुकोपमेषु लोकधातुषु सत्त्वास्तान् सर्व्वान् शीलस्कन्धे प्रतिष्ठापयितुकामेन समाधिस्कन्धे प्रतिष्ठापयितुकामेन प्रज्ञास्कन्धे प्रतिष्ठापयितुकामेन विमुक्तिस्कन्धे प्रतिष्ठापयितुकामेन विमुक्तिज्ञानदर्शनस्कन्धे प्रतिष्ठापयितुकामेन स्रोत-आपत्तिफले प्रतिष्ठापयितुकामेन सकृदागामिफले प्रतिष्ठापयितुकामेन अनागामिफले प्रतिष्ठापयितुकामेन अर्हत्त्वे प्रतिष्ठापयितुकामेन प्रत्येकबोधौ प्रतिष्ठापयितुकामेन सर्व्वज्ञतायां प्रतिष्ठापयितुकामेन मार्गाऽऽकारज्ञतायां प्रतिष्ठापयितुकामेन सर्व्वाऽऽकारज्ञतायां प्रतिष्ठापयितुकामेन अनुपधिशेषे निर्व्वाणधातौ प्रतिष्ठापयितुकामेन बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां शिचितव्यं। ये उपरिष्टाद्दिशि गङ्गानदीवालुकोपमेषु लोकधातुषु सत्त्वास्तान् सर्व्वान् शीलस्कन्धे प्रतिष्ठापयितुकामेन

समाधिस्कन्धे प्रतिष्ठापयितुकामेन प्रज्ञास्कन्धे
विमुक्तिस्कन्धे प्रतिष्ठापयितुकामेन विमुक्तिज्ञानदर्शनस्कन्धे प्र
पयितुकामेन स्रोत-आपत्तिफले प्रतिष्ठापयितुकामेन
फले प्रतिष्ठापयितुकामेन अनागामिफले प्रतिष्ठापयितुकामेन
प्रतिष्ठापयितुकामेन प्रत्येकबोधौ प्रतिष्ठापयितुकामेन
प्रतिष्ठापयितुकामेन मार्गाऽऽकारज्ञतायां
सर्व्वाऽऽकारज्ञतायां प्रतिष्ठापयितुकामेन अनुपधिशेषे* निर्वा
धातौ प्रतिष्ठापयितुकामेन बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमि
शिक्षितव्यं। पुनरपरं शारद्वतीपुत्र यावन्तो दशदिग्लोकधातु
सत्त्वास्तान् सर्व्वाञ्छ्रावकप्रत्येकबुद्धयानेन च महायानेन च परि
निर्व्वापयितुकामेन बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमिता
शिक्षितव्यं। पुनरपरं शारद्वतीपुत्र बोधिसत्त्वेन महासत्त्वेन प्र
पारमितायां चरतादानं ददतैवं शिक्षितव्यं॥

यदेवं दानं दत्वा महाफलं भवत्येवं दानं दत्त्वा क्षत्रिय म
शालकुलेषूपपद्यते। एवं दानं दत्त्वा ब्राह्मणमहाशालकुले
पद्यते। एवं दानं दत्वा तदेवं दानं निश्राय चातुर्महाराजि
देवेषूपपद्यते। एवं दानं दत्वा तदेवं दानं निश्राय चार्य
देवेषूपपद्यते। एवं दानं दत्वा तदेवं दानं निश्राय या
देवेषूपपद्यते। एवं दानं दत्वा तदेवं दानं निश्राय तुषि

* [illegible]

[illegible]

[illegible]

देवेषूपपद्यते। एवं दानं दत्त्वा तदेवं दानं निश्राय निर्माणरतिषु देवेषूपपद्यते। एवं दानं दत्त्वा तदेवं दानं निश्राय परनिर्मितवशवर्त्तिषु देवेषूपपद्यते। एवं दानं दत्त्वा तदेवं दानं निश्राय प्रथमं ध्यानं समापद्यते। एवं दानं दत्त्वा तदेवं दानं निश्राय द्वितीयं ध्यानं समापद्यते। एवं दानं दत्त्वा तदेवं दानं निश्राय तृतीयं ध्यानं समापद्यते। एवं दानं दत्त्वा तदेवं दानं निश्राय चतुर्थं ध्यानं समापद्यते। एवं दानं तत्त्वा तदेवं दानं निश्राय आकाशानन्त्यायतनसमापत्तिं समापद्यते। एवं दानं दत्त्वा तदेवं दानं निश्रायज्ञानानन्त्यायतनसमापत्तिं समापद्यते। एवं दानं दत्त्वा तदेवं दानं निश्राय आकिञ्चन्यायतनसमापत्तिं समापद्यते। एवं दानं दत्त्वा तदेवं दानं निश्राय नैवसंज्ञानासंज्ञायतनसमापत्तिं समापद्यते। एवं दानं दत्त्वा चत्वारिस्मृत्युपस्थानान्युत्पद्यन्ते। एवं दानं दत्त्वा चत्वारि सम्यक्प्रहाणान्युत्पद्यन्ते। एवं दानं दत्त्वा पञ्चेन्द्रियाण्युत्पद्यन्ते। एवं दानं दत्त्वा पञ्चवलान्युत्पद्यन्ते। एवं दानं दत्त्वा सप्तवोध्यङ्गान्युत्पद्यन्ते। एवं दानं दत्त्वा आर्य्याष्टाङ्गो मार्ग उत्पद्यते। एवं दानं दत्त्वाशून्यताऽऽनिमित्ताऽप्रणिहितविमोक्षमुखान्युत्पद्यन्ते। एवं दानं दत्त्वा श्रोतआपत्तिफलमनुप्राप्यते। एवं दानं दत्त्वा सकृदागामिफलमनुप्राप्यते। एवं दानं दत्त्वा अनागामिफलमनुप्राप्यते। एवं दानं दत्त्वा अर्हत्त्वमनुप्राप्यते। एवं दानं दत्त्वा प्रत्येकवोधिरनुप्राप्यते। एवं दानं दत्त्वा अनुत्तरासम्यक्सम्बोधिरनुप्राप्यते। पुनरपरं शारद्वतीपुत्र वोधिसत्त्वो महासत्त्वः प्रज्ञापारमितायां चरन्जानात्येवमुपायकौश-

त्त्वेन दानं दत्तं दानपारमितां परिपूरयत्येवं दानं दत्तं शील
मितां परिपूरयत्येवं दानं दत्तं क्षान्तिपारमितां परिपूरयत्येवं द
दत्तं वीर्य्यपारमितां परिपूरयत्येवं दानं दत्तं ध्यानपार
परिपूरयत्येवं दानं दत्तं प्रज्ञापारमितां परिपूरयति ।

अथायुष्मान् शारद्वतीपुत्रोभगवन्तमेतदवोचत् । कथं
बोधिसत्त्वेन महासत्त्वेन दानं ददता दानपारमिता परिपूरि
भवति । कथं भगवन् बोधिसत्त्वेन महासत्त्वेन शीलं रक्षता शी
पारमिता परिपूरिता भवति । कथं भगवन् बोधिसत्त्वेन म
सत्त्वेन क्षान्तिं भावयता क्षान्तिपारमिता परिपूरिता भवति
कथं भगवन् बोधिसत्त्वेन महासत्त्वेन वीर्य्यमारभता वीर्य्यपारमि
परिपूरिता भवति । कथं भगवन् बोधिसत्त्वेन महासत्त्वेन ध्या
समापद्यता ध्यानपारमिता परिपूरिता भवति । कथं भगवन्
बोधिसत्त्वेन महासत्त्वेन प्रज्ञां भावयता प्रज्ञापारमिता परिपूरि
भवति । भगवानाह । अनुपलम्भयोगेन शारद्वतीपुत्र दान
दायकस्य प्रतिग्राहकस्य त्रिमण्डलपरिशुद्धा दानपारमिता परि
पूरिता भवति । आपत्त्यनापत्त्यध्यापत्तितामुपादाय शी मि
परिपूरिता भवति । अक्षोभनतामुपादाय क्षान्तिपारमिता परि
पूरिता भवति । कायचित्तवीर्य्याश्रंसनतामुपादाय वीर्य्यपार
परिपूरिता भवति । *अविक्षेपाऽसङ्करणतामुपादाय ध्यानपारमित
परिपूरिता भवति । सर्व्वधर्म्मप्रज्ञानताऽनुपलम्भयोगेन प्रज्ञा

---

* अविक्षेपाऽसङ्करणता इति ख, ग, घ पुस्तके पाठः ।

† प्रज्ञानता इति ख, ग, घ पुस्तके पाठः ।

मिता परिपूरिता भवति। पुनरपरं शारद्वतीपुत्र अतीतानागत-
त्युत्पन्नानां बुद्धानां भगवतां सर्व्वबुद्धगुणान् प्रज्ञातुकामेनाऽनुप्राप्नु-
कामेन बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां शिक्षितव्यं।
पुनरपरं शारद्वतीपुत्र संस्कृताऽसंस्कृतानां धर्म्माणां पारं गन्तुकामेन
बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां शिक्षितव्यं। पुनरपरं
शारद्वतीपुत्र साश्रवानाऽश्रवाणां धर्म्माणां पारं गन्तुकामेन बोधि-
सत्त्वेन महासत्त्वेन प्रज्ञापारमितायां शिक्षितव्यं। पुनरपरं शार-
द्वतीपुत्र कुशलाऽकुशलानां धर्म्माणां पारं गन्तु कामेन बोधिसत्त्वेन
महासत्त्वेन प्रज्ञापारमितायां शिक्षितव्यं। पुनरपरं शारद्वतीपुत्र
लौकिकलोकोत्तराणां धर्म्माणां पारं गन्तुकामेन बोधिसत्त्वेन
महासत्त्वेन प्रज्ञापारमितायां शिक्षितव्यं। पुनरपरं शारद्वतीपुत्र
रूप्यरूपिणां धर्म्माणां पारं गन्तुकामेन बोधिसत्त्वेन महासत्त्वेन
प्रज्ञापारमितायां शिक्षितव्यं। पुनरपरं शारद्वतीपुत्र व्याकृताऽ-
व्याकृतानां धर्म्माणां पारं गन्तुकामेन बोधिसत्त्वेन महासत्त्वेन
प्रज्ञापारमितायां शिक्षितव्यं। पुनरपरं शारद्वतीपुत्र नियताऽ-
नियतानां धर्म्माणां पारं गन्तुकामेन बोधिसत्त्वेन महासत्त्वेन
प्रज्ञापारमितायां शिक्षितव्यं। पुनरपरं शारद्वतीपुत्र नैर्याणिकाऽ-
नैर्याणिकानां धर्म्माणां पारं गन्तुकामेन बोधिसत्त्वेन महासत्त्वेन
प्रज्ञापारमितायां शिक्षितव्यं। पुनरपरं शारद्वतीपुत्र हान*-
भागीयानां विशेषभागीयानां धर्म्माणां पारं गन्तुकामेन बोधि-

* हानभागीयानामिति ग पुस्तके पाठः, भागीयानामिति ख, घ पुस्तके पाठः।

सत्त्वेन महासत्त्वेन प्रज्ञापारमितायां शिक्षितव्यं । पुनरपरं शा
द्वतीपुत्र [illegible] पारं गन्तु
बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां शिक्षितव्यं । पु
शारद्वतीपुत्र पृथग्जनधर्म्माणामार्य्यधर्म्माणां पारं गन्तुकामेन बोधि
सत्त्वेन महासत्त्वेन प्रज्ञापारमितायां शिक्षितव्यं । पुनरपरं शा
द्वतीपुत्र शैक्षधर्म्माणामशैक्षधर्म्माणां पारं गन्तुकामेन बोधि
महासत्त्वेन प्रज्ञापारमितायां शिक्षितव्यं । पुनरपरं शारद्वती
श्रावकधर्म्माणां प्रत्येकबुद्धधर्म्माणां पारं गन्तुकामेन बोधिस
महासत्त्वेन प्रज्ञापारमितायां शिक्षितव्यं । पुनरपरं शारद्वती
बोधिसत्त्वधर्म्माणां बुद्धधर्म्माणाञ्च पारं गन्तुकामेन बोधिसत्त्वे
महासत्त्वेन प्रज्ञापारमितायां शिक्षितव्यं । पुनरपरं शारद्वतीपु
सर्व्वधर्म्माणां पारं गन्तुकामेन बोधिसत्त्वेन महासत्त्वेन प्रज्ञापार
मितायां शिक्षितव्यं । पुनरपरं शारद्वतीपुत्र बोधिसत्त्वेन महा
सत्त्वेन अतीतानागतप्रत्युत्पन्नानां धर्म्माणां तथतामनुबोद्धुकामे
प्रज्ञापारमितायां शिक्षितव्यं । पुनरपरं शारद्वतीपुत्र बोधिसत्त्वे
महासत्त्वेन सर्व्वधर्म्माणामनुत्पादकोटिमनुप्राप्तुकामेन प्रज्ञापार
मितायां शिक्षितव्यं । पुनरपरं शारद्वतीपुत्र बोधिसत्त्वेन मह
सत्त्वेन सर्व्वधर्म्माणां भूतकोटिं प्रतिवेद्धुकामेन प्रज्ञापारमिताय
शिक्षितव्यं । पुनरपरं शारद्वतीपुत्र सर्व्वश्रावकप्रत्येकबुद्धानां पू
गमेन भवितु कामेन बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमिताय
शिक्षितव्यं । पुनरपरं शारद्वतीपुत्र बोधिसत्त्वेन महासत्त्वेन सर्व्व

* एतच्चिह्नद्वयमध्यवर्त्तीपाठः क पुस्तके नास्ति ।

ष्टुम् । सम्यगाजीवसम्पन्नेन अभिभवितुकामेन प्रज्ञापारमितायां
शिक्षितव्यं । पुनरपरं शारद्वतीपुत्र बोधिसत्त्वेन महासत्त्वेन सर्व-
श्रावकप्रत्येकबुद्धानां सर्वान्तरपरिवारेण[*] अभिभवितुकामेन प्रज्ञापारमितायां
शिक्षितव्यं । पुनरपरं शारद्वतीपुत्र बोधिसत्त्वेन महासत्त्वेन महा-
परिवारेण अभिभवितुकामेन प्रज्ञापारमितायां शिक्षितव्यं । पुनरपरं
शारद्वतीपुत्र बोधिसत्त्वेन महासत्त्वेनाशैक्षाणामनागामिनां
बोधिसत्त्वपरिवाराणां अभिभवितुकामेन प्रज्ञापारमितायां शिक्षि-
तव्यं । पुनरपरं शारद्वतीपुत्र बोधिसत्त्वेन महासत्त्वेन सर्वदातॄणां
दक्षिणां परिशोधयितुकामेन प्रज्ञापारमितायां शिक्षितव्यं ।
पुनरपरं शारद्वतीपुत्र बोधिसत्त्वेन महासत्त्वेन दानेन च शीले-
लेन अभिभवितुकामेन प्रज्ञापारमितायां शिक्षितव्यं । पुनरपरं
शारद्वतीपुत्र बोधिसत्त्वेन महासत्त्वेन दौःशील्यचित्तमनुत्पाद्
यितुकामेन प्रज्ञापारमितायां शिक्षितव्यं । पुनरपरं शारद्वती-
पुत्र बोधिसत्त्वेन महासत्त्वेन व्यापादचित्तमनुत्पादयितुकामेन प्रज्ञा-
पारमितायां शिक्षितव्यं । पुनरपरं शारद्वतीपुत्र बोधिसत्त्वेन
महासत्त्वेन कौसीद्यचित्तमनुत्पादयितुकामेन प्रज्ञापारमितायां
शिक्षितव्यं । पुनरपरं शारद्वतीपुत्र बोधिसत्त्वेन महासत्त्वेन विक्षे-
पचित्तमनुत्पादयितुकामेन प्रज्ञापारमितायां शिक्षितव्यं । पुनर-
परं शारद्वतीपुत्र बोधिसत्त्वेन महासत्त्वेन दौष्प्रज्ञचित्तमनुत्पाद-
यितुकामेन प्रज्ञापारमितायां शिक्षितव्यं । पुनरपरं शारद्वतीपुत्र

* सर्वान्तरपरिवारेण ग, घ पुस्तके पाठः ।

बोधिसत्त्वेन महासत्त्वेन सर्व्वसत्त्वान् दानमये पुण्यक्रियावस्तुनि प्रति-
ष्ठापयितुकामेन प्रज्ञापारमितायां शिक्षितव्यं । पुनरपरं शारद्व-
तीपुत्र बोधिसत्त्वेन महासत्त्वेन सर्व्वसत्त्वाञ्छीलमये पुण्यक्रियावस्तु-
नि प्रतिष्ठापयितुकामेन प्रज्ञापारमितायां शिक्षितव्यं । पुनरपरं
शारद्वतीपुत्र बोधिसत्त्वेन महासत्त्वेन सर्व्वसत्त्वान् भावनामये पुण्य-
क्रियावस्तुनिप्रतिष्ठापयितुकामेन प्रज्ञापारमितायां शिक्षितव्यं।
पुनरपरं शारद्वतीपुत्र बोधिसत्त्वेन महासत्त्वेन सर्व्वसत्त्वानैर्य्यापथ-
सहगते पुण्यक्रियावस्तुनिप्रतिष्ठापयितुकामेन प्रज्ञापारमितायां शि-
क्षितव्यं । पुनरपरं शारद्वतीपुत्र बोधिसत्त्वेन महासत्त्वेन सर्व्वस-
त्त्वान् सर्व्वौषधिकसहगते पुण्यक्रियावस्तुनिप्रतिष्ठापयितुकामेन
प्रज्ञापारमितायां शिक्षितव्यं । पुनरपरं शारद्वतीपुत्र बोधिसत्त्वेन
महासत्त्वेन सर्व्वाऽऽकारं पञ्चचक्षुर्निष्पादयितुकामेन प्रज्ञापारमि-
तायां शिक्षितव्यं । पुनरपरं शारद्वतीपुत्र बोधिसत्त्वेन महासत्त्वेन
यदुत्तमाऽऽत्मचक्षुर्निष्पादयितुकामेन प्रज्ञापारमितायां शिक्षितव्यं।
दिव्यं चक्षुर्निष्पादयितुकामेन बोधिसत्त्वेन महासत्त्वेन प्रज्ञा[illegible]मि-
तायां शिक्षितव्यं । प्रज्ञाचक्षुर्निष्पादयितुकामेन बोधिसत्त्वेन महा-
सत्त्वेन प्रज्ञापारमितायां शिक्षितव्यं । धर्म[illegible]चक्षुर्निष्पादयितुकामेन
बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां शिक्षितव्यं । बुद्धचक्षुर्नि-
ष्पादयितुकामेन बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां शि-
क्षितव्यं । पुनरपरं शारद्वतीपुत्र ये पूर्व्वस्यांदिशि गङ्गानदी-
वालुकोपमेषु लोकधातुषु बुद्धाभगवन्तस्तान् सर्व्वान् दिव्येनचक्षुषा-
संद्रष्टुकामेन बोधिसत्त्वेन महासत्त्वेन यञ्च बुद्धाभगवन्तोधर्म्मं भाषन्ते

[illegible] ... Rs. [illegible]

[illegible]

*[illegible]

[illegible]

Vayu Purana, (Text) Fasc. [illegible] ... 2 [illegible]

Yoga Aphorisms, (Text) Fasc. 1-4 [illegible] ... 3 [illegible]

*[illegible] (Text) Vol. [illegible], Fasc. [illegible], Vol. II, Fasc. [illegible] each ... 4 [illegible]

[illegible] (Text) Fasc. 1-[illegible] each ... [illegible]

[illegible] (Text) Fasc. [illegible] each ... [illegible]

[illegible] Purana, (Text) Fasc. [illegible] ... [illegible]

[illegible] Purana, Fasc. 1-6 ... [illegible]

Tibetan Series

Pag-sam Thi Śiṅ, Fasc. 1-4 @ 1/ each ... 4 0

Sher-Phyin Vol. I, Fasc. 1-5, Vol. II, Fasc. 1-3, Vol. III, Fasc. 1-6 @ 1/ each ... 15 0

Rtogs brjod dpag hkhri Śiṅ (Tib. & Sans.) Vol. I, Fasc. 1-5, Vol. II Fasc. 1-5 @ 1/ each ... 10 0

Arabic and Persian Series

*Alamgirnamah, with Index (Text) Fasc. 1-13 @ /6/ each ... 4 14

Al-Muqaddasi (English) Vol. I, Fasc. 1-3 @ /12/ ... 2 4

Ain-i-Akbari, (Text) Fasc. 1-22 @ 1/ each ... 22 0

Ditto (English) Vol. I, Fasc. 1-7, Vol. II, Fasc. 1-5, Vol. III, Fasc. 1-5, @ 1/12/ each ... 29 12

Akbarnamah, with Index, (Text) Fasc. 1-37 @ 1/ each ... 37 0

Ditto English Fasc. 1-6 @ 1/ each ... 6 0

Arabic Bibliography, by Dr. A. Sprenger ... 0 8

Badshahnamah, with Index, (Text) Fasc. 1-19 @ /6/ each ... 7 2

Catalogue of Arabic Books and Manuscripts ... 1 0

Catalogue of the Persian Books and Manuscripts in the Library of the Asiatic Society of Bengal. Fasc. 1-3 @ 1 each ... 3 0

Dictionary of Arabic Technical Terms, and Appendix, Fasc. 1-21 @ 1 each ... 21 0

Farhang-i-Rashidi, (Text) Fasc. 1-14 @ 1 each ... 14 0

Fihrist-i-Tusi, or, Tusy's list of Shy'ah Books, (Text) Fasc. 1-4 @ /12/ each ... 3 0

Futuhu-sh-Sham of Waqidi, (Text) Fasc. 1-9 @ /6/ each ... 3 6

Ditto of Azadi, (Text) Fasc. 1-4 @ /6/ each ... 1 8

Haft Asman, History of the Persian Masnawi, (Text) Fasc. 1 ... 0 12

History of the Caliphs, (English) Fasc. 1-6 @ /12/ each ... 4 8

Iqbalnamah-i-Jahangiri, (Text) Fasc. 1-3 @ /6/ each ... 1 2

Isabah, with Supplement, (Text) 51 Fasc. @ /12/ each ... 38 4

Maasir-ul-Umara, Vol. I, Fasc. 1-9, Vol. II, Fasc. 1-9; Vol. III, 1-10; Index to Vol. I, Fasc. 10-11; Index to Vol. III, Fasc. 11-12; Index to Vol. II, Fasc. 10-12 @ /6/ each ... 18 2

Maghazi of Waqidi, (Text) Fasc. 1-5 @ /6/ each ... 1 14

* The other Fasciculi of these works are out of stock, and complete copies cannot be supplied.

ntakhabu-t-Tawārikh, (Text) Fasc. 1–15 @ /6/ each ... Rs. 5
ntakhabu-t-Tawārikh, (English) Vol. I, Fasc. 1–7; Vol. II, Fasc. 1–5 and 3 Indexes; Vol. III, Fasc. 1 @ /12/ each ... 12
ntakhabu-l-Lubāb, (Text) Fasc. 1–19 @ /6/ each ... 7
āṣir-i-'Ālamgīrī, (Text), Fasc. 1–6 @ /6/ each ... 2
khbatu-l-Fikr, (Text) Fasc. 1 0
āmī's Khiradnāmah-i-Iskandari, (Text) Fasc. 1-2 @ /12/ each ... 1
āẓu-s-Salātīn, (Text) Fasc. 1–5 @ /6/ each 1
baqāt-i-Nāṣirī, (Text) Fasc. 1–5 @ /6/ each 1
Ditto (English) Fasc. 1–14 @ /12/ each 10
Ditto Index 1
ikh-i-Fīrūz Shāhi of Ẓiyāu-d-dīn Barni (Text) Fasc. 1–7 @ /6/ each... 2
īkh-i-Fīrūzshāhi, of Shams-i-Sirāj Aif, (Text) Fasc. 1–6 @ /6/ each... 2
Ancient Arabic Poems, Fasc. 1-2 @ 1/8/ each 3
s o Rāmīn, (Text) Fasc. 1–5 @ /6/ each 1
afarnāmah, Vol. I, Fasc. 1–9, Vol. II, Fasc. 1–8 @ /6/ each ... 6
zuk-i-Jahāngīrī, (Eng.) Fasc. 1 0

ASIATIC SOCIETY'S PUBLICATIONS.

SIATIC RESEARCHES. Vol. VII, Vols. XI and XVII, and Vols. XIX and XX @ 10/ each 50

ROCEEDINGS of the Asiatic Society from 1865 to 1869 (incl.) @ /6/ per No.; and from 1870 to date @ /8/ per No.

URNAL of the Asiatic Society for 1843 (12), 1844 (12), 1845 (12), 1846 (5), 1847 (12), 1848 (12), 1866 (7), 1867 (6), 1868 (6), 1869 (8), 1870 (8), 1871 (7), 1872 (8), 1873 (8) 1874 (8), 1875 (7), 1876 (7), 1877 (8), 1878 (8), 1879 (7), 1880 (8), 1881 (7), 1882, (6), 1883 (5), 1884 (6), 1885 (6), 1886 (8), 1887 (7), 1888 (7), 1889 (10), 1890 (11), 1891 (7), 1892 (8), 1893 (11), 1894 (8), 1895 (7), 1896 (8), 1897 (8), 1898 (8), 1899 (8), @ 1/8 per No. to Members and @ 2/ per No. to Non-Members

N. B.—The figures enclosed in brackets give the number of Nos. in each Volume.

Centenary Review of the Researches of the Society from 1784–1883 ... 3

Sketch of the Turki language as spoken in Eastern Turkistan, by R. B. Shaw (Extra No., *J.A.S.B.*, 1878) 4

[illegible]'s Catalogue of Reptiles in the Museum of the Asiatic Society (Extra No., *J.A.S.B.*, 1868) 2

Catalogue of Mammals and Birds of Burmah, by E. Blyth (Extra No., *J.A.S.B.*, 1875) 4

[illegible] to the Maithili Language of North Bihār, by G. A. [illegible], Part II, *Chrestomathy* and Vocabulary (Extra No., *J.A.S.B.*, 1882) 4

[illegible] 3

[illegible] Vertebrata 3

[illegible] of the Library of the Asiatic Society, Bengal, by W. A. Bion 3

[illegible] on the Himalayan, Vols. II and IV, @ 16/ each... 32

[illegible], [illegible] pages with 17 plates, 4to. Part I ... 2

[illegible] 4

[illegible] Vols. III and IV, @ 20/ each 40

[illegible] Descriptions of New Indian Lepidoptera, [illegible] Plates, 4to. @ 6/ each 15

[illegible] 4

[illegible] 16

[illegible] 6

[illegible] 8

[illegible] in the rooms of [illegible] 4

[illegible] Geography of [illegible] 4

[illegible] @ 1/ each ... 22

[illegible], by Dr. R. L. Mitra ... 5

[illegible] the [illegible]

BIBLIOTHECA INDICA:

COLLECTION OF ORIENTAL WORKS

PUBLISHED BY THE

ASIATIC SOCIETY OF BENGAL.

NEW SERIES, No. 1007.



शतसाहस्रिका प्रज्ञापारमिता ।

ÇATASAHASRIKĀ-PRAJÑĀ-PĀRAMITĀ

A

THEOLOGICAL AND PHILOSOPHICAL DISCOURSE

OF

BUDDHA WITH HIS DISCIPLES

(IN A HUNDRED-THOUSAND STANZAS).

EDITED BY

PRATĀPACANDRA GHOṢA.

PART I. FAS 2.

CALCUTTA.

PRINTED AT THE BAPTIST MISSION PRESS,

AND PUBLISHED BY THE

ASIATIC SOCIETY, 57, PARK STREET,

1902.

LIST OF BOOKS FOR SALE

AT THE LIBRARY OF THE

ASIATIC SOCIETY OF BENGAL

No. 57, PARK STREET, CALCUTTA.

AND OBTAINABLE FROM

THE SOCIETY'S AGENTS, MESSRS. LUZAC & CO.,
46, GREAT RUSSELL STREET, LONDON, W.C., AND MR OTTO
HARRASSOWITZ, BOOKSELLER, LEIPZIG, GERMANY.

*Complete copies of those works marked with an asterisk * cannot be supplied—some of the Fasciculi being out of stock.*

BIBLIOTHECA INDICA.

Sanskrit Series.

Advaita Brahma Siddhi, (Text) Fasc. 1–4 @ /6/ each ...	Rs.	1
Advaitachinta Kaustubha, Fasc. 1		0
*Agni Purāṇa, (Text) Fasc. 4–14 @ /6/ each		4
Aitarēya Brāhmaṇa, Vol. I, Fasc. 1–5 and Vol. II, Fasc. 1–5 Vol. III, Fasc. 1–5 Vol. IV, Fasc. 1–5 @ /6/		7
Aṇu Bhāṣyam, (Text) Fasc. 1–5 @ /6/ each		1
Aphorisms of Sāṇḍilya, (English) Fasc. 1		0
Aṣṭasāhasrikā Prajñāpāramitā, (Text) Fasc. 1–6 @ /6/ each ...		2
Açvavaidyaka, (Text) Fasc. 1–5 @ /6/ each		1
Avadāna Kalpalatā, (Sans. and Tibetan) Vol. I, Fasc. 1–5; Vol. II, Fasc. 1–5 @ 1/ each		10
*Bhāmatī, (Text) Fasc. 4–8 @ /6/ each		1
Bhāṭṭa Dīpikā Vol. I, Fasc. 1–3		1
Bṛhaddēvatā (Text) Fasc. 1–4 @ /6/ each		1
Bṛhaddharma Purāṇa, (Text) Fasc. 1–6 @ /6/ each		2
Bodhicaryavatara of Cantideva, Fasc. 1		0
Catalogue of Sanskrit Books and MSS., Fasc. 1–3 @ 2/ each ...		6
Çatapatha Brāhmaṇa, Fasc. 1–5		1
*Caturvarga Chintāmaṇi (Text) Vols. II, 1–25; III. Part I, Fasc. 1–18, Part II, Fasc. 1–10 @ /6/ each		19
Çlokavartika, (English) Fasc. 1–2		1
*Çrauta Sūtra of Āpastamba, (Text) Fasc. 4–16 @ /6/ each ...		4
Ditto Çāṅkhāyana, (Text) Vol. I, Fasc. 1–7; Vol. II, Fasc. 1–4, Vol. III, Fasc. 1–4 @ /6/ each		5
Çrī Bhāshyam, (Text) Fasc. 1–3 @ /6/ each		1
Gadadhara Paddhati Kālasāra Vol I. Fasc. 1–3		1
Kāla Mādhava, (Text) Fasc. 1–4 @ /6/ each		1
Kāla Viveka, Fasc. 1–4		1
Kātantra, (Text) Fasc. 1–6 @ /12/ each		4
Kathā Sarit Sāgara, (English) Fasc. 1–14 @ /12/ each		10
Kūrma Purāṇa, (Text) Fasc. 1–9 @ /6/ each		3
Lalita-Vistara, (English) Fasc. 1–3 @ /12/ each		2
Madana Pārijāta, (Text) Fasc. 1–11 @ /6/ each...		4
Mahā-bhāṣya-pradīpōdyōta, (Text) Fasc. 1–9 & Vol. II, Fasc. 1–3 @ /6/ each		4
Manuṭīkā Saṅgraha, (Text) Fasc. 1–3 @ /6/ each		1
Mārkaṇḍēya Purāṇa, (English) Fasc. 1–6 @ /12 each		4
*Mīmāṁsā Darçana, (Text) Fasc. 7–19 @ /6/ each		4
Nārada Smṛti, (Text) Fasc. 1–3 @ /6/		1
Nyāyavārtika, (Text) Fasc. 1–4 @ /6/		1
*Nirukta, (Text) Vol. III, Fasc. 1–6; Vol. IV, Fasc. 1–8 @ /6/ each ...		5
Nityacarapaddhati Fasc. I–III (Text) @ /6/		1
Nyayabindutika, (Text)		0
Nyāya Kusumāñjali Prakaraṇa (Text) Vol. I, Fasc. 1–6 Vol. II, Fasc. 1–3 @ /6/ each		3
Padumapati Fasc. 1–2		3

तार्थं दिव्येन श्रोत्रेण श्रोतुकामेन तेषाञ्च बुद्धानां भगवतां चेत-
स चेतः प्रज्ञातुकामेन तेषाञ्च बुद्धानां भगवतां पूर्व्वयोगसमुद्गतां
बोधिसत्त्वचर्य्यां समनुगन्तुकामेन तेषां बुद्धानां भगवतामनेकविध-
र्द्धिविकुर्व्वितं संद्रष्टुकामेन बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमि-
तायां शिक्षितव्यं। ये दक्षिणस्यान्दिशि गङ्गानदीवालुकोपमेषु
लोकधातुषु बुद्धाभगवन्तस्तान् सर्व्वान् दिव्येन चक्षुषा संद्रष्टुकामेन
यच्च बुद्धाभगवन्तोधर्म्मं भाषन्ते तत्सर्व्वं दिव्येन श्रोत्रेण श्रोतु-
कामेन तेषाञ्च बुद्धानां भगवतां चेतसैव चेतः प्रज्ञातुकामेन तेषां
बुद्धानां भगवतां पूर्व्वयोगसमुद्गतां बोधिसत्त्वचर्य्यामनुगन्तुकामेन
तेषां बुद्धानां भगवतामनेकविधर्द्धिविकुर्व्वितं संद्रष्टुकामेन बोधि-
सत्त्वेन महासत्त्वेन प्रज्ञापारमितायां शिक्षितव्यं। ये पश्चिमायां-
दिशि गङ्गानदीवालुकोपमेषु लोकधातुषु बुद्धाभगवन्तस्तान्
सर्व्वान् दिव्येन चक्षुषा संद्रष्टुकामेन यच्च ते बुद्धाभगवन्तोधर्म्मं
भाषन्ते तत्सर्व्वं दिव्येन श्रोत्रेण श्रोतुकामेन तेषां बुद्धानां भगवतां
चेतसैव चेतः प्रज्ञातुकामेन तेषाञ्च बुद्धानां भगवतां पूर्व्वयोगसमु-
द्गतां बोधिसत्त्वचर्य्यामनुगन्तुकामेन तेषाञ्च बुद्धानां भगवतामनेक-
विधर्द्धिविकुर्व्वितं संद्रष्टुकामेन बोधिसत्त्वेन महासत्त्वेन प्रज्ञा-
पारमितायां शिक्षितव्यं। ये उत्तरस्यान्दिशि गङ्गानदीवालुकोप-
मेषु लोकधातुषु बुद्धाभगवन्तस्तान् सर्व्वान् दिव्येन चक्षुषा संद्रष्टुका-
मेन यच्च ते बुद्धाभगवन्तोधर्म्मं भाषन्ते तत् सर्व्वं दिव्येन श्रोत्रेण

* एष पाठः पञ्चसु पुस्तकेषु किन्तु कुत्रचित्स्थले विकुर्व्वितुमिति
कुत्रचित्, स्थले विकुर्व्वितमिति पाठोदृश्यते।

श्रोतुकामेन तेषाञ्च बुद्धानां भगवतां चेतसैव चेतः प्रज्ञा...
तेषां बुद्धानां भगवतां पूर्व्वयोगसहगतां बोधि...चर्य्या...
कामेन तेषां बुद्धानां भगवतामनेकविधमृद्धिविकुर्व्वितं...
कामेन बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां शिक्षितव्यं ।
उत्तरपूर्व्वस्यान्दिशि गङ्गानदीवालुकोपमेषु लोकधातुषु बुद्ध...
वन्तस्तान् सर्व्वान् दिव्येन चक्षुषा संद्रष्टुकामेन यञ्च ते ...
धर्म्मं भाषन्ते तत्सर्व्वं दिव्येन श्रोत्रेण श्रोतुकामेन तेषाञ्च बुद्ध...
भगवतां चेतसैव चेतः प्रज्ञातुकामेन तेषाञ्च बुद्धानां ...
पूर्व्वयोगसहगतां बोधिसत्त्वचर्य्यामनुस्मर्त्तुकामेन तेषाञ्च बुद्ध...
भगवतामनेकविधमृद्धिविकुर्व्वितं संद्रष्टुकामेन बोधिसत्त्वेन मा...
सत्त्वेन प्रज्ञापारमितायां शिक्षितव्यं । ये पूर्व्वद...स्यां...
गङ्गानदीवालुकोपमेषु लोकधातुषु बुद्धाभगवन्तस्तान् ...
दिव्येन चक्षुषा संद्रष्टुकामेन यञ्चते बुद्धाभगवन्तोधर्म्मं भा...
तत्सर्व्वं दिव्येन श्रोत्रेण श्रोतुकामेन तेषां बुद्धानां भ...
चेतसैव चेतः प्रज्ञातुकामेन तेषाञ्च बुद्धानां भगवतां पूर्व्वयो...
सहगतां बोधिसत्त्वचर्य्यामनुस्मर्त्तुकामेन तेषाञ्च बुद्धानां ...
मनेकविधमृद्धिविकुर्व्वितं संद्रष्टुकामेन बोधिसत्त्वेन महा...
प्रज्ञापारमितायां शिक्षितव्यं । ये दक्षिणपश्चिमायान्दिशि ...
नदीवालुकोपमेषु लोकधातुषु बुद्धाभगवन्तस्तान् सर्व्वान् दि...
चक्षुषा संद्रष्टुकामेन यञ्चते बुद्धाभगवन्तोधर्म्मं भाषन्ते ...
दिव्येन श्रोत्रेण श्रोतुकामेन तेषाञ्च बुद्धानां भगवतां ...
चेतः प्रज्ञातुकामेन तेषाञ्च बुद्धानां भगवतां पूर्व्वयो...

धिसत्त्वचर्य्यामनुस्मर्त्तुकामेन तेषाञ्च बुद्धानां भगवतामनेकविध-
द्धिविकुर्व्वितं संद्रष्टुकामेन बोधिसत्त्वेन महासत्त्वेन प्रज्ञापार-
तायां शिक्षितव्यं। ये पश्चिमोत्तरस्यान्दिशि गङ्गानदीवालुको-
मेषु लोकधातुषु बुद्धाभगवन्तस्तान् सर्व्वान् दिव्येन चक्षुषा
द्रष्टुकामेन यच्चते बुद्धाभगवन्तोधर्म्मं भाषन्ते तत्सर्व्वं दिव्येन
त्रेण श्रोतुकामेन तेषाञ्च बुद्धानां भगवतां चेतसैव चेतः प्रज्ञातु-
मेन तेषाञ्च बुद्धानां भगवतां पूर्व्वयोगसहगतां बोधिसत्त्वचर्य्या-
नुस्मर्त्तुकामेन तेषाञ्च बुद्धानां भगवतामनेकविधर्द्धिविकुर्व्वितं
द्रष्टुकामेन बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां शिक्षितव्यं।
ऽधस्ताद्दिशि गङ्गानदीवालुकोपमेषु लोकधातुषु बुद्धाभगवन्त-
ान् सर्व्वान् दिव्येन चक्षुषा संद्रष्टुकामेन यच्चते बुद्धाभगवन्तो
र्म्मं भाषन्ते तत्सर्व्वं दिव्येन श्रोत्रेण श्रोतुकामेन तेषाञ्च बुद्धानां
गवतां चेतसैव चेतः प्रज्ञातुकामेन तेषाञ्च बुद्धानां भगवतां
र्व्वयोगसहगतां बोधिसत्त्वचर्य्यामनुस्मर्त्तुकामेन तेषाञ्च बुद्धानां
गवतामनेकविधर्द्धिविकुर्व्वितं संद्रष्टुकामेन बोधिसत्त्वेन महा-
त्त्वेन प्रज्ञापारमितायां शिक्षितव्यं। ये उपरिष्टाद्दिशि गङ्गा-
दीवालुकोपमेषु लोकधातुषु बुद्धाभगवन्तस्तान् सर्व्वान् दिव्येन
चक्षुषा संद्रष्टुकामेन यच्चते बुद्धाभगवन्तोधर्म्मं भाषन्ते तत्सर्व्वं
दिव्येन श्रोत्रेण श्रोतुकामेन तेषाञ्च बुद्धानां भगवतां चेतसैव
चेतः प्रज्ञातुकामेन तेषाञ्च बुद्धानां भगवतां पूर्व्वयोगसहगतां
बोधिसत्त्वचर्य्यामनुस्मर्त्तुकामेन तेषाञ्च बुद्धानां भगवतामनेकविध-
र्द्धिविकुर्व्वितं संद्रष्टुकामेन बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमि-

नायां शिक्षितव्यं। पुनरपरं शारद्वतीपुत्र बोधिसत्त्वेन म[illegible]
यन्तो बुद्धा भगवन्तो धर्म्मं भाषन्ते समन्ताद्दशसु दिक्षु सर्व्वे [illegible]
धर्म्मं भाषन्ते तत्सर्व्वं श्रुत्वा नाच्छेदेन स्मृतिबलाधानेन [illegible]
कामेन यावदनुत्तरां सम्यक्सम्बोधिमभिसम्बुद्धः [illegible]
सर्व्वमप्रणाशयितुकामेन प्रज्ञापारमितायां शिक्षितव्यं। पुन[रपरं]
शारद्वतीपुत्र बोधिसत्त्वेन महासत्त्वेनाऽतीताऽनागतप्रत्युत्पन्नानां [भग]
वतां बुद्धानां बुद्धक्षेत्राणि च बुद्धक्षेत्रपरिशुद्धिञ्च* द्रष्टु[म्]
परिनिष्पादयितुकामेन प्रज्ञापारमितायां शिक्षितव्यं। पुन[रपरं]
शारद्वतीपुत्र यत्किञ्चित्तथागतैर्भाषितं सूत्रं गेयं व्या[करणं]
गाथोदाननिदानत्यक्तकजातकवैपुल्याऽद्भुतधर्म्मायच्छ्रावकैर्न श्रुतं त[त्]
श्रोतुकामेन उद्ग्रहीतुकामेन धारयितुकामेन [illegible]
पर्य्यवाप्तुकामेन तथता प्रतिपत्तुकामेन परेभ्यश्च [illegible]
सम्प्रकाशयितुकामेन बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमिता[यां]
शिक्षितव्यं। पुनरपरं शारद्वतीपुत्र यत्किञ्चित् पूर्व्वस्यां [दिशि]
गङ्गानदीवालुकोपमेषु लोकधातुषु सर्व्वबुद्धैर्भगवद्भिर्भाषितं भा[षन्ते]
भाषिष्यन्ते तत्सर्व्वं श्रोतुकामेन उद्ग्रहीतुकामेन [illegible]
वाचयितुकामेन पर्य्यवाप्तुकामेन परेभ्यश्च विस्तरेण [illegible]
कामेन [illegible] प्रतिपत्तुकामेन बोधिसत्त्वेन महासत्त्वेन प्र[ज्ञा]
पारमितायां शिक्षितव्यं। यत्किञ्चिद्दक्षिणस्यान्दिशि [illegible]
भंगवद्भिर्भाषितं भाषन्ते भाषिष्यन्ते तत्सर्व्वं श्रोतुकामेन [illegible]
कामेन धारयि[illegible]मेन वाचयितुकामेन पर्य्यवाप्तुकामेन [illegible]

* परिशुद्धीश्च इ। ख, ग, घ, ङ पुस्तकेषु पाठः।

विस्तरेण सम्प्रकाशयितुकामेन तत्र च तथत्वाय प्रतिपत्तुकामेन
बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां शिक्षितव्यं । यत्किञ्चित्प-
श्चिमायान्दिशि गङ्गानदीवालुकोपमेषु लोकधातुषु सर्व्वबुद्धैर्भगव-
द्भिर्भाषितं भाषन्ते भाषिष्यन्ते तत्सर्व्वं श्रोतुकामेन उद्ग्रहीतुकामेन
धारयितुकामेन वाचयितुकामेन पर्य्यवाप्तुकामेन परेभ्यश्च विस्तरेण
सम्प्रकाशयितुकामेन तत्र च तथत्वाय प्रतिपत्तुकामेन बोधिसत्त्वेन
महासत्त्वेन प्रज्ञापारमितायां शिक्षितव्यं । यत्किञ्चिदुत्तरस्यान्दिशि
सर्व्वबुद्धैर्भगवद्भिर्भाषितं भाषन्ते भाषिष्यन्ते तत्सर्व्वं श्रोतुकामेन
उद्ग्रहीतुकामेन धारयितुकामेन वाचयितुकामेन पर्य्यवाप्तुकामेन
परेभ्यश्च विस्तरेण सम्प्रकाशयितुकामेन तत्र च तथत्वाय प्रति-
पत्तुकामेन बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां शिक्षितव्यं ।
यत्किञ्चिदुत्तरपूर्व्वस्यान्दिशि सर्व्वबुद्धैर्भगवद्भिर्भाषितं भाषन्ते
भाषिष्यन्ते तत्सर्व्वं श्रोतुकामेन उद्ग्रहीतुकामेन धारयितुकामेन
वाचयितुकामेन पर्य्यवाप्तुकामेन परेभ्यश्च विस्तरेण सम्प्रकाशयितु-
कामेन तत्र च तथत्वाय प्रतिपत्तुकामेन बोधिसत्त्वेन महासत्त्वेन
प्रज्ञापारमितायां शिक्षितव्यं । यत्किञ्चित् पूर्व्वदक्षिणस्यान्दिशि
सर्व्वबुद्धैर्भगवद्भिर्भाषितं भाषन्ते भाषिष्यन्ते तत्सर्व्वं श्रोतुकामेन
उद्ग्रहीतुकामेन धारयितुकामेन वाचयितुकामेन पर्य्यवाप्तुकामेन
परेभ्यश्च विस्तरेण सम्प्रकाशयितुकामेन तत्र च तथत्वाय प्रति-
पत्तुकामेन बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां शिक्षितव्यं ।
यत्किञ्चिद्दक्षिणपश्चिमायान्दिशि सर्व्वबुद्धैर्भगवद्भिर्भाषितं भाषन्ते
भाषिष्यन्ते तत्सर्व्वं श्रोतुकामेन उद्ग्रहीतुकामेन धारयितुकामेन

सावेवं महर्द्धिकावेवं महेशाख्यावेवं महानुभावौ न भास-
तो न तपतो न विरोचतस्ताः सर्व्वांअवभासयितुकामेन बोधिस-
त्त्वेन महासत्त्वेन प्रज्ञापारमितायां शिक्षितव्यं। याः पश्चिमायां
दिशि गङ्गानदीवालुकोपमेषु लोकधातुषु अन्धकारतमिस्रा
अघाअघस्फुटायत्रैवंकौ सूर्य्याचन्द्रमसावेवं महर्द्धिकावेवं मह-
शाख्यावेवं महानुभावौ न भासतो न तपतो न विरोच-
तस्ताः सर्व्वांअवभासयितुकामेन बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमिता-
यां शिक्षितव्यं। या उत्तरस्यां दिशि गङ्गानदीवालुकोपमेषु लोकधातुषु
अन्धकारतमिस्राअघाअघस्फुटायत्रैवंकौ सूर्य्याचन्द्रमसावेवं महर्द्धि-
कावेवं महेशाख्यावेवं महानुभावौ न भासतोन तपतो-
न विरोचतस्ताः सर्व्वांअवभासयितुकामेन बोधिसत्त्वेन महासत्त्वेन
प्रज्ञापारमितायां शिक्षितव्यं। या उपरिष्टाद्दिशि गङ्गानदी-
वालुकोपमेषु लोकधातुषु अन्धकारतमिस्राअघाअघस्फुटायत्रैवंकौ
सूर्य्याचन्द्रमसावेवं महर्द्धिका*वेवं महेशाख्यावेवं महानुभावौ
न भासतोन तपतोन विरोचतस्ताः सर्व्वांअवभासयितुका-
बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां शिक्षितव्यं। पुनरपरं
शारद्वतीपुत्र यावन्तः पूर्व्वस्यान्दिशि गङ्गानदीवालुकोपमा लोक-
धातवो यत्र न बुद्धशब्दं न धर्म्मशब्दं न सङ्घशब्दं सत्त्वाः शृण्वन्ति
तत्र लोकधातुषु तान् सर्व्वसत्त्वान् बुद्धधर्म्मसङ्घशब्दान् श्रावयितु-
कामेन सम्यग्दृष्टौ प्रतिष्ठापयितुकामेन बोधिसत्त्वेन महासत्त्वेन

* च पुस्तके एवं महेशाख्यावित्यतः प्रागपि एवं महानुभावाविति
पाठः सर्व्वत्र दृश्यते।

प्रज्ञापारमितायां शिक्षितव्यं। यावन्तः शारद्वतीपुत्र दक्षिणस्या-न्दिशि गङ्गानदीवालुकोपमाल्लोकधातवोयत्र न बुद्धशब्दं न धर्म्मशब्दं न सङ्घशब्दं सत्त्वाः शृण्वन्ति तत्र लोकधातुषु तान् सर्व्वसत्त्वान् बुद्धधर्म्मसङ्घशब्दान् श्रावयितुकामेन सम्यग्दृष्टौ प्रतिष्ठापयितुकामेन बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां शिक्षितव्यं। यावन्तः शारद्वतीपुत्र पश्चिमायान्दिशि गङ्गानदीवालुकोपमालोकधातवोयत्र न बुद्धशब्दं न धर्म्मशब्दं न सङ्घशब्दं सत्त्वाः शृण्वन्ति तत्र लोकधातुषु तान् सर्व्वसत्त्वान् बुद्धधर्म्मसङ्घशब्दान् श्रावयितुकामेन सम्यग्दृष्टौ प्रतिष्ठापयितुकामेन बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां शिक्षितव्यं। यावन्तः शारद्वतीपुत्र उत्तरस्यान्दिशि गङ्गानदीवालुकोपमाल्लोकधातवोयत्र न बुद्धशब्दं न धर्म्मशब्दं न सङ्घशब्दं सत्त्वाः शृण्वन्ति तत्र लोकधातुषु तान् सर्व्वसत्त्वान् बुद्धधर्म्मसङ्घशब्दान् श्रावयितुकामेन सम्यग्दृष्टौ प्रतिष्ठापयितुकामेन बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां शिक्षितव्यं। यावन्तः शारद्वतीपुत्र उत्तरपूर्व्वस्यान्दिशि गङ्गानदीवालुकोपमालोकधातवोयत्र न बुद्धशब्दं न धर्म्मशब्दं न सङ्घशब्दं सत्त्वाः शृण्वन्ति तत्र लोकधातुषु तान् सर्व्वसत्त्वान् बुद्धधर्म्मसङ्घशब्दान् श्रावयितुकामेन सम्यग्दृष्टौ प्रतिष्ठापयितुकामेन बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां शिक्षितव्यं। यावन्तः शारद्वतीपुत्र पूर्व्वदक्षिणस्यान्दिशि गङ्गानदीवालुकोपमालोकधातवोयत्र न बुद्धशब्दं न धर्म्मशब्दं न सङ्घशब्दं सत्त्वाः शृण्वन्ति तत्र लोकधातुषु तान् सर्व्वसत्त्वान् बुद्धधर्म्मसङ्घशब्दान् श्रावयितुकामेन

सम्यग्दृष्टौ प्रतिष्ठापयितुकामेन बोधिसत्त्वेन महासत्त्वेन प्रज्ञापार-
मितायां शिक्षितव्यं। यावन्तः शारद्वतीपुत्र दक्षिणस्या-
न्दिशि गङ्गानदीवालुकोपमालोकधातवो यत्र न बुद्धशब्दं
धर्मशब्दं न सङ्घशब्दं सत्त्वाः शृण्वन्ति तत्र लोकधातुषु ता-
न्सर्वसत्त्वान् बुद्धधर्मसङ्घशब्दान् श्रावयितुकामेन सम्यग्दृष्टौ प्रति-
ष्ठापयितुकामेन बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां शि-
क्षितव्यं। यावन्तः शारद्वतीपुत्र पश्चिमोत्तरस्यान्दिशि
वालुकोपमालोकधातवो यत्र न बुद्धशब्दं न धर्मशब्दं न
सत्त्वाः शृण्वन्ति तत्र लोकधातुषु तान् सर्वसत्त्वान्
शब्दान् श्रावयितुकामेन सम्यग्दृष्टौ प्रतिष्ठापयितुकामेन बोधि-
सत्त्वेन महासत्त्वेन प्रज्ञापारमितायां शिक्षितव्यं। यावन्तः शार-
द्वतीपुत्राऽधस्ताद्दिशि गङ्गानदीवालुकोपमालोकधातवो यत्र
बुद्धशब्दं न धर्मशब्दं न सङ्घशब्दं सत्त्वाः शृण्वन्ति तत्र लोकधातु
तान् सर्वसत्त्वान् बुद्धधर्मसङ्घशब्दान् श्रावयितुकामेन सम्यग्दृष्टौ
प्रतिष्ठापयितुकामेन बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां
शिक्षितव्यं। यावन्तः शारद्वतीपुत्रोपरिष्टाद्दिशि गङ्गानदीवालु
कोपमालोकधातवो यत्र न बुद्धशब्दं न धर्मशब्दं न
सत्त्वाः शृण्वन्ति तत्र लोकधातुषु तान् सर्वसत्त्वान् बुद्ध
शब्दान् श्रावयितुकामेन सम्यग्दृष्टौ प्रतिष्ठापयितुकामेन बो-
सत्त्वेन महासत्त्वेन प्रज्ञापारमितायां शिक्षितव्यं। पुनरपरं
द्वतीपुत्र ये पूर्वस्यान्दिशि गङ्गानदीवालुकोपमेषु लो
न्धाः सत्त्वास्ते ममाऽनुभावाच्चक्षुषा रूपाणि द्रक्ष्यन्ति बधिराः

ब्दान् श्रोष्यन्त्युन्मत्ताः स्मृतिं प्रतिलप्स्यन्ते नग्नाश्चीवराणि प्रति-
लप्स्यन्ते क्षुधितपिपासिता अन्नपानं प्रतिलप्स्यन्ते ग्लाना व्याधिभ्यः
प्रतिमोक्ष्यन्ते बन्धनाऽवरोधगतायथाकामं गमिष्यन्ति* ममर्द्धा
ममाऽनुभावेनेति तेन बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां
शिक्षितव्यं। ये शारद्वतीपुत्र दक्षिणस्यान्दिशि गङ्गानदीवालुकोप-
मेषु लोकधातुष्वन्धाः सत्त्वास्ते ममाऽनुभावाच्चक्षुषा रूपाणि द्रक्ष्यन्ति
बधिराः श्रोत्रेण शब्दान् श्रोष्यन्ति उन्मत्ताः स्मृतिं प्रतिलप्स्यन्ते
नग्नाश्चीवराणि प्रतिलप्स्यन्ते क्षुधितपिपासिता अन्नपानं प्रति-
लप्स्यन्ते ग्लाना व्याधिभ्यः प्रतिमोक्ष्यन्ते बन्धनाऽवरोधगतायथाकामं
गमिष्यन्ति ममर्द्धा ममाऽनुभावेनेति तेन बोधिसत्त्वेन महासत्त्वेन
प्रज्ञापारमितायां शिक्षितव्यं। ये शारद्वतीपुत्र पश्चिमायान्दिशि
गङ्गानदीवालुकोपमेषु लोकधातुष्वन्धाः सत्त्वास्ते ममाऽनुभावाच्चक्षुषा
रूपाणि द्रक्ष्यन्ति बधिराः श्रोत्रेण शब्दान् श्रोष्यन्ति उन्मत्ताः
स्मृतिं प्रतिलप्स्यन्ते नग्नाश्चीवराणि प्रतिलप्स्यन्ते क्षुधितपिपासिता-
अन्नपानं प्रतिलप्स्यन्ते ग्लाना व्याधिभ्यः प्रतिमोक्ष्यन्ते बन्धनाऽवरोध-
गतायथाकामं गमिष्यन्ति ममर्द्धा ममाऽनुभावेनेति तेन बोधि-
सत्त्वेन महासत्त्वेन प्रज्ञापारमितायां शिक्षितव्यं। ये शारद्वतीपुत्रो-
त्तरस्यान्दिशि गङ्गानदीवालुकोपमेषु लोकधातुष्वन्धाः सत्त्वास्ते
ममाऽनुभावाच्चक्षुषा रूपाणि द्रक्ष्यन्ति बधिराः श्रोत्रेण शब्दं श्रोष्यन्ति
उन्मत्ताः स्मृतिं प्रतिलप्स्यन्ते नग्नाश्चीवराणि प्रतिलप्स्यन्ते क्षुधित-

* यथाकामंगमाभविष्यन्ति इति ख, ग, घ, च पुस्तकेषु पाठः एवं परत्र।

पिपासिताश्चान्नपानं प्रतिलप्स्यन्ते ग्लानाः व्याधिभ्यः प्रतिमोक्ष्यन्ते बन्धनाऽवरोधगतायथाकामंगमाभविष्यन्ति ममर्द्धा ममाऽनुभावेनेति बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां शिक्षितव्यं। ये शारद्वतीपुत्रोत्तरपूर्वस्यान्दिशि गङ्गानदीवालुकोपमेषु लोकधातुष्वन्धाः सत्त्वास्ते ममाऽनुभावाच्चक्षुषा रूपाणि द्रक्ष्यन्ति बधिराः श्रोत्रेण शब्दं श्रोष्यन्ति उन्मत्ताः स्मृतिं प्रतिलप्स्यन्ते नग्नाश्चीवराणि प्रतिलप्स्यन्ते क्षुधितपिपासिताश्चान्नपानं प्रतिलप्स्यन्ते ग्लानाः व्याधिभ्यः प्रतिमोक्ष्यन्ते बन्धनाऽवरोधगतायथाकामंगमाभविष्यन्ति ममर्द्धा ममाऽनुभावेनेति बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां शिक्षितव्यं। ये शारद्वतीपुत्र पूर्वदक्षिणस्यान्दिशि गङ्गानदीवालुकोपमेषु लोकधातुष्वन्धाः सत्त्वास्ते ममाऽनुभावाच्चक्षुषा रूपाणि द्रक्ष्यन्ति बधिराः श्रोत्रेण शब्दान् श्रोष्यन्ति उन्मत्ताः स्मृतिं प्रतिलप्स्यन्ते नग्नाश्चीवराणि प्रतिलप्स्यन्ते क्षुधितपिपासिताश्चान्नपानं प्रतिलप्स्यन्ते ग्लानाः व्याधिभ्यः प्रतिमोक्ष्यन्ते, बन्धनाऽवरोधगतायथाकामंगमाभविष्यन्ति ममर्द्धा ममाऽनुभावेनेति बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां शिक्षितव्यं। ये शारद्वतीपुत्र दक्षिणपश्चिमायान्दिशि गङ्गानदीवालुकोपमेषु लोकधातुष्वन्धाः सत्त्वास्ते ममाऽनुभावाच्चक्षुषा रूपाणि द्रक्ष्यन्ति बधिराः श्रोत्रेण शब्दं श्रोष्यन्ति उन्मत्ताः स्मृतिं प्रतिलप्स्यन्ते नग्नाश्चीवराणि प्रतिलप्स्यन्ते क्षुधितपिपासिताश्चान्नपानं प्रतिलप्स्यन्ते ग्लानाः व्याधिभ्यः प्रतिमोक्ष्यन्ते बन्धनाऽवरोधगतायथाकामंगमाभविष्यन्ति ममर्द्धा ममाऽनुभावेनेति बोधिसत्त्वेन महासत्त्वेन प्रज्ञा-

पारमितायां शिचितव्यं। ये शारद्वतीपुत्र पश्चिमोत्तरस्यान्दिशि गङ्गानदीवालुकोपमेषु लोकधातुष्वन्धाः सत्त्वास्ते ममाऽनुभावाच्चक्षुषा रूपाणि द्रक्ष्यन्ति बधिराः श्रोत्रेण शब्दं श्रोष्यन्ति उन्मत्ताः स्मृतिं प्रतिलप्स्यन्ते नग्नाश्चीवराणि प्रतिलप्स्यन्ते क्षुधितपिपासिता-श्चान्नपानं प्रतिलप्स्यन्ते ग्लानाः व्याधिभ्यः परिमोक्ष्यन्ते बन्धनाऽव-रोधगतायथाकामंगमाभविष्यन्ति मयर्द्धा ममाऽनुभावेनेति बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां शिचितव्यं। ये शार-द्वतीपुत्राऽधस्ताद्दिशि गङ्गानदीवालुकोपमेषु लोकधातुष्वन्धाः सत्त्वास्ते ममाऽनुभावाच्चक्षुषा रूपाणि द्रक्ष्यन्ति बधिराः श्रोत्रेण शब्दं श्रोष्यन्ति उन्मत्ताः स्मृतिं प्रतिलप्स्यन्ते नग्नाश्चीवराणि प्रति-लप्स्यन्ते क्षुधितपिपासिताश्चान्नपानं प्रतिलप्स्यन्ते ग्लानाः व्याधिभ्यः परिमोक्ष्यन्ते, बन्धनाऽवरोधगतायथाकामं गमिष्यन्ति मयर्द्धा ममाऽनुभावेनेति बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां शिचि-तव्यं। ये शारद्वतीपुत्रोपरिष्टाद्दिशि गङ्गानदीवालुकोपमेषु लोक-धातुष्वन्धाः सत्त्वास्ते ममाऽनुभावाच्चक्षुषा रूपाणि द्रक्ष्यन्ति, बधिराः श्रोत्रेण शब्दं श्रोष्यन्ति, उन्मत्ताः स्मृतिं प्रतिलप्स्यन्ते, नग्नाश्चीवराणि प्रतिलप्स्यन्ते, क्षुधितपिपासिताश्चान्नपानं प्रति-लप्स्यन्ते, ग्लानाव्याधिभ्यः परिमोक्ष्यन्ते* बन्धनाऽवरोधगतायथा-कामंगमाभविष्यन्ति, मयर्द्धा ममाऽनुभावेनेति बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां शिचितव्यं। किमिति ये तत्र

---

* केषु स्थलेषु प्रतिमोक्ष्यन्ते इति केषु च स्थलेषु परिमोक्ष्यन्ते इति पाठः सर्व्वेष पुस्तकेषु दृश्यते ।

समन्ताद्दशसु दिक्षु एकैकस्यान्दिशि गङ्गानदीवालुकोपमेषु लोकधातुषु अक्षणाऽपायगताः सत्त्वाः नैरयिकाः तैर्य्यग्योनिकावा याम्लौकिकावा ते ममाऽनुभावात्ततश्चुत्वा मानुष्यमात्मभावं प्रतिलप्स्यन्ते सर्व्वांश्चतान् सत्त्वाञ्छीले प्रतिष्ठापयितुकामेन, समाधौ प्रतिष्ठापयितुकामेन, प्रज्ञायां प्रतिष्ठापयितुकामेन, विमुक्तौ प्रतिष्ठापयितुकामेन, विमुक्तिज्ञानदर्शने प्रतिष्ठापयितुकामेन, स्रोतआपत्तिफले प्रतिष्ठापयितुकामेन सकृदागामिफले प्रतिष्ठापयितुकामेन, अनागामिफले प्रतिष्ठापयितुकामेन अर्हत्त्वे प्रतिष्ठापयितुकामेन, प्रत्येकबोधौ प्रतिष्ठापयितुकामेन, सर्व्वज्ञतायां प्रतिष्ठापयितुकामेन, मार्गाकारज्ञतायां प्रतिष्ठापयितुकामेन, सर्व्वाकारज्ञतायां प्रतिष्ठापयितुकामेन, अनुत्तरायां सम्यक्सम्बोधौ प्रतिष्ठापयितुकामेन, बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां शिक्षितव्यं। पुनरपरं शारद्वतीपुत्र बोधिसत्त्वेन महासत्त्वेन तथागतेर्य्यापथं शिक्षितुकामेन, तथागतचर्य्याचारित्रविशुद्धं तथागतस्य ज्ञानपूर्व्वङ्गमकायकर्म्मवाक्कर्म्ममनस्कर्म्मपरिशुद्धिं शिक्षितुकामेन प्रज्ञापारमितायां शिक्षितव्यं। पुनरपरं शारद्वतीपुत्र बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां चरतैवमुपपरीक्षितव्यं। किमित्यहं महानागाऽवलोकितमवलोक्य सत्त्वेभ्योऽक्षुण्णधर्मं देशयेयं। किमित्यहमतो* सिंहविक्रमितेन विक्रमयेयं। किमित्यहममोघविक्रामितेना† विक्रामयेयं। किमित्यहं चतुरङ्गुलमात्रेण महापृथिवीं

* अयमेव पाठः पुस्तकपत्रके।

† विक्रामितया इति च पुस्तके पाठः।

[illegible] । किमित्यहं सर्वसत्त्वेषु [illegible] [illegible] [illegible] सर्वसत्त्वान् [illegible] शीलेऽनिवेशयेयं। किमित्यहं [illegible] [illegible] [illegible] निर्विकल्पं [illegible]। किमित्यहं सर्वसत्त्वानां [illegible] परिवर्त्तयेयं। किमित्यहं [illegible] [illegible] [illegible] ठेयं। किमित्यहमेकं वा योजनं द्वे वा त्रीणि वा चत्वारि वा पञ्च वा दश वा विंशतं वा त्रिंशतं वा योजनशतं वा योजनसहस्रं वा योजनशतसहस्रं वा योजनकोटीं वा योजनकोटीशतं वा योजनकोटीसहस्रं वा योजनकोटीनियुतसहस्रं वा यावदसंख्येयानि वा अप्रमेयाणि वा अचिन्त्यानि वा अतुल्यानि वा अमाप्यानि वा अपर्यन्तानि वा अप्रमाणानि वा अनभिलाप्यान्यनभिलाप्यानि वा बुद्धक्षेत्राण्युत्क्षिपेयमनुत्क्षिपेयं न कायक्लमो मे स्यादिति प्रज्ञापारमितायां शिक्षितव्यं। पुनरपरं शारद्वतीपुत्र बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां एवमेव व्युपपरीक्षितव्यं। किमित्यहमेकस्मात् कालमन्तरयोः‡ सहस्राराभ्यां पादाभ्यां रश्मिकोटीनियुतशतसहस्राणि प्रमुञ्चन् सर्वापायदुःखानि प्रशमय्य सर्वसत्त्वान् सुखितान् कुर्यामिति प्रज्ञापारमितायां शिक्षितव्यं। पुनरपरं शारद्वतीपुत्र बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां एवमेव व्युपपरीक्षितव्यं। किमित्यहं चातुर्महा-

---

* विधरता इति पञ्चसु पुस्तकेषु पाठः विधरन्त इति पाठो युक्तः।

† पश्य के इति पाठः पञ्चसु पुस्तकेषु दृश्यते पश्यं मे इति शुद्धं प्रतिभाति।

‡ प्रसृतम्योरिति ख, ग, घ, ङ पुस्तकेषु पाठः।

राजकायिकदेवैः त्रायस्त्रिंशैर्यामैस्तुषितैर्निर्म्माणरतिभिः [illegible]
तवशवर्त्तिभिः [illegible]
परीता*भैरप्रमाणाभैराभास्वरैः शुभैः परीत्तशुभैः अप्रमाणशु[illegible]
शुभकृत्स्नैर्वृहैः परीत्तवृहैरप्रमाणवृहैर्वृहत्फलैः अवृहैः अत[illegible]
सुदृशैः सुदर्शनैः अकनिष्ठैः अनेकदेवकोटीनियुतशतसहस्रैः परि[illegible]
वृतः पुरस्कृतो बोधिमण्डलमुपसंक्रम्ययामीति‡ [illegible]
शिक्षितव्यं। पुनरपरं शारद्वतीपुत्र बोधिसत्त्वेन महासत्त्वेन प्रज्ञा[illegible]
पारमितायां चरतैवं व्युपपरीक्षितव्यं। किमिति मे बोधिवृक्षतले[illegible]
निषीदतः चातुर्महाराजकायिकादेवास्त्रायस्त्रिंशादेवाः [illegible]
निर्माणरतयोदेवाः परनिर्म्मितवशवर्त्तिनोदेवाः ब्रह्मकायिकादेवा[illegible]
ब्रह्मपुरोहितादेवाः ब्रह्मपार्षद्यादेवाः महाब्रह्मणोदेवाः परी[illegible]
त्ताभादेवाः आभास्वरादेवाः शुभादेवाः परीत्तशुभादेवाः अप्र[illegible]
माणशुभादेवाः शुभकृत्स्नादेवाः वृहादेवाः वृहत्फलादेवाः अवृहा[illegible]
देवाः अतपादेवाः सुदृशादेवाः सुदर्शनादेवाः [illegible]
दुष्प्रसंस्तरं कुर्य्युरिति प्रज्ञापारमितायां शिक्षितव्यं। [illegible]
शारद्वतीपुत्र बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां चरतैवं
व्युपपरीक्षितव्यं। किमित्यहं बोधिमण्डलनिषण्णः पाणिनालक्षण-
समलङ्कृतेन महापृथिवीं पराहत्य सपरिवारं कृष्णबन्धुमुपि[illegible]

---

* परीत्ताभैरिति ख, ग, घ पुस्तके पाठः।

† बोधिमण्डादद्रुममूलमिति ख, ग, घ पुस्तके पाठः।

‡ उपसंक्रमेयमिति घ पुस्तके पाठः।

---

(१) बोधिद्रुमस्चलदलः पिप्पलः कुञ्जराशनः अश्वत्थे इत्यमरः।

[illegible] प्रज्ञापारमितायां चरितम् । पूर्वतर [illegible]

[illegible] प्रज्ञापारमितायां [illegible]

[illegible] सम्यक्सम्बोधिमभिसम्बुद्ध [illegible]

[illegible]

[illegible] प्रज्ञापारमितायां चरितम् । [illegible]

[illegible] प्रज्ञापारमितायां [illegible][1] [illegible]

[illegible]

[illegible] सम्यक्सम्बोधिमभिसम्बुद्ध [illegible]

[illegible]

[illegible] सम्यक्सम्बोधिमभिसम्बुद्धस्य [illegible]

[illegible] प्रज्ञापारमितायां चरितम् । [illegible]

[illegible] प्रज्ञापारमितायां [illegible]

[illegible] सम्यक्सम्बोधिमभिसम्बुद्धस्याऽप्रमेयाऽसंख्येय [illegible]

[illegible] अप्रमेयाऽसंख्येया [illegible]

[illegible] सम्यक्सम्बोधौ

अप्रमेयाऽसंख्येयाऽपरिमाणश्च बोधिसत्त्वसंघोऽभवदमितं चायुष्प्रमाणं

---

* विशुद्धेद इति ख, ग, घ पुस्तके पाठः ।

---

(१) धर्मता भावयता सर्व्वमत्यर्थी बोधार्थाः ।

15

मोदिताभविष्यामद्यामनस्काभवन्ति चतुर्महाराजकायिका देवा त्रायस्त्रिंशादेवा यामादेवाः तुषितादेवाः निर्माणरतयोदेवाः परनिर्मितवशवर्त्तिनोदेवाः ब्रह्मकायिकादेवाः ब्रह्मपुरोहितादेवाः ब्रह्मपार्षद्यादेवा महाब्रह्माणो*देवाः आभास्वरा देवाः शुभादेवाः परीत्तशुभादेवाः अप्रमाणशुभादेवाः शुभकृत्स्ना देवाः अप्रमाणवृहादेवाः वृहत्फलादेवाः अवृहादेवाः अतपादेवाः सुदृशादेवाः सुदर्शनादेवाः अकनिष्ठादेवाः बोधिसत्त्वस्य महासत्त्वस्य मैथुनसंयोगप्रस्थाननतायै, स खलुब्रह्मचारी भवति। सत्त्वानां बोधिनियोजनतायै न संयोजनतायै† धर्म्मैः संयुज्यते स एवं प्रणिदधाति प्रथमचित्तोत्पादं मयोपादाय ब्रह्मचारिणाभवितव्यं नाऽब्रह्मचारिणा तत् कस्य हेतोः। कामान् खलु पुनः प्रतिषेधमानस्य‡ ब्रह्मलोकोपपत्तेरप्यन्तरायोभवति। कः पुनर्व्वादोऽनुत्तरायाः सम्यक् सम्बोधेस्तस्मात्तर्हि बोधिसत्त्वेन महासत्त्वेन ब्रह्मचारिणाऽभिनिष्क्रम्याऽनुत्तरा सम्यक् सम्बोधिरभिसम्बोद्धव्या नाऽब्रह्मचारिणा। अथ आयुष्मान् शारदतीपुत्रोभगवन्तमेतदवोचत्। किं पुनर्भगवन् बोधिसत्त्वस्य महासत्त्वस्याऽवश्यं [illegible] पुत्रदुहितृभिर्भवितव्यं। भगवानाह। केषाञ्चिच्छारदतीपुत्र बोधिसत्त्वानां म[illegible]त्त्वानामवश्यं मातापितृभ्यां भवितव्यं। भार्य्यापुत्रदुहितृभिर्भवितव्यं

* सर्व्वत्रपुस्तके महाब्रह्मणो देवा इत्यस्ति महाब्रह्माणा इति [illegible] प्रतिभाति।

† संयोजनीयैरिति ख, ग, घ, च पुस्तके पाठः।

‡ सेवमानस्य इति यक्तं प्रतिभाति।

[illegible] कामा[illegible] । केचिद्बोधिसत्त्वा-
[illegible] पञ्चकामगुणान् [illegible]
[illegible] स्पृशन्ति [illegible]
[illegible] अनुत्तरां सम्यक्संबोधिमभिसंबुध्यन्ते । केचिद्बोधिसत्त्वा महा-
सत्त्वाः [illegible] पञ्चकामगुणान् [illegible] पुन-
[illegible] अनुत्तरां सम्यक्संबोधिमभिसंबुध्यन्ते । केचिद्
[illegible] कामगुणपरिभोगं* च उपदर्शयन्ति
न च परिभुञ्जते । तद्यथाऽपि नाम शारद्वतीपुत्र दक्षो मायाकारो वा मा-
याकारान्तेवासी वा [illegible] स
पञ्चकामगुणानभिनिर्माय पञ्चभिः कामगुणैः समर्पितं क्रीडन्तं
परिचारयन्तमात्मानमुपदर्शयेत् तत् किं मन्यसे शारद्वतीपुत्राऽपि नु
तेन मायाकारेण मायाकारान्तेवासिना वा पञ्चकामगुणाः
परिभुक्ता भवेयुः । नो हीदं भगवन् । भगवानाह । एवमेव शारद्व-
तीपुत्र बोधिसत्त्वा महासत्त्वा महायाने सुशिक्षिता मायोपमधर्मावि-
हारप्रतिपन्नाः सर्वक्लेशानुगतचित्तसत्त्वपरिपाकाय महाकरुणाव-
शेन कामगुणपरिभोगमुपदर्शयन्ति । न च कामगुणान्परिभु-
ञ्जन्ति । न च तैः सार्धं सम्भवन्ति । न तैः परिक्लिश्यन्ते ।
अनेकपर्यायेण शारद्वतीपुत्र बोधिसत्त्वाः महासत्त्वाः कामानां
वर्णान् भाषन्ते । आदीप्ताः कामाः, वधकाः कामाः, प्रत्यर्थिकाः
कामाः, प्रत्यमित्राः कामाः, अग्न्युल्कोपमाः कामाः, किम्पाक-

* कामगुणपरिभोगमिति ख, ग, घ पुस्तकेषु पाठः ।

फलोपमाः कामाः, असिधारोपमाः कामाः अङ्गाररश्म्युपमाः कामाः, विषमा*न्नोपमाः कामाः वड़िशोपमाः कामाः मोहकूपोपमाः कामाः। एवं हि शारद्वतीपुत्र बोधिसत्त्वाः महासत्त्वाः कामान् परिजानन्ति। सत्त्वानामनुपायकुशलानां परिपाचनार्थं पञ्चभ्यः कामगुणेभ्यः विवेचनार्थं पञ्चकामगुणानुपदर्शयन्ति। न च तैर्मोचयन्ति न कामहेतोर्न कामनिदानं पापकर्म्माऽध्यवस्यन्ति। एवमुक्ते आयुष्मान् शारद्वतीपुत्रो भगवन्तमेतदवोचत्। कथं पुनर्भगवन् बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां चरितव्यं। भगवानाह। इह शारद्वतीपुत्र बोधिसत्त्वो महासत्त्वः प्रज्ञापारमितायां चरन् बोधिसत्त्वं न समनुपश्यति। बोधिसत्त्वचर्य्यामपि न समनुपश्यति। प्रज्ञापारमितां न समनुपश्यति। प्रज्ञापारमितानामाऽपि न समनुपश्यति। चरतीति न समनुपश्यति। न चरतीति न समनुपश्यति। रूपमपि न समनुपश्यति। वेदनामपि न समनुपश्यति। संज्ञामपि न समनुपश्यति। संस्कारानपि न समनुपश्यति। विज्ञानमपि न समनुपश्यति। तत्कस्य हेतोः तथाहि शारद्वतीपुत्र बोधिसत्त्वो महासत्त्वः स्वभावेन शून्यः एवं हि बोधिसत्त्वनाम बोधिसत्त्वनाम्ना शून्यं। तत्कस्य हेतोः [illegible] तथाहि न शून्यतया रूपं शून्यं नान्यत्र रूपात् शून्यता [illegible] शून्यता शून्यतैव रूपं। न शून्यतया वेदना शून्या नान्यत्र वेदनाया शून्यता वेदनैव शून्यता शून्यतैव वेदना। न शून्यतया संज्ञा शून्या नान्यत्र संज्ञायाः शून्यता संज्ञैव शून्यता शून्यतैव संज्ञा। न शून्यतया

---

* मन्त्रो इति ख पुस्तके पाठः।

संस्काराः शून्याः नान्यत्र संस्कारेभ्यः शून्यता संस्कारा एव शून्यता शून्यतैव संस्काराः। न शून्यतया विज्ञानं शून्यं नान्यत्र विज्ञानात् शून्यता। विज्ञानमेव शून्यता शून्यतैव विज्ञानं। तत्-कस्य हेतोःशारि नाममात्रमिदं यदुत बोधिसत्त्वः नाममात्रमिदं यदुत शून्यता नाममात्रमिदं यदुत रूपं नाममात्रमिदं यदुत वेदना, नाममात्रमिदं यदुत संज्ञा नाममात्रमिदं यदुत संस्काराः। नाममात्रमिदं यदुत विज्ञानं। तथा हि मायोपमं रूपं मायोपमा वेदना, मायोपमा संज्ञा, मायोपमाः संस्काराः मायोपमं विज्ञानं। माया च नाममात्रं न देशस्थान प्रदेशस्था असदसद्भूतं वितथमसं मायादर्शनं स्वभावविरहितमस्वभावत्वाऽनुत्पादोऽनिरोधः। अस्थानं न हानिर्न वृद्धिर्न संक्लेशेन व्यवदानं एवं चरन् बोधिसत्त्वो महासत्त्वः कस्यचिद्धर्मस्य उत्पादं न समनुपश्यति निरोधं न समनुपश्यति स्थानं न समनुपश्यति हानिं न समनुपश्यति वृद्धिं न समनुपश्यति संक्लेशं न समनुपश्यति व्यवदानं न समनुपश्यति। रूपं न समनुपश्यति। वेदनां न समनुपश्यति। संज्ञां न समनुपश्यति। संस्कारान् न समनुपश्यति। विज्ञानं न समनुपश्यति। बोधिरिति बोधिसत्त्व इति यदुच्यते तदपि न समनुपश्यति। तत्कस्यहेतोः तथाहि कृत्रिमनामप्रति*पत्तिधर्मास्ते कल्पिता-आगन्तुकेन नामधेयेनाऽभूतपरिकल्पितेन व्यवह्रियन्ते, व्यवहाराच्चाऽभिनिविशन्ते तद्बोधिसत्त्वो महासत्त्वः प्रज्ञापारमितायां चरन् सर्व्वधर्मान् न समनुपश्यति नोपलभते असमनुपश्यन् अनुपलभ-

* प्रति प्रति इति ख, ग, घ पुस्तके पाठः।

मानोन मन्यते नाऽभिनिविशते। पुनरपरं शारद्वतीपुत्र बोधि
सत्त्वोमहासत्त्वः प्रज्ञापारमितायां चरन्नेवं व्युपपरीचेत
यदुत बोधिसत्त्व इति नाममात्रमिदं यदुत बोधिरिति
मात्रमिदं यदुत बुद्ध इति नाममात्रमिदं यदुत
नाममात्रमिदं यदुत प्रज्ञापारमितायां चरतीति।
यदुत रूपमिति नाममात्रमिदं यदुत वेदनेति।
यदुत संज्ञेति। नाममात्रमिदं यदुत संस्कारादिति। नाममा
मिदं यदुत विज्ञानमिति। तद्यथाऽपि नाम शारद्वतीपुत्र
व्यवह्रियते सच यथाभूतं परिगवेष्यमाणोनोपलभ्यते। सत्त्वः
इति व्यवह्रियते सच यथाभूतं परिगवेष्यमाणोनोपलभ्यते।
जीवोजीवइति व्यवह्रियते सच यथाभूतं परिगवेष्यमाणो
नोपलभ्यते अनुपलम्भशून्यतामुपादाय। पोषः पोषइति
ह्रियते स च यथाभूतं परिगवेष्यमाणोनोपलभ्यते। पुरुषः पुरु
इति व्यवह्रियते सच यथाभूतं परिगवेष्यमाणोनोपलभ्यते
पुद्गलः पुद्गलइति व्यवह्रियते सच यथाभूतं परिगवेष्यमाणो
नोपलभ्यते। मनुजोमनुज इति व्यवह्रियते स च यथाभूतं परि
गवेष्यमाणोनोपलभ्यते। मानवोमानवइति व्यवह्रियते
यथाभूतं परिगवेष्यमाणोनोपलभ्यते। कारापकः
व्यवह्रियते सच यथाभूतं परिगवेष्यमाणोनोपलभ्यते। वेदक
वेदकइति व्यवह्रियते सच यथाभूतं परिगवेष्यमाणोनोप
लभ्यते। वेदयितृकोवेदयितृकइति व्यवह्रियते सच यथाभू
परिगवेष्यमाणोनोपलभ्यते। उत्थापकउत्थापकइति व्यवह्रियते

ाप यथाभूतं परिगवेष्यमाणोनोपलभ्यते। समुत्थापकः समुत्थापक-
ति व्यवह्रियते स च यथाभूतं परिगवेष्यमाणोनोपलभ्यते। ज्ञान-
ोज्ञानकइति व्यवह्रियते स च यथाभूतं परिगवेष्यमाणोनोपलभ्यते।
्यकः पश्यकइति व्यवह्रियते स च यथाभूतं परिगवेष्यमाणोनोप-
भ्यते। स्पर्शकः स्पर्शकइति व्यवह्रियते स च यथाभूतं परिगवेष्य-
ाणोनोपलभ्यते। तद्यथाऽपि नाम विज्ञानकोविज्ञानकइति व्यव-
ह्रियते स च यथाभूतं परिगवेष्यमाणोनोपलभ्यते। अनुपलम्भशून्य-
ामुपादाय। यावदेव नामसङ्केतमात्रेण व्यवह्रियते एवमेव बोधि-
त्त्वोमहासत्त्वः प्रज्ञापारमितायां चरन् बोधिसत्त्वं न समनुपश्यति
ुद्धं न समनुपश्यति प्रज्ञापारमितां न समनुपश्यति। रूपं न
मनुपश्यति वेदनां न समनुपश्यति संज्ञां न समनुपश्यति संस्का-
ान्न समनुपश्यति विज्ञानं न समनुपश्यति। येन नाम्ना व्यवह्रि-
यते तदपि नाम न समनुपश्यति। एवं चरन् बोधिसत्त्वोमहासत्त्वः
्रज्ञापारमितायां चरन् तथागतप्रज्ञां स्थापयित्वा सत्त्वा* प्रज्ञायावत्
र्व्वश्रावकप्रत्येकबुद्धानां प्रज्ञामभिभवत्यनुपलम्भशून्यतामुपादाय।
त्कस्य हेतोस्तथाहि एतदपि न समनुपश्यति नोपलभते येना-
भिनिविशेत। एवं चरन् शारद्वतीपुत्र बोधिसत्त्वोमहासत्त्वः प्रज्ञा-
ारमितायां चरति। सचेच्छारद्वतीपुत्र अयं जम्बुद्वीपः† परिपूर्णो
वेत् मौद्गल्यायनसदृशैर्भिक्षुभिः। तद्यथाऽपि नाम नड़वनं वा
रवनं वा वेणुवनं वा इक्षुवनं वा शालिवनं वा तिलवनं वा

---

* सत्त्वा इति ख, ग, घ, च पुस्तके ऽधिकः पाठः, अर्थसङ्गतिर्न भवति कस्यापि पाठस्य।

† जाम्बुद्वीप इति च पुस्तके पाठः।

तेषां या प्रज्ञा सा बोधिसत्त्वस्य महासत्त्वस्य प्रज्ञापारमितायां
प्रज्ञायाः शततमीमपि कलां नोपैति सहस्रतमीमपि कलां नो
शतसहस्रतमीमपि कलां नोपैति कोटीतमीमपि कलां नोपै
कोटीशततमीमपि कलां नोपैति कोटीसहस्रतमीमपि कलां नोपै
कोटीशतसहस्रतमीमपि कलां नोपैति कोटिनियुतमीमपि
नोपैति कोटीनियुतशततमीमपि कलां नोपैति को नियु
तमीमपि कलां नोपैति कोटीनियुतशतसहस्रतमीमपि
नोपैति संख्यामपि नोपैति कलामपि नोपैति गणनामपि नोपै
उपमामपि नोपैति उपनिशामपि न क्षमते तत् कस्य तोः
शारद्वतीपुत्र बोधिसत्त्वस्य महासत्त्वस्य या प्रज्ञा सा सर्व्वसत्
परिनिर्व्वाणाय प्रत्युपस्थिता न तु सर्व्वश्रावकप्रत्येकबुद्धानां। पुन
रपरं शारद्वतीपुत्र बोधिसत्त्वस्य महासत्त्वस्य ज्ञ पारमिता
चरतो या एकदिवसपरिभाविता प्रज्ञा सा र्व्वश्रा कबुद्ध
प्रज्ञाअभिभूयतिष्ठति। तिष्ठतु शारद्वतीपुत्र जम्बुद्वीपः रि
शारद्वतीपुत्र* मौद्गल्यायनसदृशैर्भिक्षुभिः। सचेच्छारद्वतीपुत्र।
साहस्रमहासाहस्रोलोकधातुः र्ण वेणु नि दृशैर्भि
स्तेषां या प्रज्ञा सा बोधिसत्त्वस्य महासत्त्वस्य . .
चरतः प्रज्ञायाः शततमीकलां नोपैति सहस्रतमीमपि
नोपैति शतसहस्रतमीमपि कलां नोपैति कोटीतमीमपि
नोपैति कोटीशततमीमपि कलां नोपैति कोटि तम।

* शारद्वतीपुत्र इति पाठः पुस्तकपङ्क्तौ पुनरपि दृश्यते।

कलां नोपैति कोटीशतसहस्रतमीमपि कलां नोपैति कोटी-
नियुततमीमपि कलां नोपैति कोटीनियुतशततमीमपि कलां
नोपैति कोटीनियुतसहस्रतमीमपि कलां नोपैति कोटीनियुतशत-
सहस्रतमीमपि कलां नोपैति संख्यामपि नोपैति कलामपि नोपैति
गणनामपि नोपैति उपमामपि नोपैति उपनिशामपि न क्षमते ।
तिष्ठतु शारद्वतीपुत्र [illegible] । (१)[illegible]
[illegible] पूर्वस्यां दिशि [illegible] परिपूर्णा-
[illegible] शारद्वतीपुत्र मौद्गल्यायनसदृशैर्भिक्षुभिः [illegible]
[illegible] प्रज्ञापारमितायां [illegible]
[illegible] शततमीमपि कलां नोपैति सहस्रतमीमपि
कलां नोपैति शतसहस्रतमीमपि कलां नोपैति कोटीतमीमपि
कलां नोपैति कोटीशततमीमपि कलां नोपैति कोटीसहस्रतमी-
मपि कलां नोपैति कोटीशतसहस्रतमीमपि कलां नोपैति को-
टीनियुततमीमपि कलां नोपैति कोटीनियुतशततमीमपि कलां
नोपैति कोटीनियुतसहस्रतमीमपि कलां नोपैति कोटीनियुतश-
तसहस्रतमीमपि कलां नोपैति । संख्यामपि नोपैति कलामपि
नोपैति गणनामपि नोपैति उपमामपि नोपैति उपनिशामपि
न क्षमते । तिष्ठतु(२) शारद्वतीपुत्र पूर्वस्यां दिशि गङ्गानदीवालु-
कोपमा लोकधातवः परिपूर्णाः शारद्वतीपुत्र मौद्गल्यायनसदृशै-
र्भिक्षुभिः । तिष्ठतु शारद्वतीपुत्र दक्षिणस्यां दिशि गङ्गानदीवालुकोप-

(१) क: इत्यारभ्यायं पदं नोपलभ्यते ।

(२) तिष्ठतु इत्यारभ्यायं पदं न दृश्यते ।

भालोकधातवः परिपूर्णाभवेयुः शारद्वतीपुत्र मौद्गल्यायनसदृशै-
र्भिक्षुभिः तेषां या प्रज्ञा सा बोधिसत्त्वस्य महासत्त्वस्य प्रज्ञापार-
मितायां चरतः एकदिवसपरिभाविताया: प्रज्ञायाः शततमीम-
पि कलां नोपैति सहस्रतमीमपि कलां नोपैति शतसहस्रतमीम-
पि कलां नोपैति कोटीतमीमपि कलां नोपैति कोटीशततमीम-
पि कलां नोपैति कोटीसहस्रतमीमपि कलां नोपैति कोटीश-
तसहस्रतमीमपि कलां नोपैति कोटीनियुततमीमपि कलां नोपै-
ति कोटीनियुतशततमीमपि कलां नोपैति कोटीनियुतसहस्रतमीम-
पि कलां नोपैति कोटीनियुतशतसहस्रतमीमपि कलां नोपैति संख्या-
मपि नोपैति कलामपि नोपैति गणनामपि नोपैति उपमाम-
पि नोपैति उपनिशामपि न क्षमते। तिष्ठतु शारद्वतीपुत्र दक्षि-
णस्यां दिशि गङ्गानदीवालुकोपमालोकधातवः परिपूर्णाः शारद्वतीपु-
त्र मौद्गल्यायनसदृशैर्भिक्षुभिः। सचेच्छारद्वतीपुत्र पश्चिमायां दिशि
गङ्गानदीवालुकोपमालोकधातवः परिपूर्णाभवेयुः शारद्वतीपुत्र
मौद्गल्यायनसदृशैर्भिक्षुभिः तेषां या प्रज्ञा सा बोधिसत्त्वस्य महा-
सत्त्वस्य प्रज्ञापारमितायां चरतः एकदिवसपरिभाविताया: प्रज्ञायाः
शततमीमपि कलां नोपैति सहस्रतमीमपि कलां नोपैति शत-
सहस्रतमीमपि कलां नोपैति कोटीतमीमपि कलां नोपैति कोटी-
शततमीमपि कलां नोपैति कोटीसहस्रतमीमपि कलां नोपैति
कोटीशतसहस्रतमीमपि कलां नोपैति कोटीनियुततमीम-
पि कलां नोपैति कोटीनियुतशततमीमपि कलां नोपैति कोटीनि-
[illegible] कलां नोपैति [illegible]

कलां नोपैति संख्यामपि नोपैति कलामपि नोपैति गणनामपि नोपैति उपमामपि नोपैति उपनिशामपि नक्षमते। तिष्ठतु शारद्वतीपुत्र पश्चिमायान्दिशि गङ्गानदीवालुकोपमालोकधातवः परिपूर्णाः शारद्वतीपुत्र मौद्गल्यायनसदृशैर्भिक्षुभिः। सचेच्छारद्वती-पुत्र उत्तरस्यान्दिशि गङ्गानदीवालुकोपमालोकधातवः परिपूर्णा-भवेयुः शारद्वतीपुत्र[1] मौद्गल्यायनसदृशैर्भिक्षुभिः तेषां या प्रज्ञा सा बोधिसत्त्वस्य महासत्त्वस्य प्रज्ञापारमितायां चरतः एकदिवसपरि-भाविताया: प्रज्ञायाः शततमीमपि कलां नोपैति सहस्रतमीमपि कलां नोपैति शतसहस्रतमीमपि कलां नोपैति कोटीतमीमपि कलां नोपैति। कोटीशततमीमपि कलां नोपैति कोटीसहस्र-तमीमपि कलां नोपैति कोटीशतसहस्रतमीमपि कलां नोपैति। कोटीनियुततमीमपि कलां नोपैति कोटीनियुतशततमीमपि कलां नोपैति कोटीनियुतसहस्रतमीमपि कलां नोपैति। कोटी-नियुतशतसहस्रतमीमपि कलां नोपैति। संख्यामपि नोपैति कला-मपि नोपैति गणनामपि नोपैति उपमामपि नोपैति उपनिशामपि न क्षमते। तिष्ठतु शारद्वतीपुत्र उत्तरस्यान्दिशि गङ्गानदीवालु-कोपमालोकधातवः परिपूर्णाः शारद्वतीपुत्र मौद्गल्यायनसदृशैर्भि-क्षुभिः। सचेच्छारद्वतीपुत्र उत्तरपूर्व्वस्यान्दिशि गङ्गानदीवालुकोप-मालोकधातवः परिपूर्णाभवेयुः शारद्वतीपुत्र मौद्गल्यायनसदृशैर्भिक्षु-भिस्तेषां या प्रज्ञा सा बोधिसत्त्वस्य महासत्त्वस्य प्रज्ञापारमितायां चरतः एकदिवसपरिभाविताया: प्रज्ञायाः शततमीमपि कलां

(१) शारद्वतीपुत्र इत्यस्य पुनः पाठः सर्व्वेषु पुस्तकेषु ।

नोपैति सहस्रतमीमपि कलां नोपैति शतसहस्रतमीमपि कलां नोपैति कोटीतमीमपि कलां नोपैति कोटीशततमीमपि कलां नोपैति कोटीसहस्रतमीमपि कलां नोपैति कोटीशतसहस्रतमीमपि कलां नोपैति कोटीनियुततमीमपि कलां नोपैति कोटीनियुतशततमीमपि कलां नोपैति कोटीनियुतसहस्रतमीमपि कलां नोपैति। कोटीनियुतशतसहस्रतमीमपि कलां नोपैति संख्यामपि नोपैति कलामपि नोपैति गणनामपि नोपैति उपमामपि नोपैति उपनिशामपि न क्षमते। तिष्ठतु शारद्वतीपुत्र उत्तरपूर्व्वस्यान्दिशि गङ्गानदीवालुकोपमालोकधातवः परिपूर्णाः शारद्वतीपुत्र मौद्गल्यायनसदृशैर्भिक्षुभिः। सचेच्छारद्वतीपुत्र पूर्व्वदक्षिणस्यान्दिशि गङ्गानदीवालुकोपमालोकधातवः परिपूर्णाभवेयुः शारद्वतीपुत्र मौद्गल्यायनसदृशैर्भिक्षुभिस्तेषां या प्रज्ञा सा बोधिसत्त्वस्य महासत्त्वस्य प्रज्ञापारमितायां चरतः एकदिवसपरिभावितायाः प्रज्ञायाः शततमीमपि कलां नोपैति सहस्रतमीमपि कलां नोपैति शतसहस्रतमीमपि कलां नोपैति कोटीतमीमपि कलां नोपैति कोटीशततमीमपि कलां नोपैति कोटीसहस्रतमीमपि कलां नोपैति कोटीशतसहस्रतमीमपि कलां नोपैति कोटीनियुततमीमपि कलां नोपैति कोटीनियुतशततमीमपि कलां नोपैति कोटीनियुतसहस्रतमीमपि कलां नोपैति कोटीनियुतशतसहस्रतमीमपि कलां नोपैति। संख्यामपि नोपैति कलामपि नोपैति गणनामपि नोपैति उपमामपि नोपैति उपनिशामपि न क्षमते। तिष्ठतु शारद्वतीपुत्र पूर्व्वदक्षिणस्यान्दिशि गङ्गानदीवालुकोपमालोकधातवः परिपूर्णाः

नोपैति सहस्रतमीमपि कलां नोपैति शतसहस्रतमीमपि कलां नोपैति कोटीतमीमपि कलां नोपैति कोटीशततमीमपि कलां नोपैति कोटीसहस्रतमीमपि कलां नोपैति कोटीशतसहस्रतमीमपि कलां नोपैति कोटीनियुततमीमपि कलां नोपैति कोटीनियुतशततमीमपि कलां नोपैति कोटीनियुतसहस्रतमीमपि कलां नोपैति। कोटीनियुतशतसहस्रतमीमपि कलां नोपैति संख्यामपि नोपैति कलामपि नोपैति गणनामपि नोपैति उपमामपि नोपैति उपनिशामपि न क्षमते। तिष्ठतु शारद्वतीपुत्र उत्तरपूर्व्वस्यान्दिशि गङ्गानदीवालुकोपमालोकधातवः परिपूर्णाः शारद्वतीपुत्र मौद्गल्यायनसदृशैर्भिक्षुभिः। सचेच्छारद्वतीपुत्र पूर्व्वदक्षिणस्यान्दिशि गङ्गानदीवालु[illegible] लोकधातवः परिपूर्णाभवे[illegible] मौ[illegible]

[illegible] प्रज्ञा [illegible]

तमी [illegible]

नोपैति [illegible]

नोपैति। [illegible]

महासत्त्वस्य प्रज्ञापारमितायां चरतः एकदिवसपरिभाविताया: प्रज्ञायाः शततमीमपि कलां नोपैति सहस्रतमीमपि कलां नोपैति शतसहस्रतमीमपि कलां नोपैति कोटीतमीमपि कलां नोपैति कोटीशततमीमपि कलां नोपैति कोटीसहस्रतमीमपि कलां नोपैति कोटीशतसहस्रतमीमपि कलां नोपैति कोटीनियुततमीमपि कलां नोपैति कोटीनियुतशततमीमपि कलां नोपैति कोटीनियुतसहस्रतमीमपि कलां नोपैति कोटीनियुतशतसहस्रतमीमपि कलां नोपैति संख्यामपि नोपैति कलामपि नोपैति गणनामपि नोपैति उपमामपि नोपैति उपनिशामपि न क्षमते। शारद्वतीपुत्र आह येयं भगवञ्छ्रावकाणां प्रज्ञा स्रोतआपन्नस्य सकृदागामिनोऽनागामिनोऽर्हतो या च प्रत्येकबुद्धस्य या च बोधिसत्त्वस्य या च तथागतस्याऽर्हतः सम्यक्सम्बुद्धस्य प्रज्ञा सर्व्वास्ताः प्रज्ञाः अभिन्नाः अभेदः शून्याविविक्ताऽनुत्पादप्रकृतिकाः स्वभावशून्याः न च भगवन्नभेदस्य विविक्तस्याऽनुत्पादस्य स्वभावशून्यस्य विशेषोवा नानाकरणं वा उपलभ्यते। तत्कथं भगवन् येयं बोधिसत्त्वस्य महासत्त्वस्य प्रज्ञापारमितायां चरतः एकदिवसपरिभाविता प्रज्ञा सा सर्व्वश्रावकप्रत्येकबुद्धानां प्रज्ञाअभिभवति। भगवानाह। तत् किं मन्यसे शारद्वतीपुत्र येन कृत्येन बोधिसत्त्वस्य महासत्त्वस्य प्रज्ञापारमितायां चरतः एकदिवसपरिभाविता प्रज्ञा प्रत्युपस्थिता मार्गाकारज्ञतायां चरता सर्व्वसत्त्वानामर्थं कुर्व्वता सर्व्वाकार[1]सर्व्वधर्म्मानभिसम्बुध्य सर्व्वसत्त्वाः परि-

---

[1] सर्व्वाकारैरिति ग पुस्तके पाठः सर्व्वाकारः इति ख, घ पुस्तके पाठः।

निर्व्वापयितव्यादिति अपि नु तेन कृत्येन सर्व्वश्रावकप्रत्येकबुद्धानां प्रज्ञा प्रत्युपस्थिता । आह । नोहीदं भगवन् । भगवानाह । तत् किं मन्यसे शारद्वतीपुत्राऽपि नु सर्व्वश्रावकप्रत्येकबुद्धानां एवं भवत्यस्माभिरनुत्तरां सम्यक्सम्बोधिमभिसम्बुध्य सर्व्वसत्त्वा-अनुपधिशेषे निर्व्वाणधातौ परिनिर्व्वापयितव्याः । आह । नोहीदं भगवन् । भगवानाह । तदनेनापि ते शारद्वतीपुत्र पर्य्यायेणेदं वेदितव्यं । येयं सर्व्वश्रावकप्रत्येकबुद्धानां प्रज्ञा या बोधिसत्त्वस्य महासत्त्वस्य इमां प्रज्ञामुपनिधाय एषा सर्व्वश्रावकप्रत्येकबुद्धानां प्रज्ञा शततमीमपि कलां नोपैति सहस्रतमीमपि कलां नोपैति शतसहस्रतमीमपि कलां नोपैति कोटीतमीमपि कलां नोपैति कोटीशततमीमपि कलां नोपैति कोटीसहस्रतमीमपि कलां नोपैति कोटीशतसहस्रतमीमपि कलां नोपैति कोटीनियुततमीमपि कलां नोपैति कोटीनियुतशततमीमपि कलां नोपैति कोटीनियुतसहस्रतमीमपि कलां नोपैति कोटीनियुतशतसहस्रतमीमपि कलां नोपैति संख्यामपि नोपैति कलामपि नोपैति गणनामपि नोपैति उपमामपि नोपैति उपनिशामपि न क्षमते । तत् किं मन्यसे शारद्वतीपुत्राऽपि नु सर्व्वश्रावकप्रत्येकबुद्धानामेवं भवति वयं षट्पारमितासु चरित्वा सत्त्वान् परिपाच्य बुद्धक्षेत्रं परिशोध्य दशतथागतबलानि परिपूर्य्य चत्वारि वैशारद्यानि चतस्रः प्रतिसंविदः महामैत्रीं महाकरुणां अष्टादशावेणिकबुद्धधर्म्माः*

---

* [illegible]

परिपूर्य्याऽनुत्तरां सम्यक्सम्बोधिमभिसम्बुध्याऽप्रमेयाऽसंख्येयाऽपरिमा-
णान् सत्त्वान् परिनिर्व्वापयिष्यामीति । आह । नोहीदं भगवन् ।
भगवानाह । बोधिसत्त्वः पुनः शारद्वतीपुत्र महासत्त्वस्य एवं भवति
यथा षट्पारमितासु चरित्वा सत्त्वान् परिपाच्य बुद्धक्षेत्रं परिशोध्य
दशतथागतबलानि परिपूर्य्य चत्वारि वैशारद्यानि चतस्रः प्रतिसम्विदो-
महामैत्रीं महाकरुणां अष्टादशाऽऽवेणिकान् बुद्धधर्म्मान् परिपूर्य्याऽनु-
त्तरां सम्यक्सम्बोधिमभिसम्बुध्याऽप्रमेयाऽसंख्येयाऽपरिमाणाः सत्त्वाः
परिनिर्व्वापयितव्याः तद्यथाऽपि नाम शारद्वतीपुत्र खद्योतकस्य
प्राणकजातस्य नैवं भवत्यहमाभया जम्बुद्वीपमवभासयेयं समाऽऽ-
भया जम्बुद्वीपः स्फुटोभवेत् एवमेव शारद्वतीपुत्र सर्व्वश्रावक-
प्रत्येकबुद्धानां नैव भवति । वयं षट्पारमितासु चरित्वा सत्त्वान्
परिपाच्य बुद्धक्षेत्रं परिशोध्य दशतथागतबलानि परिपूर्य्य चत्वारि-
वैशारद्यानि चतस्रः प्रतिसम्विदः महामैत्रीं महाकरुणां अष्टादशाऽऽ-
वेणिकान् बुद्धधर्म्मान् परिपूर्य्याऽनुत्तरां सम्यक्सम्बोधिमभिसम्बुध्याऽ-
प्रमेयाऽसंख्येयाऽपरिमाणान् सत्त्वान् परिनिर्व्वापयिष्यामि इति ।
तद्यथाऽपि नाम शारद्वतीपुत्र सूर्य्यमण्डलमुदागच्छन् सर्व्वजम्बु-
द्वीपमवभासेन स्फुरति सर्व्वं जम्बुद्वीपमवभासेन स्फुटीकरोति ।
एवमेव शारद्वतीपुत्र बोधिसत्त्वो महासत्त्वः षट्सु पारमितासु चरन्
सत्त्वान् परिपाच्य बुद्धक्षेत्रं परिशोध्य दशतथागतबलानि परिपूर्य्य
चत्वारि वैशारद्यानि चतस्रः प्रतिसम्विदः महामैत्रीं महाकरुणां
अष्टादशाऽऽवेणिकान् बुद्धधर्म्मान् परिपूर्य्याऽनुत्तरां सम्यक्सम्बोधि-
मभिसम्बुध्याऽप्रमेयाऽसंख्येयाऽपरिमाणान् सत्त्वान् परिनिर्व्वापयति ।

प्रादुर्भावोभवति। सर्व्वधारणीमुखानां लोके प्रादुर्भावोभवति। दशानां तथागतबलानां लोके प्रादुर्भावोभवति। चतुर्णां वैशारद्यानां लोके प्रादुर्भावोभवति। चतसृणां प्रतिसम्विदां लोके प्रादुर्भावोभवति। महामैत्र्यालोके प्रादुर्भावोभवति। महाकरुणायालोके प्रादुर्भावोभवति। अष्टादशाऽऽवेणिकानां बुद्धधर्म्माणां लोके प्रादुर्भावोभवति। एवमादीनां शारद्वतीपुत्र कुशलानां धर्म्माणां लोके प्रादुर्भावोभवति। एषाञ्च कुशलमूलानां धर्म्माणां प्रादुर्भावात् क्षत्रियमहाशालकुलानि प्रज्ञायन्ते। ब्राह्मणमहाशालकुलानि प्रज्ञायन्ते। गृहपतिमहाशालकुलानि प्रज्ञायन्ते। चतुर्महाराजकायिकादेवाः प्रज्ञायन्ते। त्रायस्त्रिंशादेवाः प्रज्ञायन्ते। यामादेवाः प्रज्ञायन्ते। तुषितादेवाः प्रज्ञायन्ते। निर्म्माणरतयोदेवाः प्रज्ञायन्ते। परनिर्म्मितवशवर्त्तिनोदेवाः प्रज्ञायन्ते। ब्रह्मकायिकादेवाः प्रज्ञायन्ते। ब्रह्मपुरोहितादेवाः प्रज्ञायन्ते। ब्रह्मपार्षद्याः देवाः प्रज्ञायन्ते। महाब्रह्माणोदेवाः प्रज्ञायन्ते। आभादेवाः प्रज्ञायन्ते। परीत्ताभादेवाः प्रज्ञायन्ते। अप्रमाणाभादेवाः प्रज्ञायन्ते। आभास्वरादेवाः प्रज्ञायन्ते। शुभादेवाः प्रज्ञायन्ते। परीत्तशुभादेवाः प्रज्ञायन्ते। अप्रमाणशुभादेवाः प्रज्ञायन्ते। शुभकृत्स्नादेवाः प्रज्ञायन्ते। वृहादेवाः प्रज्ञायन्ते। परीत्तवृहादेवाः प्रज्ञायन्ते। अप्रमाणवृहादेवाः प्रज्ञायन्ते। वृहत्फलादेवाः प्रज्ञायन्ते। अवृहादेवाः प्रज्ञायन्ते। अतपादेवाः प्रज्ञायन्ते। सदृशादेवाः प्रज्ञायन्ते। सुदर्शनादेवाः प्रज्ञायन्ते। अकनिष्ठादेवाः प्रज्ञायन्ते। आकाशानन्त्याऽऽयतनादेवाः प्रज्ञायन्ते। विज्ञानानन्त्याऽऽयतनादेवाः

प्रज्ञायन्ते । आकिंचन्यायतनादेवाः प्रज्ञायन्ते । नैवसंज्ञानासंज्ञाऽऽ-
यतनादेवाः प्रज्ञायन्ते । स्रोतआपन्नादेवाः प्रज्ञायन्ते । सकृदा-
गामिनः प्रज्ञायन्ते । अनागामिनः प्रज्ञायन्ते । अर्हन्तः प्रज्ञायन्ते ।
प्रत्येकबुद्धाः प्रज्ञायन्ते । बोधिसत्त्वा महासत्त्वाः प्रज्ञायन्ते । तथा-
गता अर्हन्तः सम्यक्सम्बुद्धाः प्रज्ञायन्ते । आह । किं पुनर्भगवन्
बोधिसत्त्वो महासत्त्वो दक्षिणां शोधयति । भगवानाह । पर्य्यायेण
शारद्वतीपुत्र बोधिसत्त्वो महासत्त्वो दक्षिणां शोधयति । तत्कस्य
हेतोरत्यन्तविशुद्धाहि शारद्वतीपुत्र बोधिसत्त्वस्य महासत्त्वस्य
दक्षिणा तथाहि दायकः शारद्वतीपुत्र बोधिसत्त्वो महासत्त्वः कस्य-
दायकः अनेकेषां कुशलानां धर्म्माणां यदुत दशानां कुशलानां
कर्म्मपथानां पञ्चानां शिक्षापादानां अष्टाङ्गसमन्वागतस्य पोषस्य
चतुर्णां ध्यानानां चतुर्णामप्रमाणानां चतसृणामारूप्यसमापत्तीनां
पञ्चानामभिज्ञानां षण्णामनुस्मृतीनां दानपारमितायाः शीलपार-
मितायाः क्षान्तिपारमितायाः वीर्य्यपारमितायाः ध्यानपारमितायाः
प्रज्ञापारमितायाः अध्यात्मशून्यतायाः बहिर्धाशून्यतायाः अध्यात्म-
बहिर्द्धाशून्यतायाः शून्यताशून्यतायाः महाशून्यतायाः परमार्थ-
शून्यतायाः संस्कृतशून्यतायाः असंस्कृतशून्यतायाः अत्यन्तशून्यतायाः
अनवराग्रशून्यतायाः अनवकारशून्यतायाः प्रकृतिशून्यतायाः सर्व्व-
धर्म्मशून्यतायाः स्वलक्षणशून्यतायाः अनुपलम्भशून्यतायाः अभावशून्य-
तायाः स्वभावशून्यतायाः अभावस्वभावशून्यतायाः चतुर्णां स्मृत्युप-
स्थानानां चतुर्णां सम्यक् प्रहाणानां चतुर्णामृद्धिपादानां पञ्चाना-
मिन्द्रियाणां पञ्चानां बलानां सप्तानां बोध्यङ्गानां आर्य्याऽष्टाङ्गस्य

मार्गस्य चतुर्णामार्यसत्यानां ध्यानानां विमोक्षाणां नवानामनुपूर्व-
विहारसमापत्तीनां शून्यताऽनिमित्ताऽप्रणिहितानां विमोक्षमुखानां
धारणीमुखानां दशानां तथागतबलानां चतुर्णां वैशारद्यानां चत-
सृणां प्रतिसम्विदां महामैत्रीमहाकरुणायाः अष्टादशानां आवेणि-
कानां बुद्धधर्माणां। आह। कथं युज्यमानो बोधिसत्त्वो महासत्त्वः
प्रज्ञापारमितायां युक्त इति वक्तव्यः। भगवानाह। इह शार-
द्वतीपुत्र बोधिसत्त्वो महासत्त्वः रूपशून्यतायां युक्तोयुक्तइति वक्तव्यः
वेदनाशून्यतायां युक्तोयुक्तइति वक्तव्यः। संज्ञाशून्यतायां युक्तो-
युक्तइति वक्तव्यः। संस्कारशून्यतायां युक्तोयुक्तइति वक्तव्यः।
विज्ञानशून्यतायां युक्तोयुक्तइति वक्तव्यः। चक्षुः शून्यतायां युक्तो-
युक्तइति वक्तव्यः। श्रोत्रशून्यतायां युक्तोयुक्तइति वक्तव्यः। घ्राण-
शून्यतायां युक्तोयुक्तइति वक्तव्यः। जिह्वाशून्यतायां युक्तोयुक्तइति
वक्तव्यः। कायशून्यतायां युक्तोयुक्तइति वक्तव्यः। मनः शून्यतायां
युक्तोयुक्तइति वक्तव्यः। रूपशून्यतायां युक्तोयुक्तइति वक्तव्यः। शब्द-
शून्यतायां युक्तोयुक्तइति वक्तव्यः। गन्धशून्यतायां युक्तोयुक्तइति
वक्तव्यः। रसशून्यतायां युक्तोयुक्तइति वक्तव्यः। स्पर्शशून्यतायां
युक्तोयुक्तइति वक्तव्यः। धर्मशून्यतायां युक्तोयुक्तइति वक्तव्यः।
चक्षुर्धातुशून्यतायां युक्तोयुक्तइति वक्तव्यः। रूपधातुशून्यतायां युक्तो-
युक्तइति वक्तव्यः। चक्षुर्विज्ञानधातुशून्यतायां युक्तोयुक्तइति वक्तव्यः।
श्रोत्रधातुशून्यतायां युक्तोयुक्तइति वक्तव्यः। शब्दधातुशून्यतायां
युक्तोयुक्तइति वक्तव्यः। श्रोत्रविज्ञानधातुशून्यतायां युक्तोयुक्तइति
वक्तव्यः। घ्राणधातुशून्यतायां युक्तोयुक्तइति वक्तव्यः। गन्धधातु-

बोधिसत्त्वोमहासत्त्वः प्रज्ञापारमितायां चरन्नासु सप्तसु शून्यतासु युक्तोयुक्तइति वक्तव्यः। एवं खलु शारद्वतीपुत्र सप्ताभिः सप्तभिः शून्यताभिः प्रज्ञापारमितायां चरन् न तावद्युक्तइति वा अयुक्तइति वा वक्तव्यः। तत्कस्य हेतोस्तथाहि सनरूपं[१] युक्तमिति वा अयुक्तमिति वा समनुपश्यति नवेदना युक्तेति वा अयुक्तेति वा समनुपश्यति। न संज्ञा युक्तेति वा अयुक्तेति वा समनुपश्यति। न संस्काराः युक्ताइति वा अयुक्ताइति वा समनुपश्यति। न

(१) रूप्यन्ते एभिरिति रूप्यन्ते इति च व्युत्पत्त्या सविषयाणीन्द्रियाणि रूपस्कन्धः। यद्यपि रूप्यमाणाः पृथिव्यादयो वाह्यास्तथापि कायस्थत्वाद्वा इन्द्रियसम्बन्धाद्वा भवन्त्याध्यात्मिकाः। विज्ञानस्कन्धोऽहमित्याकारोरूपादिविषयइन्द्रियजन्योवा दण्डायमानः। वेदनास्कन्धोया प्रियाऽप्रियाऽनुभयविषयस्पर्शे सुखदुःखतद्रहितविशेषावस्थाचित्तस्य जायते स वदनास्कन्धः। संज्ञास्कन्धः स विकल्पप्रत्ययः संज्ञासंसर्गयोग्यप्रतिभासोयथाडित्थः कुण्डलीगौरोब्राह्मणोगच्छती-त्येवं जातीयकः। संस्कारस्कन्धो रागादयः क्लेशाः उपक्लेशाश्च मदमानादयोधर्म्माधर्म्मौ चेति तदेतेषां समुदायः पञ्चस्कन्धी॥ इति भामती।

चित्तचैत्तात्मकः सम्बन्धः पञ्चविधः रूपविज्ञानवेदनासंज्ञासंस्कारसंज्ञकः। तत्र रूप्यन्ते एभिर्विषया इति रूप्यन्ते इति च व्युत्पत्त्या सविषयाणीन्द्रियाणि रूपस्कन्धः। आलयविज्ञानप्रवृत्तिविज्ञानप्रवाहो विज्ञानस्कन्धः। प्रागुक्तस्कन्धद्वयसम्बन्धजन्यः सुखदुःखादिप्रत्ययप्रवाहोवेदनास्कन्धः। गौरित्यादिशब्दोल्लेखिविज्ञानप्रवाहः संज्ञास्कन्धः। वेदनास्कन्धनिबन्धनारागद्वेषादयः क्लेशाः उपक्लेशाश्च मदमानादयोधर्म्माधर्म्मौ च संस्कारस्कन्धः॥ इति सर्व्वदर्शनसंग्रहः।

विज्ञानं युक्तमिति वा अयुक्तमिति वा समनुपश्यति न रूप-
मुत्पादधर्म्मि वा निरोधधर्म्मि वा समनुपश्यति। न वेदनामुत्पाद-
धर्म्मिणीं वा निरोधधर्म्मिणीं वा समनुपश्यति । न संज्ञामुत्पाद-
धर्म्मिणीं वा निरोधधर्म्मिणीं वा समनुपश्यति। संस्कारानुत्पाद-
धर्म्मिणो वा निरोधधर्म्मिणो वा समनुपश्यति । न विज्ञानमुत्पाद-
धर्म्मि वा निरोधधर्म्मि वा समनुपश्यति। न रूपं संक्लेशधर्म्मि
वा व्यवदानधर्म्मि वा समनुपश्यति । न वेदनां संक्लेशधर्म्मिणीं वा
व्यवदानधर्म्मिणीं वा समनुपश्यति । न संज्ञां संक्लेशधर्म्मिणीं वा
व्यवदानधर्म्मिणीं वा समनुपश्यति । न संस्कारान् संक्लेशधर्म्मिणोवा
व्यवदानधर्म्मिणोवा समनुपश्यति। न विज्ञानं संक्लेशधर्म्मि वा व्यव-
दानधर्म्मि वा समनुपश्यति । न रूपं वेदनया सह समवसरतीति
समनुपश्यति । न वेदनारूपेण सह समवसरतीति समनुपश्यति ।
न वेदना संज्ञयासह समवसरतीति समनुपश्यति । न संज्ञा वेदन-
यासह समवसरतीति समनुपश्यति । न संज्ञा संस्कारैः सह सम-
वसरतीति समनुपश्यति । न संस्काराः संज्ञयासह समवसरन्तीति
समनुपश्यति । न संस्काराः विज्ञानेन सह समवसरन्तीति समनु-
श्यपति । न विज्ञानं संस्कारैः सह समवसरतीति समनुपश्यति ।
तत्कस्य हेतोस्तथाहि न कश्चिद्धर्म्मः केनचिद्धर्म्मेण सह समवसरति
न विसरति न युज्यते न वियुज्यते प्रकृतिशून्यतामुपादाय । या
शारद्वतीपुत्र शून्यता न तद्रूपं तथाहि या रूपस्य शून्यता न सा
रूपयति। या वेदनाशून्यता न सा वेदना तथाहि या वेदनाशून्यता
न सा वेदयति। या संज्ञाशून्यता न सा संज्ञा तथाहि या संज्ञा-

शून्यता न सा सञ्जानाति। या संस्कारशून्यता न ते संस्कारा-स्तथाहि या संस्कारशून्यता न साऽभिसंस्करोति। या विज्ञानस्य शून्यता न तद्विज्ञानं तथाहि या विज्ञानशून्यता न सा विजा-नाति। तत्कस्यहेतोर्न हि शारद्वतीपुत्र अन्यद्रूपमन्या शून्यता नाऽन्या शून्यता नाऽन्यद्रूपं। रूपमेव शून्यता शून्यतैव रूपं। नाऽ-न्यावेदना नाऽन्याशून्यता। नाऽन्याशून्यता नाऽन्या वेदना वेदनैव शून्यता शून्यतैव वेदना। नाऽन्यासंज्ञा नाऽन्याशून्यता नाऽन्याशून्यता नाऽन्यासंज्ञा शून्यतेव संज्ञा संज्ञैव शून्यता। नाऽन्ये संस्काराः नाऽन्याशून्यता नाऽन्याशुन्यता नाऽन्ये संस्काराः संस्काराएव शून्यता शून्यतैव संस्काराः। नाऽन्यद्विज्ञानं नाऽन्याशून्यता नाऽन्या शून्यता नाऽन्यद्विज्ञानं। विज्ञानमेव शून्यता शून्यतैव विज्ञानं। या शार-द्वतीपुत्र शून्यता न सा उत्पद्यते न निरुध्यतेन संक्लिश्यते। न व्यवदायते न क्षीयते न वर्द्धते न साऽतीता नाऽनागता न प्रत्युत्पन्ना या न उत्पद्यते न निरुध्यते न संक्लिश्यते न व्यवदायते न क्षीयते न वर्द्धते नाऽतीता नाऽनागता न प्रत्युत्पन्ना न तत्र रूपं न वेदना न संज्ञा न संस्काराः न विज्ञानं। न तत्र चक्षुर्न श्रोत्रं न घ्राणं न जिह्वा न कायोन मनः। न तत्र रूपं न शब्दोन गन्धोन रसोन स्प्रष्टव्यं न धर्माः। न तत्र पृथिवीधातुर्नाब्धातुर्न तेजोधातुर्न वायुधातुर्नाकाशधातुर्न विज्ञानधातुः। न तत्र चक्षुर्धातुर्न रूपधातुर्न चक्षुर्विज्ञानधातुः। न तत्र श्रोत्रधातुर्न शब्दधातुर्न श्रोत्रविज्ञान-धातुः। न तत्र घ्राणधातुर्न गन्धधातुर्न घ्राणविज्ञानधातुः। न तत्र जिह्वाधातुर्न रसधातुर्न जिह्वाविज्ञानधातुः न कायधातुर्न स्प्रष्ट-

धातुर्न कायविज्ञानधातुः। न तत्र मनोधातुर्न धर्मधातुर्न मनो-
विज्ञानधातुः। न तत्राऽविद्या नाऽविद्यानिरोधोन तत्र संस्कारा न
संस्कारनिरोधोन तत्र विज्ञानं न विज्ञाननिरोधोन तत्र नामरूपं
न नामरूपनिरोधोन तत्र षडायतनं न षडायतननिरोधोन तत्र
स्पर्शोन स्पर्शनिरोधोन तत्र वेदना न वेदनानिरोधोन तत्र तृष्णा
न तृष्णानिरोधोन तत्र उपादानं न उपादाननिरोधोन तत्र भवोन
भवनिरोधोन तत्र जातिर्न जातिनिरोधोन तत्र जरामरणं न
जरामरणनिरोधोन तत्र दुःखं न दुःखपरिज्ञानं। न तत्र समुदयोन
समुदयप्रहाणं। न तत्र निरोधोनिरोधसाक्षात्क्रिया। न तत्र मार्गोन
मार्गभावना न तत्र प्राप्तिर्नाऽभिसमयः। न तत्र स्रोतआपन्नः न
स्रोत-आपन्नफलं। न तत्र सकृदागामी न सकृदागामिफलं। न
तत्राऽनागामी नाऽनागामिफलं न तत्राऽर्हन्नार्हत्फलं। न तत्र
प्रत्येकबुद्धोन प्रत्येकबोधिः। न तत्र बोधिसत्त्वोन मार्गाकारज्ञता
न तत्र बुद्धो न तत्र बोधिः। एवं खलु शारद्वतीपुत्र बोधिसत्त्वो-
महासत्त्वः प्रज्ञापारमितायां चरन् युक्तइति वक्तव्यः। एवं प्रज्ञा-
पारमितायां चरन्रूपे युक्तइति वा अयुक्तइति वा न समनुपश्यति।
न वेदनायां युक्तइति वा अयुक्तइति वा समनुपश्यति। न संज्ञायां
युक्तइति वा अयुक्तइति वा समनुपश्यति। न संस्कारे युक्तइति वा
अयुक्तइति वा समनुपश्यति। न विज्ञाने युक्तइति वा अयुक्तइति
वा समनुपश्यति। एवं प्रज्ञापारमितायां चरन् न चक्षुषि युक्तइति
वा अयुक्तइतिवा समनुपश्यति। न श्रोत्रे युक्तइति वा अयुक्तइति
वा समनुपश्यति। न घ्राणे युक्तइति वा अयुक्तइति वा समनु-

पश्यति। न जिह्वायां युक्तइति वा अयुक्तइति वा समनुपश्यति। न काये युक्तइति वा अयुक्तइति वा समनुपश्यति। न मनसि युक्त-इति वा अयुक्तइति वा समनुपश्यति। एवं प्रज्ञापारमितायां चरन् न रूपे युक्तइति वा अयुक्तइति वा समनुपश्यति। न शब्दे युक्तइति वा अयुक्तइति वा समनुपश्यति। न गन्धे युक्तइति वा अयुक्तइति वा समनुपश्यति। न रसे युक्तइति वा अयुक्तइति वा समनुपश्यति। न स्पर्शे युक्तइति वा अयुक्तइति वा समनुपश्यति न धर्म्मे युक्तइति वा अयुक्तइति वा समनुपश्यति। एवं प्रज्ञापारमितायां चरन् न चक्षुर्धातौ युक्तइति वा अयुक्तइति वा समनुपश्यति। न रूपधातौ युक्तइति वा अयुक्तइति वा समनुपश्यति। न चक्षु-र्विज्ञानधातौ युक्तइति वा अयुक्तइति वा समनुपश्यति। एवं प्रज्ञापारमितायां चरन्। न श्रोत्रधातौ युक्तइति वा अयुक्तइति वा समनुपश्यति। न शब्दधातौ युक्तइति वा अयुक्तइति वा समनुपश्यति। न श्रोत्रविज्ञानधातौ युक्तइति वा अयुक्तइति वा समनुपश्यति। एवं प्रज्ञापारमितायां चरन् न घ्राणधातौ युक्तइति वा अयुक्तइति वा समनुपश्यति। न गन्धधातौ युक्तइति वा अयुक्तइति वा समनुपश्यति। न घ्राणविज्ञानधातौ युक्तइति वा अयुक्तइति वा समनुश्यति। एवं प्रज्ञापारमितायां चरन्। न जिह्वाधातौ युक्तइति वा अयुक्तइति वा समनुपश्यति। न रसधातौ युक्तइति वा अयुक्तइति वा समनुपश्यति। न जिह्वाविज्ञानधातौ युक्तइति वा अयुक्तइति वा समनुपश्यति। न कायधातौ युक्तइति वा अयुक्तइति वा समनुपश्यति। न स्प्रष्टव्यधातौ युक्तइति वा

अयुक्तइति वा समनुपश्यति। न कायविज्ञानधातौ युक्तइति वा
अयुक्तइति वा समनुपश्यति। न मनोधातौ युक्तइति वा अयुक्तइति
वा समनुपश्यति। न धर्म्मधातौ युक्तइति वा अयुक्तइति वा समनु-
पश्यति। न मनोविज्ञानधातौ युक्तइति वा अयुक्तइति वा समनु-
पश्यति। स एवं प्रज्ञापारमितायां चरन् न पृथिवीधातौ युक्तइति
वा अयुक्तइति वा समनुपश्यति। नाब्धातौ युक्तइति वा अयुक्तइति
वा समनुपश्यति। न तेजोधातौ युक्तइति वा अयुक्तइति वा
समनुपश्यति। न वायुधातौ युक्तइति वा अयुक्तइति वा समनु-
पश्यति। नाऽऽकाशधातौ युक्तइति वा अयुक्तइति वा समनुपश्यति।
न विज्ञानधातौ युक्तइति वा अयुक्तइति वा समनुपश्यति स एवं
प्रज्ञापारमितायां चरन्नाविद्यायां युक्तइति वा अयुक्तइति वा
समनुपश्यति। न संस्कारे युक्तइति वा अयुक्तइति वा समनुपश्यति।
न विज्ञाने युक्तइति वा अयुक्तइति वा समनुपश्यति। न नामरूपे
युक्तइति वा अयुक्तइति वा समनुपश्यति। न षडायतने युक्तइति
वा अयुक्तइति वा समनुपश्यति। न स्पर्शे युक्तइति वा अयुक्तइति
वा समनुपश्यति। न वेदनायां युक्तइति वा अयुक्तइति वा समनु-
पश्यति। न तृष्णायां युक्तइति वा अयुक्तइति वा समनुपश्यति।
नोपादाने युक्तइति वा अयुक्तइति वा समनुपश्यति। न भवे
युक्तइति वा अयुक्तइति वा समनुपश्यति। न जातौ युक्तइति
वा अयुक्तइति दा समनुपश्यति। न जरामरणे युक्तइति वा
अयुक्तइति वा समनुपश्यति सएवं प्रज्ञापारमितायां चरन् न
दानपारमितायां युक्तइति वा अयुक्तइति वा समनुपश्यति। न

शीलपारमितायां युक्तइति वा अयुक्तइति वा समनुपश्यति। न क्षान्तिपारमितायां युक्तइति वा अयुक्तइति वा समनुपश्यति। न वीर्य्यपारमितायां युक्तइति वा अयुक्तइति वा समनुपश्यति। न ध्यानपारमितायां युक्तइति वा अयुक्तइति वा समनुपश्यति। न प्रज्ञापारमितायां युक्तइति वा अयुक्तइति वा समनुपश्यति। स एवं प्रज्ञापारमितायां चरन् नाऽध्यात्मशून्यतायां युक्तइति वा अयुक्तइति वा समनुपश्यति। न वहिर्धाशून्यतायां युक्तइति वा अयुक्तइति वा समनुपश्यति। नाऽधात्मवहिर्द्धाशून्यतायां युक्तइति वा अयुक्तइति वा समनुपश्यति। न शून्यताशून्यतायां युक्तइति वा अयुक्तइति वा समनुपश्यति। न महाशून्यतायां युक्तइति वा अयुक्तइति वा समनुपश्यति। न परमार्थशून्यतायां युक्तइति वा अयुक्तइति वा समनुपश्यति। न संस्कृतशून्यतायां युक्तइति वा अयुक्तइति वा समनुपश्यति। नाऽसंस्कृतशून्यतायां युक्तइति वा अयुक्तइति वा समनुपश्यति। नाऽत्यन्तशून्यतायां युक्तइति वा अयुक्तइति वा समनुपश्यति। नाऽनवराग्रशून्यतायां युक्तइति वा अयुक्तइति वा समनुपश्यति। नाऽनवकारशून्यतायां युक्तइति वा अयुक्तइति वा समनुपश्यति। न प्रकृतिशून्यतायां युक्तइति वा अयुक्तइति वा समनुपश्यति। न सर्व्वधर्म्मशून्यतायां युक्तइति वा अयुक्तइति वा समनुपश्यति। न स्वलक्षणशून्यतायां युक्तइति वा अयुक्तइति वा समनुपश्यति। नाऽनुपलम्भशून्यतायां युक्तइति वा अयुक्तइति वा समनुपश्यति। नाऽभावशून्यतायां युक्तइति वा अयुक्त-इति वा समनुपश्यति। नस्वभावशून्यतायां युक्तइति वा अयुक्तइति

वा समनुपश्यति । नाभावस्वभावशून्यतायां युक्तइति वा अयुक्तइति वा समनुपश्यति । एवं प्रज्ञापारमितायां चरन् स्मृत्युपस्थानेषु युक्तइति वा अयुक्तइति वा समनुपश्यति । न सम्यक्प्रहाणेषु युक्तइति वा अयुक्तइति वा समनुपश्यति । न ऋद्धिपादेषु युक्तइति वा अयुक्तइति वा समनुपश्यति । नेन्द्रियेषु युक्तइति वा अयुक्तइति वा समनुपश्यति । न बलेषु युक्तइति वा अयुक्तइति वा समनुपश्यति । न बोध्यङ्गेषु युक्तइति वा अयुक्तइति वा समनुपश्यति । न मार्गेषु युक्तइति वा अयुक्तइति वा समनुपश्यति । नाऽऽर्य्यसत्येषु युक्तइति वा अयुक्तइति वा समनुपश्यति । न ध्यानेषु युक्तइति वा अयुक्तइति वा समनुपश्यति । नाऽप्रमाणेषु युक्तइति वा अयुक्तइति वा समनुपश्यति । नाऽऽरूप्यसमापत्तिषु युक्तइति वा अयुक्तइति वा समनुपश्यति । नाऽष्टविमोक्षेषु युक्तइति वा अयुक्तइति वा समनुपश्यति । न नवाऽनुपूर्व्वविहारेषु युक्तइति वा अयुक्तइति वा समनुपश्यति । न शून्यतायां समाधौ युक्तइति वा अयुक्तइति वा समनुपश्यति । नाऽऽनिमित्ते समाधौ युक्तइति वा अयुक्तइति वा समनुपश्यति । नाऽप्रणिहिते समाधौ युक्तइति वा अयुक्तइति वा समनुपश्यति । नाऽभिज्ञासु युक्तइति वा अयुक्तइति वा समनुपश्यति । न सर्व्वसमाधिषु युक्तइति वा अयुक्तइति वा समनुपश्यति । न सर्व्वधारणीमुखेषु युक्तइति वा अयुक्तइति वा समनुपश्यति । न दशसु तथागतबलेषु युक्तइति वा अयुक्तइति वा समनुपश्यति । न चतुर्षु वैशारद्येषु युक्तइति वा अयुक्तइति वा समनुपश्यति । न चतसृषु प्रतिसम्विल्सु युक्तइति वा अयुक्तइति वा समनुपश्यति । न

महामैत्र्यां युक्तइति वा अयुक्तइति वा समनुपश्यति। न महाकरुणायां युक्तइति वा अयुक्तइति वा समनुपश्यति। नाऽष्टादशाऽऽवेणिकबुद्धधर्म्मेषु युक्तइति वा अयुक्तइति वा समनुपश्यति। न स्रोतआपत्तिफले युक्तइति वा अयुक्तइति वा समनुपश्यति। न सकृदागामिफले युक्तइति वा अयुक्तइति वा समनुपश्यति। नाऽनागामिफले युक्तइति वा अयुक्तइति वा समनुपश्यति। नाऽर्हत्त्वे युक्तइति वा अयुक्तइति वा समनुपश्यति। न प्रत्येकबोधौ युक्तइति वा अयुक्तइति वा समनुपश्यति। न मार्गाऽऽकारज्ञतायां युक्तइति वा अयुक्तइति वा समनुपश्यति। न सर्व्वाऽऽकारज्ञतायां युक्तइति वा अयुक्तइति वा समनुपश्यति। अनेनाऽपि शारीपुत्र पर्य्यायेण बोधिसत्त्वोमहासत्त्वः प्रज्ञापारमितायां युक्तइति वक्तव्यः। सर्व्वधर्म्मायोगाऽवियोगतामुपादाय। पुनरपरं शारद्वतीपुत्र बोधिसत्त्वोमहासत्त्वः प्रज्ञापारमितायां चरन् न शून्यतां शून्यतया योजयति न वियोजयति। न शून्यतायोगं नाऽऽनिमित्तेन योजयति न वियोजयति। नाऽऽनिमित्तयोगं नाऽप्रणिहितेन योजयति न वियोजयति नाऽप्रणिहितयोगं*। तत्कस्यहेतोस्तथाहि शून्यतायां न योगो न वियोगः। आनिमित्तं न योगो न वियोगः अप्रणिहितं न योगो न वियोगः। एवं युज्यमानः शारद्वतीपुत्र बोधिसत्त्वोमहासत्त्वः प्रज्ञापारमितायां युक्त इति वक्तव्यः। पुनरपरं शारद्वतीपुत्र बोधिसत्त्वोमहासत्त्वः प्रज्ञापारमितायां चरन् धर्म्माणां

---

* नाऽप्रणिहितयोगमित्यधिकं प्रतिभाति।

† शून्यता इति दुष्टं प्रतिभाति।

लक्षणशून्यतामवतरन् रूपं न योजयति न वियोजयति न वेदनां योजयति न वियोजयति न संज्ञां योजयति न वियोजयति न संस्कारान् योजयति न वियोजयति। न विज्ञानं योजयति न वियोजयति। न रूपं पूर्व्वाऽन्तेन योजयति न वियोजयति। तथाहि पूर्व्वाऽन्तमेव न समनुपश्यति। न रूपमपराऽन्तेन योजयति न वियोजयति तथाह्यपराऽन्तमेव न समनुपश्यति। न रूपं प्रत्युत्पन्नेन योजयति न वियोजयति। तथाहि प्रत्युत्पन्नमेव न समनुपश्यति। न वेदनां पूर्व्वाऽन्तेन योजयति न वियोजयति। तथाहि पूर्व्वाऽन्तमेव न समनुपश्यति। न वेदनामपराऽन्तेन योजयति न वियोजयति तथाह्यपराऽन्तमेव न समनुपश्यति। न वेदनां प्रत्युत्पन्नेन योजयति न वियोजयति तथाहि प्रत्युत्पन्नमेव न समनुपश्यति। न संज्ञां पूर्व्वाऽन्तेन योजयति न वियोजयति तथाहि पूर्व्वाऽन्तमेव न समनुपश्यति। न संज्ञामपराऽन्तेन योजयति न वियोजयति तथाह्यपराऽन्तमेव न समनुपश्यति। न संज्ञां प्रत्युत्पन्नेन योजयति न वियोजयति तथाहि प्रत्युत्पन्नमेव न समनुपश्यति। न संस्कारान् पूर्व्वाऽन्तेन योजयति न वियोजयति तथाहि पूर्व्वाऽन्तमेव न समनुपश्यति। न संस्कारानपराऽन्तेन योजयति न वियोजयति तथाह्यपराऽन्तमेव न समनुपश्यति। न संस्कारान् प्रत्युत्पन्नेन योजयति न वियोजयति तथाहि प्रत्युत्पन्नमेव न समनुपश्यति। न विज्ञानं पूर्व्वाऽन्तेन योजयति न वियोजयति तथाहि पूर्व्वाऽन्तमेव न समनुपश्यति। न विज्ञानमपराऽन्तेन योजयति न वियोजयति तथाह्यपराऽन्तमेव न समनु-

पश्यति। न विज्ञानं प्रत्युत्पन्नेन योजयति न वियोजयति तथाहि प्रत्युत्पन्नमेव न समनुपश्यति। न चक्षुः पूर्व्वाऽन्तेन योजयति न वियोजयति तथाहि पूर्व्वाऽन्तमेव न समनुपश्यति। न चक्षुरपराऽन्तेन योजयति न वियोजयति तथाह्यपराऽन्तमेव न समनुपश्यति। न चक्षुः प्रत्युत्पन्नेन योजयति न वियोजयति तथाहि प्रत्युत्पन्नमेव न समनुपश्यति। न श्रोत्रं पूर्व्वाऽन्तेन योजयति न वियोजयति तथाहि पूर्व्वाऽन्तमेव न समनुपश्यति। न श्रोत्रमपराऽन्तेन योजयति न वियोजयति तथाह्यपराऽन्तमेव न समनुपश्यति। न श्रोत्रं प्रत्युत्पन्नेन योजयति न वियोजयति। तथाहि प्रत्युत्पन्नमेव न समनुपश्यति। न घ्राणं पूर्व्वाऽन्तेन योजयति न वियोजयति तथाहि पूर्व्वाऽन्तमेव न समनुपश्यति। न घ्राणमपराऽन्तेन योजयति न वियोजयति तथाह्यपराऽन्तमेव न समनुपश्यति। न घ्राणं प्रत्युत्पन्नेन योजयति न वियोजयति तथाहि प्रत्युत्पन्नमेव न समनुपश्यति। न जिह्वां पूर्व्वाऽन्तेन योजयति न वियोजयति तथाहि पूर्व्वाऽन्तमेव न समनुपश्यति। न जिह्वामपराऽन्तेन योजयति न वियोजयति तथाह्यपराऽन्तमेव न समनुपश्यति। न जिह्वां प्रत्युत्पन्नेन योजयति न वियोजयति तथाहि प्रत्युत्पन्नमेव न समनुपश्यति। न कायं पूर्व्वाऽन्तेन योजयति न वियोजयति तथाहि पूर्व्वाऽन्तमेव न समनुपश्यति। न कायमपराऽन्तेन योजयति न वियोजयति तथाह्यपराऽन्तमेव न समनुपश्यति। न कायं प्रत्युत्पन्नेन योजयति न वियोजयति तथाहि प्रत्युत्पन्नमेव न समनुपश्यति। न मनः पूर्व्वाऽन्तेन योजयति न वियोजयति तथाहि पूर्व्वाऽन्तमेव

न समनुपश्यति। न मनोऽपराऽन्तेन योजयति न वियोजयति तथाह्यपराऽन्तमेव न समनुपश्यति। न मनः प्रत्युत्पन्नेन योजयति न वियोजयति तथाहि प्रत्युत्पन्नमेव न समनुपश्यति। न रूपं पूर्व्वाऽन्तेन योजयति न वियोजयति तथाहि पूर्व्वाऽन्तमेव न समनुपश्यति। न रूपमपराऽन्तेन योजयति न वियोजयति तथाह्यपराऽन्तमेव न समनुपश्यति। न रूपं प्रत्युत्पन्नेन योजयति न वियोजयति तथाहि प्रत्युत्पन्नमेव न समनुपश्यति। न शब्दं पूर्व्वाऽन्तेन योजयति न वियोजयति तथाहि पूर्व्वाऽन्तमेव न समनुपश्यति। न शब्दमपराऽन्तेन योजयति न वियोजयति तथाह्यपराऽन्तमेव न समनुपश्यति। न शब्दं प्रत्युत्पन्नेन योजयति न वियोजयति तथाहि प्रत्युत्पन्नमेव न समनुपश्यति। न गन्धं पूर्व्वाऽन्तेन योजयति न वियोजयति तथाहि पूर्व्वाऽन्तमेव न समनुपश्यति। न गन्धमपराऽन्तेन योजयति न वियोजयति तथाह्यपराऽन्तमेव न समनुपश्यति। न गन्धं प्रत्युत्पन्नेन योजयति न वियोजयति तथाहि प्रत्युत्पन्नमेव न समनुपश्यति। न रसं पूर्व्वाऽन्तेन योजयति न वियोजयति तथाहि पूर्व्वाऽन्तमेव न समनुपश्यति। न रसमपराऽन्तेन योजयति न वियोजयति तथाह्यपराऽन्तमेव न समनुपश्यति। न रसं प्रत्युत्पन्नेन योजयति न वियोजयति तथाहि प्रत्युत्पन्नमेव न समनुपश्यति। न स्पर्शं पूर्व्वाऽन्तेन योजयति न वियोजयति तथाहि पूर्व्वाऽन्तमेव न समनुपश्यति। न स्पर्शमपराऽन्तेन योजयति न वियोजयति तथाह्यपराऽन्तमेव न समनुपश्यति। न स्पर्शं प्रत्युत्पन्नेन योजयति न वियोजयति

तथाहि प्रत्युत्पन्नमेव न समनुपश्यति। न धर्म्मं पूर्व्वान्तेन योजयति न वियोजयति तथाहि पूर्व्वान्तमेव न समनुपश्यति। न धर्म्ममपरान्तेन योजयति न वियोजयति तथाह्यपरान्तमेव न समनुपश्यति। न धर्म्मं प्रत्युत्पन्नेन योजयति न वियोजयति तथाहि प्रत्युत्पन्नमेव न समनुपश्यति। न चक्षुर्विज्ञानं पूर्व्वान्तेन योजयति न वियोजयति तथाहि पूर्व्वान्तमेव न समनुपश्यति। न चक्षुर्विज्ञानमपरान्तेन योजयति न वियोजयति तथाह्यपरान्तमेव न समनुपश्यति। न चक्षुर्विज्ञानं प्रत्युत्पन्नेन योजयति न वियोजयति तथाहि प्रत्युत्पन्नमेव न समनुपश्यति। न श्रोत्रविज्ञानं पूर्व्वान्तेन योजयति न वियोजयति तथाहि पूर्व्वान्तमेव न समनुपश्यति। न श्रोत्रविज्ञानमपरान्तेन योजयति न वियोजयति तथाह्यपरान्तमेव न समनुपश्यति। न श्रोत्रविज्ञानं प्रत्युत्पन्नेन योजयति न वियोजयति तथाहि प्रत्युत्पन्नमेव न समनुपश्यति। न घ्राणविज्ञानं पूर्व्वान्तेन योजयति न वियोजयति तथाहि पूर्व्वान्तमेव न समनुपश्यति। न घ्राणविज्ञानमपरान्तेन योजयति न वियोजयति तथाह्यपरान्तमेव न समनुपश्यति। न घ्राणविज्ञानं प्रत्युत्पन्नेन योजयति न वियोजयति तथाहि प्रत्युत्पन्नमेव न समनुपश्यति। [illegible] जिह्वाविज्ञानं पूर्व्वान्तेन योजयति न वियोजयति तथाहि [illegible]न्तमेव न समनुपश्यति। न जिह्वाविज्ञानमपरान्तेन योजयति [illegible] वियोजयति तथाह्यपरान्तमेव न समनुपश्यति। न जिह्वा-[illegible]नं प्रत्युत्पन्नेन योजयति न वियोजयति तथाहि प्रत्युत्पन्न-[illegible] न समनुपश्यति। न कायविज्ञानं पूर्व्वान्तेन योजयति न

वियोजयति तथाहि पूर्व्वाऽन्तमेव न समनुपश्यति। न काय-विज्ञानमपराऽन्तेन योजयति न वियोजयति तथाह्यपराऽन्तमेव न समनुपश्यति। न कायविज्ञानं प्रत्युत्पन्नेन योजयति न वियोजयति तथाहि प्रत्युत्पन्नमेव न समनुपश्यति। न मनोविज्ञानं पूर्व्वाऽन्तेन योजयति न वियोजयति तथाहि पूर्व्वाऽन्तमेव न सम-नुपश्यति। न मनोविज्ञानमपराऽन्तेन योजयति न वियोजयति तथाह्यपराऽन्तमेव न समनुपश्यति। न मनोविज्ञानं प्रत्युत्पन्नेन योजयति न वियोजयति तथाहि प्रत्युत्पन्नमेव न समनुपश्यति। न चक्षुः संस्पर्शं पूर्व्वाऽन्तेन योजयति न विजोयति तथाहि पूर्व्वाऽ-न्तमेव न समनुपश्यति। न चक्षुः संस्पर्शमपराऽन्तेन योजयति न वियोजयति तथाह्यपराऽन्तमेव न समनुपश्यति। न चक्षुः संस्पर्शं प्रत्युत्पन्नेन योजयति न वियोजयति तथाहि प्रत्युत्पन्नमेव न समनुपश्यति। न श्रोत्रसंस्पर्शं पूर्व्वाऽन्तेन योजयति न वियोजयति तथाहि पूर्व्वाऽन्तमेव न समनुपश्यति। न श्रोत्रसंस्पर्शमपराऽन्तेन योजयति न वियोजयति तथाह्यपराऽन्तमेव न समनुपश्यति। न श्रोत्रसंस्पर्शं प्रत्युत्पन्नेन योजयति न वियोजयति तथाहि प्रत्यु-त्पन्नमेव न समनुपश्यति। न घ्राणसंस्पर्शं पूर्व्वाऽन्तेन योजयति न वियोजयति तथाहि पूर्व्वाऽन्तमेव न समनुपश्यति। न घ्राणसंस्पर्श-मपराऽन्तेन योजयति न वियोजयति तथाह्यपराऽन्तमेव न समनु-पश्यति। न घ्राणसंस्पर्शं प्रत्युत्पन्नेन योजयति न वियोजयति तथाहि प्रत्युत्पन्नमेव न समनुपश्यति। न जिह्वासंस्पर्शं पूर्व्वाऽन्तेन योजयति न वियोजयति तथाहि पूर्व्वाऽन्तमेव न समनुपश्यति।

न जिह्वासंस्पर्शमपराऽन्तेन योजयति न वियोजयति तथाह्यपराऽन्त-मेव न समनुपश्यति। न जिह्वासंस्पर्शं प्रत्युत्पन्नेन योजयति न वियोजयति तथाहि प्रत्युत्पन्नमेव न समनुपश्यति। न कायसंस्पर्शं पूर्व्वाऽन्तेन योजयति न वियोजयति तथाहि पूर्व्वाऽन्तमेव न समनुपश्यति। न कायसंस्पर्शमपराऽन्तेन योजयति न वियोजयति तथाह्यपराऽन्तमेव न समनुपश्यति। न कायसंस्पर्शं प्रत्युत्पन्नेन योजयति न वियोजयति तथाहि प्रत्युत्पन्नमेव न समनुपश्यति। न मनः संस्पर्शं पूर्व्वाऽन्तेन योजयति न वियोजयति तथाहि पूर्व्वाऽन्तमेव न समनुपश्यति। न मनः संस्पर्शमपराऽन्तेन योजयति न वियोजयति तथाह्यपराऽन्तमेव न समनुपश्यति। न मनः संस्पर्शं प्रत्युत्पन्नेन योजयति न वियोजयति तथाहि प्रत्युत्पन्नमेव न समनुपश्यति। न चक्षुः संस्पर्शजां वेदनां पूर्व्वाऽन्तेन योजयति न वियोजयति तथाहि पूर्व्वाऽन्तमेव न समनुपश्यति। न चक्षुः संस्पर्शजां वेदनामपराऽन्तेन योजयति न वियोजयति तथाह्यप-राऽन्तमेव न समनुपश्यति। न चक्षुः संस्पर्शजां वेदनां प्रत्युत्पन्नेन योजयति न वियोजयति तथाहि प्रत्युत्पन्नमेव न समनुपश्यति। न श्रोत्रसंस्पर्शजां वेदनां पूर्व्वाऽन्तेन योजयति न वियोजयति तथाहि पूर्व्वाऽन्तमेव न समनुपश्यति। न श्रोत्रसंस्पर्शजां वेदना-मपराऽन्तेन योजयति न वियोजयति तथाह्यपराऽन्तमेव न सम-नुपश्यति। न श्रोत्रसंस्पर्शजां वेदनां प्रत्युत्पन्नेन योजयति न वियोजयति तथाहि प्रत्युत्पन्नमेव न समनुपश्यति। न घ्राणसंस्प-र्शजां वेदनां पूर्व्वाऽन्तेन योजयति न वियोजयति तथाहि पूर्व्वाऽ-

न्तमेव न समनुपश्यति। न घ्राणसंस्पर्शजां वेदनामपराऽन्तेन योजयति न वियोजयति तथाह्यपराऽन्तमेव न समनुपश्यति। न घ्राणसंस्पर्शजां वेदनां प्रत्युत्पन्नेन योजयति न वियोजयति तथाहि प्रत्युत्पन्नमेव न समनुपश्यति। न जिह्वासंस्पर्शजां वेदनां पूर्व्वाऽन्तेन योजयति न वियोजयति तथाहि पूर्व्वाऽन्तमेव न समनुपश्यति। न जिह्वासंस्पर्शजां वेदनामपराऽन्तेन योजयति न वियोजयति यथाह्यपराऽन्तमेव न समनुपश्यति। न जिह्वासंस्पर्शजां वेदनां प्रत्युत्पन्नेन योजयति न वियोजयति तथाहि प्रत्युत्पन्नमेव न समनुपश्यति। न कायसंस्पर्शजां वेदनां पूर्व्वाऽन्तेन योजयति न वियोजयति तथाहि पूर्व्वाऽन्तमेव न समनुपश्यति। न कायसंस्पर्शजां वेदनामपराऽन्तेन योजयति न वियोजयति तथाह्यपराऽन्तमेव न समनुपश्यति। न कायसंस्पर्शजां वेदनां प्रत्युत्पन्नेन योजयति न वियोजयति तथाहि प्रत्युत्पन्नमेव न समनुपश्यति। न मनः संस्पर्शजां वेदनां पूर्व्वाऽन्तेन योजयति न वियोजयति तथाहि पूर्व्वाऽन्तमेव न समनुपश्यति। न मनः संस्पर्शजां वेदनामपराऽन्तेन योजयति न वियोजयति तथाह्यपराऽन्तमेव न समनुपश्यति। न मनः संस्पर्शजां वेदनां प्रत्युत्पन्नेन योजयति न वियोजयति तथाहि प्रत्युत्पन्नमेव न समनुपश्यति। न पृथिवीधातुं पूर्व्वाऽन्तेन योजयति न वियोजयति तथाहि पूर्व्वाऽन्तमेव न समनुपश्यति। न पृथिवीधातुमपराऽन्तेन योजयति न वियोजयति तथाह्यपराऽन्तमेव न समनुपश्यति। न पृथिवीधातुं प्रत्युत्पन्नेन योजयति न वियोजयति तथाहि प्रत्युत्पन्नमेव न समनुपश्यति। नाब्धातुं

पूर्व्वाऽन्तेन योजयति न वियोजयति तथाहि पूर्व्वाऽन्तमेव न समनुपश्यति । नाब्धातुमपराऽन्तेन योजयति न वियोजयति तथाह्य-पराऽन्तमेव न समनुपश्यति । नाब्धातुं प्रत्युत्पन्नेन योजयति न वियोजयति तथाहि प्रत्युत्पन्नमेव न समनुपश्यति । न तेजोधातुं पूर्व्वाऽन्तेन योजयति न वियोजयति तथाहि पूर्व्वाऽन्तमेव न समनुपश्यति । न तेजोधातुमपराऽन्तेन योजयति न वियोजयति तथाह्यपराऽन्तमेव न समनुपश्यति । न तेजोधातुं प्रत्युत्पन्नेन योजयति न वियोजयति तथाहि प्रत्युत्पन्नमेव न समनुपश्यति । न वायुधातुं पूर्व्वाऽन्तेन योजयति न वियोजयति तथाहि पूर्व्वाऽन्तमेव न समनुपश्यति । न वायुधातुमपराऽन्तेन योजयति न वियोजयति तथाह्यपराऽन्तमेव न समनुपश्यति । न वायुधातुं प्रत्युत्पन्नेन योजयति न वियोजयति तथाहि प्रत्युत्पन्नमेव न समनुपश्यति । नाऽऽकाशधातुं पूर्व्वाऽन्तेन योजयति न वियोजयति तथाहि पूर्व्वाऽन्तमेव न समनुपश्यति । नाऽऽकाशधातुमपराऽन्तेन योजयति न वियोजयति तथाह्यपराऽन्तमेव न समनुपश्यति । नाऽऽकाशधातुं प्रत्युत्पन्नेन योजयति न वियोजयति तथाहि प्रत्यु-त्पन्नमेव न समनुपश्यति । न विज्ञानधातुं पूर्व्वाऽन्तेन योजयति न वियोजयति तथाहि पूर्व्वाऽन्तमेव न समनुपश्यति । न विज्ञान-धातुमपराऽन्तेन योजयति न वियोजयति तथाह्यपराऽन्तमेव न समनुपश्यति । न विज्ञानधातुं प्रत्युत्पन्नेन योजयति न वियोज-यति तथाहि प्रत्युत्पन्नमेव न समनुपश्यति । नाऽविद्यां पूर्व्वाऽन्तेन योजयति न वियोजयति तथाहि पूर्व्वाऽन्तमेव न समनुपश्यति ।

नाऽविद्यामपराऽन्तेन योजयति न वियोजयति तथाह्यपराऽन्तमेव न समनुपश्यति। नाऽविद्यां प्रत्युत्पन्नेन योजयति न वियोजयति तथाहि प्रत्युत्पन्नमेव न समनुपश्यति। न संस्कारान् पूर्व्वाऽन्तेन योजयति न वियोजयति तथाहि पूर्व्वाऽन्तमेव न सनुपश्यति। न संस्कारानपराऽन्तेन योजयति न वियोजयति तथाह्यपराऽन्तमेव न समनुपश्यति। न संस्कारान् प्रत्युत्पन्नेन योजयति न वियोजयति तथाहि प्रत्युत्पन्नमेव न समनुपश्यति। न विज्ञानं पूर्व्वाऽन्तेन योजयति न वियोजयति तथाहि पूर्व्वाऽन्तमेव न समनुपश्यति। न विज्ञानमपराऽन्तेन योजयति न वियोजयति तथाह्यपराऽन्तमेव न समनुपश्यति। न विज्ञानं प्रत्युत्पन्नेन योजयति न वियोजयति तथाहि प्रत्युत्पन्नमेव न समनुपश्यति। न नामरूपं पूर्व्वाऽन्तेन योजयति न वियोजयति तथाहि पूर्व्वाऽन्तमेव न समनुपश्यति। न नामरूपमपराऽन्तेन योजयति न वियोजयति तथाह्यपराऽन्तमेव न समनुपश्यति। न नामरूपं प्रत्युत्पन्नेन योजयति न वियोजयति तथाहि प्रत्युत्पन्नमेव न समनुपश्यति। न षड़ायतनं पूर्व्वाऽन्तेन योजयति न वियोजयति तथाहि पूर्व्वाऽन्तमेव न समनुपश्यति। न षड़ायतनमपराऽन्तेन योजयति न वियोजयति तथाह्यपराऽन्तमेव न समनुपश्यति न षड़ायतनं प्रत्युत्पन्नेन योजयति न वियोजयति तथाहि प्रत्युत्पन्नमेव न समनुपश्यति। न स्पर्शं पूर्व्वाऽन्तेन योजयति न वियोजयति तथाहि पूर्व्वाऽन्तमेव न समनुपश्यति। न स्पर्शमपराऽन्तेन योजयति न वियोजयति तथाह्यपराऽन्तमेव न समनुपश्यति। न स्पर्शं प्रत्युत्पन्नेन योजयति न

वियोजयति तथाहि प्रत्युत्पन्नमेव न समनुपश्यति। न वेदनां पूर्व्वाऽ-
न्तेन योजयति न वियोजयति तथाहि पूर्व्वाऽन्तमेव न समनु-
पश्यति। न वेदनामपराऽन्तेन योजयति न वियोजयति तथाह्यप-
राऽन्तमेव न समनुपश्यति। न वेदनां प्रत्युत्पन्नेन योजयति न
वियोजयति तथाहि प्रत्युत्पन्नमेव न समनुपश्यति। न तृष्णां
पूर्व्वाऽन्तेन योजयति न वियोजयति तथाहि पूर्व्वाऽन्तमेव न सम-
नुपश्यति। न तृष्णामपराऽन्तेन योजयति न वियोजयति तथाह्यप-
राऽन्तमेव न समनुपश्यति। न तृष्णां प्रत्युत्पन्नेन योजयति न
वियोजयति तथाहि प्रत्युत्पन्नमेव न समनुपश्यति। नोपादानं
पूर्व्वाऽन्तेन योजयति न वियोजयति तथाहि पूर्व्वाऽन्तमेव न समनु-
पश्यति। नोपादानमपराऽन्तेन योजयति न वियोजयति तथाह्यप-
राऽन्तमेव न समनुपश्यति। नोपादानं प्रत्युत्पन्नेन योजयति न
वियोजयति तथाहि प्रत्युत्पन्नमेव न समनुपश्यति। न भवं पूर्व्वाऽ-
न्तेन योजयति न वियोजयति तथाहि पूर्व्वाऽन्तमेव न समनु-
पश्यति। न भवमपराऽन्तेन योजयति न वियोजयति तथाह्यप-
राऽन्तमेव न समनुपश्यति। न भवं प्रत्युत्पन्नेन योजयति न
वियोजयति तथाहि प्रत्युत्पन्नमेव न समनुपश्यति। न जातिं
पूर्व्वाऽन्तेन योजयति न वियोजयति तथाहि पूर्व्वाऽन्तमेव न समनु-
पश्यति। न जातिमपराऽन्तेन योजयति न वियोजयति तथाह्यप-
राऽन्तमेव न समनुपश्यति। न जातिं प्रत्युत्पन्नेन योजयति न
वियोजयति तथाहि प्रत्युत्पन्नमेव न समनुपश्यति। न जरामरणं
पूर्व्वाऽन्तेन योजयति न वियोजयति तथाहि पूर्व्वाऽन्तमेव न समनु-

पश्यति। न जरामरणमपराऽन्तेन योजयति न वियोजयति तथा-ह्यपराऽन्तमेव न समनुपश्यति। न जरामरणं प्रत्युत्पन्नेन योजयति न वियोजयति तथाहि प्रत्युत्पन्नमेव न समनुपश्यति। न दान-पारमितां पूर्व्वाऽन्तेन योजयति न वियोजयति तथाहि पूर्व्वाऽन्त-मेव न समनुपश्यति। न दानपारमितामपराऽन्तेन योजयति न वियोजयति तथाह्यपराऽन्तमेव न समनुपश्यति। न दानपारमितां प्रत्युत्पन्नेन योजयति न वियोजयति तथाहि प्रत्युत्पन्नमेव न समनुपश्यति। न शीलपारमितां पूर्व्वाऽन्तेन योजयति न वियो-जयति तथाहि पूर्व्वाऽन्तमेव न समनुपश्यति। न शीलपारमिता-मपराऽन्तेन योजयति न वियोजयति तथाह्यपराऽन्तमेव न समनु-पश्यति। न शीलपारमितां प्रत्युत्पन्नेन योजयति न वियोजयति तथाहि प्रत्युत्पन्नमेव न समनुपश्यति। न क्षान्तिपारमितां पूर्व्वाऽ-न्तेन योजयति न वियोजयति तथाहि पूर्व्वाऽन्तमेव न समनु-पश्यति। न क्षान्तिपारमितामपराऽन्तेन योजयति न वियोजयति तथाह्यपराऽन्तमेव न समनुपश्यति। न क्षान्तिपारमितां प्रत्युत्पन्नेन योजयति न वियोजयति तथाहि प्रत्युत्पन्नमेव न समनुपश्यति। न वीर्य्यपारमितां पूर्व्वाऽन्तेन योजयति न वियोजयति तथाहि पूर्व्वाऽन्तमेव न समनुपश्यति। न वीर्य्यपारमितामपराऽन्तेन योज-यति न वियोजयति तथाह्यपराऽन्तमेव न समनुपश्यति। न वीर्य्य-पारमितां प्रत्युत्पन्नेन योजयति न वियोजयति तथाहि प्रत्युत्पन्न-मेव न समनुपश्यति। न ध्यानपारमितां पूर्व्वाऽन्तेन योजयति न वियोजयति तथाहि पूर्व्वाऽन्तमेव न समनुपश्यति। न ध्यानपार-

मेव न समनुपश्यति। न शून्यताशून्यतामपराऽन्तेन योजयति न वियोजयति तथाह्यपराऽन्तमेव न समनुपश्यति। न शून्यताशून्यतां प्रत्युत्पन्नेन योजयति न वियोजयति तथाहि प्रत्युत्पन्नमेव न समनुपश्यति। न महाशून्यतां पूर्व्वाऽन्तेन योजयति न वियोजयति तथाहि पूर्व्वाऽन्तमेव न समनुपश्यति। न महाशून्यतामपराऽन्तेन योजयति न वियोजयति तथाह्यपराऽन्तमेव न समनुपश्यति। न महाशून्यतां प्रत्युत्पन्नेन योजयति न वियोजयति तथाहि प्रत्युत्पन्नमेव न समनुपश्यति। न परमार्थशून्यतां पूर्व्वाऽन्तेन योजयति न वियोजयति तथाहि पूर्व्वाऽन्तमेव न समनुपश्यति। न परमार्थशून्यतामपराऽन्तेन योजयति न वियोजयति तथाह्यपराऽन्तमेव न समनुपश्यति। न परमार्थशून्यतां प्रत्युत्पन्नेन योजयति न वियोजयति तथाहि प्रत्युत्पन्नमेव न समनुपश्यति। न संस्कृतशून्यतां पूर्व्वाऽन्तेन योजयति न वियोजयति तथाहि पूर्व्वाऽन्तमेव न समनुपश्यति। न संस्कृतशून्यतामपराऽन्तेन योजयति न वियोजयति तथाहि अपराऽन्तमेव न समनुपश्यति। न संस्कृतशून्यतां प्रत्युत्पन्नेन योजयति न वियोजयति तथाहि प्रत्युत्पन्नमेव न समनुपश्यति। न संस्कृतशून्यतां पूर्व्वाऽन्तेन योजयति न वियोजयति तथाहि पूर्व्वाऽन्तमेव न समनुपश्यति। न संस्कृतशून्यतामपराऽन्तेन योजयति न वियोजयति तथाह्यपराऽन्तमेव न समनुपश्यति। न संस्कृतशून्यतां प्रत्युत्पन्नेन योजयति न वियोजयति तथाहि प्रत्युत्पन्नमेव न समनुपश्यति। नाऽत्यन्तशून्यतां पूर्व्वाऽन्तेन योजयति न वियोजयति तथाहि पूर्व्वाऽन्तमेव न

समनुपश्यति। नाऽत्यन्तशून्यतामपराऽन्तेन योजयति न वि
जयति तथाह्यपराऽन्तमेव न समनुपश्यति। नाऽत्यन्तशू
प्रत्युत्पन्नेन योजयति न वियोजयति तथाहि प्रत्युत्पन्नमेव
समनुपश्यति। नाऽनवराऽग्रशून्यतां पूर्व्वाऽन्तेन योजयति न वि
जयति तथाहि पूर्व्वाऽन्तमेव न समनुपश्यति। नाऽनवराऽग्रशून्य
मपराऽन्तेन योजयति न वियोजयति तथाह्यपराऽन्तमेव न सम
पश्यति। नाऽनवराऽग्रशून्यतां प्रत्युत्पन्नेन योजयति न वियोजय
तथाहि प्रत्युत्पन्नमेव न समनुपश्यति। नाऽनवकारशून्यतां पूर्व्वाऽ
योजयति न वियोजयति तथाहि पूर्व्वाऽन्तमेव न समनुपश्यति
नाऽनवकारशून्यतामपराऽन्तेन योजयति न वियोजयति तथाह्
राऽन्तमेव न समनुपश्यति। नाऽनवकारशून्यतां प्रत्युत्पन्नेन योजय
न वियोजयति तथाहि प्रत्युत्पन्नमेव न समनुपश्यति। न प्रकृति
शून्यतां पूर्व्वाऽन्तेन योजयति न वियोजयति तथाहि पूर्व्वाऽन्त
न समनुपश्यति। न प्रकृतिशून्यतामपराऽन्तेन योजयति न वि
जयति तथाह्यपराऽन्तमेव न समनुपश्यति। न प्रकृतिशून्य
प्रत्युत्पन्नेन योजयति न वियोजयति तथाहि प्रत्युत्पन्नमेव
समनुपश्यति। न सर्व्वधर्मशून्यतां पूर्व्वाऽन्तेन योजयति न वियो
जयति तथाहि पूर्व्वाऽन्तमेव न समनुपश्यति। न सर्व्वधर्मशून्यत
मपराऽन्तेन योजयति न वियोजयति तथाह्यपराऽन्तमेव न समनु
पश्यति। न सर्व्वधर्मशून्यतां प्रत्युत्पन्नेन योजयति न वियोजयति
तथाहि प्रत्युत्पन्नमेव न समनुपश्यति। न स्वलक्षणशून्यतां पूर्व्वाऽ
न्तेन योजयति न वियोजयति तथाहि पूर्व्वाऽन्तमेव न समनु

पश्यति। न स्वलक्षणशून्यतामपरान्तेन योजयति न वियोजयति
तथाह्यपरान्तमेव न समनुपश्यति। न स्वलक्षणशून्यतां प्रत्युत्पन्नेन
योजयति न वियोजयति तथाहि प्रत्युत्पन्नमेव न समनुपश्यति।
नाऽनुपलम्भशून्यतां पूर्व्वान्तेन योजयति न वियोजयति तथाहि
पूर्व्वान्तमेव न समनुपश्यति। नाऽनुपलम्भशून्यतामपरान्तेन योज-
यति न वियोजयति तथाह्यपरान्तमेव न समनुपश्यति। नाऽनुपलम्भ-
शून्यतां प्रत्युत्पन्नेन योजयति न वियोजयति तथाहि प्रत्युत्पन्न-
मेव न समनुपश्यति। नाऽभावशून्यतां पूर्व्वान्तेन योजयति न
वियोजयति तथाहि पूर्व्वान्तमेव न समनुपश्यति। नाऽभावशून्यता-
मपरान्तेन योजयति न वियोजयति तथाह्यपरान्तमेव न समनु-
पश्यति। नाऽभावशून्यतां प्रत्युत्पन्नेन योजयति न वियोजयति
तथाहि प्रत्युत्पन्नमेव न समनुपश्यति। न स्वभावशून्यतां पूर्व्वान्तेन
योजयति न वियोजयति तथाहि पूर्व्वान्तमेव न समनुपश्यति।
न स्वभावशून्यतामपरान्तेन योजयति न वियोजयति तथाह्यप-
रान्तमेव न समनुपश्यति। न स्वभावशून्यतां प्रत्युत्पन्नेन योजयति
न वियोजयति तथाहि प्रत्युत्पन्नमेव न समनुपश्यति। नाऽभाव-
स्वभावशून्यतां पूर्व्वान्तेन योजयति न वियोजयति तथाहि
पूर्व्वान्तमेव न समनुपश्यति। नाऽभावस्वभावशून्यतामपरान्तेन
योजयति न वियोजयति तथाह्यपरान्तमेव न समनुपश्यति।
नाऽभावस्वभावशून्यतां प्रत्युत्पन्नेन योजयति न वियोजयति
तथाहि प्रत्युत्पन्नमेव न समनुपश्यति। न स्मृत्युपस्थानानि पूर्व्वाऽ-
न्तेन योजयति न वियोजयति तथाहि पूर्व्वान्तमेव न समनु-

पश्यति। न स्मृत्युपस्थानान्यपरान्तेन योजयति न वियोजयति तथाह्यपरान्तमेव न समनुपश्यति। न स्मृत्युपस्थानानि प्रत्युत्पन्नेन योजयति न वियोजयति तथाहि प्रत्युत्पन्नमेव न समनुपश्यति। न सम्यक्प्रहाणानि पूर्व्वान्तेन योजयति न वियोजयति तथाहि पूर्व्वान्तमेव न समनुपश्यति। न सम्यक्प्रहाणान्यपरान्तेन योजयति न वियोजयति तथाह्यपरान्तमेव न समनुपश्यति। न सम्यक्-प्रहाणानि प्रत्युत्पन्नेन योजयति न वियोजयति तथाहि प्रत्यु-त्पन्नमेव न समनुपश्यति। न ऋद्धिपादान् पूर्व्वान्तेन योजयति न वियोजयति तथाहि पूर्व्वान्तमेव न समनुपश्यति। न ऋद्धि-पादानपरान्तेन योजयति न वियोजयति तथाह्यपरान्तमेव न समनुपश्यति। न ऋद्धिपादान् प्रत्युत्पन्नेन योजयति न वियो-जयति तथाहि प्रत्युत्पन्नमेव न समनुपश्यति। नेन्द्रियाणि पूर्व्वा-न्तेन योजयति न वियोजयति तथाहि पूर्व्वान्तमेव न समनु-पश्यति। नेन्द्रियाण्यपरान्तेन योजयति न वियोजयति तथाह्यप-रान्तमेव न समनुपश्यति। नेन्द्रियाणि प्रत्युत्पन्नेन योजयति न वियोजयति तथाहि प्रत्युत्पन्नमेव न समनुपश्यति। न वलानि पूर्व्वान्तेन योजयति न वियोजयति तथाहि पूर्व्वान्तमेव न सम-नुपश्यति। न वलान्यपरान्तेन योजयति न वियोजयति तथाह्य-परान्तमेव न समनुपश्यति। न वलानि प्रत्युत्पन्नेन योजयति न वियोजयति तथाहि प्रत्युत्पन्नमेव न समनुपश्यति। न बोध्य-ङ्गानि पूर्व्वान्तेन योजयति न वियोजयति तथाहि पूर्व्वान्तमेव न समनुपश्यति। न बोध्यङ्गान्यपरान्तेन योजयति न वियोजयति

तथाह्यपराऽन्तमेव न समनुपश्यति। न बोध्यङ्गानि प्रत्युत्पन्नेन योजयति न वियोजयति तथाहि प्रत्युत्पन्नमेव न समनुपश्यति। नाऽऽर्य्याऽष्टाऽङ्गमार्गं पूर्व्वाऽन्तेन योजयति न वियोजयति तथाहि पूर्व्वाऽन्तमेव न समनुपश्यति। नाऽऽर्य्याऽष्टऽङ्गमार्गमपराऽन्तेन योजयति न वियोजयति तथाह्यपराऽन्तमेव न समनुपश्यति। नाऽऽर्य्याऽष्टाऽङ्ग-मार्गं प्रत्युत्पन्नेन योजयति न वियोजयति तथाहि प्रत्युत्पन्नमेव न समनुपश्यति। नाऽऽर्य्यसत्यानि पूर्व्वाऽन्तेन योजयति न वियो-जयति तथाहि पूर्व्वाऽन्तमेव न समनुपश्यति। नाऽऽर्य्यसत्यान्यप-राऽन्तेन योजयति न वियोजयति तथाह्यपराऽन्तमेव न समनु-पश्यति। नाऽऽर्य्यसत्यानि प्रत्युत्पन्नेन योजयति न वियोजयति तथाहि प्रत्युत्पन्नमेव न समनुपश्यति। न ध्यानानि पूर्व्वाऽन्तेन योजयति न वियोजयति तथाहि पूर्व्वाऽन्तमेव न समनुपश्यति। न ध्यानान्यपराऽन्तेन योजयति न वियोजयति तथाह्यपराऽन्तमेव न समनुपश्यति। न ध्यानानि प्रत्युत्पन्नेन योजयति न वियो-जयति तथाहि प्रत्युत्पन्नमेव न समनुपश्यति। नाऽप्रमाणानि पूर्व्वाऽन्तेन योजयति न वियोजयति तथाहि पूर्व्वाऽन्तमेव न सम-नुपश्यति। नाऽप्रमाणान्यपराऽन्तेन योजयति न वियोजयति तथा-ह्यपराऽन्तमेव न समनुपश्यति। नाऽप्रमाणानि प्रत्युत्पन्नेन योजयति न वियोजयति तथाहि प्रत्युत्पन्नमेव न समनुपश्यति। नाऽऽरूप्यसमापत्तिं पूर्व्वाऽन्तेन योजयति न वियोजयति तथाहि पूर्व्वाऽन्तमेव न समनुपश्यति। नाऽऽरूप्यसमापत्तिमपराऽन्तेन योज-यति न वियोजयति तथाह्यपराऽन्तमेव न समनुपश्यति। नाऽऽरूप्य-

समापत्तिं प्रत्युत्पन्नेन योजयति न वियोजयति तथाहि प्रत्यु-
त्पन्नमेव न समनुपश्यति। नाऽष्टौ विमोचान् पूर्व्वाऽन्तेन योजयति
न वियोजयति तथाहि पूर्व्वाऽन्तमेव न समनुपश्यति। नाऽष्टौ
विमोचानपराऽन्तेन योजयति न वियोजयति तथाह्यपराऽन्तमेव
न समनुपश्यति। नाऽष्टौ विमोचान् प्रत्युत्पन्नेन योजयति न
वियोजयति तथाहि प्रत्युत्पन्नमेव न समनुपश्यति। न नवाऽनु-
पूर्व्वविहारसमापत्तीः पूर्व्वाऽन्तेन योजयति न वियोजयति तथाहि
पूर्व्वाऽन्तमेव न समनुपश्यति। न नवाऽनुपूर्व्वविहारसमापत्तीरप-
राऽन्तेन योजयति न वियोजयति तथाह्यपराऽन्तमेव न समनु-
पश्यति। न नवाऽनुपूर्व्वविहारसमापत्तीः प्रत्युत्पन्नेन योजयति न
वियोजयति तथाहि प्रत्युत्पन्नमेव न समनुपश्यति। न शून्यताऽऽ-
निमित्ताऽप्रणिहितविमोचमुखानि पूर्व्वाऽन्तेन योजयति न वियो-
जयति तथाहि पूर्व्वाऽन्तमेव न समनुपश्यति। न शून्यताऽऽनिमित्ताऽ-
प्रणिहितविमोचमुखान्यपराऽन्तेन योजयति न वियोजयति तथा-
ह्यपराऽन्तमेव न समनुपश्यति। न शून्यताऽऽनिमित्ताऽप्रणिहित-
विमोचमुखानि प्रत्युत्पन्नेन योजयति न वियोजयति तथाहि
प्रत्युत्पन्नमेव न समनुपश्यति। नाऽभिज्ञाः पूर्व्वाऽन्तेन योजयति
न वियोजयति तथाहि पूर्व्वाऽन्तमेव न समनुपश्यति। नाऽभिज्ञा-
अपराऽन्तेन योजयति न वियोजयति तथाह्यपराऽन्तमेव न समनु-
पश्यति। नाऽभिज्ञाः प्रत्युत्पन्नेन योजयति न वियोजयति तथाहि
प्रत्युत्पन्नमेव न समनुपश्यति। न समाधीन् पूर्व्वाऽन्तेन योजयति
न वियोजयति तथाहि पूर्व्वाऽन्तमेव न समनुपश्यति। न समा-

धीनपरान्तेन योजयति न वियोजयति तथाह्यपरान्तमेव न समनुपश्यति। न समाधीन् प्रत्युत्पन्नेन योजयति न वियोजयति तथाहि प्रत्युत्पन्नमेव न समनुपश्यति। न धारणीमुखानि पूर्व्वान्तेन योजयति न वियोजयति तथाहि पूर्व्वान्तमेव न समनुपश्यति। न धारणीमुखान्यपरान्तेन योजयति न वियोजयति तथाह्यपरान्तमेव न समनुपश्यति। न धारणीमुखानि प्रत्युत्पन्नेन योजयति न वियोजयति तथाहि प्रत्युत्पन्नमेव न समनुपश्यति। न दशतथागतबलानि पूर्व्वान्तेन योजयति न वियोजयति तथाहि पूर्व्वान्तमेव न समनुपश्यति। न दशतथागतबलान्यपरान्तेन योजयति न वियोजयति तथाह्यपरान्तमेव न समनुपश्यति। न दशतथागतबलानि प्रत्युत्पन्नेन योजयति न वियोजयति तथाहि प्रत्युत्पन्नमेव न समनुपश्यति। न चत्वारि वैशारद्यानि पूर्व्वान्तेन योजयति न वियोजयति तथाहि पूर्व्वान्तमेव न समनुपश्यति। न चत्वारि वैशारद्यान्यपरान्तेन योजयति न वियोजयति तथाह्यपरान्तमेव न समनुपश्यति। न चत्वारि वैशारद्यानि प्रत्युत्पन्नेन योजयति न वियोजयति तथाहि प्रत्युत्पन्नमेव न समनुपश्यति। न चतस्रः प्रतिसम्विदः पूर्व्वान्तेन योजयति न वियोजयति तथाहि पूर्व्वान्तमेव न समनुपश्यति। न चतस्रः प्रतिसम्विदोऽपरान्तेन योजयति न वियोजयति तथाह्यपरान्तमेव न समनुपश्यति। न चतस्रः प्रतिसम्विदः प्रत्युत्पन्नेन योजयति न वियोजयति। तथाहि प्रत्युत्पन्नमेव न समनुपश्यति। न महामैत्रीं पूर्व्वान्तेन योजयति न वियोजयति तथाहि पूर्व्वान्तमेव न समनुपश्यति। न महा-

मैत्रीमपराऽन्तेन योजयति न वियोजयति तथाह्यपराऽन्तमेव न समनुपश्यति। न महामैत्रीं प्रत्युत्पन्नेन योजयति न वियोजयति तथाहि प्रत्युत्पन्नमेव न समनुपश्यति। न महाकरुणां पूर्व्वाऽन्तेन योजयति न वियोजयति तथाहि पूर्व्वाऽन्तमेव न समनुपश्यति। न महाकरुणामपराऽन्तेन योजयति न वियोजयति तथाह्यपराऽन्तमेव न समनुपश्यति। न महाकरुणां प्रत्युत्पन्नेन योजयति न वियोजयति तथाहि प्रत्युत्पन्नमेव न समनुपश्यति। नाऽष्टादशाऽऽवेणिकान् बुद्धधर्म्मान् पूर्व्वाऽन्तेन योजयति न वियोजयति तथाहि पूर्व्वाऽन्तमेव न समनुपश्यति। नाष्टादशाऽऽवेणिकान् बुद्धधर्म्मानपराऽन्तेन योजयति न वियोजयति तथाह्यपराऽन्तमेव न समनुपश्यति। नाष्टादशाऽऽवेणिकान् बुद्धधर्म्मान् प्रत्युत्पन्नेन योजयति न वियोजयति तथाहि प्रत्युत्पन्नमेव न समनुपश्यति। न स्रोत-आपत्तिफलं पूर्व्वाऽन्तेन योजयति न वियोजयति तथाहि पूर्व्वाऽन्तमेव न समनुपश्यति। न स्रोत-आपत्तिफलमपराऽन्तेन योजयति न वियोजयति तथाह्यपराऽन्तमेव न समनुपश्यति। न स्रोत-आपत्तिफलं प्रत्युत्पन्नेन योजयति न वियोजयति तथाहि प्रत्युत्पन्नमेव न समनुपश्यति। न सकृदागामिफलं पूर्व्वाऽन्तेन योजयति न वियोजयति तथाहि पूर्व्वाऽन्तमेव न समनुपश्यति। न सकृदागामिफलमपराऽन्तेन योजयति न वियोजयति तथाह्यपराऽन्तमेव न समनुपश्यति। न सकृदागामिफलं प्रत्युत्पन्नेन योजयति न वियोजयति तथाहि प्रत्युत्पन्नमेव न समनुपश्यति। नाऽनागामिफलं पूर्व्वाऽन्तेन योजयति न वियोजयति तथाहि पूर्व्वाऽन्तमेव न

समनुपश्यति। नाऽनागामिफलमपराऽन्तेन योजयति न वियोजयति तथाह्यपराऽन्तमेव न समनुपश्यति। नाऽनागामिफलं प्रत्युत्पन्नेन योजयति न वियोजयति तथाहि प्रत्युत्पन्नमेव न समनुपश्यति। नाऽर्हत्त्वं पूर्व्वाऽन्तेन योजयति न वियोजयति तथाहि पूर्व्वाऽन्तमेव न समनुपश्यति। नाऽर्हत्त्वमपराऽन्तेन योजयति न वियोजयति तथाह्यपराऽन्तमेव न समनुपश्यति। नाऽर्हत्त्वं प्रत्युत्पन्नेन योजयति न वियोजयति तथाहि प्रत्युत्पन्नमेव न समनुपश्यति। न प्रत्येकबोधिं पूर्व्वाऽन्तेन योजयति न वियोजयति तथाहि पूर्व्वाऽन्तमेव न समनुपश्यति। न प्रत्येकबोधिमपराऽन्तेन योजयति न वियोजयति तथाह्यपराऽन्तमेव न समनुपश्यति। न प्रत्येकबोधिं प्रत्युत्पन्नेन योजयति न वियोजयति तथाहि प्रत्युत्पन्नमेव न समनुपश्यति। न मार्गाऽऽकारज्ञतां पूर्व्वाऽन्तेन योजयति न वियोजयति तथाहि पूर्व्वाऽन्तमेव न समनुपश्यति। न मार्गाऽऽकारज्ञतामपराऽन्तेन योजयति न वियोजयति तथाह्यपराऽन्तमेव न समनुपश्यति। न मार्गाऽऽकारज्ञतां प्रत्युत्पन्नेन योजयति न वियोजयति तथाहि प्रत्युत्पन्नमेव न समनुपश्यति। न सर्व्वाऽऽकारज्ञतां पूर्व्वाऽन्तेन योजयति न वियोजयति तथाहि पूर्व्वाऽन्तमेव न समनुपश्यति। न सर्व्वाऽऽकारज्ञतामपराऽन्तेन योजयति न वियोजयति तथाह्यपराऽन्तमेव न समनुपश्यति। न सर्व्वाऽऽकारज्ञतां प्रत्युत्पन्नेन योजयति न वियोजयति तथाहि प्रत्युत्पन्नमेव न समनुपश्यति। एवं युज्यमानः शारद्वतीपुत्र बोधिसत्त्वोमहासत्त्वः प्रज्ञापारमितायां युक्तइति वक्तव्यः। पुनरपरं शारद्वतीपुत्र

बोधिसत्त्वोमहासत्त्वः प्रज्ञापारमितायां चरन् न पूर्व्वाऽन्तमपराऽन्तेन योजयति न वियोजयति। नाऽपराऽन्तं पूर्व्वाऽन्तेन योजयति न वियोजयति। न पूर्व्वाऽन्तमपराऽन्तं वा प्रत्युत्पन्नेन योजयति न वियोजयति अध्वसमानता*मुपादाय। एवं युक्तः शारद्वतीपुत्र बोधिसत्त्वोमहासत्त्वः प्रज्ञापारमितायां युक्तइति वक्तव्यः। पुनरपरं शारद्वतीपुत्र बोधिसत्त्वोमहासत्त्वः प्रज्ञापारमितायां चरन्नेवं युज्यते यथा युज्यमानेनां† सर्व्वज्ञतामतीतेन योजयति न वियोजयति तथाह्यतीतमेव न समनुपश्यति। असमनुपश्यन् कथं सर्व्वज्ञतामतीतेन योजयिष्यति वियोजयिष्यति वा। न सर्व्वज्ञतामनागतेन योजयति न वियोजयति तथाह्यनागतमेव न समनुपश्यति असमनुपश्यन् कथं सर्व्वज्ञतामनागतेन योजयिष्यति वियोजयिष्यति वा। न सर्व्वज्ञतां प्रत्युत्पन्नेन योजयति न वियोजयति तथाहि प्रत्युत्पन्नमेव न समनुपश्यति। असमनुपश्यन् कथं सर्व्वज्ञतां प्रत्युत्पन्नेन योजयिष्यति वियोजयिष्यति वा। एवञ्च्छारद्वतीपुत्र बोधिसत्त्वोमहासत्त्वः प्रज्ञापारमितातां युक्तइति वा वक्तव्यः। पुनरपरं शारद्वतीपुत्र बोधिसत्त्वोमहासत्त्वः प्रज्ञापारमितायां चरन् न रूपं सर्व्वज्ञतया योजयति न वियोजयति तथाहि रूपमेव न समनुपश्यति असमनुपश्यन् कथं रूपं सर्व्वज्ञतया योजयिष्यति वियोजयिष्यति वा। न वेदनां सर्व्वज्ञतया योजयति न वियोजयति तथाहि वेदनामेव न समनुपश्यति

---

* अध्वसमतामुपादाय, ख पुस्तके पाठः।

† युज्यमानेन इति पाठोऽयुक्तः प्रतिभाति।

असमनुपश्यन् कथं वेदनां सर्व्वज्ञतया योजयिष्यति वियो-जयिष्यति वा । न संज्ञां सर्व्वज्ञतया योजयति न वियोजयति तथाहि संज्ञामेव न समनुपश्यति । असमनुपश्यन् कथं संज्ञां सर्व्व-ज्ञतया योजयिष्यति वियोजयिष्यति वा । न संस्कारान् सर्व्वज्ञतया योजयति न वियोजयति तथाहि संस्कारानेव न समनुपश्यति । असमनुपश्यन् कथं संस्कारान् सर्व्वज्ञतया योजयि-ष्यति वियोजयिष्यति वा । न विज्ञानं सर्व्वज्ञतया योजयति न वियोजयति तथाहि विज्ञानमेव न समनुपश्यति । असमनुपश्यन् कथं विज्ञानं सर्व्वज्ञतया योजयिष्यति वियोजयिष्यति वा ।

पुनरपरं शारद्वतीपुत्र बोधिसत्त्वो महासत्त्वः प्रज्ञापारमितायां चरन् न चक्षुः सर्व्वज्ञतया योजयति न वियोजयति । तथाहि चक्षुरेव न समनुपश्यति । असमनुपश्यन् कथं चक्षुः सर्व्वज्ञतया योजयिष्यति वियोजयिष्यति वा । न श्रोत्रं सर्व्वज्ञतया योजयति न वियोजयति तथाहि श्रोत्रमेव न समनुपश्यति । असमनुपश्यन् कथं श्रोत्रं सर्व्वज्ञतया योजयिष्यति वियोजयिष्यति वा । न घ्राणं सर्व्वज्ञतया योजयति न वियोजयति तथाहि घ्राणमेव न समनु-पश्यति । असमनुपश्यन् कथं घ्राणं सर्व्वज्ञतया योजयिष्यति वियोजयिष्यति वा । न जिह्वां सर्व्वज्ञतया योजयति न वियो-जयति तथाहि जिह्वामेव न समनुपश्यति । असमनुपश्यन् कथं जिह्वां सर्व्वज्ञतया योजयिष्यति वियोजयिष्यति वा । न कायं सर्व्वज्ञतया योजयति न वियोजयति तथाहि कायमेव न समनु-पश्यति । असमनुपश्यन् कथं कायं सर्व्वज्ञतया योजयिष्यति

वियोजयिष्यति वा। न मनः सर्व्वज्ञतया योजयति न वियोजयति तथाहि मनएव न समनुपश्यति। असमनुपश्यन् कथं मनः सर्व्वज्ञतया योजयिष्यति वियोजयिष्यति वा।

पुनरपरं शारद्वतीपुत्र बोधिसत्त्वोमहासत्त्वः प्रज्ञापारमितायां चरन्रूपं सर्व्वज्ञतया योजयति न वियोजयति तथाहि रूपमेव न समनुपश्यति। असमनुपश्यन् कथं रूपं सर्व्वज्ञतया योजयिष्यति वियोजयिष्यति वा। न शब्दं सर्व्वज्ञतया योजयति न वियोजयति तथाहि शब्दमेव न समनुपश्यति। असमनुपश्यन् कथं शब्दं सर्व्वज्ञतया योजयिष्यति वियोजयिष्यति वा। न गन्धं सर्व्वज्ञतया योजयति न वियोजयति तथाहि गन्धमेव न समनुपश्यति। असमनुपश्यन् कथं गन्धं सर्व्वज्ञतया योजयिष्यति वियोजयिष्यति वा। न रसं सर्व्वज्ञतया योजयति न वियोजयति तथाहि रसमेव न समनुपश्यति। असमनुपश्यन् कथं रसं सर्व्वज्ञतया योजयिष्यति वियोजयिष्यति वा। न स्पर्शं सर्व्वज्ञतया योजयति न वियोजयति तथाहि स्पर्शमेव न समनुपश्यति। असमनुपश्यन् कथं स्पर्शं सर्व्वज्ञतया योजयिष्यति वियोजयिष्यति वा। न धर्म्मान् सर्व्वज्ञतया योजयति न वियोजयति तथाहि धर्म्मानेव न समनुपश्यति। असमनुपश्यन् कथं धर्म्मान् सर्व्वज्ञतया योजयिष्यति वियोजयिष्यति वा।

पुनरपरं शारद्वतीपुत्र बोधिसत्त्वोमहासत्त्वः प्रज्ञापारमितायां चरंश्चक्षुर्धातुं सर्व्वज्ञतया योजयति न वियोजयति तथाहि चक्षुर्धातुमेव न समनुपश्यति। असमनुपश्यन् कथं चक्षुर्धातुं सर्व्वज्ञतया योजयिष्यति वियोजयिष्यति वा। न रूपधातुं

सर्व्वज्ञतया योजयति न वियोजयति तथाहि रूपधातुमेव न समनुपश्यति। असमनुपश्यन् कथं रूपधातुं सर्व्वज्ञतया योजयिष्यति वियोजयिष्यति वा न चक्षुर्विज्ञानधातुं सर्व्वज्ञतया योजयति न वियोजयति तथाहि चक्षुर्विज्ञानधातुमेव न समनुपश्यति। असमनुपश्यन् कथं चक्षुर्विज्ञानधातुं सर्व्वज्ञतया योजयिष्यति वियोजयिष्यति वा। न श्रोत्रधातुं सर्व्वज्ञतया योजयति न वियोजयति तथाति श्रोत्रधातुमेव न समनुपश्यति। असमनुपश्यन् कथं श्रोत्रधातुं सर्व्वज्ञतया योजयिष्यति वियोजयिष्यति वा। न शब्दधातुं सर्व्वज्ञतया योजयति न वियोजयति तथाहि शब्दधातुमेव न समनुपश्यति। असमनुपश्यन् कथं शब्दधातुं सर्व्वज्ञतया योजयिष्यति वियोजयिष्यति वा। न श्रोत्रविज्ञानधातुं सर्व्वज्ञतया योजयति न वियोजयति तथाहि श्रोत्रविज्ञानधातुमेव न समनुपश्यति। असमनुपश्यन् कथं श्रोत्रविज्ञानधातुं सर्व्वज्ञतया योजयिष्यति वियोजयिष्यति वा। न घ्राणधातुं सर्व्वज्ञतया योजयति न वियोजयति तथाहि घ्राणधातुमेव न समनुपश्यति। असमनुपश्यन् कथं घ्राणधातुं सर्व्वज्ञतया योजयिष्यति वियोजयिष्यति वा। न गन्धधातुं सर्व्वज्ञतया योजयति न वियोजयति तथाहि गन्धधातुमेव न समनुपश्यति। असमनुपश्यन् कथं गन्धधातुं सर्व्वज्ञतया योजयिष्यति वियोजयिष्यति वा। न घ्राणविज्ञानधातुं सर्व्वज्ञतया योजयति न वियोजयति तथाहि घ्राणविज्ञानधातुमेव न समनुपश्यति। असमनुपश्यन् कथं घ्राणविज्ञानधातुं सर्व्वज्ञतया योजयिष्यति वियोजयिष्यति वा। न जिह्वाधातुं सर्व्वज्ञतया

योजयति न वियोजयति तथाहि जिह्वाधातुमेव न समनुपश्यति। असमनुपश्यन् कथं जिह्वाधातुं सर्व्वज्ञतया योजयिष्यति वियोजयिष्यति वा। न रसधातुं सर्व्वज्ञतया योजयति न वियोजयति तथाहि रसधातुमेव न समनुपश्यति। असमनुपश्यन् कथं रसधातुं सर्व्वज्ञतया योजयिष्यति वियोजयिष्यति वा। न जिह्वाविज्ञानधातुं सर्व्वज्ञतया योजयति न वियोजयति तथाहि जिह्वाविज्ञानधातुमेव न समनुपश्यति। असमनुपश्यन् कथं जिह्वाविज्ञानधातुं सर्व्वज्ञतया योजयिष्यति वियोजयिष्यति वा। न कायधातुं सर्व्वज्ञतया योजयति न वियोजयति तथाहि कायधातुमेव न समनुपश्यति। असमनुपश्यन् कथं कायधातुं सर्व्वज्ञतया योजयिष्यति वियोजयिष्यति वा। न स्प्रष्टव्यधातुं सर्व्वज्ञतया योजयति न वियोजयति तथाहि स्प्रष्टव्यधातुमेव न समनुपश्यति। असमनुपश्यन् कथं स्प्रष्टव्यधातुं सर्व्वज्ञतया योजयिष्यति वियोजयिष्यति वा। न कायविज्ञानधातुं सर्व्वज्ञतया योजयति न वियोजयति तथाहि कायविज्ञानधातुमेव न समनुपश्यति। असमनुपश्यन् कथं कायविज्ञानधातुं सर्व्वज्ञतया योजयिष्यति वियोजयिष्यति वा। न मनोधातुं सर्व्वज्ञतया योजयति न वियोजयति तथाहि मनोधातुमेव न समनुपश्यति। असमनुपश्यन् कथं मनोधातुं सर्व्वज्ञतया योजयिष्यति वियोजयिष्यति वा। न धर्म्मधातुं सर्व्वज्ञतया योजयति न वियोजयति तथाहि धर्म्मधातुमेव न समनुपश्यति। असमनुपश्यन् कथं धर्म्मधातुं सर्व्वज्ञतया योजयिष्यति वियोजयिष्यति वा। न मनोविज्ञानधातुं सर्व्वज्ञतया योजयति न वियोजयति

तथाहि मनोविज्ञानधातुमेव न समनुपश्यति। असमनुपश्यन् कथं मनोविज्ञानधातुं सर्व्वज्ञतया योजयिष्यति वियोजयिष्यति वा। न पृथिवीधातुं सर्व्वज्ञतया योजयति न वियोजयति तथाहि पृथिवी-धातुमेव न समनुपश्यति। असमनुपश्यन् कथं पृथिवीधातुं सर्व्वज्ञतया योजयिष्यति वियोजयिष्यति वा। नाऽब्धातुं सर्व्वज्ञतया योजयति न वियोजयति तथाह्यब्धातुमेव न समनुपश्यति। असमनुपश्यन् कथम-ब्धातुं सर्व्वज्ञतया योजयिष्यति वियोजयिष्यति वा। न तेजोधातुं सर्व्वज्ञतया योजयति न वियोजयति तथाहि तेजोधातुमेव न समनुपश्यति। असमनुपश्यन् कथं तेजोधातुं सर्व्वज्ञतया योजयिष्यति वियोजयिष्यति वा न वायुधातुं सर्व्वज्ञतया योजयति न वियो-जयति तथाहि वायुधातुमेव न समनुपश्यति। असमनुपश्यन् कथं वायुधातुं सर्व्वज्ञतया योजयिष्यति वियोजयिष्यति वा। नाऽऽकाश धातुं सर्व्वज्ञतया योजयति न वियोजयति तथाह्याकाशधातुमेव न समनुपश्यति। असमनुपश्यन् कथमाकाशधातुं सर्व्वज्ञतया योजयि-ष्यति वियोजयिष्यति वा। न विज्ञानधातुं सर्व्वज्ञतया योजयति न वियोजयति तथाहि विज्ञानधातुमेव न समनुपश्यति। असमनुपश्यन् कथं विज्ञानधातुं सर्व्वज्ञतया योजयिष्यति वियोजयिष्यति वा।

पुनरपरं शारद्वतीपुत्र बोधिसत्त्वो महासत्त्वः प्रज्ञापारमितायां चरन्नाऽविद्यां सर्व्वज्ञतया योजयति न वियोजयति तथाह्यविद्या-मेव न समनुपश्यति। असमनुपश्यन् कथमविद्यां सर्व्वज्ञतया योजयिष्यति वियोजयिष्यति वा। न संस्कारान् सर्व्वज्ञतया योजयति न वियोजयति तथाहि संस्कारानेव न समनुपश्यति

असमनुपश्यन् कथं विज्ञानं सर्व्वज्ञतया योजयिष्यति वियोजयिष्यति वा। न नामरूपं सर्व्वज्ञतया योजयति न वियोजयति तथाहि नामरूपमेव न समनुपश्यति। असमनुपश्यन् कथं नामरूपं सर्व्वज्ञतया योजयिष्यति वियोजयिष्यति वा। न षडायतनं सर्व्वज्ञतया योजयति न वियोजयति तथाहि षडायतनमेव न समनुपश्यति। असमनुपश्यन् कथं षडायतनं सर्व्वज्ञतया योजयिष्यति वियोजयिष्यति वा। न स्पर्शं सर्व्वज्ञतया योजयति न वियोजयति तथाहि स्पर्शमेव न समनुपश्यति। असमनुपश्यन् कथं स्पर्शं सर्व्वज्ञतया योजयिष्यति वियोजयिष्यति वा। न वेदनां सर्व्वज्ञतया योजयति न वियोजयति तथाहि वेदनामेव न समनुपश्यति। असमनुपश्यन् कथं वेदनां सर्व्वज्ञतया योजयिष्यति वियोजयिष्यति वा। न तृष्णां सर्व्वज्ञतया योजयति न वियोजयति तथाहि तृष्णामेव न समनुपश्यति। असमनुपश्यन् कथं तृष्णां सर्व्वज्ञतया योजयिष्यति वियोजयिष्यति वा। नोपादानं सर्व्वज्ञतया योजयति न वियोजयति तथाह्युपादानमेव न समनुपश्यति। असमनुपश्यन् कथमुपादानं सर्व्वज्ञतया योजयिष्यति वियोजयिष्यति वा। न भवं सर्व्वज्ञतया योजयति न वियोजयति तथाहि भवमेव न समनुपश्यति। असमनुपश्यन् कथं भवं सर्व्वज्ञतया योजयिष्यति वियोजयिष्यति वा। न जातिं सर्व्वज्ञतया योजयति न वियोजयति तथाहि जातिमेव न समनुपश्यति। असमनुपश्यन् कथं जातिं सर्व्वज्ञतया योजयिष्यति वियोजयिष्यति वा। न जरामरणं सर्व्वज्ञतया योजयति न वियोजयति तथाहि

जरामरणमेव न समनुपश्यति । असमनुपश्यन् कथं जरामरणं सर्व्वज्ञतया योजयिष्यति वियोजयिष्यति वा ।

पुनरपरं शारद्वतीपुत्र बोधिसत्त्वो महासत्त्वः प्रज्ञापारमितायां चरन् न दानपारमितां सर्व्वज्ञतया योजयति न वियोजयति तथाहि दानपारमितामेव न समनुपश्यति । असमनुपश्यन् कथं दानपारमितां सर्व्वज्ञतया योजयिष्यति वियोजयिष्यति वा । शीलपारमितां सर्व्वज्ञतया योजयति न वियोजयति तथाहि शीलपारमितामेव न समनुपश्यति । असमनुपश्यन् कथं शीलपारमितां सर्व्वज्ञतया योजयिष्यति वियोजयिष्यति वा । न क्षान्तिपारमितां सर्व्वज्ञतया योजयति न वियोजयति तथाहि क्षान्तिपारमितामेव न समनुपश्यति । असमनुपश्यन् कथं क्षान्तिपारमितां सर्व्वज्ञतया योजयिष्यति वियोजयिष्यति वा । न वीर्य्यपारमितां सर्व्वज्ञतया योजयति न वियोजयति तथाहि वीर्य्यपारमितामेव न समनुपश्यति । असमनुपश्यन् कथं वीर्य्यपारमितां सर्व्वज्ञतया योजयिष्यति वियोजयिष्यति वा । न ध्यानपारमितां सर्व्वज्ञतया योजयति न वियोजयति तथाहि ध्यानपारमितामेव न समनुपश्यति । असमनुपश्यन् कथं ध्यानपारमितां सर्व्वज्ञतया योजयिष्यति वियोजयिष्यति वा । न प्रज्ञापारमितां सर्व्वज्ञतया योजयति न वियोजयति तथाहि प्रज्ञापारमितामेव न समनुपश्यति । असमनुपश्यन् कथं प्रज्ञापारमितां सर्व्वज्ञतया योजयिष्यति वियोजयिष्यति वा । नाऽध्यात्मशून्यतां सर्व्वज्ञतया योजयति न वियोजयति तथाह्यध्यात्मशून्यतामेव न समनुपश्यति । असमनुपश्यन् कथमध्यात्मशून्यतां सर्व्वज्ञतया योज-

यिष्यति वियोजयिष्यति वा। न बहिर्द्धाशून्यतां सर्व्वज्ञतया योजयति न वियोजयति तथाहि बहिर्द्धाशून्यतामेव न समनुपश्यति। असमनुपश्यन् कथं बहिर्द्धाशून्यतां सर्व्वज्ञतया योजयिष्यति वियोजयिष्यति वा। नाऽध्यात्मबहिर्द्धाशून्यतां सर्व्वज्ञतया योजयति न वियोजयति तथाह्यध्यात्मबहिर्द्धाशून्यतामेव न समनुपश्यति। असमनुपश्यन् कथमध्यात्मबहिर्द्धाशून्यतां सर्व्वज्ञतया योजयिष्यति वियोजयिष्यति वा। न शून्यताशून्यतां सर्व्वज्ञतया योजयति न वियोजयति तथाहि शून्यताशून्यतामेव न समनुपश्यति। असमनुपश्यन् कथं शून्यताशून्यतां सर्व्वज्ञतया योजयिष्यति वियोजयिष्यति वा। न महाशून्यतां सर्व्वज्ञतया योजयति न वियोजयति तथाहि महाशून्यतामेव न समनुपश्यति। असमनुपश्यन् कथं महाशून्यतां सर्व्वज्ञतया योजयिष्यति वियोजयिष्यति वा। न परमार्थशून्यतां सर्व्वज्ञतया योजयति न वियोजयति तथाहि परमार्थशून्यतामेव न समनुपश्यति। असमनुपश्यन् कथं परमार्थशून्यतां सर्व्वज्ञतया योजयिष्यति वियोजयिष्यति वा। न संस्कृतशून्यतां सर्व्वज्ञतया योजयति न वियोजयति तथाहि संस्कृतशून्यतामेव न समनुपश्यति। असमनुपश्यन् कथं संस्कृतशून्यतां सर्व्वज्ञतया योजयिष्यति वियोजयिष्यति वा। नासंस्कृतशून्यतां सर्व्वज्ञतया योजयति न वियोजयति तथाह्यसंस्कृतशून्यतामेव न समनुपश्यति। असमनुपश्यन् कथमसंस्कृतशून्यतां सर्व्वज्ञतया योजयिष्यति वियोजयिष्यति वा। [illegible] सर्व्वज्ञतया योजयति न वियोजयति [illegible] न समनुपश्यति। असमनुपश्यन्

कथमत्यन्तशून्यतां सर्व्वज्ञतया योजयिष्यति वियोजयिष्यति वा। ना-
ऽनवराग्रशून्यतां सर्व्वज्ञतया योजयति न वियोजयति। तथाह्यनव-
राग्रशून्यतामेव न समनुपश्यति। असमनुपश्यन् कथमनवराग्रशून्यतां
सर्व्वज्ञतया योजयिष्यति वियोजयिष्यति वा। नाऽनवकारशून्यतां
सर्व्वज्ञतया योजयति न वियोजयति। तथाह्यनवकारशून्यतामेव न
समनुपश्यति। असमनुपश्यन् कथमनवकारशून्यतां सर्व्वज्ञतया योज-
यिष्यति वियोजयिष्यति वा। न प्रकृतिशून्यतां सर्व्वज्ञतया योज-
यति न वियोजयति। तथाहि प्रकृतिशून्यतामेव न समनुपश्यति।
असमनुपश्यन् कथं प्रकृतिशून्यतां सर्व्वज्ञतया योजयिष्यति वियो-
जयिष्यति वा। न सर्व्वधर्म्मशून्यतां सर्व्वज्ञतया योजयति न
वियोजयति। तथाहि सर्व्वधर्म्मशून्यतामेव न समनुपश्यति। असमनु-
पश्यन् कथं सर्व्वधर्म्मशून्यतां सर्व्वज्ञतया योजयिष्यति वियोजयि-
ष्यति वा। न स्वलक्षणशून्यतां सर्व्वज्ञतया योजयति न वियोज-
यति। तथाहि स्वलक्षणशून्यतामेव न समनुपश्यति। असमनुपश्यन्
कथं स्वलक्षणशून्यतां सर्व्वज्ञतया योजयिष्यति वियोजयिष्यति
वा। नाऽनुपलम्भशून्यतां सर्व्वज्ञतया योजयति न वियोजयति।
तथाह्यनुपलम्भशून्यतामेव न समनुपश्यति। असमनुपश्यन् कथम-
नुपलम्भशून्यतां सर्व्वज्ञतया योजयिष्यति वियोजयिष्यति वा।
नाऽभावशून्यतां सर्व्वज्ञतया योजयति न वियोजयति। तथाह्य-
भावशून्यतामेव न समनुपश्यति। असमनुपश्यन् कथमभावशून्यतां
सर्व्वज्ञतया योजयिष्यति वियोजयिष्यति वा। न स्वभावशून्यतां
सर्व्वज्ञतया योजयति न वियोजयति। तथाहि स्वभावशून्यतामेव

न समनुपश्यति। असमनुपश्यन् कथं स्वभावशून्यतां सर्व्वज्ञतया योजयिष्यति वियोजयिष्यति वा। नाऽभावस्वभावशून्यतां सर्व्वज्ञतया योजयति न वियोजयति। तथाह्यभावस्वभावशून्यतामेव न समनुपश्यति। असमनुपश्यन् कथमभावस्वभावशून्यतां सर्व्वज्ञतया योजयिष्यति वियोजयिष्यति वा। न स्मृत्युपस्थानानि सर्व्वज्ञतया योजयति न वियोजयति। तथाहि स्मृत्युपस्थानान्येव न समनुपश्यति। असमनुपश्यन् कथं स्मृत्युपस्थानानि सर्व्वज्ञतया योजयिष्यति वियोजयिष्यति वा। न सम्यक्प्रहाणानि सर्व्वज्ञतया योजयति न वियोजयति। तथाहि सम्यक्प्रहाणान्येव न समनुपश्यति। असमनुपश्यन् कथं सम्यक्प्रहाणानि सर्व्वज्ञतया योजयिष्यति वियोजयिष्यति वा। न ऋद्धिपादान् सर्व्वज्ञतया योजयति न वियोजयति। तथाह्यृद्धिपादानेव न समनुपश्यति। असमनुपश्यन् कथमृद्धिपादान् सर्व्वज्ञतया योजयिष्यति वियोजयिष्यति वा। नेन्द्रियाणि सर्व्वज्ञतया योजयति न वियोजयति। तथाहीन्द्रियाण्येव न समनुपश्यति। असमनुपश्यन् कथमिन्द्रियाणि सर्व्वज्ञतया योजयिष्यति वियोजयिष्यति वा। न बलानि सर्व्वज्ञतया योजयति न वियोजयति। तथाहि बलान्येव न समनुपश्यति। असमनुपश्यन् कथं बलानि सर्व्वज्ञतया योजयिष्यति वियोजयिष्यति वा। न बोध्यङ्गानि सर्व्वज्ञतया योजयति न वियोजयति। तथाहि बोध्यङ्गान्येव न समनुपश्यति। असमनुपश्यन् कथं बोध्यङ्गानि सर्व्वज्ञतया योजयिष्यति वियोजयिष्यति वा। न मार्गं सर्व्वज्ञतया योजयति न वियोजयति। तथाहि मार्गमेव न समनुपश्यति। असमनुपश्यन् कथं

र्गान् सर्व्वज्ञतया योजयिष्यति वियोजयिष्यति वा। नाऽऽर्य्य-सत्यानि सर्व्वज्ञतया योजयति न वियोजयति। तथाह्यार्य्यसत्यान्येव न समनुपश्यति। असमनुपश्यन् कथमार्य्यसत्यानि सर्व्वज्ञतया योज-यिष्यति वियोजयिष्यति वा। न ध्यानानि सर्व्वज्ञतया योजयति न वियोजयति। तथाहि ध्यानान्येव न समनुपश्यति। असमनुपश्यन् कथं ध्यानानि सर्व्वज्ञतया योजयिष्यति वियोजयिष्यति वा। नाऽप्रमाणानि सर्व्वज्ञतया योजयति न वियोजयति। तथाह्यप्रमा-णान्येव न समनुपश्यति। असमनुपश्यन् कथमप्रमाणानि सर्व्वज्ञतया योजयिष्यति वियोजयिष्यति वा। नाऽऽरूप्यसमापत्तीः सर्व्वज्ञतया योजयति न वियोजयति। तथाह्याऽऽरूप्यसमापत्तीरेव न समनु-पश्यति। असमनुपश्यन् कथमाऽऽरूप्यसमापत्तीः सर्व्वज्ञतया योज-यिष्यति वियोजयिष्यति वा। न विमोचान् सर्व्वज्ञतया योजयति न वियोजयति। तथाहि विमोचानेव न समनुपश्यति। असमनुपश्यन् कथं विमोचान् सर्व्वज्ञतया योजयिष्यति वियोजयिष्यति वा। नवाऽनुपूर्व्वविहारसमापत्तीः सर्व्वज्ञतया योजयति न वियोजयति। तथाहि नवाऽनुपूर्व्वविहारसमापत्तीरेव न समनुपश्यति। असमनु-पश्यन् कथं नवाऽनुपूर्व्वविहारसमापत्तीः सर्व्वज्ञतया योजयिष्यति वियोजयिष्यति वा। न शून्यतां सर्व्वज्ञतया योजयति न वियो-जयति। तथाहि शून्यतामेव न समनुपश्यति। असमनुपश्यन् कथं शून्यतां सर्व्वज्ञतया योजयिष्यति वियोजयिष्यति वा। नाऽऽनिमित्तं सर्व्वज्ञतया योजयति न वियोजयति। तथाह्यानिमित्तमेव न समनुपश्यति। असमनुपश्यन् कथमानिमित्तं सर्व्वज्ञतया योजयि-

ष्यति वियोजयिष्यति वा। नाऽप्रणिहितं सर्व्वज्ञतया योजयति न वियोजयति। तथाह्यप्रणिहितमेव न समनुपश्यति। असमनुपश्यन् कथमप्रणिहितं सर्व्वज्ञतया योजयिष्यति वियोजयिष्यति वा। नाऽभिज्ञां सर्व्वज्ञतया योजयति न वियोजयति। तथाह्यभिज्ञामेव न समनुपश्यति। असमनुपश्यन् कथमभिज्ञां सर्व्वज्ञतया योजयिष्यति वियोजयिष्यति वा। न समाधिं सर्व्वज्ञतया योजयति न वियोजयति। तथाहि समाधिमेव न समनुपश्यति। असमनुपश्यन् कथं समाधिं सर्व्वज्ञतया योजयिष्यति वियोजयिष्यति वा। न धारणीमुखानि सर्व्वज्ञतया योजयति न वियोजयति। तथाहि धारणीमुखान्येव न समनुपश्यति। असमनुपश्यन् कथं धारणीमुखानि सर्व्वज्ञतया योजयिष्यति वियोजयिष्यति वा। न दश तथागतबलानि सर्व्वज्ञतया योजयति न वियोजयति। तथाहि दश तथागतबलान्येव न समनुपश्यति। असमनुपश्यन् कथं दश तथागतबलानि सर्व्वज्ञतया योजयिष्यति वियोजयिष्यति वा। न वैशारद्यानि सर्व्वज्ञतया योजयति न वियोजयति। तथाहि वैशारद्यान्येव न समनुपश्यति। असमनुपश्यन् कथं वैशारद्यानि सर्व्वज्ञतया योजयिष्यति वियोजयिष्यति वा। न प्रतिसंविदः सर्व्वज्ञ- [illegible]

वियोजयिष्यति वा । न महाकरुणां सर्व्वज्ञतया योजयति न वियोजयति । तथाहि महाकरुणामेव न समनुपश्यति । असमनुपश्यन् कथं महाकरुणां सर्व्वज्ञतया योजयिष्यति वियोजयिष्यति वा । नाष्टादशाऽऽवेणिकान् बुद्धधर्मान् सर्व्वज्ञतया योजयति न वियोजयति । तथाह्यष्टादशाऽऽवेणिकान् बुद्धधर्मानेव न समनुपश्यति । असमनुपश्यन् कथमष्टादशाऽऽवेणिकान् बुद्धधर्मान् सर्व्वज्ञतया योजयिष्यति वियोजयिष्यति वा । एवं युज्यमानः शारद्वतीपुत्र, बोधिसत्त्वोमहासत्त्वः प्रज्ञापारमितायां युक्तइति वक्तव्यः ।

पुनरपरं शारद्वतीपुत्र, बोधिसत्त्वोमहासत्त्वः प्रज्ञापारमितायां चरन् न बुद्धं सर्व्वज्ञतया योजयति न वियोजयति, न सर्व्वज्ञतां बुद्धेन योजयति न वियोजयति । तथाहि बुद्धमेव न समनुपश्यति, सर्व्वज्ञतामेव न समनुपश्यति । असमनुपश्यन् कथं बुद्धं सर्व्वज्ञतया सर्व्वज्ञतां वा बुद्धेन योजयिष्यति वियोजयिष्यति वा । न बोधिं सर्व्वज्ञतया योजयति न वियोजयति, न बोध्या सर्व्वज्ञतां योजयति न वियोजयति । तथाहि बोधिमेव न समनुपश्यति सर्व्वज्ञतामेव न समनुपश्यति । असमनुपश्यन् कथं बोधिं सर्व्वज्ञतया सर्व्वज्ञतां वा बोध्या योजयिष्यति वियोजयिष्यति वा । एवं हि शारद्वतीपुत्र, बोधिसत्त्वोमहासत्त्वः प्रज्ञापारमितायां युक्तइति वक्तव्यः ।

पुनरपरं शारद्वतीपुत्र, बोधिसत्त्वोमहासत्त्वः प्रज्ञापारमितायां चरन् न रूपं भावइति योजयति न रूपमभावइति योजयति । न वेदनां भावइति योजयति न वेदनामभावइति योजयति । न संज्ञां भावइति योजयति न संज्ञामभावइति योजयति । न संस्कारान्

न तेजोधातुमभावइति योजयति। न वायुधातुं भावइति योजयति न वायुधातुमभावइति योजयति। नाऽऽकाशधातुं भावइति योजयति नाऽऽकाशधातुमभावइति योजयति। न विज्ञानधातुं भावइति योजयति न विज्ञानधातुमभावइति योजयति। नाऽविद्यां भावइति योजयति नाऽविद्यामभावइति योजयति। न संस्कारान् भावइति योजयति न संस्कारानभावइति योजयति। न विज्ञानं भावइति योजयति न विज्ञानमभावइति योजयति। न नामरूपं भावइति योजयति न नामरूपमभावइति योजयति। न षड़ायतनं भावइति योजयति न षड़ायतनमभावइति योजयति। न स्पर्शं भावइति योजयति न स्पर्शमभावइति योजयति। न वेदनां भावइति योजयति न वेदनामभावइति योजयति। न तृष्णां भावइति योजयति न तृष्णामभावइति योजयति। नोपादानं भावइति योजयति नोपादानमभावइति योजयति। न भवं भावइति योजयति न भवमभावइति योजयति। न जातिं भावइति योजयति न जातिमभावइति योजयति। न जरामरणं भावइति योजयति न जरामरणमभावइति योजयति। न दानपारमितां भावइति योजयति न दानपारमितामभावइति योजयति। न शीलपारमितां भावइति योजयति न शीलपारमितामभावइति योजयति। न क्षान्तिपारमितां भावइति योजयति न क्षान्तिपारमितामभावइति योजयति। न वीर्य्यपारमितां भावइति योजयति न वीर्य्यपारमितामभावइति योजयति। न ध्यानपारमितां भावइति योजयति न ध्यानपारमितामभावइति योजयति। न प्रज्ञापारमितां

भावइति योजयति न प्रज्ञापारमितामभावइति योजयति। नाऽध्यात्मशून्यतां भावइति योजयति नाऽध्यात्मशून्यतामभावइति योजयति। न वहिर्द्धाशून्यतां भाव इति योजयति न वहिर्द्धा-शून्यतामभावइति योजयति। नाऽध्यात्मवहिर्द्धाशून्यतां भावइति योजयति नाऽध्यात्मवहिर्द्धाशून्यतामभावइति योजयति। न शून्यताशून्यतां भावइति योजयति न शून्यताशून्यतामभावइति योजयति। न महाशून्यतां भावइति योजयति न महाशून्यता-मभावइति योजयति। न परमाऽर्थशून्यतां भावइति योजयति न परमाऽर्थशून्यतामभावइति योजयति। न संस्कृतशून्यतां भावइति योजयति न संस्कृतशून्यतामभावइति योजयति। नाऽसंस्कृतशून्यतां भावइति योजयति नाऽसंस्कृतशून्यतामभावइति योजयति। नाऽत्यन्तशून्यतां भावइति योजयति नाऽत्यन्तशून्यतामभावइति योजयति। नाऽनवराऽग्रशून्यतां भावइति योजयति नाऽनवराऽग्र-शून्यतामभावइति योजयति। नाऽनवकारशून्यतां भावइति योज-यति नाऽनवकारशून्यतामभावइति योजयति। न प्रकृतिशून्यतां भावइति योजयति न प्रकृतिशून्यतामभावइति योजयति। न सर्व्वधर्म्मशून्यतां भावइति योजयति न सर्व्वधर्म्मशून्यतामभावइति योजयति। न स्वलक्षणशून्यतां भावइति योजयति न स्वलक्षण-शून्यतामभावइति योजयति। नाऽनुपलम्भशून्यतां भावइति योज-यति नाऽनुपलम्भशून्यतामभावइति योजयति। नाऽभावशून्यतां भावइति योजयति नाऽभावशून्यतामभावइति योजयति। न स्वभावशून्यतां भावइति योजयति न स्वभावशून्यतामभावइति

योजयति। नाऽभावस्वभावशून्यतां भावइति योजयति नाऽभाव-स्वभावशून्यतामभावइति योजयति। न स्मृत्युपस्थानानि भावइति योजयति न स्मृत्युपस्थानान्यभावइति योजयति। न सम्यक्प्रहा-णानि भावइति योजयति। न सम्यक्प्रहाणान्यभावइति योजयति। न ऋद्धिपादान् भावइति योजयति। न ऋद्धिपादानभावइति योजयति। नेन्द्रियाणि भावइति योजयति नेन्द्रियाण्यभावइति योजयति। न बलानि भावइति योजयति न बलान्यभावइति योजयति। न बोध्यङ्गानि भावइति योजयति न बोध्यङ्गान्य-भावइति योजयति। नाऽप्रमाणानि भावइति योजयति नाऽप्रमा-णान्यभावइति योजयति। नाऽऽर्य्यसत्यानि भावइति योजयति नाऽऽर्य्यसत्यान्यभावइति योजयति। न ध्यानानि भावइति योज-यति न ध्यानान्यभावइति योजयति। न मार्गं भावइति योज-यति न मार्गमभावइति योजयति। नाऽऽरूप्यसमापत्तीर्भावइति योजयति नाऽऽरूप्यसमापत्तीरभावइति योजयति। नाऽष्टौ विमोक्षान् भावइति योजयति नाऽष्टौ विमोक्षानभावइति योज-यति। न नवाऽनुपूर्व्वविहारसमापत्तीर्भावइति योजयति न नवाऽनुपूर्व्वविहारसमापत्तीरभावइति योजयति। न शून्यतां भावइति योजयति न शून्यतामभावइति योजयति। नाऽऽनिमित्तं भावइति योजयति नाऽऽनिमित्तमभावइति योजयति। नाऽप्रणि-हितं भावइति योजयति नाऽप्रणिहितमभावइति योजयति। नाऽभिज्ञां भावइति योजयति नाऽभिज्ञामभाव इति योजयति। न समाधीन् भावइति योजयति न समाधीनभावइति योजयति।

न धारणीमुखानि भावयति योजयति न धारणीमुखान्यभावयति योजयति। न दशतथागतबलानि भावयति योजयति न दशतथागतबलान्यभावयति योजयति। न चत्वारि वैशारद्यानि भावयति योजयति न चत्वारि वैशारद्यान्यभावयति योजयति। न चतस्रः प्रतिसंविदो भावयति योजयति न चतस्रः प्रतिसंविदोऽभावयति योजयति। न महामैत्रीं भावयति योजयति न महामैत्रीमभावयति योजयति। न महाकरुणां भावयति योजयति न महाकरुणामभावयति योजयति। नाऽष्टादशाऽऽवेणिकान् बुद्धधर्मान् भावयति योजयति नाऽष्टादशाऽऽवेणिकान् बुद्धधर्मानभावयति योजयति। न स्रोत-आपत्तिफलं भावयति योजयति न स्रोत-आपत्तिफलमभावयति योजयति। न सकृदाऽऽगामिफलं भावयति योजयति न सकृदाऽऽगामिफलमभावयति योजयति। नाऽनागामिफलं भावयति योजयति नाऽनागामिफलमभावयति योजयति। नाऽर्हत्त्वं भावयति योजयति नाऽर्हत्त्वमभावयति योजयति। न प्रत्येकबोधिं भावयति योजयति न प्रत्येकबोधिमभावयति योजयति। न मार्गाऽऽकारज्ञतां भावयति योजयति न मार्गाऽऽकारज्ञतामभावयति योजयति। न सर्व्वाऽऽकारज्ञतां भावयति योजयति न सर्व्वाऽऽकारज्ञतामभावयति योजयति।

पुनरपरं शारद्वतीपुत्र बोधिसत्त्वो महासत्त्वः प्रज्ञापारमितायां चरन् न रूपं नित्यमिति योजयति न रूपमनित्यमिति योजयति। न वेदनां नित्यमिति योजयति न वेदनामनित्यमिति योजयति। न संज्ञां नित्यमिति योजयति न संज्ञामनित्यमिति

योजयति । न संस्कारान्नित्य इति योजयति न संस्कारानित्या इति योजयति । न विज्ञानं नित्यमिति योजयति न विज्ञानमनित्यमिति योजयति । न चक्षुर्नित्यमिति योजयति न चक्षुरनित्यमिति योजयति । न श्रोत्रं नित्यमिति योजयति न श्रोत्रमनित्यमिति योजयति । न घ्राणं नित्यमिति योजयति न घ्राणमनित्यमिति योजयति । न जिह्वां नित्यमिति योजयति न जिह्वामनित्यमिति योजयति । न कायं नित्यमिति योजयति न कायमनित्यमिति योजयति । न मनो नित्यमिति योजयति न मनोऽनित्यमिति योजयति । न रूपं नित्यमिति योजयति न रूपमनित्यमिति योजयति । न शब्दं नित्यमिति योजयति न शब्दमनित्यमिति योजयति । न गन्धं नित्यमिति योजयति न गन्धमनित्यमिति योजयति । न रसं नित्यमिति योजयति न रसमनित्यमिति योजयति । न स्पर्शं नित्यमिति योजयति न स्पर्शमनित्यमिति योजयति । न धर्मान्नित्यानिति योजयति न धर्मानित्यानिति योजयति । न चक्षुर्विज्ञानं नित्यमिति योजयति न चक्षुर्विज्ञानमनित्यमिति योजयति । न श्रोत्रविज्ञानं नित्यमिति योजयति न श्रोत्रविज्ञानमनित्यमिति योजयति । न घ्राणविज्ञानं नित्यमिति योजयति न घ्राणविज्ञानमनित्यमिति योजयति । न जिह्वाविज्ञानं [illegible]मिति योजयति न जिह्वाविज्ञानमनित्यमिति

-ग।ऽभिज्ञां भावद

न ममाधीन् भाव ’त्यानिति युक्तं प्रतिभाति ।

त्यानिति युक्तं प्रतिभाति ।

योजयति । न कायविज्ञानं नित्यमिति योजयति न कायविज्ञानमनित्यमिति योजयति । न मनोविज्ञानं नित्यमिति योजयति न मनोविज्ञानमनित्यमिति योजयति । न चक्षुः संस्पर्शं नित्यमिति योजयति न चक्षुः संस्पर्शमनित्यमिति योजयति । न श्रोत्रसंस्पर्शं नित्यमिति योजयति न श्रोत्रसंस्पर्शमनित्यमिति योजयति । न घ्राणसंस्पर्शं नित्यमिति योजयति न घ्राणसंस्पर्शमनित्यमिति योजयति । न जिह्वासंस्पर्शं नित्यमिति योजयति न जिह्वासंस्पर्शमनित्यमिति योजयति । न कायसंस्पर्शं नित्यमिति योजयति न कायसंस्पर्शमनित्यमिति योजयति । न मनः संस्पर्शं नित्यमिति योजयति न मनः संस्पर्शमनित्यमिति योजयति । न चक्षुः संस्पर्शप्रत्ययां वेदनां नित्य*मिति योजयति न चक्षुः संस्पर्शप्रत्ययां वेदनामनित्यमिति योजयति । न श्रोत्रसंस्पर्शप्रत्ययां वेदनां नित्यमिति योजयति न श्रोत्रसंस्पर्शप्रत्ययां वेदनामनित्यमिति योजयति । न घ्राणसंस्पर्शप्रत्ययां वेदनां नित्यमिति योजयति न घ्राणसंस्पर्शप्रत्ययां वेदनामनित्यमिति योजयति । न जिह्वासंस्पर्शप्रत्ययां वेदनां नित्यमिति योजयति न जिह्वासंस्पर्शप्रत्ययां वेदनामनित्यमिति योजयति । न कायसंस्पर्शप्रत्ययां वेदनां नित्यमिति योजयति न कायसंस्पर्शप्रत्ययां वेदनामनित्यमिति योजयति । न मनः संस्पर्शप्रत्ययां वेदनां नित्यमिति योजयति न मनः संस्पर्शप्रत्ययां वेदनामनित्यमिति योजयति । न पृथिवीधातुं नित्यइति योजयति न पृथिवीधातुमनित्यइति

* नित्या इति ख, ग, घ पुस्तके पाठः ।

योजयति। नाऽब्धातुं नित्यइति योजयति नाऽब्धातुमनित्यइति योजयति। न तेजोधातुं नित्यइति योजयति न तेजोधातुमनित्यइति योजयति। न वायुधातुं नित्यइति योजयति न वायुधातुमनित्यइति योजयति। नाऽऽकाशधातुं नित्यइति योजयति नाऽऽकाशधातुमनित्यइति योजयति। न विज्ञानधातुं नित्यइति योजयति न विज्ञानधातुमनित्यइति योजयति। नाऽविद्यां नित्यामिति योजयति नाऽविद्यामनित्यामिति योजयति। न संस्कारान् नित्यानिति* योजयति न संस्काराननित्यानिति योजयति। न विज्ञानं नित्यमिति योजयति न विज्ञानमनित्यमिति योजयति। न नामरूपं नित्यमिति योजयति न नामरूपमनित्यमिति योजयति। न षड़ायतनं नित्यमिति योजयति न षड़ायतनमनित्यमिति योजयति। न स्पर्शं नित्यमिति योजयति न स्पर्शमनित्यमिति योजयति। न वेदनां नित्यामिति योजयति न वेदनामनित्यामिति योजयति। न तृष्णां नित्यामिति योजयति न तृष्णामनित्यामिति योजयति। नोपादानं नित्यमिति योजयति नोपादानमनित्यमिति योजयति। न भवं नित्यमिति योजयति न भवमनित्यमिति योजयति। न जातिं नित्यामिति योजयति न जातिमनित्यामिति योजयति। न

* इति [illegible] नित्यादि शब्दस्य क्वचित् प्रथमान्तत्वं क्वचित् द्वितीयान्तत्वं एवं क्वचित् विशेष्यपदलिङ्गानुसारित्वं। क्वचित् क्लीबलिङ्गत्वं दृश्यते। [illegible] भातीति प्रतिभाति। एवं [illegible] [illegible] दृश्यते। [illegible]पाठो लिखितः।

जरामरणं नित्यमिति योजयति न जरामरणमनित्यमि
यति । न दानपारमितां नित्येति योजयति न दानपा
नित्येति योजयति । न शीलपारमितां नित्येति यो
शीलपारमितामनित्येति योजयति । न क्षान्तिपारमित
योजयति न क्षान्तिपारमितामनित्येति योजयति । न
मितां नित्येति योजयति न वीर्य्यपारमितामनित्येति य
न ध्यानपारमितां नित्येति योजयति न ध्यानपारमिता
योजयति । न प्रज्ञापारमितां नित्येति योजयति न
मितामनित्येति योजयति । नाऽध्यात्मशून्यतां नित्येति
नाऽध्यात्मशून्यतामनित्येति योजयति । न वहिर्द्धाशून्यत
योजयति न वहिर्द्धाशून्यतामनित्येति योजयति ।
वहिर्द्धाशून्यतां नित्येति योजयति नाऽध्यात्मवहिर्द्धा
नित्येति योजयति । न शून्यताशून्यतां नित्येति यो
शून्यताशून्यतामनित्येति योजयति । न महाशून्यतां
योजयति न महाशून्यतामनित्येति योजयति । न परमा
नित्येति योजयति न परमाऽर्थशून्यतामनित्येति योज
संस्कृतशून्यतां नित्येति योजयति न संस्कृतशून्यतामनित्ये
यति । नाऽसंस्कृतशून्यतां नित्येति योजयति नाऽसंस्कृत
नित्येति योजयति । नाऽत्यन्तशून्यतां नित्येति योजयति
शून्यतामनित्येति योजयति । नाऽनवराऽग्रशून्यतां नित्ये
यति नाऽनवराऽग्रशून्यतामनित्येति योजयति । नाऽनवक
नित्येति योजयति नाऽनवकारशून्यतामनित्येति योज

प्रकृतिशून्यतां नित्येति योजयति न प्रकृतिशून्यतामनित्येति योजयति। न सर्व्वधर्म्मशून्यतां नित्येति योजयति न सर्व्वधर्म्म-शून्यतामनित्येति योजयति। न स्वलक्षणशून्यतां नित्येति योज-यति न स्वलक्षणशून्यतामनित्येति योजयति। नाऽनुपलम्भशून्यतां नित्येति योजयति नाऽनुपलम्भशून्यतामनित्येति योजयति। नाऽभावशून्यतां नित्येति योजयति नाऽभावशून्यतामनित्येति योजयति। न स्वभावशून्यतां नित्येति योजयति न स्वभाव-शून्यतामनित्येति योजयति। नाऽभावस्वभावशून्यतां नित्येति योजयति नाऽभावस्वभावशून्यतामनित्येति योजयति। न स्मृत्युप-स्थानानि नित्यानीति योजयति न स्मृत्युपस्थानान्यनित्यानीति योजयति। न सम्यक्प्रहाणानि नित्यानीति योजयति न सम्यक्-प्रहाणान्यनित्यानीति योजयति। न ऋद्धिपादान् नित्यानिति योजयति न ऋद्धिपादाननित्यानिति योजयति। नेन्द्रियाणि नित्यानीति योजयति नेन्द्रियाण्यनित्यानीति योजयति। न बलानि नित्यानीति योजयति न बलान्यनित्यानीति योजयति। न बोध्यङ्गानि नित्यानीति योजयति न बोध्यङ्गान्यनित्यानीति योजयति। नाऽऽर्य्याऽष्टाऽङ्गमार्गं नित्यमिति योजयति नाऽऽर्य्याऽ-ष्टाऽङ्गमार्गमनित्यमिति योजयति। नाऽऽर्य्यसत्यानि नित्यानीति योजयति नाऽऽर्य्यसत्यान्यनित्यानीति योजयति। न ध्यानानि नित्यानीति योजयति न ध्यानान्यनित्यानीति योजयति। नाऽप्र-माणानि नित्यानीति योजयति नाऽप्रमाणान्यनित्यानीति योज-यति। नाऽऽरूप्यसमापत्तीर्नित्या इति योजयति नाऽऽरूप्यसमापत्ती-

Muntakhabu-t-Tawārīkh, (Text) Fasc. 1–15 @ /6/ each ... Rs. 5

Muntakhabu-t-Tawārīkh, (English) Vol. I, Fasc. 1–7; Vol. II, Fasc. 1–5 and 3 Indexes; Vol. III, Fasc. 1 @ /12/ each 12

Muntakhabu-l-Lubāb, (Text) Fasc. 1–19 @ /6/ each 7

Ma'āṣir-i-'Ālamgīrī, (Text), Fasc. 1–6 @ /6/ each 2

Nukhbatu-l-Fikr, (Text) Fasc. 1 0

Nizāmī's Khiradnāmah-i-Iskandari, (Text) Fasc. 1-2 @ /12/ each 1

Riyāẓu-s-Salāṭīn, (Text) Fasc. 1–5 @ /6/ each 1

Tabaqāt-i-Nāṣirī, (Text) Fasc. 1–5 @ /6/ each 1

Ditto (English) Fasc. 1–14 @ /12/ each 10

Ditto Index 1

Tārīkh-i-Fīrūz Shāhi of Ziyāu-d-dīn Barni (Text) Fasc. 1–7 @ /6/ each... 2

Tārīkh-i-Fīrūzshāhi, of Shams-i-Sirāj Aif, (Text) Fasc. 1–6 @ /6/ each... 2

Ten Ancient Arabic Poems, Fasc. 1-2 @ 1/8/ each 3

Wīs o Rāmīn, (Text) Fasc. 1–5 @ /6/ each 1

Zafarnāmah, Vol. I, Fasc. 1–9, Vol. II, Fasc. 1–8 @ /6/ each .. 6

Tuzuk-i-Jahāngīrī, (Eng.) Fasc. 1 0

ASIATIC SOCIETY'S PUBLICATIONS.

1. Asiatic Researches. Vol. VII, Vols. XI and XVII, and Vols. XIX and XX @ 10/ each 50
2. Proceedings of the Asiatic Society from 1865 to 1869 (incl.) @ /6/ per No.; and from 1870 to date @ /8/ per No.
3. Journal of the Asiatic Society for 1843 (12), 1844 (12), 1845 (12), 1846 (5), 1847 (12), 1848 (12), 1866 (7), 1867 (6), 1868 (6), 1869 (8), 1870 (8), 1871 (7), 1872 (8), 1873 (8) 1874 (8), 1875 (7), 1876 (7), 1877 (8), 1878 (8), 1879 (7), 1880 (8), 1881 (7), 1882, (6), 1883 (5), 1884 (6), 1885 (6), 1886 (8), 1887 (7), 1888 (7), 1889 (10), 1890 (11), 1891 (7), 1892 (8), 1893 (11), 1894 (8), 1895 (7), 1896 (8), 1897 (8), 1898 (8), 1899 (8), @ 1/8 per No. to Members and @ 2/ per No. to Non-Members

N. B.—The figures enclosed in brackets give the number of Nos. in each Volume.

4. Centenary Review of the Researches of the Society from 1784-1883 ... 3

   A sketch of the Turki language as spoken in Eastern Turkistan, by R. B. Shaw (Extra No., *J.A.S.B.*, 1878) 4

   Theobald's Catalogue of Reptiles in the Museum of the Asiatic Society (Extra No., *J.A.S.B.*, 1868) 2

   Catalogue of Mammals and Birds of Burmah, by E. Blyth (Extra No., *J.A.S.B.*, 1875) 4

   Introduction to the Maithili Language of North Bihar, by G. A. Grierson, Part II, Chrestomathy and Vocabulary (Extra No., *J.A.S.B.*, 1882) ... ... [illegible]
5. [illegible] 3
6. Catalogue of Fossil Vertebrata 3
7. Catalogue of the Library of the Asiatic Society, Bengal, by W. A. Bion 3
8. Iṣṭilāḥāt Commentary on the Hidāyah, Vols. II and IV, @ 16/ each... 32
9. [illegible], 162 pages with 17 plates, 4to. Part I ... 2
10. [illegible] 4
11. [illegible], Vols. III and IV, @ 20/ each 40
12. [illegible] Descriptions of New Indian Lepidoptera, Parts I-III, with [illegible] Plates, 4to. @ 6/ each 15
13. [illegible] 4
14. [illegible], by Csoma de Körös 10
15. [illegible] 8
16. [illegible] Parts I & II @ [illegible] 3
17. [illegible] the [illegible] ... ... [illegible]
18. [illegible] ... [illegible]

[illegible] ... [illegible]

[illegible] by Mr [illegible] ... [illegible]

[illegible] payable to the "Treasurer, [illegible]

BIBLIOTHECA INDICA:

A

COLLECTION OF ORIENTAL WORKS

PUBLISHED BY THE

ASIATIC SOCIETY OF BENGAL

NEW SERIES, No 1012.



शतसाहस्रिका प्रज्ञापारमिता ।

ÇATASAHASRIKA-PRAJÑA-PARAMITA

A

THEOLOGICAL AND PHILOSOPHICAL DISCOURSE

OF

BUDDHA WITH HIS DISCIPLES

(IN A HUNDRED-THOUSAND STANZAS).

EDITED BY

PRATAPACANDRA GHOṢA

PART I. FAS. 3.

CALCUTTA:

PRINTED AT THE BAPTIST MISSION PRESS,

AND PUBLISHED BY THE

ASIATIC SOCIETY, 57, PARK STREET,

1902.

LIST OF BOOKS FOR SALE

AT THE LIBRARY OF THE

ASIATIC SOCIETY OF BENGAL,

No. 57, PARK STREET, CALCUTTA,

AND OBTAINABLE FROM

THE SOCIETY'S AGENTS, MESSRS. LUZAC & CO.,
46, GREAT RUSSELL STREET, LONDON, W.C., AND MR. OTTO
HARRASSOWITZ, BOOKSELLER, LEIPZIG, GERMANY.

Complete copies of those works marked with an asterisk * cannot be supplied—some of the Fasciculi being out of stock.

BIBLIOTHECA INDICA.

Sanskrit Series.

Title	Rs.	As.
Advaita Brahma Siddhi, (Text) Fasc. 1–4 @ /6/ each ...	1	8
Advaitachinta Kaustubhe, Fasc. 1	0	6
*Agni Purāṇa, (Text) Fasc. 4–14 @ /6/ each	4	2
Aitarēya Brāhmaṇa, Vol. I, Fasc. 1–5 and Vol. II, Fasc. 1–5 Vol. III, Fasc. 1–5 Vol. IV, Fasc. 1–5 @ /6/	7	8
Aṇu Bhāṣyam, (Text) Fasc. 1–5 @ /6/ each	1	14
Aphorisms of Sāṇḍilya, (English) Fasc. 1	0	12
Aṣṭasāhasrikā Prajñāpāramitā, (Text) Fasc. 1–6 @ /6/ each ...	2	4
Açvavaidyaka, (Text) Fasc. 1–5 @ /6/ each	1	14
Avadāna Kalpalatā, (Sans. and Tibetan) Vol. I, Fasc. 1–5; Vol. II. Fasc. 1–5 @ 1, each	10	0
*Bhāmati, (Text) Fasc. 4–8 @ /6/ each	1	14
Bhatta Dīpikā Vol. I, Fasc. 1–3	1	2
Bṛhaddēvatā (Text) Fasc. 1–4 @ /6/ each	1	8
Bṛhaddharma Purāṇa, (Text) Fasc. 1–6 @ /6/ each	2	4
Bodhicaryavatara of Cantidevi, Fasc. 1	0	6
Catalogue of Sanskrit Books and MSS., Fasc. 1–3 @ 2/ each ...	6	0
Çatapatha Brāhmaṇa, Fasc. 1–5	1	14
*Caturvarga Chintāmaṇi (Text) Vols. II, 1–25; III. Part I, Fasc. 1–18. Part II, Fasc. 1–10 @ /6/ each	19	14
Çatasāhasrika-prajna-paramita Part I Fasc. 1–3 @ /6/	1	2
Çrautasūtra, (English) Fasc. 1–2	1	8
*Çrauta Sūtra of Āpastamba, (Text) Fasc. 4–10 @ /6/ each ...	4	14
Ditto Çāṅkhāyana, (Text) Vol. I, Fasc. 1–7; Vol. II, Fasc. 1–4, Vol. III, Fasc. 1–4 @ /6/ each	[illegible]	10
Çrī Bhāṣyam, (Text) Fasc. 1–3 @ /6/ each	1	2
[illegible] Vol. I, Fasc. 1–3	1	2
[illegible] (Text) Fasc. 1–4 @ /6/ each	1	[illegible]
[illegible] Fasc. 1–4	1	8
[illegible] (Text) Fasc. 1–6 @ /12/ each	4	8
[illegible] (English) Fasc. 1–14 @ /12/ each	10	[illegible]
[illegible] (Text) Fasc. 1–5 @ /6/ each	2	[illegible]
[illegible] (English) Fasc. 1–3 @ /12/ each	2	4
[illegible] Fasc. 1–11 @ /6/ each	4	[illegible]
[illegible] (Text) Fasc. 1–5 & Vol. II, Fasc. 1–4 @ /6/ each	[illegible]	14
[illegible] (Text) Fasc. 1–3 @ /6/ each	1	2
[illegible] @ /12/ each	[illegible]	[illegible]
*[illegible] (Text) @ /6/ each	[illegible]	14
[illegible] Fasc. 1–6 @ /6/	[illegible]	[illegible]
[illegible]	[illegible]	14
*[illegible] Vol. IV, Fasc. 1–6 @ /6/ each ...	[illegible]	[illegible]
[illegible]	[illegible]	[illegible]
[illegible]	[illegible]	[illegible]
[illegible] (Text) Vol. I, Fasc. 1–6; Vol. II, Fasc.		

ऽनित्या इति योजयति । नाऽष्टौ विमोक्षान्नित्यानिति योजयति नाऽष्टौ विमोक्षाननित्यानिति योजयति । न नवाऽनुपूर्वविहार-समापत्तीर्नित्या इति योजयति न नवाऽनुपूर्वविहारसमापत्तीर-नित्या इति योजयति । न शून्यतां नित्यामिति योजयति न शून्यतामनित्यामिति योजयति । नाऽऽनिमित्तं नित्यमिति योजयति नाऽऽनिमित्तमनित्यमिति योजयति । नाऽप्रणिहितं नित्यमिति योजयति नाऽप्रणिहितमनित्यमिति योजयति । नाऽभिज्ञा नित्या इति योजयति नाऽभिज्ञा अनित्या इति योजयति । न समाधीन्नित्यानिति योजयति । न समाधीननित्यानिति योजयति । न धारणीमुखानि नित्यानीति योजयति । न धारणी-मुखान्यनित्यानीति योजयति । न दशतथागतबलानि नित्यानीति योजयति । न दशतथागतबलान्यनित्यानीति योजयति । न चत्वारि वैशारद्यानि नित्यानीति योजयति । न चत्वारि वैशारद्या-न्यनित्यानीति योजयति । न चतस्रः प्रतिसंविदो नित्या इति योज-यति । न चतस्रः प्रतिसंविदोऽनित्या इति योजयति । न महामैत्रीं नित्यामिति योजयति । न महामैत्रीमनित्यामिति योजयति । न महाकरुणां नित्यामिति योजयति । न महाकरुणामनित्यामिति योजयति । नाऽष्टादशाऽऽवेणिकान् बुद्धधर्मान्नित्यानिति योजयति । नाऽष्टादशाऽऽवेणिकान् बुद्धधर्माननित्यानिति योजयति । न स्रोत-आपत्तिफलं नित्यमिति योजयति । न स्रोत-आपत्तिफलमनित्य-मिति योजयति । न सकृदागामिफलं नित्यमिति योजयति । न सकृदागामिफलमनित्यमिति योजयति । नाऽनागामिफलं नित्य-

मिति योजयति। नाऽनागामिफलमनित्यमिति योजयति। नाऽर्हत्त्वं नित्यमिति योजयति। नाऽर्हत्त्वमनित्यमिति योजयति। न प्रत्येकबोधिं नित्यमिति योजयति। न प्रत्येकबोधिमनित्यमिति योजयति। न मार्गाऽऽकारज्ञतां नित्यामिति योजयति। न मार्गाऽऽकारज्ञतामनित्यामिति योजयति। न सर्व्वाऽऽकारज्ञतां नित्यामिति योजयति। न सर्व्वाऽऽकारज्ञतामनित्यामिति योजयति। एवं चरन् शारद्वतीपुत्र बोधिसत्त्वोमहासत्त्वः प्रज्ञापारमितायां युक्त इति वक्तव्यः।

पुनरपरं शारद्वतीपुत्र बोधिसत्त्वोमहासत्त्वः प्रज्ञापारमितायां चरन् न रूपं सुखमिति योजयति। न रूपं दुःखमिति योजयति। न वेदनां सुखेति योजयति। न वेदनां दुःखेति योजयति। न संज्ञां सुखेति योजयति। न संज्ञां दुःखेति योजयति। न संस्कारान् सुखानिति योजयति। न संस्कारान् दुःखानिति योजयति। न विज्ञानं सुखमिति योजयति। नविज्ञानं दुःखमिति योजयति। न चक्षुः सुखमिति योजयति। न चक्षुर्दुःखमिति योजयति। न श्रोत्रं सुखमिति योजयति। न श्रोत्रं दुःखमिति योजयति। न घ्राणं सुखमिति योजयति। न घ्राणं दुःखमिति योजयति। न जिह्वां सुखमिति योजयति। न जिह्वां दुःखमिति योजयति। न कायं सुखमिति योजयति। न कायं दुःखमिति योजयति। न मनः सुखमिति योजयति। न मनोदुःखमिति योजयति। न रूपं सुखमिति योजयति। न रूपं दुःखमिति योजयति। न शब्दं सुखमिति योजयति। न शब्दं दुःखमिति योजयति। न गन्धं

सुखमिति योजयति । न शब्दं दुःखमिति योजयति । न रसं सुखमिति योजयति । न रसं दुःखमिति योजयति । न स्पर्शं सुखमिति योजयति । न स्पर्शं दुःखमिति योजयति । न धर्म्मान् सुखानिति योजयति । न धर्म्मान् दुःखानिति योजयति । न चक्षुर्विज्ञानं सुखमिति योजयति । न चक्षुर्विज्ञानं दुःखमिति योजयति । न श्रोत्रविज्ञानं सुखमिति योजयति । न श्रोत्रविज्ञानं दुःखमिति योजयति । न घ्राणविज्ञानं सुखमिति योजयति । न घ्राणविज्ञानं दुःखमिति योजयति । न जिह्वाविज्ञानं सुखमिति योजयति । न जिह्वाविज्ञानं दुःखमिति योजयति । न कायविज्ञानं सुखमिति योजयति । न कायविज्ञानं दुःखमिति योजयति । न मनोविज्ञानं सुखमिति योजयति । न मनोविज्ञानं दुःखमिति योजयति । न चक्षुःसंस्पर्शं सुखमिति योजयति । न चक्षुःसंस्पर्शं दुःखमिति योजयति । न श्रोत्रसंस्पर्शं सुखमिति योजयति । न श्रोत्रसंस्पर्शं दुःखमिति योजयति । न घ्राणसंस्पर्शं सुखमिति योजयति । न घ्राणसंस्पर्शं दुःखमिति योजयति । न जिह्वासंस्पर्शं सुखमिति योजयति । न जिह्वासंस्पर्शं दुःखमिति योजयति । न कायसंस्पर्शं सुखमिति योजयति । न कायसंस्पर्शं दुःखमिति योजयति । न मनःसंस्पर्शं सुखमिति योजयति । न मनःसंस्पर्शं दुःखमिति योजयति । न चक्षुःसंस्पर्शप्रत्ययां वेदनां सुखामिति योजयति । न चक्षुःसंस्पर्शप्रत्ययां वेदनां दुःखामिति योजयति । न श्रोत्रसंस्पर्शप्रत्ययां वेदनां सुखामिति योजयति । न श्रोत्रसंस्पर्शप्रत्ययां वेदनां दुःखामिति योजयति । न घ्राणसंस्पर्शप्रत्ययां वेदनां सुखामिति

योजयति। न घ्राणसंस्पर्शप्रत्ययां वेदनां दुःखामिति योजयति। न जिह्वासंस्पर्शप्रत्ययां वेदनां सुखामिति योजयति। न जिह्वासंस्पर्शप्रत्ययां वेदनां दुःखामिति योजयति। न कायसंस्पर्शप्रत्ययां वेदनां सुखामिति योजयति। न कायसंस्पर्शप्रत्ययां वेदनां दुःखामिति योजयति। न मनःसंस्पर्शप्रत्ययां वेदनां सुखामिति योजयति। न मनःसंस्पर्शप्रत्ययां वेदनां दुःखामिति योजयति। न पृथिवीधातुं सुखमिति योजयति। न पृथिवीधातुं दुःखमिति योजपति। नाऽब्धातुं सुखमिति योजयति। नाऽब्धातुं दुःखमिति योजयति। न तेजोधातुं सुखमिति योजयति। न तेजोधातुं दुःखमिति योजयति। न वायुधातुं सुखमिति योजयति। न वायुधातुं दुःखमिति योजयति। नाऽऽकाशधातुं सुखमिति योजयति। नाऽऽकाशधातुं दुःखमिति योजयति। न विज्ञानधातुं सुखमिति योजयति। न विज्ञानधातुं दुःखमिति योजयति। नाऽविद्यां सुखेति योजयति। नाऽविद्यां दुःखेति योजयति। न संस्कारान् सुखाइति योजयति। न संस्कारान् दुःखाइति योजयति। न विज्ञानं सुखमिति योजयति। न विज्ञानं दुःखमिति योजयति। न नामरूपं सुखमिति योजयति। न नामरूपं दुःखमिति योजयति। न षडायतनं सुखमिति योजयति। न षडायतनं दुःखमिति योजयति। न स्पर्शं सुखमिति योजयति। न स्पर्शं दुःखमिति योजयति। न वेदनां सुखेति योजयति। न वेदनां दुःखेति योजयति। न तृष्णां सुखेति योजयति। न तृष्णां दुःखेति योजयति। नोपादानं सुखमिति योजयति। नोपादानं दुःखमिति योजयति। न भवं सुख-

मिति योजयति। न भवं दुःखमिति योजयति। न जातिं सुखेति योजयति। न जातिं दुःखेति योजयति। न जरामरणं सुखमिति योजयति। न जरामरणं दुःखमिति योजयति। न दानपारमितां सुखेति योजयति। न दानपारमितां दुःखेति योजयति। न शीलपारमितां सुखेति योजयति। न शीलपारमितां दुःखेति योजयति। न क्षान्तिपारमितां सुखेति योजयति। न क्षान्तिपारमितां दुःखेति योजयति। न वीर्यपारमितां सुखेति योजयति। न वीर्यपारमितां दुःखेति योजयति। न ध्यानपारमितां सुखेति योजयति। न ध्यानपारमितां दुःखेति योजयति। न प्रज्ञापारमितां सुखेति योजयति। न प्रज्ञापारमितां दुःखेति योजयति। नाऽध्यात्मशून्यतां सुखेति योजयति। नाऽध्यात्मशून्यतां दुःखेति योजयति। न बहिर्धाशून्यतां सुखेति योजयति। न बहिर्धाशून्यतां दुःखेति योजयति। नाऽध्यात्मबहिर्धाशून्यतां सुखेति योजयति। नाऽध्यात्मबहिर्धाशून्यतां दुःखेति योजयति। न शून्यताशून्यतां सुखेति योजयति। न शून्यताशून्यतां दुःखेति योजयति। न महाशून्यतां सुखेति योजयति। न महाशून्यतां दुःखेति योजयति। न परमार्थशून्यतां सुखेति योजयति। न परमार्थशून्यतां दुःखेति योजयति। न संस्कृतशून्यतां सुखेति योजयति। न संस्कृतशून्यतां दुःखेति योजयति नाऽसंस्कृतशून्यतां सुखेति योजयति। नाऽसंस्कृतशून्यतां दुःखेति योजयति। नाऽत्यन्तशून्यतां सुखेति योजयति। नाऽत्यन्तशून्यतां दुःखेति योजयति। नाऽनवराग्रशून्यतां सुखेति योजयति। नाऽनवराग्रशून्यतां दुःखेति योजयति। नाऽनवकार-

शून्यतां सुखेति योजयति। नाऽनवकारशून्यतां दुःखेति योजयति। न प्रकृतिशून्यतां सुखेति योजयति। न प्रकृतिशून्यतां दुखेति योजयति। न सर्व्वधर्म्मशून्यतां सुखेति योजयति। न सर्व्वधर्म्मशून्यतां दुःखेति योजयति। न स्वलक्षणशून्यतां सुखेति योजयति। न स्वलक्षणशून्यतां दुःखेति योजयति। नाऽनुपलम्भशून्यतां सुखेति योजयति। नाऽनुपलम्भशून्यतां दुःखेति योजयति। नाऽभावशून्यतां सुखेति योजयति। नाऽभावशून्यतां दुःखेति योजयति। न स्वभाव-शून्यतां सुखेति योजयति। न स्वभावशून्यतां दुःखेति योजयति। नाऽभावस्वभावशून्यतां सुखेति योजयति। नाऽभावस्वभावशून्यतां दुखेति योजयति। न स्मृत्युपस्थानानि सुखानीति योजयति। न स्मृत्युपस्थानानि दुःखानीति योजयति। न सम्यक् प्रहाणानि सुखानीति योजयति। न सम्यक् प्रहाणानि दुःखानीति योजयति। न ऋद्धिपादान् सुखा इति योजयति। न ऋद्धिपादान् दुःखा इति योजयति। नेन्द्रियाणि सुखानीति योजयति। नेन्द्रियाणि दुःखा-नीति योजयति। न बलानि सुखानीति योजयति। न बलानि दुःखानीति योजयति। न बोध्यङ्गानि सुखानीति योजयति। न बोध्यङ्गानि दुःखानीति योजयति। नाऽर्य्याष्टाङ्गमार्गं सुखमिति योजयति। नाऽर्य्याष्टाङ्गमार्गं दुःखमिति योजयति। नाऽर्य्यसत्यानि सुखानीति योजयति। नाऽर्य्यसत्यानि दुःखानीति योजयति। न ध्यानानि सुखानीति योजयति। न ध्यानानि दुःखानीति योजयति। नाऽप्रमाणानि सुखानीति योजयति। नाऽप्रमाणानि दुःखानीति योजयति। नाऽऽरूप्यसमापत्तीः सुखा इति योजयति। नाऽऽरूप्य-

समापत्ती दुःखा इति योजयति । नाऽष्टौ विमोक्षान् सुखा इति योजयति । नाऽष्टौ विमोक्षान् दुःखा इति योजयति । न नवाऽनुपूर्वविहारसमापत्तीः सुखा इति योजयति । न नवाऽनुपूर्वविहारसमापत्तीः दुःखा इति योजयति । न शून्यतां सुखेति योजयति । न शून्यतां दुःखेति योजयति । नाऽऽनिमित्तं सुखमिति योजयति । नाऽऽनिमित्तं दुःखमिति योजयति । नाऽप्रणिहितं सुखमिति योजयति । नाऽप्रणिहितं दुःखमिति योजयति । नाऽभिज्ञां सुखेति योजयति । नाऽभिज्ञां दुःखेति योजयति । न समाधिं सुख इति योजयति । न समाधिं दुःख इति योजयति । न धारणीमुखानि सुखानीति योजयति । न धारणीमुखानि दुःखानीति योजयति । न दशतथागतबलानि सुखानीति योजयति । न दशतथागतबलानि दुःखानीति योजयति । न चत्वारि वैशारद्यानि सुखानीति योजयति । न चत्वारि वैशारद्यानि दुःखानीति योजयति । न चतस्रः प्रतिसंविदः सुखा इति योजयति । न चतस्रः प्रतिसंविदो दुःखा इति योजयति । न महामैत्रीं सुखेति योजयति । महामैत्रीं दुःखेति योजयति । न महाकरुणां सुखेति योजयति । न महाकरुणां दुःखेति योजयति । नाऽष्टादशाऽऽवेणिकान् बुद्धधर्मान् सुखा इति योजयति । नाऽष्टादशाऽऽवेणिकान् बुद्धधर्मान् दुःखा इति योजयति । न स्रोत-आपत्तिफलं सुखमिति योजयति । न स्रोत-आपत्तिफलं दुःखमिति योजयति । न सकृदागामिफलं सुखमिति योजयति । न सकृदागामिफलं दुःखमिति योजयति । नाऽनागामिफलं सुखमिति योजयति । नाऽनागामिफलं दुःखमिति

योजयति । नाध्यात्मं सुखमिति योजयति । नाध्यात्मं दुःखमिति योजयति । न बहिर्धापि सुखमिति योजयति । न बहिर्धापि दुःखमिति योजयति । न मायोऽऽकारज्ञाता सुखेति योजयति । न मायोऽऽकारज्ञाता दुःखेति योजयति । न मयोऽऽकारज्ञाता सुखेति योजयति । न मयोऽऽकारज्ञाता दुःखेति योजयति । एवं हि शारद्वतीपुत्र बोधिसत्त्वो महासत्त्वः प्रज्ञापारमितायां युक्त इति वक्तव्यः ।

पुनरपरं शारद्वतीपुत्र बोधिसत्त्वो महासत्त्वः प्रज्ञापारमितायां चरन् न रूपमात्मेति योजयति । न रूपमनात्मेति योजयति । न वेदनामात्मेति योजयति । न वेदनामनात्मेति योजयति । न संज्ञामात्मेति योजयति । न संज्ञामनात्मेति योजयति । न संस्कारानात्मान इति योजयति। न संस्काराननात्मानइति योजयति । न विज्ञानमात्मेति योजयति। न विज्ञानमनात्मेति योजयति । न चक्षुरात्मेति योजयति न चक्षुरनात्मेति योजयति । न श्रोत्रमात्मेति योजयति । न श्रोत्रमनात्मेति योजयति । न घ्राणमात्मेति योजयति न घ्राणमनात्मेति योजयति । न जिह्वामात्मेति योजयति। न जिह्वामनात्मेति योजयति। न कायमात्मेति योजयति । न कायमनात्मेति योजयति । न मनश्चात्मेति योजयति। न मनोऽनात्मेति योजयति। न रूपमात्मेति योजयति। न रूपमनात्मेति योजयति । न शब्दमात्मेति योजयति । न शब्दमनात्मेति योजयति । न गन्धमात्मेति योजयति । न गन्धमनात्मेति योजयति । न रसमात्मेति योजयति । न रसमनात्मेति

योजयति । न स्पर्शमात्मेति योजयति । न स्पर्शमनात्मेति योजयति । न धर्मानात्मान इति योजयति । न धर्माननात्मान इति योजयति । न चक्षुर्विज्ञानमात्मेति योजयति । न चक्षुर्विज्ञानमनात्मेति योजयति । न श्रोत्रविज्ञानमात्मेति योजयति । न श्रोत्रविज्ञानमनात्मेति योजयति । न घ्राणविज्ञानमात्मेति योजयति । न घ्राणविज्ञानमनात्मेति योजयति । न जिह्वाविज्ञानमात्मेति योजयति । न जिह्वाविज्ञानमनात्मेति योजयति । न कायविज्ञानमात्मेति योजयति । न कायविज्ञानमनात्मेति योजयति । न मनोविज्ञानमात्मेति योजयति । न मनोविज्ञानमनात्मेति योजयति । न चक्षुः संस्पर्शमात्मेति योजयति । न चक्षुः संस्पर्शमनात्मेति योजयति । न श्रोत्रसंस्पर्शमात्मेति योजयति । न श्रोत्रसंस्पर्शमनात्मेति योजयति । न घ्राणसंस्पर्शमात्मेति योजयति । न घ्राणसंस्पर्शमनात्मेति योजयति । न जिह्वासंस्पर्शमात्मेति योजयति । न जिह्वासंस्पर्शमनात्मेति योजयति । न कायसंस्पर्शमात्मेति योजयति न कायसंस्पर्शमनात्मेति योजयति । न मनः संस्पर्शमात्मेति योजयति न मनः संस्पर्शमनात्मेति योजयति । न चक्षुःसंस्पर्शप्रत्ययां वेदनामात्मेति योजयति न चक्षुःसंस्पर्शप्रत्ययां वेदनामनात्मेति योजयति । न श्रोत्रसंस्पर्शप्रत्ययां वेदनामात्मेति योजयति न श्रोत्रसंस्पर्शप्रत्ययां वेदनामनात्मेति योजयति । न घ्राणसंस्पर्शप्रत्ययां वेदनामात्मेति योजयति न घ्राणसंस्पर्शप्रत्ययां वेदनामनात्मेति योजयति । न जिह्वासंस्पर्शप्रत्ययां वेदनामात्मेति योजयति न जिह्वासंस्पर्शप्रत्ययां वेदनामनात्मेति योजयति । न कायसंस्पर्शप्रत्ययां

वेदनामात्मेति योजयति। न कायसंस्पर्शप्रत्ययां वेदनामनात्मेति योजयति। न मनःसंस्पर्शप्रत्ययां वेदनामात्मेति। योजयतिन मनःसंस्पर्शप्रत्ययां वेदनामनात्मेति योजयति। न पृथिवीधातुमात्मेति योजयति। न पृथिवीधातुमनात्मेति योजयति। नाऽब्धातुमात्मेति योजयति। नाऽब्धातुमनात्मेति योजयति। न तेजोधातुमात्मेति योजयति। न तेजोधातुमनात्मेति योजयति। न वायुधातुमात्मेति योजयति। न वायुधातुमनात्मेति योजयति। नाऽऽकाशधातुमात्मेति योजयति। नाऽऽकाशधातुमनात्मेति योजयति। न विज्ञानधातुमात्मेति योजयति। न विज्ञानधातुमनात्मेति योजयति। नाऽविद्यामात्मेति योजयति। नाऽविद्यामनात्मेति योजयति। न संस्कारानात्मानइति योजयति। न संस्कारानन्नात्मानइति योजयति। न विज्ञानमात्मेति योजयति। न विज्ञानमनात्मेति योजयति। न नामरूपमात्मेति योजयति। न नामरूपमनात्मेति योजयति। न षडायतनमात्मेति योजयति। न षडायतनमनात्मेति योजयति। न स्पर्शमात्मेति योजयति। न स्पर्शमनात्मेति योजयति। न वेदनामात्मेति योजयति। न वेदनामनात्मेति योजयति। न तृष्णामात्मेति योजयति। न तृष्णामनात्मेति योजयति। नोपादानमात्मेति योजयति। नोपादानमनात्मेति योजयति। न भवमात्मेति योजयति। न भवमनात्मेति योजयति। न जातिमात्मेति योजयति। न जातिमनात्मेति योजयति। न जरामरणमात्मेति योजयति। न जरामरणमनात्मेति योजयति। न दानपारमितामात्मेति योजयति। न दानपारमितामनात्मेति योजयति। न शीलपारमितामात्मेति

योजयति। न शीलपारमितामनात्मेति योजयति। न क्षान्तिपार-
मितामात्मेति योजयति। न क्षान्तिपारमितामनात्मेति योजयति।
न वीर्यपारमितामात्मेति योजयति। न वीर्यपारमितामनात्मेति
योजयति। न ध्यानपारमितामात्मेति योजयति। न ध्यानपारमिता-
मनात्मेति योजयति। न प्रज्ञापारमितामात्मेति योजयति। न
प्रज्ञापारमितामनात्मेति योजयति। नाऽध्यात्मशून्यतामात्मेति योज-
यति। नाऽध्यात्मशून्यतामनात्मेति योजयति। न बहिर्द्धाशून्यता-
मात्मेति योजयति। न बहिर्द्धाशून्यतामनात्मेति योजयति। नाऽ-
ध्यात्मबहिर्द्धाशून्यतामात्मेति योजयति। नाऽध्यात्मबहिर्द्धाशून्यताम-
नात्मेति योजयति। न शून्यताशून्यतामात्मेति योजयति। न शून्य-
ताशून्यतामनात्मेति योजयति। न महाशून्यतामात्मेति योजयति।
न महाशून्यतामनात्मेति योजयति। न परमार्थशून्यतामात्मेति
योजयति। न परमार्थशून्यतामनात्मेति योजयति। न संस्कृतशून्य-
तामात्मेति योजयति। न संस्कृतशून्यतामनात्मेति योजयति। ना-
ऽसंस्कृतशून्यतामात्मेति योजयति। नाऽसंस्कृतशून्यतामनात्मेति योज-
यति। नाऽत्यन्तशून्यतामात्मेति योजयति। नाऽत्यन्तशून्यतामनात्मेति
योजयति। नाऽनवराऽग्रशून्यतामात्मेति योजयति। नाऽनवराग्रशून्य-
तामनात्मेति योजयति। नाऽनवकारशून्यतामात्मेति योजयति।
नाऽनवकारशून्यतामनात्मेति योजयति। न प्रकृतिशून्यतामात्मेति
योजयति। न प्रकृतिशून्यतामनात्मेति योजयति। न सर्व्वधर्मशून्य-
तामात्मेति योजयति। न सर्व्वधर्मशून्यतामनात्मेति योजयति। न
स्वलक्षणशून्यतामात्मेति योजयति। न स्वलक्षणशून्यतामनात्मेति

योजयति। नाऽनुपलम्भशून्यतामात्मेति योजयति। नाऽनुपलम्भशून्यता-
मनात्मेति योजयति। नाऽभावशून्यतामात्मेति योजयति। नाऽ-
भावशून्यतामनात्मेति योजयति। न स्वभावशून्यतामात्मेति योज-
यति। न स्वभावशून्यतामनात्मेति योजयति। नाऽभावस्वभावशून्य-
तामात्मेति योजयति। नाऽभावस्वभावशून्यतामनात्मेति योजयति।
न स्मृत्युपस्थानान्यात्मानीति योजयति। न स्मृत्युपस्थानान्यनात्मा-
नीति योजयति। न सम्यक् प्रहाणान्यात्मानीति योजयति। न
सम्यक् प्रहाणान्यनात्मानीति योजयति। न ऋद्धिपादानात्मानइति
योजयति। न ऋद्धिपादाननात्मानइति योजयति। नेन्द्रियाण्या-
त्मानीति योजयति। नेन्द्रियाण्यनात्मानीति योजयति। न बला-
न्यात्मानीति योजयति। न बलान्यनात्मानीति योजयति। न बो-
ध्यङ्गान्यात्मानीति योजयति। न बोध्यङ्गान्यनात्मानीति योजयति।
नाऽर्य्याऽष्टाऽऽङ्गमार्गमात्मेति योजयति। नाऽर्य्याऽष्टाऽऽङ्गमार्गमनात्मेति
योजयति। नाऽऽर्य्यसत्यान्यात्मानीति योजयति। नाऽऽर्य्यसत्यान्यना-
त्मानीति योजयति। न ध्यानान्यात्मानीति योजयति। न ध्यानान्य-
नात्मानीति योजयति। नप्रमाणान्यात्मानीति योजयति। नप्रमा-
णान्यनात्मानीति योजयति। नाऽऽरूप्यसमापत्तीरात्मेति योजयति।
नाऽऽरूप्यसमापत्तीरनात्मेति योजयति। नाऽष्टौ विमोक्षानात्मान-
इति योजयति। नाऽष्टौ विमोक्षाननात्मानइति योजयति। न न-
वाऽनुपूर्व्वविहारसमापत्तीरात्मेति* योजयति। न नवाऽनुपूर्व्वविहार-

---

* आत्मानइति पाठोयुक्तः प्रतिभाति।

समापत्तीरनात्मेति* योजयति । न शून्यताऽऽनिमित्ताऽप्रणिहित-विमोचमुखान्यात्मानीति योजयति। न शून्यताऽऽनिमित्ताऽप्रणिहित-विमोचमुखान्यनात्मानीति योजयति। नाऽभिज्ञामात्मेति योजयति। नाऽभिज्ञामनात्मेति योजयति । न समाधीनात्मानदूति योजयति न समाधीननात्मानदूति योजयति । न धारणीमुखान्यात्मानीति योजयति। न धारणीमुखान्यनात्मानीति योजयति। न दृशतथागत-बलान्यात्मानीति योजयति। न दृशतथागतबलान्यनात्मानीति योज-यति । न वैशारद्यान्यात्मानीति योजयति। न वैशारद्यान्यनात्मा-नीति योजयति। न प्रतिसम्विद्ग्रात्मानदूति योजयति। न प्रति-सम्विदोऽनात्मानदूति योजयति । न महामैत्रीमात्मेति योजयति। न महामैत्रीमनात्मेति योजयति । न महाकरुणामात्मेति योज-यति । न महाकरुणामनात्मेति योजयति । नाऽष्टादशाऽऽवेणिक बुद्धधर्म्मानात्मानदूति योजयति। नाऽष्टादशाऽऽवेणिकबुद्धधर्म्माननात्मानदूति योजयति । न स्रोतआपत्तिफलमात्मेति योजयति। न स्रोतआपत्तिफलमनात्मेति योजयति । न सकृदागामिफलमात्मेति योजयति। न सकृदागामिफलमनात्मेति योजयति। नाऽनागामि-फलमात्मेति योजयति। नाऽनागामिफलमनात्मेति योजयति। ना-ऽर्हत्त्वमात्मेति योजयति। नाऽर्हत्त्वमनात्मेति योजयति। न प्रत्येक-बोधिमात्मेति योजयति। न प्रत्येकबोधिमनात्मेति योजयति। न मार्गाऽऽकारज्ञतामात्मेति योजयति। न मार्गाऽऽकारज्ञतामनात्मेति योजयति। न सर्व्वाऽऽकारज्ञतामात्मेति योजयति। न सर्व्वाऽऽकार-

* अनात्मानदूति युक्तः प्रतिभाति ।

ज्ञानमशान्तेति योजयति। एवं चरन् शारद्वतीपुत्र बोधिसत्त्वो-महासत्त्वः प्रज्ञापारमितायां युक्त इति वक्तव्यः।

पुनरपरं शारद्वतीपुत्र बोधिसत्त्वो महासत्त्वः प्रज्ञापारमितायां चरन् न रूपं शान्तमिति योजयति। न रूपमशान्तमिति योजयति। न वेदनां शान्तेति योजयति। न वेदनामशान्तेति योजयति। न संज्ञां शान्तेति योजयति। न संज्ञामशान्तेति योजयति। न संस्कारान् शान्ता इति योजयति। न संस्कारानशान्ता इति योजयति। न विज्ञानं शान्तमिति योजयति। न विज्ञानमशान्तमिति योजयति। न चक्षुः शान्तमिति योजयति। न चक्षुरशान्तमिति योजयति। न श्रोत्रं शान्तमिति योजयति। न श्रोत्रमशान्तमिति योजयति। न घ्राणं शान्तमिति योजयति। न घ्राणमशान्तमिति योजयति। न जिह्वां शान्तेति योजयति। न जिह्वामशान्तेति योजयति। न कायं शान्तमिति योजयति। न कायमशान्तमिति* योजयति। न मनः शान्तमिति योजयति। न मनोऽशान्तमिति योजयति। न रूपं शान्तमिति योजयति। न रूपमशान्तमिति योजयति। न शब्दं शान्तमिति योजयति। न शब्दमशान्तमिति योजयति। न गन्धं शान्तमिति योजयति। न गन्धमशान्तमिति योजयति। न रसं शान्तमिति योजयति। न रसमशान्तमिति योजयति। न स्पर्शं शान्तमिति योजयति। न स्पर्शमशान्तमिति योजयति। न धर्म्मान् शान्ता इति योजयति। न धर्म्मानशान्ता इति योजयति। न चक्षुर्व्विज्ञानं शान्तमिति योजयति। न चक्षुर्व्विज्ञान-

* अशान्तेति पाठः क।

शान्तमिति योजयति। न श्रोत्रविज्ञानं शान्तमिति योजयति। न श्रोत्रविज्ञानमशान्तमिति योजयति। न घ्राणविज्ञानं शान्तमिति योजयति। न घ्राणविज्ञानमशान्तमिति योजयति। न जिह्वाविज्ञानं शान्तमिति योजयति। न जिह्वाविज्ञानमशान्तमिति योजयति। न कायविज्ञानं शान्तमिति योजयति। न कायविज्ञानमशान्तमिति योजयति। न मनोविज्ञानं शान्तमिति योजयति। न मनोविज्ञानमशान्तमिति योजयति। न चक्षुःसंस्पर्शं शान्तमिति योजयति। न चक्षुःसंस्पर्शमशान्तमिति योजयति। न श्रोत्रसंस्पर्शं शान्तमिति योजयति। न श्रोत्रसंस्पर्शमशान्तमिति योजयति। न घ्राणसंस्पर्शं शान्तमिति योजयति। न घ्राणसंस्पर्शमशान्तमिति योजयति। न जिह्वासंस्पर्शं शान्तमिति योजयति। न जिह्वासंस्पर्शमशान्तमिति योजयति। न कायसंस्पर्शं शान्तमिति योजयति। न कायसंस्पर्शमशान्तमिति योजयति। न मनः संस्पर्शं शान्तमिति योजयति। न मनःसंस्पर्शमशान्तमिति योजयति। न चक्षुःसंस्पर्शप्रत्ययां[1] वेदनां शान्तेति योजयति। न चक्षुःसंस्पर्शप्रत्ययां वेदनामशान्तेति योजयति। न श्रोत्रसंस्पर्शप्रत्ययां वेदनां शान्तेति योजयति। न श्रोत्रसंस्पर्शप्रत्ययां वेदनामशान्तेति योजयति। न घ्राणसंस्पर्शप्रत्ययां वेदनां शान्तेति योजयति। न घ्राणसंस्पर्शप्रत्ययां वेदनामशान्तेति योजयति। न जिह्वासंस्पर्शप्रत्ययां वेदनां शान्तेति योजयति। न जिह्वासंस्पर्शप्रत्ययां वेदनामशान्तेति योजयति। न कायसंस्पर्शप्रत्ययां

(१) कार्य्यं प्रत्ययते गच्छतीति प्रत्ययः कारणमितिरत्नप्रभा। प्रत्ययोऽधीनशपथज्ञानविश्वासहेतुष्वित्यमरः।

वेदनां शान्तेति योजयति । न कायसंस्पर्शप्रत्ययां वेदनामशान्तेति योजयति । न मनः संस्पर्शप्रत्ययां वेदनां शान्तेति योजयति । न मनः संस्पर्शप्रत्ययां वेदनामशान्तेति योजयति । न पृथिवीधातुं शान्ते*ति योजयति । न पृथिवीधातुमशान्तेति योजयति । नाऽब्धातुं शान्तेति योजयति । नाऽब्धातुमशान्तेति योजयति । न तेजोधातुं शान्तेति योजयति । न तेजोधातुमशान्तेति योजयति । न वायुधातुं शान्तेति योजयति । न वायुधातुमशान्तेति योजयति । नाऽऽकाशधातुं शान्तइति योजयति । नाऽऽकाशधातुमशान्तइति योजयति । न विज्ञानधातुं शान्तइति योजयति । न विज्ञानधातुमशान्तइति योजयति । नाऽविद्यां(१) शान्तेति योजयति । नाऽविद्यामशान्तेति योजयति । न संस्कारान् शान्ताइति योजयति । न संस्कारानशान्ताइति योजयति । न विज्ञानं शान्तमिति योजयति ।

* शान्तेति च पाठः ।

(१) क्षणिकेषु स्थिरत्वबुद्धिरविद्या । ततोरागद्वेषमोहाः संस्काराभवन्ति । तेभ्योगर्भस्थस्याद्यं विज्ञानमुत्पद्यते । तस्माच्चालयविज्ञानात् पृथिव्यादि चतुष्टयं नामाश्रयत्वान्नाम भवति । ततो रूपं सितासितात्मकं शुक्रशोणितं निष्पद्यते गर्भस्यकललबुद्बुदाऽवस्था नामरूपपदार्थइति निष्कर्षः । विज्ञानं पृथिव्यादिचतुष्टयं रूपञ्चेति षट् आयतनानियस्येन्द्रियजातस्य तत् षडायतनं । नामरूपेन्द्रियाणां मिथः संयोगः स्पर्शः । ततः सुखादिकावेदना, तया पुनर्विषयतृष्णा, तया प्रवृत्तिरुपादानं । तेन भवत्यस्माज्जन्मेति भवोधर्म्मादिस्ततोजातिर्देहजन्म पञ्चस्कन्धसमुदायइति यावत् जातानां स्कन्धानां परिपाकोजरास्कन्धः नाशोमरणम् । इति शारीरकभाष्य टीका, रत्नप्रभा ।

न विज्ञानमशान्तमिति योजयति । न नामरूपं शान्तमिति योजयति न नामरूपमशान्तमिति योजयति । न षडायतनं शान्तमिति योजयति न षडायतनमशान्तमिति योजयति । न स्पर्शं शान्तमिति योजयति न स्पर्शमशान्तमिति योजयति । न वेदनां शान्तेति योजयति न वेदनामशान्तेति योजयति । न तृष्णां शान्तेति योजयति न तृष्णामशान्तेति योजयति । नोपादानं शान्तमिति* योजयति नोपादानमशान्तमिति† योजयति । न भवं शान्तमिति योजयति न भवमशान्तमिति योजयति । न जातिं शान्तेति योजयति न जातिमशान्तेति योजयति । न जरामरणं शान्तमिति योजयति न जरामरणमशान्तमिति योजयति । न दानपारमितां शान्तेति योजयति न दानपारमितामशान्तेति योजयति । न शीलपारमितां शान्तेति योजयति न शीलपारमितामशान्तेति योजयति । न क्षान्तिपारमितां शान्तेति योजयति न क्षान्तिपारमितामशान्तेति योजयति न वीर्य्यपारमितां शान्तेति योजयति न वीर्य्यपारमितामशान्तेति योजयति । न ध्यानपारमितां शान्तेति योजयति । न ध्यानपारमितामशान्तेति योजयति । न प्रज्ञापारमितां शान्तेति योजयति । न प्रज्ञापारमितामशान्तेति योज-

---

* अशान्तेति घ पुस्तके पाठः। एवं परत्र शान्तेति अशान्तेति पु० नपु० सकयोर्विशेष्यत्वेपि प्रयोगः। पुस्तकचतुष्टये दृश्यते ।

† शान्त इति ख, ग, घ पुस्तके पाठः । एवं परत्र धातुशब्द विशेष्य स्थले शान्त इति अशान्त इति सर्व्वत्र पाठः ख, ग, घ, पुस्तकेषु दृश्यते ।

यति। नाऽध्यात्मशून्यतां शान्तेति योजयति। नाऽध्यात्मशून्यता-मशान्तेति योजयति। न वहिर्द्धाशून्यतां शान्तेति योजयति। न वहिर्द्धाशून्यतामशान्तेति योजयति। नाऽध्यात्मवहिर्द्धाशून्यतां शान्तेति योजयति। नाऽध्यात्मवहिर्द्धाशून्यतामशान्तेति योजयति। न शून्यताशून्यतां शान्तेति योजयति। न शून्यताशून्यताम-शान्तेति योजयति। न महाशून्यतां शान्तेति योजयति। न महाशून्यतामशान्तेति योजयति। न परमार्थशून्यतां शान्तेति योजयति। न परमार्थशून्यतामशान्तेति योजयति। न संस्कृत-शून्यतां शान्तेति योजयति। न संस्कृतशून्यतामशान्तेति योज-यति। नाऽसंस्कृतशून्यतां शान्तेति योजयति। नाऽसंस्कृतशून्यताम-शान्तेति योजयति। नाऽत्यन्तशून्यतां शान्तेति योजयति। नाऽत्य-न्तशून्यतामशान्तेति योजयति। नाऽनवराऽग्रशून्यतां शान्तेति योज-यति। नाऽनवराऽग्रशून्यतामशान्तेति योजयति। नाऽनवकारशून्यतां शान्तेति योजयति। नाऽनवकारशून्यतामशान्तेति योजयति। न प्रकृतिशून्यतां शान्तेति योजयति। न प्रकृतिशून्यतामशान्तेति योज-यति। न सर्व्वधर्म्मशून्यतां शान्तेति योजयति। न सर्व्वधर्म्मशून्यता-मशान्तेति योजयति। न स्वलक्षणशून्यतां शान्तेति योजयति न। स्वलक्षणशून्यतामशान्तेति योजयति। नाऽनुपलम्भशून्यतां शान्तेति योजयति। नाऽनुपलम्भशून्यतामशान्तेति योजयति। नाऽभावशून्यतां शान्तेति योजयति। नाऽभावशून्यतामशान्तेति योजयति। न स्वभावशून्यतां शान्तेति योजयति। न स्वभावशून्यतामशान्तेति योजयति। नाऽभावस्वभावशून्यतां शान्तेति योजयति। नाऽभावस्व-

[illegible]न्यशान्तानीति योजयति । न स्मृत्युपस्थानानि शान्तानीति योजयति । न स्मृत्युपस्थानान्यशान्तानीति योजयति । न सम्यक्प्रहाणानि शान्तानीति । योजयति न सम्यक्प्रहाणान्यशान्तानीति योजयति । न ऋद्धिपादान् शान्ताइति योजयति । न ऋद्धिपादानशान्ताइति योजयति । नेन्द्रियाणि शान्तानीति योजयति । नेन्द्रियाण्यशान्तानीति योजयति । न बलानि शान्तानीति योजयति । न बलान्यशान्तानीति योजयति । न बोध्यङ्गानि शान्तानीति योजयति । न बोध्यङ्गान्यशान्तानीति योजयति । नाऽऽर्य्याऽष्टाङ्गमार्गं शान्त*मिति योजयति । नाऽऽर्य्याऽष्टाङ्गमार्गमशान्तमिति योजयति । न ध्यानानि शान्तानीति योजयति । न ध्यानान्यशान्तानीति योजयति । नाऽप्रमाणानि शान्तानीति योजयति । नाऽऽप्रमाणान्यशान्तानीति योजयति । नाऽऽरूप्यसमापत्तीः शान्ताइति योजयति । नाऽऽरूप्यसमापत्तीरशान्ताइति योजयति । न विमोक्षान् शान्ताइति योजयति । न विमोक्षानशान्ताइति योजयति । ननवाऽनुपूर्व्वविहारसमापत्तीः शान्ताइति योजयति । न नावऽनुपूर्व्वविहारसमापत्तीरशान्ताइति योजयति । न शून्यताऽऽनिमित्ताऽप्रणिहितविमोक्षमुखानि शान्तानीति योजयति । न शून्यताऽऽनिमित्ताऽप्रणिहितविमोक्षमुखान्यशान्तानीति योजयति । नाऽभिज्ञाः शान्ताइति योज-

---

* नाऽऽर्य्यसत्यानि शान्तानीति योजयति नाऽऽर्य्यसत्यान्यशान्तानीति योजयति घ पाठः ।

† शान्ताइति ख, ग, घ, पुस्तकेषु पाठः

‡ नाऽनुपूर्व्वेति घ पाठः

यति । नाऽभिज्ञाश्शान्ता इति योजयति । न समाधीन् शान्ता इति योजयति । न समाधीनशान्ता इति योजयति । न धारणीमुखानि शान्तानीति योजयति । न धारणीमुखान्यशान्तानीति योजयति । न दशतथागतबलानि शान्तानीति योजयति । न दशतथागतबला-न्यशान्तानीति योजयति । न चत्वारि वैशारद्यानि शान्तानीति योजयति । न चत्वारि वैशारद्यान्यशान्तानीति योजयति । न चतस्रः प्रतिसंविदः शान्ता इति योजयति । न चतस्रः प्रतिसंविदोऽशान्ता इति योजयति । न महामैत्रीं शान्तेति योजयति । न महामैत्री-मशान्तेति योजयति । न महाकरुणां शान्तेति योजयति । न महा-करुणामशान्तेति योजयति । नाऽष्टादशाऽऽवेणिकान् बुद्धधर्मान् शान्ता इति योजयति । नाऽष्टादशाऽऽवेणिकान् बुद्धधर्मानशान्ता इति योजयति । न स्रोत-आपत्तिफलं शान्तमिति योजयति । न स्रोत-आपत्तिफलमशान्तमिति योजयति । न सकृदागामिफलं शान्तमिति योजयति न सकृदागामिफलमशान्तमिति योजयति । नाऽनागामिफलं शान्तमिति योजयति नाऽनागामिफलमशान्तमिति योजयति । नाऽर्हत्त्वं शान्तमिति योजयति नाऽर्हत्त्वमशान्तमिति योजयति । न प्रत्येकबोधिं शान्त इति योजयति न प्रत्येकबोधि-मशान्त इति योजयति । न मार्गाऽऽकारज्ञतां शान्तेति योज-यति । न मार्गाऽऽकारज्ञतामशान्तेति योजयति । न सर्व्वाऽऽकार-ज्ञतां शान्तेति योजयति । न सर्व्वाऽऽकारज्ञतामशान्तेति योजयति । एवं चरन् शारद्वतीपुत्र बोधिसत्त्वो महासत्त्वः प्रज्ञापारमितायां युक्त इति वक्तव्यः ।

पुनरपरं शारद्वतीपुत्र बोधिसत्त्वोमहासत्त्वः प्रज्ञापारमितायां युज्यमानो नरूपं शून्यमिति वाऽशून्यमिति वा युज्यते। न वेदनां शून्यमिति वाऽशून्यमिति वा युज्यते। न संज्ञां शून्यमिति वाऽशून्यमिति वा युज्यते। न संस्काराः *शून्याइति वाऽशून्याइति वा युज्यते। न विज्ञानं शून्यमिति वाऽशुन्यमिति वा युज्यते। न चक्षुः शून्यमिति वाऽशून्यमिति वा युज्यते। न श्रोत्रं शून्यमिति वाऽशून्यमिति वा युज्यते। न घ्राणं शून्यमिति वाऽशून्यमिति वा युज्यते। न जिह्वां शून्यमिति वाऽशून्यमिति वा युज्यते। न कायं शून्यमिति वाऽशून्यमिति वा युज्यते। न मनः शून्यमिति वाऽशून्यमिति वा युज्यते। न रूपं शून्यमिति वाऽशून्यमिति वा युज्यते। न शब्दं शून्यमिति वाऽशून्यमिति वा युज्यते। न गन्धं शून्यमिति वाऽशून्यमिति वा युज्यते। न रसं शून्यमिति वाऽशून्यमिति वा युज्यते। न स्पर्शं शून्यमिति वाऽशून्यमिति वा युज्यते। न धर्म्मान् शून्याइति वाऽशून्याइति वा युज्यते। न चक्षुर्व्विज्ञानं शून्यमिति वाऽशून्यमिति वा युज्यते। न श्रोत्रविज्ञानं शून्यमिति वाऽशून्यमिति वा युज्यते। न घ्राणविज्ञानं शून्यमिति वाऽशून्यमिति वा युज्यते। न जिह्वाविज्ञानं शून्यमिति वाऽशून्यमिति वा युज्यते। न कायविज्ञानं शून्यमिति वाऽशून्यमिति वा युज्यते। न मनोविज्ञानं शून्यमिति वाऽशून्यमिति वा युज्यते। न चक्षुःसंस्पर्शं शून्यमिति वाऽशुन्यमिति वा युज्यते। न श्रोत्रसंस्पर्शं शून्यमिति वाऽशून्यमिति वा युज्यते। न घ्राणसंस्पर्शं शून्यमिति

* न संस्कारान् इति ख, ग, घ, च पाठः।

वाऽशून्यमिति वा युज्यते । न जिह्वासंस्पर्शं शून्यमिति वाऽशून्यमिति वा युज्यते । न कायसंस्पर्शं शून्यमिति वाऽशून्यमिति वा युज्यते । न मनःसंस्पर्शं शून्यमिति वाऽशून्यमिति वा युज्यते । न चक्षुःसंस्पर्शप्रत्ययां वेदनां शून्येति वाऽशून्येति वा युज्यते । न श्रोत्रसंस्पर्शप्रत्ययां वेदनां शून्येति वाऽशून्येति वा युज्यते । न घ्राणसंस्पर्शप्रत्ययां वेदनां शून्येति वाऽशून्येति वा युज्यते । न जिह्वासंस्पर्शप्रत्ययां वेदनां शून्येति वाऽशून्येति वा युज्यते । न कायसंस्पर्शप्रत्ययां वेदनां शून्येति वाऽशून्येति वा युज्यते । न मनःसंस्पर्शप्रत्ययां वेदनां शून्येति वाऽशून्येति वा युज्यते । न पृथिवीधातुं शून्य*मिति वाऽशून्यमिति वा युज्यते । नाऽब्धातुं शून्यमिति वाऽशून्यमिति वा युज्यते । न तेजोधातुं शून्यमिति वाऽशून्यमिति वा युज्यते । न वायुधातुं शून्यमिति वाऽशून्यमिति वा युज्यते । नाऽऽकाशधातुं शून्यमिति वाऽशून्यमिति वा युज्यते । न विज्ञानधातुं शून्यइति वाऽशून्यइति वा युज्यते । नाविद्यां शून्येति वाऽशून्येति वा युज्यते । न संस्कारान् शून्याइति† वाऽशून्याइति वा युज्यते । न विज्ञानं शून्यमिति वाऽशून्यमिति वा युज्यते । न नामरूपं शून्यमिति वाऽशून्यमिति वा युज्यते । न षडायतनं शून्यमिति वाऽशून्यमिति वा युज्यते । न स्पर्शं शून्यमिति वाऽ-

---

* ख, ग, घ, च पुस्तकेषु शून्य इति वा अशून्य इति वा पाठः । एवं सर्व्वत्र धातुशब्दविशेष्यस्थले दृश्यते ।

† शून्येति अशून्येति, च पुस्तके पाठः । ख, ग, घ, च पुस्तकेषु शून्याइति अशून्य, इति यथायथं पाठः ।

शून्यमिति वा युज्यते । न वेदना शून्येति वाऽशून्येति वा युज्यते । न तृष्णा शून्येति वाऽशून्येति वा युज्यते । नोपादानं शून्यमिति वाऽशून्यमिति वा युज्यते । न भवं शून्यमिति वाऽशून्यमिति वा युज्यते । न जातिं शून्येति वाऽशून्येति वा युज्यते । न जरामरणं शून्यमिति वाऽशून्यमिति वा युज्यते । न दानपारमिता शून्येति वाऽशून्येति वा युज्यते । न शीलपारमिता शून्येति वाऽशून्येति वा युज्यते । न क्षान्तिपारमिता शून्येति वाऽशून्येति वा युज्यते । न वीर्यपारमिता शून्येति वाऽशून्येति वा युज्यते । न ध्यानपारमिता शून्येति वाऽशून्येति वा युज्यते । न प्रज्ञापारमिता शून्येति वाऽशून्येति वा युज्यते । नाऽध्यात्मशून्यता शून्येति वाऽशून्येति वा युज्यते । न बहिर्धाशून्यता शून्येति वाऽशून्येति वा युज्यते । नाऽध्यात्मबहिर्धाशून्यता शून्येति वाऽशून्येति वा युज्यते । न शून्यताशून्यता शून्येति वाऽशून्येति वा युज्यते । न महाशून्यता शून्येति वाऽशून्येति वा युज्यते । न परमार्थशून्यता शून्येति वाऽशून्येति वा युज्यते । न संस्कृतशून्यता शून्येति वाऽशून्येति वा युज्यते । नाऽसंस्कृतशून्यता शून्येति वाऽशून्येति वा युज्यते । नाऽत्यन्तशून्यता शून्येति वाऽशून्येति वा युज्यते । नाऽनवराग्रशून्यता शून्येति वाऽशून्येति वा युज्यते । नाऽनवकारशून्यता शून्येति वाऽशून्येति वा युज्यते । न प्रकृतिशून्यता शून्येति वाऽशून्येति वा युज्यते । न सर्वधर्मशून्यता शून्येति वाऽशून्येति वा युज्यते । न स्वलक्षणशून्यता शून्येति वाऽशून्येति वा युज्यते । नाऽनुपलम्भशून्यता शून्येति वाऽशून्येति वा युज्यते । नाऽभावशून्यता शून्येति वाऽशून्येति वा युज्यते ।

न स्वभावशून्यतां शून्येति वाऽशून्येति वा युज्यते। नाऽभावस्वभाव-शून्यतां शून्येति वाऽशून्येति वा युज्यते । न स्मृत्युपस्थानानिशून्या-नीति वाऽशून्यानीति वा युज्यते । न सम्यक् प्रहाणानि शून्या-नीति वाऽशून्यानीति वा युज्यते । नर्द्धिपादान् शून्यादति वाऽ-शून्यादति वा युज्यते। नेन्द्रियाणि शून्यानीति वाऽशून्यानीति वा युज्यते । नवलानि शून्यानीति वाऽशून्यानीति वा युज्यते । न वोध्यङ्गानि शून्यानीति वाऽशून्यानीति वा युज्यते। नाऽऽर्य्योऽष्टाऽङ्ग-मार्गं शून्यदति वाऽशून्यदति वा युज्यते। नार्य्यसत्यानि शून्यानीति वाऽशून्यानीति वा युज्यते । न ध्यानानि शून्यानीति वाऽशून्या-नीति वा युज्यते । नाऽप्रमाणानि शून्यानीति वाऽशून्यानीति वा युज्यते। नाऽऽरूप्यसमापत्तीः शून्यादति वाऽशून्यादति वा युज्यते। नाऽष्टौ विमोचान् शून्यादति वाऽशून्यादति वा युज्यते। न नवा-ऽनुपूर्व्वविहारसमापत्तीः शून्यादति वाऽशून्यादति वा युज्यते । न शून्यताऽऽनिमित्ताऽप्रणिहितविमोचमुखानि शून्यानीति वाऽशून्या-नीति वा युज्यते। नाभिज्ञाः शून्यादति वा अशून्यादति वा युज्यते। न समाधीन् शून्यादति वाऽशून्यादति वा युज्यते । न धारणीमुखानि शून्यानीति वाऽशून्यानीति वा युज्यते। न तथा-गतबलानि शून्यानीति वाऽशून्यानीति वा युज्यते। न वैशारद्यानि शून्यानीति वाऽशून्यानीति वा युज्यते। न प्रतिसंविदः शून्यादति वाऽशून्यादति वा युज्यते। न महामैत्रीं शून्येति वाऽशून्येति वा युज्यते । न महाकरुणां शून्येति वाऽशून्येति वा युज्यते । नाऽऽवे-णिकबुद्धधर्म्मान् शून्यादति वाऽशून्यादति वा युज्यते। न श्रोत-

आपत्तिफलं शून्यमिति वाऽशून्यमिति वा युज्यते। न सकृदागामिफलं शून्यमिति वाऽशून्यमिति वा युज्यते। नाऽनागामिफलं शून्यमिति वाऽशून्यमिति वा युज्यते। नाऽर्हत्त्वं शून्यमिति वाऽशून्यमिति वा युज्यते। न प्रत्येकबोधिं शून्यइति वाऽशून्यइति वा युज्यते। न सर्वज्ञतां शून्येति वाऽशून्येति वा युज्यते। न मार्गाऽऽकारज्ञतां शून्येति वाऽशून्येति वा युज्यते। न सर्वाऽऽकारज्ञतां शून्येति वाऽशून्येति वा युज्यते। एवं चरन् शारद्वतीपुत्र बोधिसत्त्वो महासत्त्वः प्रज्ञापारमितायां युक्त इति वक्तव्यः।

पुनरपरं शारद्वतीपुत्र बोधिसत्त्वो महासत्त्वः प्रज्ञापारमितायां चरन् न रूपं निमित्तमिति वाऽनिमित्तमिति वा युज्यते। न वेदनां निमित्तेति वाऽनिमित्तेति वा युज्यते। न संज्ञां निमित्तेति वाऽनिमित्तेति वा युज्यते। न संस्कारान् निमित्ताइति वाऽनिमित्ताइति वा युज्यते। न विज्ञानं निमित्तमिति वाऽनिमित्तमिति वा युज्यते। न चक्षुर्निमित्तमिति वाऽनिमित्तमिति वा युज्यते। न श्रोत्रं निमित्तमिति वाऽनिमित्तमिति वा युज्यते। न घ्राणं निमित्तमिति वा अनिमित्तमिति वा युज्यते। न जिह्वां निमित्त*मिति वाऽनिमित्तमिति वा युज्यते। न कायं निमित्तमिति वाऽनिमित्तमिति वा युज्यते। न मनो निमित्तमिति वाऽनिमित्तमिति वा युज्यते। न रूपं निमित्तमिति वाऽनिमित्तमिति वा युज्यते। न शब्दं निमित्तइति वा ऽनिमित्तइति वा युज्यते। न गन्धं निमित्तइति वाऽनिमित्तइति वा युज्यते। न रसं निमित्तमिति

* निमित्तेति वानिमित्तेति ख, ग, घ पुस्तकेषु यथायथं पाठः।

वाऽनिमित्तमिति वा युज्यते। न स्पर्शं निमित्तमिति वाऽनिमित्तमिति वा युज्यते। न धर्मान् निमित्तादिति वाऽनिमित्तादिति वा युज्यते। न चक्षुर्विज्ञानं निमित्तमिति वाऽनिमित्तमिति वा युज्यते। न श्रोत्रविज्ञानं निमित्तमिति वा अनिमित्तमिति वा युज्यते। न घ्राणविज्ञानं निमित्तमिति वाऽनिमित्तमिति वा युज्यते। न जिह्वाविज्ञानं निमित्तमिति वाऽनिमित्तमिति वा युज्यते। न कायविज्ञानं निमित्तमिति वाऽनिमित्तमिति वा युज्यते। न मनोविज्ञानं निमित्तमिति वाऽनिमित्तमिति वा युज्यते। न चक्षुः संस्पर्शं निमित्तमिति वाऽनिमित्तमिति वा युज्यते। न श्रोत्रसंस्पर्शं निमित्तमिति वाऽनिमित्तमिति वा युज्यते। न घ्राणसंस्पर्शं निमित्तमिति वाऽनिमित्तमिति वा युज्यते। न जिह्वासंस्पर्शं निमित्तमिति वाऽनिमित्तमिति वा युज्यते। न कायसंस्पर्शं निमित्तमिति वाऽनिमित्तमिति वा युज्यते। न मनः संस्पर्शं निमित्तमिति वाऽनिमित्तमिति वा युज्यते। न चक्षुः संस्पर्शप्रत्ययां वेदनां निमित्तेति वाऽनिमित्तेति वा युज्यते। न श्रोत्रसंस्पर्शप्रत्ययां वेदनां निमित्तेति वाऽनिमित्तेति वा युज्यते। न घ्राणसंस्पर्शप्रत्ययां वेदनां निमित्तेति वाऽनिमित्तेति वा युज्यते। न जिह्वासंस्पर्शप्रत्ययां वेदनां निमित्तेति वाऽनिमित्तेति वा युज्यते। न कायसंस्पर्शप्रत्ययां वेदनां निमित्तेति वाऽनिमित्तेति वा युज्यते। न मनः संस्पर्शप्रत्ययां वेदनां निमित्तेति वा अनिमित्तेति वा युज्यते। न पृथिवीधातुं निमित्तमिति वाऽनिमित्तमिति वा युज्यते। नाऽब्धातुं निमित्तमिति वाऽनिमित्तमिति वा

युज्यते। न तेजोधातुं निमित्तमिति वाऽनिमित्तमिति वा युज्यते। न वायुधातुं निमित्तमिति वाऽनिमित्तमिति वा युज्यते। नाऽऽकाशधातुं निमित्तमिति वाऽनिमित्तमिति वा युज्यते। न विज्ञानधातुं निमित्तमिति वाऽनिमित्तमिति वा युज्यते। नाऽविद्यां निमित्तेति वाऽनिमित्तेति वा युज्यते। न संस्कारान् निमित्तादिति वाऽनिमित्तादिति वा युज्यते। न विज्ञानं निमित्तमिति वाऽनिमित्तमिति वा युज्यते। न नामरूपं निमित्तमिति वाऽनिमित्तमिति वा युज्यते। न षडायतनं निमित्तमिति वाऽनिमित्तमिति वा युज्यते। न स्पर्शं निमित्तमिति वाऽनिमित्तमिति वा युज्यते। न वेदनां निमित्तेति वाऽनिमित्तेति वा युज्यते। न तृष्णां निमित्तेति वाऽनिमित्तेति वा युज्यते। नोपादानं निमित्तमिति वाऽनिमित्तमिति वा युज्यते। न भवं* निमित्तमिति वाऽनिमित्तमिति वा युज्यते। न जातिं निमित्तेति वाऽनिमित्तेति वा युज्यते। न जरामरणं निमित्तमिति वाऽनिमित्तमिति वा युज्यते। न दानपारमितां निमित्तेति वाऽनिमित्तेति वा युज्यते। न शीलपारमितां निमित्तेति वाऽनिमित्तेति वा युज्यते। न क्षान्तिपारमितां निमित्तेति वाऽनिमित्तेति वा युज्यते। न वीर्य्यपारमितां निमित्तेति वाऽनिमित्तेति वा युज्यते। न ध्यानपारमितां निमित्तेति वाऽनिमित्तेति वा युज्यते। न प्रज्ञापारमितां निमित्तेति वाऽनिमित्तेति वा युज्यते। नाऽध्यात्मशून्यतां निमित्तेति वाऽनिमित्तेति वा युज्यते। न बहिर्द्धाशून्यतां निमित्तेति

* निमित्तमिति व्यनिमित्तमिति ख, ग, घ पुस्तकेषु पाठः।

वाऽनिमित्तेति वा युज्यते । नाऽध्यात्मबहिर्द्धाशून्यतां निमित्तेति वाऽनिमित्तेति वा युज्यते । न शून्यताशून्यतां निमित्तेति वाऽनिमित्तेति वा युज्यते । न महाशून्यतां निमित्तेति वाऽनिमित्तेति वा युज्यते । न परमार्थशून्यतां निमित्तेति वाऽनिमित्तेति वा युज्यते । न संस्कृतशून्यतां निमित्तेति वाऽनिमित्तेति वा युज्यते । नाऽसंस्कृतशून्यतां निमित्तेति वाऽनिमित्तेति वा युज्यते । नाऽत्यन्तशून्यतां निमित्तेति वाऽनिमित्तेति वा युज्यते। नाऽनवराग्रशून्यतां निमित्तेति वाऽनिमित्तेति वा युज्यते। नाऽनवकारशून्यतां निमित्तेति वाऽनिमित्तेति वा युज्यते। न प्रकृतिशून्यतां निमित्तेति वाऽनिमित्तेति वा युज्यते। न सर्व्वधर्म्मशून्यतां निमित्तेति वाऽनिमित्तेति वा युज्यते। न स्वलक्षणशून्यतां निमित्तेति वाऽनिमित्तेति वा युज्यते । नाऽनुपलम्भशून्यतां निमित्तेति वाऽनिमित्तेति वा युज्यते । नाऽभावशून्यतां निमित्तेति वाऽनिमित्तेति वा युज्यते । न स्वभावशून्यतां निमित्तेति वाऽनिमित्तेति वा युज्यते। नाऽभावस्वभावशून्यतां निमित्तेति वाऽनिमित्तेति वा युज्यते । न स्मृत्युपस्थानानि निमित्तानीति वाऽनिमित्तानीति वा युज्यते। न सम्यक् प्रहाणानि निमित्तानीति वाऽनिमित्तानीति वा युज्यते । नर्द्धिपादान् निमित्ता*निति वाऽनिमित्तानिति वा युज्यते। नेन्द्रियाणि निमित्तानीति वाऽनिमित्तानीति वा युज्यते। न बलानि निमित्तानीति वाऽनिमित्तानीति वा युज्यते । न बोध्यङ्गानि निमि-

---

* निमित्ता इति ख, घ पुस्तकयोः पाठः ।

त्तानीति वाऽनिमित्तानीति वा युज्यते। नाऽऽर्य्याऽष्टाऽङ्गमार्गं
निमित्तमिति वाऽनिमित्तमिति वा युज्यते। नाऽऽर्य्यसत्यानि
निमित्तानीति वाऽनिमित्तानीति वा युज्यते। न ध्यानानि
निमित्तानीति वाऽनिमित्तानीति वा युज्यते। नाऽप्रमाणानि
निमित्तानीति वाऽनिमित्तानीति वा युज्यते। नाऽऽरूप्यसमापत्ती-
र्निमित्तादिति वाऽनिमित्तादिति वा युज्यते। न विमोक्षान्
निमित्तादिति वाऽनिमित्तादिति वा युज्यते। न नवाऽनुपूर्व्वविहार-
समापत्तीर्निमित्तादिति वाऽनिमित्तादिति वा युज्यते। न शून्यता-
ऽऽनिमित्ताऽप्रणिहितविमोक्षमुखानि निमित्तानीति वाऽनिमित्ता-
नीति वा युज्यते। नाऽभिज्ञानिमित्तादिति वाऽनिमित्तादिति वा
युज्यते। न समाधीन् निमित्तादिति वाऽनिमित्तादिति वा युज्यते।
न धारणीमुखानि निमित्तानीति वाऽनिमित्तानीति वा युज्यते।
न तथागतबलानि निमित्तानीति वाऽनिमित्तानीति वा युज्यते।
न वैशारद्यानि निमित्तानीति वाऽनिमित्तानीति वा युज्यते।
न प्रतिसम्विदो निमित्तादिति वाऽनिमित्तादिति वा युज्यते। न
महामैत्रीं निमित्तेति वाऽनिमित्तेति वा युज्यते। न महाकरुणां
निमित्तेति वाऽनिमित्तेति वा युज्यते। नाऽष्टादशाऽऽवेणिकबुद्ध-
धर्म्मान् निमित्तादिति वाऽनिमित्तादिति वा युज्यते। न स्रोतआ-
पत्तिफलं निमित्तमिति वाऽनिमित्तमिति वा युज्यते। न सकृदा-
गामिफलं निमित्तमिति वाऽनिमित्तमिति वा युज्यते। नाऽना-
गामिफलं निमित्तमिति वाऽनिमित्तमिति वा युज्यते। नाऽर्हत्त्वं
निमित्तमिति वाऽनिमित्तमिति वा युज्यते। न प्रत्येकबोधिं

निमित्तमिति वाऽनिमित्तमिति वा युज्यते। न सर्व्वज्ञतां निमित्तेति वाऽनिमित्तेति वा युज्यते। न मार्गाऽऽकारज्ञतां निमित्तेति वाऽनिमित्तेति वा युज्यते। न सर्व्वाऽऽकारज्ञतां निमित्तेति वाऽनिमित्तेति वा युज्यते। एवञ्चरञ्छारद्वतीपुत्र बोधिसत्त्वोमहासत्त्वः प्रज्ञापारमितायां युक्तइति वक्तव्यः।

पुनरपरं शारद्वतीपुत्र बोधिसत्त्वोमहासत्त्वः प्रज्ञापारमितायां चरन् न रूपं प्रणिहितमिति वाऽप्रणिहितमिति वा युज्यते*। न वेदनां प्रणिहितेति वाऽप्रणिहितेति वा युज्यते। न संज्ञां प्रणिहितेति वाऽप्रणिहितेति वा युज्यते†। न संस्कारान् प्रणिहिताइति वाऽप्रणिहिता इति वा युज्यते। न विज्ञानं प्रणिहितमिति वाऽप्रणिहितमिति वा युज्यते। न चक्षुः प्रणिहितमिति वाऽप्रणिहितमिति वा युज्यते। न श्रोत्रं प्रणिहितमिति वाऽप्रणिहितमिति वा युज्यते। न घ्राणं प्रणिहितमिति वाऽप्रणिहितमिति वा युज्यते। न जिह्वां प्रणिहितेति वाऽप्रणिहितेति वा युज्यते। न कायं प्रणिहितइति वाऽप्रणिहितइति वा युज्यते। न मनः प्रणिहितमिति वाऽप्रणिहितमिति वा युज्यते। न रूपं प्रणिहितमिति वाऽप्रणिहितमिति वा युज्यते। न शब्दं प्रणिहितइति वाऽप्रणिहितइति वा युज्यते। न गन्धं प्रणिहितइति वाऽप्रणिहितइति वा युज्यते। न रसं प्रणिहितइति वाऽप्रणिहितइति वा युज्यते। न स्पर्शं प्रणिहितइति वाऽप्रणिहितइति वा युज्यते। न धर्म्मान् प्रणिहिताइति

* घ पुस्तके सर्व्वत्रप्रणिहितमिति पाठः।

† प्रणिहितमिति अप्रणिहितमिति ख, ग, घ पुस्तकेषु पाठः। एवं परत्र।

वाऽप्रणिहितादिति वा युज्यते। न चक्षुर्विज्ञानं प्रणिहितमिति वाऽप्रणिहितमिति वा युज्यते। न श्रोत्रविज्ञानं प्रणिहितमिति वाऽप्रणिहितमिति वा युज्यते। न घ्राणविज्ञानं प्रणिहितमिति वाऽप्रणिहितमिति वा युज्यते। न जिह्वाविज्ञानं प्रणिहितमिति वाऽप्रणिहितमिति वा युज्यते। न कायविज्ञानं प्रणिहितमिति वाऽप्रणिहितमिति वा युज्यते। न मनोविज्ञानं प्रणिहितमिति वाऽप्रणिहितमिति वा युज्यते। न चक्षुः संस्पर्शं प्रणिहितमिति वाऽप्रणिहितमिति वा युज्यते। न श्रोत्रसंस्पर्शं प्रणिहितमिति वाऽप्रणिहितमिति वा युज्यते। न घ्राणसंस्पर्शं प्रणिहितमिति वाऽप्रणिहितमिति वा युज्यते। न जिह्वासंस्पर्शं प्रणिहितमिति वाऽप्रणिहितमिति वा युज्यते। न कायसंस्पर्शं प्रणिहितमिति वाऽप्रणिहितमिति वा युज्यते। न मनः संस्पर्शं प्रणिहितमिति वाऽप्रणिहितमिति वा युज्यते। न चक्षुः संस्पर्शप्रत्ययां वेदनां प्रणिहितेति वाऽप्रणिहितेति वा युज्यते। न श्रोत्रसंस्पर्शप्रत्ययां वेदनां प्रणिहितेति वाऽप्रणिहितेति वा युज्यते। न घ्राणसंस्पर्श-प्रत्ययां वेदनां प्रणिहितेति वाऽप्रणिहितेति वा युज्यते। न जिह्वासंस्पर्शप्रत्ययां वेदनां प्रणिहितेति वाऽप्रणिहितेति वा युज्यते। न कायसंस्पर्शप्रत्ययां वेदनां प्रणिहितेति वाऽप्रणिहितेति वा युज्यते। न मनः संस्पर्शप्रत्ययां वेदनां प्रणिहितेति वाऽप्रणिहितेति वा युज्यते। न पृथिवीधातुं प्रणिहितमिति वाऽप्रणिहितमिति वा युज्यते। नाऽब्धातुं प्रणिहितमिति वाऽप्रणिहितमिति वा युज्यते। न तेजोधातुं प्रणिहितमिति वाऽप्रणिहितमिति वा युज्यते। न

वायुधातुं प्रणिहितमिति वाऽप्रणिहितमिति वा युज्यते। नाऽऽकाशधातुं प्रणिहितमिति वाऽप्रणिहितमिति वा युज्यते। न विज्ञानधातुं प्रणिहितमिति वाऽप्रणिहितमिति वा युज्यते। नाऽविद्या प्रणिहितेति वाऽप्रणिहितेति वा युज्यते। न संस्कारान् प्रणिहिता इति वाऽप्रणिहिता इति वा युज्यते। न विज्ञानं प्रणिहितमिति वाऽप्रणिहितमिति वा युज्यते। न नामरूपं प्रणिहितमिति वाऽप्रणिहितमिति वा युज्यते। न षडायतनं प्रणिहितमिति वाऽप्रणिहितमिति वा युज्यते। न स्पर्शं प्रणिहितमिति वाऽप्रणिहितमिति वा युज्यते। न वेदनाप्रणिहितेति वाऽप्रणिहितेति वा युज्यते। न तृष्णाप्रणिहितेति वाऽप्रणिहितेति वा युज्यते। नोपादानं प्रणिहितमिति वाऽप्रणिहितमिति वा युज्यते। न भवं प्रणिहितमिति वाऽप्रणिहितमिति वा युज्यते। न जातिं प्रणिहितेति वाऽप्रणिहितेति वा युज्यते। न जरामरणं प्रणिहितमिति वाऽप्रणिहितमिति वा युज्यते। न दानपारमितां प्रणिहितेति वाऽप्रणिहितेति वा युज्यते। न शीलपारमितां प्रणिहितेति वाऽप्रणिहितेति वा युज्यते। न [illegible]पारमितां प्रणिहितेति वा [illegible]

[illegible]

न शून्यताशून्यतां प्रणिहितेति वाऽप्रणिहितेति वा युज्यते । न महाशून्यतां प्रणिहितेति वाऽप्रणिहितेति वा युज्यते। न परमार्थशून्यतां प्रणिहितेति वाऽप्रणिहितेति वा युज्यते। न संस्कृतशून्यतां प्रणिहितेति वाऽप्रणिहितेति वा युज्यते । नाऽसंस्कृतशून्यतां प्रणिहितेति वाऽप्रणिहितेति वा युज्यते । नाऽत्यन्तशून्यतां प्रणिहितेति वाऽप्रणिहितेति वा युज्यते। नाऽनवराऽग्रशून्यतां प्रणिहितेति वाऽप्रणिहितेति वा युज्यते। नाऽनवकारशून्यतां प्रणिहितेति वाऽप्रणिहितेति वा युज्यते। न प्रकृतिशून्यतां प्रणिहितेति वाऽप्रणिहितेति वा युज्यते । न सर्व्वधर्मशून्यतां प्रणिहितेति वाऽप्रणिहितेति वा युज्यते । न स्वलक्षणशून्यतां प्रणिहितेति वाऽप्रणिहितेति वा युज्यते । नाऽनुपलम्भशून्यतां प्रणिहितेति वाऽप्रणिहितेति वा युज्यते । नाऽभावशून्यतां प्रणिहितेति वाऽप्रणिहितेति वा युज्यते। न स्वभावशून्यतां प्रणिहितेति वाऽप्रणिहितेति वा युज्यते । नाऽभावस्वभावशून्यतां प्रणिहितेति वाऽप्रणिहितेति वा युज्यते । न स्मृत्युपस्थानानि प्रणिहितानीति वाऽप्रणिहितानीति वा युज्यते। न सम्यक्प्रहाणानि प्रणिहितानीति वाऽप्रणिहितानीति वा युज्यते। नर्द्धिपादान् प्रणिहिताइति वाऽप्रणिहिताइति वा युज्यते। नेन्द्रियाणि प्रणिहितानीति वाऽप्रणिहितानीति वा युज्यते। न बलानि प्रणिहितानीति वाऽप्रणिहितानीति वा युज्यते । न बोध्यङ्गानि प्रणिहितानीति वाऽप्रणिहितानीति वा युज्यते। न मार्गं प्रणिहितइति वाऽप्रणिहितइति वा युज्यते। नाऽऽर्यसत्यानि

प्रणिहितानीति वाऽप्रणिहितानीति वा युज्यते। न ध्यानानि प्रणिहितानीति वाऽप्रणिहितानीति वा युज्यते । नाऽप्रमाणानि प्रणिहितानीति वाऽप्रणिहितानीति वा युज्यते । नाऽऽरूप्यसमापत्तीः प्रणिहिताइति वाऽप्रणिहिताइति वा युज्यते । नाऽष्टौविमोचान् प्रणिहिताइति वाऽप्रणिहिताइति वा युज्यते । न नवाऽनुपूर्व्व-विहारसमापत्तीः प्रणिहिताइति वाऽप्रणिहिताइति वा युज्यते । न शून्यताऽऽनिमित्ताऽप्रणिहितविमोक्षमुखानि प्रणिहितानीति वाऽप्रणिहितानीति वा युज्यते । नाऽभिज्ञाः प्रणिहिताइति वाऽप्रणिहिताइति वा युज्यते । न समाधीन् प्रणिहिताइति वाऽप्रणिहिताइति वा युज्यते । न धारणीमुखानि प्रणिहितानीति वाऽप्रणिहितानीति वा युज्यते। न तथागतबलानि प्रणिहितानीति वाऽप्रणिहितानीति वा युज्यते । न वैशारद्यानि प्रणिहितानीति वाऽप्रणिहितानीति वा युज्यते । न प्रतिसम्विद: प्रणिहिताइति वाऽप्रणिहिताइति वा युज्यते। न महामैत्रीं प्रणिहितेति वाऽप्रणिहितेति वा युज्यते। न महाकरुणां प्रणिहितेति वाऽप्रणिहितेति वा युज्यते। नाऽष्टादशाऽऽवेणिकान् बुद्धधर्म्मान् प्रणिहिताइति वाऽप्रणिहिताइति वा युज्यते । न स्रोतआपत्तिफलं प्रणिहितमिति वाऽप्रणिहितमिति वा युज्यते । न सकृदागामिफलं प्रणिहितमिति वाऽप्रणिहितमिति वा युज्यते । नाऽनागामिफलं प्रणिहितमिति वाऽप्रणिहितमिति वा युज्यते । नाऽर्हत्त्वं प्रणिहित-मिति वाऽप्रणिहितमिति वा युज्यते। न प्रत्येकबोधिं प्रणिहितइति वाऽप्रणिहितइति वा युज्यते । न सर्व्वज्ञतां प्रणिहितेति

नाऽपरिपूर्णेति वा युज्यते। न भावाऽऽकाराणां परिपूर्णेति नाऽपरिपूर्णेति वा युज्यते। न सत्त्वाऽऽकाराणां परिपूर्णेति नाऽपरिपूर्णेति वा युज्यते। एवमपि खलु शारद्वतीपुत्र बोधिसत्त्वो-महासत्त्वः प्रज्ञापारमितायां युक्तइति वक्तव्यः।

पुनरपरं शारद्वतीपुत्र बोधिसत्त्वोमहासत्त्वः प्रज्ञापारमितायां रूपमुत्पद्यतइति वा निरुध्यतइति वा युज्यते। न वेदनामुत्पद्यतइति वा निरुध्यत इति वा युज्यते। न संज्ञामुत्पद्यतइति वा निरुध्यतइति वा युज्यते। न संस्कारान् उत्पद्यन्तइति वा निरुध्यन्तइति वा युज्यते। न विज्ञानमुत्पद्यतइति वा निरुध्यतइति वा युज्यते। न चक्षुरुत्पद्यतइति वा निरुध्यतइति वा युज्यते। न श्रोत्रमुत्पद्यतइति वा निरुध्यतइति वा युज्यते। न घ्राणमुत्पद्यतइति वा निरुध्यतइति वा युज्यते। न जिह्वामुत्पद्यतइति वा निरुध्यतइति वा युज्यते। न कायमुत्पद्यतइति वा निरुध्यत-इति वा युज्यते। न मनउत्पद्यतइति वा निरुध्यतइति वा युज्यते। न रूपमुत्पद्यतइति वा निरुध्यतइति वा युज्यते। न शब्दमुत्पद्यत-इति वा निरुध्यतइति वा युज्यते। न गन्धमुत्पद्यतइति वा निरुध्यतइति वा युज्यते। न रसमुत्पद्यतइति वा निरुध्यतइति वा युज्यते। न स्पर्शमुत्पद्यतइति वा निरुध्यतइति वा युज्यते। न धर्मानुत्पद्यन्तइति वा निरुध्यन्तइति वा युज्यते। न चक्षुर्विज्ञान-मुत्पद्यतइति वा निरुध्यतइति वा युज्यते। न श्रोत्रविज्ञान-मुत्पद्यतइति वा निरुध्यतइति वा युज्यते। न घ्राणविज्ञान-मुत्पद्यतइति वा निरुध्यतइति वा युज्यते। न जिह्वाविज्ञानमुत्प-

द्यतइति वा निरुध्यतइति वा युज्यते। न कायविज्ञानमुत्पद्यतइति वा निरुध्यतइति वा युज्यते। न मनोविज्ञानमुत्पद्यतइति वा निरुध्यतइति वा युज्यते। न चक्षुः संस्पर्शमुत्पद्यतइति वा निरुध्यतइति वा युज्यते। न श्रोत्रसंस्पर्शमुत्पद्यतइति वा निरुध्यतइति वा युज्यते। न घ्राणसंस्पर्शमुत्पद्यतइति वा निरुध्यतइति वा युज्यते। न जिह्वासंस्पर्शमुत्पद्यतइति वा निरुध्यतइति वा युज्यते। न काय-संस्पर्शमुत्पद्यतइति वा निरुध्यतइति वा युज्यते। न मनः संस्पर्श-मुत्पद्यतइति वा निरुध्यत इति वा युज्यते। न चक्षुः संस्पर्शप्रत्ययां* वेदनामुत्पद्यतइति वा निरुध्यतइति वा युज्यते। न श्रोत्रसंस्पर्श-प्रत्ययां वेदनामुत्पद्यत इति वा निरुध्यतइति वा युज्यते। न घ्राणसंस्पर्शप्रत्ययां वेदनामुत्पद्यतइति वा निरुध्यतइति वा युज्यते। न जिह्वासंस्पर्शप्रत्ययां वेदनामुत्पद्यतइति वा निरुध्यतइति वा युज्यते। न कायसंस्पर्शप्रत्ययां वेदनामुत्पद्यतइति वा निरुध्यतइति वा युज्यते। न मनः संस्पर्शप्रत्ययां वेदनामुत्पद्यतइति वा निरुध्यत इति वा युज्यते। न पृथिवीधातुमुत्पद्यतइति वा निरुध्यतइति वा युज्यते। नाऽब्धातुमुत्पद्यतइति वा निरुध्यतइति वा युज्यते। न तेजोधातुमुत्पद्यतइति वा निरुध्यतइति वा युज्यते। न वायुधातु-मुत्पद्यतइति वा निरुध्यतइति वा युज्यते। नाऽऽकाशधातुमुत्पद्यत-इति वा निरुध्यतइति वा युज्यते। न विज्ञानधातुमुत्पद्यतइति वा निरुध्यतइति वा युज्यते। नाऽविद्यामुत्पद्यतइति वा निरुध्यतइति

---

* न चक्षुःसंस्पर्शजामिति ख, ग, घ, च पुस्तके पाठः। एवं परत्र।

वा युज्यते। न संस्कारा उत्पद्यन्तइति वा निरुध्यन्तइति वा युज्यते। न विज्ञानमुत्पद्यतइति वा निरुध्यतइति वा युज्यते। न नामरूपमुत्पद्यतइति वा निरुध्यतइति वा युज्यते। न षडायतनमुत्पद्यतइति वा निरुध्यतइति वा युज्यते। न स्पर्शउत्पद्यतइति वा निरुध्यतइति वा युज्यते। न वेदनामुत्पद्यत इति वा निरुध्यतइति वा युज्यते। न तृष्णामुत्पद्यतइति वा निरुध्यतइति वा युज्यते। नोपादानमुत्पद्यतइति वा निरुध्यतइति वा युज्यते। न भवमुत्पद्यतइति वा निरुध्यतइति वा युज्यते। न जातिमुत्पद्यतइति वा निरुध्यतइति वा युज्यते। न जरामरणमुत्पद्यतइति वा निरुध्यतइति वा युज्यते। न दानपारमितामुत्पद्यतइति वा निरुध्यतइति वा युज्यते। न शीलपारमितामुत्पद्यतइति वा निरुध्यतइति वा युज्यते। न क्षान्तिपारमितामुत्पद्यतइति वा निरुध्यतइति वा युज्यते। न वीर्यपारमितामुत्पद्यतइति वा निरुध्यतइति वा युज्यते। न ध्यानपारमितामुत्पद्यतइति वा निरुध्यतइति वा युज्यते। न प्रज्ञापारमितामुत्पद्यतइति वा निरुध्यतइति वा युज्यते। नाऽध्यात्मशून्यतामुत्पद्यतइति वा निरुध्यत इति वा युज्यते। न वहिर्द्धाशून्यतामुत्पद्यतइति वा निरुध्यतइति वा युज्यते। नाऽध्यात्मवहिर्द्धाशून्यतामुत्पद्यतइति वा निरुध्यतइति वा युज्यते। न शून्यताशून्यतामुत्पद्यतइति वा निरुध्यतइति वा युज्यते। न महाशून्यतामुत्पद्यतइति वा निरुध्यतइति वा युज्यते। न परमाऽर्थशून्यतामुत्पद्यतइति वा निरुध्यतइति वा युज्यते। न संस्कृतशून्यतामुत्पद्यतइति वा निरुध्यतइति वा युज्यते। नाऽसंस्कृतशून्यतामुत्पद्यतइति वा निरुध्यतइति

वा युज्यते। नाऽत्यन्तशून्यतामुत्पद्यतइति वा निरुध्यतइति वा युज्यते। नाऽनवराऽग्रशून्यतामुत्पद्यतइति वा निरुध्यतइति वा युज्यते। नाऽनवकारशून्यतामुत्पद्यतइति वा निरुध्यतइति वा युज्यते। न प्रकृतिशून्यतामुत्पद्यतइति वा निरुध्यतइति वा युज्यते। न सर्व्वधर्म्मशून्यतामुत्पद्यतइति वा निरुध्यतइति वा युज्यते। न स्वलक्षणशून्यतामुत्पद्यतइति वा निरुध्यतइति वा युज्यते। नाऽनुपलम्भशून्यतामुत्पद्यतइति वा निरुध्यतइति वा युज्यते। नाऽभावशून्यतामुत्पद्यतइति वा निरुध्यतइति वा युज्यते। न स्वभावशून्यतामुत्पद्यतइति वा निरुध्यतइति वा युज्यते। नाऽभावस्वभावशून्यतामुत्पद्यतइति वा निरुध्यतइति वा युज्यते। न स्मृत्युपस्थानान्युत्पद्यन्तइति वा निरुध्यन्तइति वा युज्यते। न सम्यक्प्रहाणान्युत्पद्यन्तइति वा निरुध्यन्तइति वा युज्यते। नर्द्धिपादानुत्पद्यन्तइति वा निरुध्यन्तइति वा युज्यते। नेन्द्रियाण्युत्पद्यन्तइति वा निरुध्यन्तइति वा युज्यते। न बलान्युत्पद्यन्तइति वा निरुध्यन्तइति वा युज्यते। न बोध्यङ्गान्युत्पद्यन्तइति वा निरुध्यन्तइति वा युज्यते। नाऽऽर्य्याऽष्टाऽङ्गमार्गमुत्पद्यतइति वा निरुध्यतइति वा युज्यते। नाऽऽर्य्यसत्यान्युत्पद्यन्तइति वा निरुध्यन्तइति वा युज्यते। न ध्यानान्युत्पद्यन्तइति वा निरुध्यन्तइति वा युज्यते। नाऽप्रमाणान्युत्पद्यन्तइति वा निरुध्यन्तइति वा युज्यते। नाऽऽरूप्यसमापत्तीः उत्पद्यन्तइति वा निरुध्यन्तइति वा युज्यते। नाऽष्टौविमोक्षानुत्पद्यन्तइति वा निरुध्यन्तइति वा युज्यते। न नवाऽनुपूर्व्वविहारसमापत्तीः उत्पद्यन्तइति वा निरुध्यन्तइति वा

युज्यते । न शून्यताऽऽनिमित्ताऽप्रणिहितविमोक्षमुखान्युत्पद्यन्तइति वा निरुध्यन्तइति वा युज्यते। नाऽभिज्ञाउत्पद्यन्तइति वा निरुध्यन्तइति वा युज्यते । न समाधीनुत्पद्यन्तइति वा निरुध्यन्तइति वा युज्यते। न धारणीमुखान्युत्पद्यन्तइति वा निरुध्यन्तइति वा युज्यते । न तथागतबलान्युत्पद्यन्तइति वा निरुध्यन्तइति वा युज्यते । न वैशारद्यान्युत्पद्यन्तइति वा निरुध्यन्तइति वा युज्यते। न प्रतिसम्विदः उत्पद्यन्तइति वा निरुध्यन्तइति वा युज्यते । न महामैत्रीमुत्पद्यत इति वा निरुध्यतइति वा युज्यते । न महाकरुणामुत्पद्यतइति वा निरुध्यतइति वा युज्यते । नाऽऽवेणिकबुद्धधर्म्मानुत्पद्यन्तइति वा निरुध्यन्तइति वा युज्यते । न श्रोतआपत्तिफलमुत्पद्यतइति वा निरुध्यत इति वा युज्यते। न सकृदागामिफलमुत्पद्यतइति वा निरुध्यतइति वा युज्यते। नाऽनागामिफलमुत्पद्यतइति वा निरुध्यतइति वा युज्यते । नाऽर्हत्त्वमुत्पद्यतइति वा निरुध्यतइति वा युज्यते। न प्रत्येकबोधिमुत्पद्यतइति वा निरुध्यतइति वा युज्यते । न मार्गाऽऽकारज्ञतामुत्पद्यतइति वा निरुध्यतइति वा युज्यते । न सर्व्वाऽऽकारज्ञतामुत्पद्यतइति वा निरुध्यतइति वा युज्यते। एवञ्चरन्शारद्वतीपुत्र बोधिसत्त्वोमहासत्त्वः प्रज्ञापारमितायां युक्तइति वक्तव्यः ।

पुनरपरं शारद्वतीपुत्र बोधिसत्त्वोमहासत्त्वः प्रज्ञापारमितायां चरन्नरूपमतीतमिति युज्यते । न रूपमनागतमिति युज्यते । न रूपं प्रत्युत्पन्नमिति युज्यते। न वेदनामतीतेति युज्यते। न वेदनामनागतेति युज्यते । न वेदनां प्रत्युत्पन्नेति युज्यते । न

संज्ञामतीतेति युज्यते। न संज्ञामनागतेति युज्यते। न संज्ञां प्रत्युत्पन्नेति युज्यते। न संस्कारानतीतादति युज्यते। न संस्काराननागतादति युज्यते। न संस्कारान् प्रत्युत्पन्नादति युज्यते। न विज्ञानमतीतमिति युज्यते। न विज्ञानमनागतमिति युज्यते। न विज्ञानं प्रत्युत्पन्नमिति युज्यते। न चक्षुरतीतमिति युज्यते। न चक्षुरनागतमिति युज्यते। न चक्षुः प्रत्युत्पन्नमिति युज्यते। न श्रोत्रमतीतमिति युज्यते। न श्रोत्रमनागतमिति युज्यते। न श्रोत्रं प्रत्युत्पन्नमिति युज्यते। न घ्राणमतीतमिति युज्यते। न घ्राणमनागतमिति युज्यते। न घ्राणं प्रत्युत्पन्नमिति युज्यते। न जिह्वामतीतेति युज्यते। न जिह्वामनागतेति युज्यते। न जिह्वां प्रत्युत्पन्नेति युज्यते। न कायमतीतमिति युज्यते। न कायमनागतमिति युज्यते। न कायं प्रत्युत्पन्नमिति युज्यते। न मनोऽतीतमिति युज्यते। न मनोऽनागतमिति युज्यते। न मनः प्रत्युत्पन्नमिति युज्यते। न रूपमतीतमिति युज्यते। न रूपमनागतमिति युज्यते। न रूपं प्रत्युत्पन्नमिति युज्यते। न शब्दमतीतमिति युज्यते। न शब्दमनागतमिति युज्यते। न शब्दं प्रत्युत्पन्नमिति युज्यते। न गन्धमतीतमिति युज्यते। न गन्धमनागतमिति युज्यते। न गन्धं प्रत्युत्पन्नमिति युज्यते। न रसमतीतमिति युज्यते। न रसमनागतमिति युज्यते। न रसंप्रत्युत्पन्नमिति युज्यते। न स्पर्शमतीतमिति युज्यते। न स्पर्शमनागतमिति युज्यते। न स्पर्शं प्रत्युत्पन्नमिति युज्यते। न धर्म्मानतीतादति युज्यते। न धर्म्माननागतादति युज्यते।

न धर्म्मान् प्रत्युत्पन्नादिति युज्यते। न चक्षुर्व्विज्ञानमतीतमिति युज्यते। न चक्षुर्व्विज्ञानमनागतमिति युज्यते। न चक्षुर्व्विज्ञानं प्रत्युत्पन्नमिति युज्यते। न श्रोत्रविज्ञानमतीतमिति युज्यते। न श्रोत्रविज्ञानमनागतमिति युज्यते। न श्रोत्रविज्ञानं प्रत्युत्पन्नमिति युज्यते। न घ्राणविज्ञानमतीतमिति युज्यते। न घ्राणविज्ञानमनागतमिति युज्यते। न घ्राणविज्ञानं प्रत्युत्पन्नमिति युज्यते। न जिह्वाविज्ञानमतीतमिति युज्यते। न जिह्वाविज्ञानमनागतमिति युज्यते। न जिह्वाविज्ञानं प्रत्युत्पन्नमिति युज्यते। न कायविज्ञानमतीतमिति युज्यते। न कायविज्ञानमनागतमिति युज्यते। न कायविज्ञानं प्रत्युत्पन्नमिति युज्यते। न मनोविज्ञानमतीतमिति युज्यते। न मनोविज्ञानमनागतमिति युज्यते। न मनोविज्ञानं प्रत्युत्पन्नमिति युज्यते। न चक्षुःसंस्पर्शमतीतमिति युज्यते*। न चक्षुःसंस्पर्शमनागतमिति युज्यते। न चक्षुःसंस्पर्शं प्रत्युत्पन्नमिति युज्यते। न श्रोत्रसंस्पर्शमतीतमिति युज्यते। न श्रोत्रसंस्पर्शमनागतमिति युज्यते। न श्रोत्रसंस्पर्शं प्रत्युत्पन्नमिति युज्यते। न घ्राणसंस्पर्शमतीतमिति युज्यते। न घ्राणसंस्पर्शमनागतमिति युज्यते। न घ्राणसंस्पर्शं प्रत्युत्पन्नमिति युज्यते। न जिह्वासंस्पर्शमतीतमिति युज्यते। न जिह्वासंस्पर्शमनागतमिति युज्यते। न जिह्वासंस्पर्शं प्रत्युत्पन्नमिति युज्यते। न कायसंस्पर्शमतीतमिति युज्यते। न कायसंस्पर्शमनागतमिति युज्यते। न कायसंस्पर्शं प्रत्यु-

* संस्पर्शशब्दविशेषणानामतीतानागतप्रत्युत्पन्नशब्दानां पुंसिप्रयोगः च-पुस्तके दृश्यते।

त्पन्नमिति युज्यते । न मनःसंस्पर्शमतीतमिति युज्यते । न मनः-संस्पर्शमनागतमिति युज्यते । न मनःसंस्पर्शं प्रत्युत्पन्नमिति युज्यते। न चक्षुःसंस्पर्शप्रत्ययां वेदनामतीतेति युज्यते । न चक्षुःसंस्पर्श-प्रत्ययां वेदनामनागतेति युज्यते । न चक्षुःसंस्पर्शप्रत्ययां वेदनां प्रत्युत्पन्नेति युज्यते। न श्रोत्रसंस्पर्शप्रत्ययां वेदनामतीतेति युज्यते। न श्रोत्रसंस्पर्शप्रत्ययां वेदनामनागतेति युज्यते। न श्रोत्रसंस्पर्शप्रत्ययां वेदनां प्रत्युत्पन्नेति युज्यते । न घ्राणसंस्पर्शप्रत्ययां वेदनामतीतेति युज्यते। न घ्राणसंस्पर्शप्रत्ययां वेदनामनागतेति युज्यते । न घ्राण-संस्पर्शप्रत्ययां वेदनां प्रत्युत्पन्नेति युज्यते । न जिह्वासंस्पर्शप्रत्ययां वेदनामतीतेति युज्यते । न जिह्वासंस्पर्शप्रत्ययां वेदनामनागतेति युज्यते । न जिह्वासंस्पर्शप्रत्ययां वेदनां प्रत्युत्पन्नेति युज्यते । न कायसंस्पर्शप्रत्ययां वेदनामतीतेति युज्यते । न कायसंस्पर्शप्रत्ययां वेदनामनागतेति युज्यते । न कायसंस्पर्शप्रत्ययां वेदनां प्रत्युत्पन्नेति युज्यते । न मनःसंस्पर्शप्रत्ययां वेदनामतीतेति युज्यते । न मनः-संस्पर्शप्रत्ययां वेदनामनागतेति युज्यते । न मनःसंस्पर्शप्रत्ययां वेदनां प्रत्युत्पन्नेति युज्यते । न पृथिवीधातुमतीतइति युज्यते । न पृथिवीधातुमनागतइति युज्यते । न पृथिवीधातुं प्रत्युत्पन्नइति युज्यते । नाऽब्धातुमतीतइति युज्यते । नाऽब्धातुमनागतइति युज्यते । नाऽब्धातुं प्रत्युत्पन्नइति युज्यते । न तेजोधातुमतीतइति युज्यते । न तेजोधातुमनागतइति युज्यते । न तेजोधातुं प्रत्यु-त्पन्नइति युज्यते । न वायुधातुमतीतइति युज्यते । न वायुधातु-मनागतइति युज्यते । न वायुधातुं प्रत्युत्पन्नइति युज्यते । नाऽऽ-

काशधातुमतीतइति युज्यते। नाऽऽकाशधातुमनागतइति युज्यते। नाऽऽकाशधातुं प्रत्युत्पन्नइति युज्यते। न विज्ञानधातुमतीतइति युज्यते। न विज्ञानधातुमनागतइति युज्यते। न विज्ञानधातुं प्रत्युत्पन्नइति युज्यते। नाऽविद्यामतीतेति युज्यते। नाऽविद्यामनागतेति युज्यते। नाऽविद्यां प्रत्युत्पन्नेति युज्यते। न संस्कारानतीताइति युज्यते। न संस्काराननागताइति युज्यते। न संस्कारान् प्रत्युत्पन्नाइति युज्यते। न विज्ञानमतीतमिति युज्यते। न विज्ञानमनागतमिति युज्यते। न विज्ञानं प्रत्युत्पन्नमिति युज्यते। न नामरूपमतीतमिति युज्यते। न नामरूपमनागतमिति युज्यते। न नामरूपं प्रत्युत्पन्नमिति युज्यते। न षड़ायतनमतीतमिति युज्यते। न षड़ायतनमनागतमिति युज्यते। न षड़ायतनं प्रत्युत्पन्नमिति युज्यते। न स्पर्शमतीतमिति युज्यते। न स्पर्शमनागतमिति युज्यते। न स्पर्शं प्रत्युत्पन्नमिति युज्यते। न वेदनामतीतेति युज्यते। न वेदनामनागतेति युज्यते। न वेदनां प्रत्युत्पन्नेति युज्यते। न तृष्णामतीतेति युज्यते। न तृष्णामनागतेति युज्यते। न तृष्णां प्रत्युत्पन्नेति युज्यते। नोपादानमतीतमिति युज्यते। नोपादानमनागतमिति युज्यते। नोपादानं प्रत्युत्पन्नमिति युज्यते। न भव*मतीतमिति युज्यते। न भवमनागतमिति युज्यते। न भवं प्रत्युत्पन्नमिति युज्यते। न जातिमतीतेति युज्यते। न जातिमनागतेति युज्यते। न जातिं प्रत्युत्पन्नेति युज्यते। न जरामरणमतीत-

---

* भवशब्दविशेषणानामतीतादिशब्दानां क्लीवलिङ्गे प्रयोगः पुस्तकपञ्चके दृश्यते।

मिति युज्यते। न जरामरणमनागतमिति युज्यते। न जरामर प्रत्युत्पन्नमिति युज्यते। न दानपारमितामतीतेति युज्यते। दानपारमितामनागतेति युज्यते। न दानपारमितां प्रत्युत्पन्ने युज्यते। न शीलपारमितामतीतेति युज्यते। न शीलपारमिता मनागतेति युज्यते। न शीलपारमितां प्रत्युत्पन्नेति युज्यते। न क्षान्ति पारमितामतीतेति युज्यते। न क्षान्तिपारमितामनागतेति युज्यते न क्षान्तिपारमितां प्रत्युत्पन्नेति युज्यते। न वीर्य्यपारमितामतीतेति युज्यते। न वीर्य्यपारमितामनागतेति युज्यते। न वीर्य्यपारमित प्रत्युत्पन्नेति युज्यते। न ध्यानपारमितामतीतेति युज्यते। न ध्यानपारमितामनागतेति युज्यते। न ध्यानपारमितां प्रत्युत्पन्नेति युज्यते। न प्रज्ञापारमितामतीतेति युज्यते। न प्रज्ञापारमिता-मनागतेति युज्यते। न प्रज्ञापारमितां प्रत्युत्पन्नेति युज्यते। नाऽध्यात्मशून्यतामतीतेति युज्यते। नाऽध्यात्मशून्यतामनागतेति युज्यते। नाऽध्यात्मशून्यतां प्रत्युत्पन्नेति युज्यते। न वहिर्द्धाशून्य-तामतीतति युज्यते। न वहिर्द्धाशून्यतामनागतेति युज्यते। न वहिर्द्धाशून्यतां प्रत्युत्पन्नेति युज्यते। नाऽध्यात्मवहिर्द्धाशून्यतामती-तेति युज्यते। नाऽध्यात्मवहिर्द्धाशून्यतामनागतेत्ति युज्यते। नाऽध्यात्मवहिर्द्धाशून्यतां प्रत्युत्पन्नेति युज्यते। न शून्यताशून्यता-मतीतेति युज्यते। न शून्यताशून्यतामनागतेति युज्यते। न शून्यताशून्यतां प्रत्युत्पन्नेति युज्यते। न महाशून्यतामतीतेति युज्यते न महाशून्यतामनागतेति युज्यते। न महाशून्यतां प्रत्युत्पन्नेति युज्यते। न परमार्थशून्यतामतीतेति युज्यते। न परमार्थशून्य-

तामनागतेति युज्यते। न परमार्थशून्यतां प्रत्युत्पन्नेति युज्यते। न संस्कृतशून्यतामतीतेति युज्यते। न संस्कृतशून्यतामनागतेति युज्यते। न संस्कृतशून्यतां प्रत्युत्पन्नेति युज्यते। नाऽसंस्कृतशून्यतामतीतेति युज्यते। नाऽसंस्कृतशून्यतामनागतेति युज्यते। नाऽसंस्कृतशून्यतां प्रत्युत्पन्नेति युज्यते। नाऽत्यन्तशून्यतामतीतेति युज्यते। नाऽत्यन्तशून्यतामनागतेति युज्यते। नाऽत्यन्तशून्यतां प्रत्युत्पन्नेति युज्यते। नाऽनवराऽग्रशून्यतामतीतेति युज्यते। नाऽनवराऽग्रशून्यतामनागतेति युज्यते। नाऽनवराऽग्रशून्यतां प्रत्युत्पन्नेति युज्यते। नाऽनवकारशून्यतामतीतेति युज्यते। नाऽनवकारशून्यतामनागतेति युज्यते। नाऽनवकारशून्यतां प्रत्युत्पन्नेति युज्यते। न प्रकृतिशून्यतामतीतेति युज्यते। न प्रकृतिशून्यतामनागतेति युज्यते। न प्रकृतिशून्यतां प्रत्युत्पन्नेति युज्यते। न सर्व्वधर्म्मशून्यतामतीतेति युज्यते। न सर्व्वधर्म्मशून्यतामनागतेति युज्यते। न सर्व्वधर्म्मशून्यतां प्रत्युत्पन्नेति युज्यते। न स्वलक्षणशून्यतामतीतेति युज्यते। न स्वलक्षणशून्यतामनागतेति युज्यते। न स्वलक्षणशून्यतां प्रत्युत्पन्नेति युज्यते। नाऽनुपलम्भशून्यतामतीतेति युज्यते। नाऽनुपलम्भशून्यतामनागतेति युज्यते। नाऽनुपलम्भशून्यतां प्रत्युत्पन्नेति युज्यते। नाऽभावशून्यतामतीतेति युज्यते। नाऽभावशून्यतामनागतेति युज्यते। नाऽभावशून्यतां प्रत्युत्पन्नेति युज्यते। न स्वभावशून्यतामतीतेति युज्यते। न स्वभावशून्यतामनागतेति युज्यते। न स्वभावशून्यतां प्रत्युत्पन्नेति युज्यते। नाऽभावस्वभावशून्यतामतीतेति युज्यते। नाऽभावस्वभावशून्यतामनागतेति युज्यते। नाऽभावस्वभावशून्यतां प्रत्युत्पन्नेति युज्यते। न

स्मृत्युपस्थानान्यतीतानीति युज्यते । न स्मृत्युपस्थानान्यनागतानीति युज्यते । न स्मृत्युपस्थानानि प्रत्युत्पन्नानीति युज्यते । न सम्यक्प्रहाणान्यतीतानीति युज्यते । न सम्यक्प्रहाणान्यनागतानीति युज्यते । न सम्यक्प्रहाणानि प्रत्युत्पन्नानीति युज्यते । नर्द्धिपादा अतीता इति युज्यते । नर्द्धिपादा अनागता इति युज्यते । नर्द्धिपादाः प्रत्युत्पन्ना इति युज्यते । नेन्द्रियाण्यतीतानीति युज्यते । नेन्द्रियाण्यनागतानीति युज्यते । नेन्द्रियाणि प्रत्युत्पन्नानीति युज्यते । न बलान्यतीतानीति युज्यते । न बलान्यनागतानीति युज्यते । न बलानि प्रत्युत्पन्नानीति युज्यते । न बोध्यङ्गान्यतीतानीति युज्यते । न बोध्यङ्गान्यनागतानीति युज्यते । न बोध्यङ्गानि प्रत्युत्पन्नानीति युज्यते । नाऽऽर्योऽष्टाऽङ्गमार्गमतीतइति युज्यते । नाऽऽर्योऽष्टाऽङ्गमार्गमनागतइति युज्यते । नाऽर्योऽष्टाऽऽङ्गमार्गं प्रत्युत्पन्नइति युज्यते । नाऽऽर्य्यसत्यान्यतीतानीति युज्यते । नाऽऽर्य्यसत्यान्यनागतानीति युज्यते । नाऽऽर्य्यसत्यानि प्रत्युत्पन्नानीति युज्यते । न ध्यानान्यतीतानीति युज्यते । न ध्यानान्यनागतानीति युज्यते । न ध्यानानि प्रत्युत्पन्नानीति युज्यते । नाऽप्रमाणान्यतीतानीति युज्यते । नाऽप्रमाणान्यनागतानीति युज्यते । नाऽप्रमाणानि प्रत्युत्पन्नानीति युज्यते । नाऽऽरूप्यसमापत्तीरतीताइति युज्यते । नाऽऽरूप्यसमापत्तीरनागताइति युज्यते । नाऽऽरूप्यसमापत्तीः प्रत्युत्पन्नाइति युज्यते । नाऽष्टौविमोचानतीताइति युज्यते । नाऽष्टौविमोचाननागताइति युज्यते । नाऽष्टौविमोचान् प्रत्युत्पन्नाइति युज्यते । न नवाऽनुपूर्व्वविहारसमापत्तीरतीताइति युज्यते । न

नवाऽनुपूर्व्वविहारसमापत्तीरनागतादिति युज्यते। न नवाऽनुपूर्व्व-विहारसमापत्तीः प्रत्युत्पन्नादिति युज्यते। न शून्यताऽऽनिमित्ताऽप्र-णिहितविमोक्षसुखान्यतीतानीति युज्यते। न शून्यताऽऽनिमित्ताऽप्र-णिहितविमोक्षसुखान्यनागतानीति युज्यते। न शून्यताऽऽनिमित्ता-ऽप्रणिहितविमोक्षसुखानि प्रत्युत्पन्नानीति युज्यते। नाऽभिज्ञा-अतीतादिति युज्यते। नाऽभिज्ञाअनागतादिति युज्यते। नाऽभिज्ञाः प्रत्युत्पन्नादिति युज्यते। न समाधीनतीतादिति युज्यते। न समा-धीननागतादिति युज्यते। न समाधीन् प्रत्युत्पन्नादिति युज्यते। न धारणीमुखान्यतीतानीति युज्यते। न धारणीमुखान्यनागतानीति युज्यते। न धारणीमुखानि प्रत्युत्पन्नानीति युज्यते। न दश तथा-गतबलान्यतीतानीति युज्यते। न दश तथागतबलान्यनागतानीति युज्यते। न दश तथागतबलानि प्रत्युत्पन्नानीति युज्यते। न चत्वारि वैशारद्यान्यतीतानीति युज्यते। न चत्वारि वैशारद्यान्यना-गतानीति युज्यते। न चत्वारि वैशारद्यानि प्रत्युत्पन्नानीति युज्यते। न चतस्रः प्रतिसंविदोऽतीतादिति युज्यते। न चतस्रः प्रतिसंविदो-ऽनागतादिति युज्यते। न चतस्रः प्रतिसंविदः प्रत्युत्पन्नादिति युज्यते। न महामैत्रीमतीतेति युज्यते। न महामैत्रीमनागतेति युज्यते। न महामैत्रीं प्रत्युत्पन्नेति युज्यते। न महाकरुणामतीतेति युज्यते। न महाकरुणामनागतेति युज्यते। न महाकरुणां प्रत्युत्पन्नेति युज्यते। नाऽष्टादशाऽऽवेणिकबुद्धधर्म्मानतीता इति युज्यते। नाऽष्टादशा-ऽऽवेणिकबुद्धधर्म्माननागतादिति युज्यते। नाऽष्टादशाऽऽवेणिकबुद्ध-धर्म्मान् प्रत्युत्पन्नादिति युज्यते। न स्रोतआपत्तिफलमतीतमिति

युज्यते। न स्रोतआपत्तिफलमनागतमिति युज्यते। न स्रोतआपत्तिफलं प्रत्युत्पन्नमिति युज्यते। न सकृदागामिफलमतीतमिति युज्यते। न सकृदागामिफलमनागतमिति युज्यते। न सकृदागामिफलं प्रत्युत्पन्नमिति युज्यते। नाऽनागामिफलमतीतमिति युज्यते। नाऽनागामिफलमनागतमिति युज्यते। नाऽनागामिफलं प्रत्युत्पन्नमिति युज्यते। नाऽर्हत्त्वमतीतमिति युज्यते। नाऽर्हत्त्वमनागतमिति युज्यते। नाऽर्हत्त्वं प्रत्युत्पन्नमिति युज्यते। न प्रत्येकबोधिमतीतेति युज्यते। न प्रत्येकबोधिमनागतेति युज्यते। न प्रत्येकबोधिं प्रत्युत्पन्नेति युज्यते। न मार्गाऽऽकारज्ञतामतीतेति युज्यते। न मार्गाऽऽकारज्ञतामनागतेति युज्यते। न मार्गाऽऽकारज्ञतां प्रत्युत्पन्नेति युज्यते। न सर्व्वाऽऽकारज्ञतामतीतेति युज्यते। न सर्व्वाऽऽकारज्ञतामनागतेति युज्यते। न सर्व्वाऽऽकारज्ञतां प्रत्युत्पन्नेति युज्यते। एवञ्खल्वञ्शारद्वतीपुत्र बोधिसत्त्वोमहासत्त्वः प्रज्ञापारमितायां युक्तः इति वक्तव्यः।

पुनरपरं शारद्वतीपुत्र बोधिसत्त्वोमहासत्त्वः प्रज्ञापारमितायां चरन् न रूपं सारमिति न दुर्व्वलमिति युज्यते। न वेदनां सारेति न दुर्व्वलेति युज्यते। न संज्ञां सारेति न दुर्व्वलेति युज्यते। न संस्कारान्सारादति न दुर्व्वलादति युज्यते। न विज्ञानं सारमिति न दुर्व्वलमिति युज्यते। न चक्षुः सारमिति न दुर्व्वलमिति युज्यते। न श्रोत्रं सारमिति न दुर्व्वलमिति युज्यते। न घ्राणं सारमिति न दुर्व्वलमिति युज्यते। न जिह्वां सारेति न दुर्व्वलेति युज्यते। न कायं सारमिति न दुर्व्वलमिति युज्यते। न मनः

सारमिति न दुर्ब्बलमिति युज्यते। न रूपं सारमिति न दुर्ब्बलमिति युज्यते। न शब्दं सारमिति न दुर्ब्बलमिति युज्यते। न गन्धं सारमिति न दुर्ब्बलमिति युज्यते। न रसं सारमिति न दुर्ब्बलमिति युज्यते। न स्पर्शं सारमिति न दुर्ब्बलमिति युज्यते। न धर्मान् सारा इति न दुर्ब्बला इति युज्यते। न चक्षुर्विज्ञानं सारमिति न दुर्ब्बलमिति युज्यते। न श्रोत्रविज्ञानं सारमिति न दुर्ब्बलमिति युज्यते। न घ्राणविज्ञानं सारमिति न दुर्ब्बलमिति युज्यते। न जिह्वाविज्ञानं सारमिति न दुर्ब्बलमिति युज्यते। न कायविज्ञानं सारमिति न दुर्ब्बलमिति युज्यते। न मनोविज्ञानं सारमिति न दुर्ब्बलमिति युज्यते। न चक्षुःसंस्पर्शः* सारमिति न दुर्ब्बलमिति वा युज्यते। न श्रोत्रसंस्पर्शः सारमिति न दुर्ब्बलमिति युज्यते। न घ्राणसंस्पर्शः सारमिति वा न दुर्ब्बलमिति वा युज्यते। न जिह्वासंस्पर्शः सारमिति न दुर्ब्बलमिति युज्यते। न कायसंस्पर्शः सारमिति न दुर्ब्बलमिति युज्यते। न मनःसंस्पर्शः सारमिति न दुर्ब्बलमिति युज्यते। न चक्षुःसंस्पर्शप्रत्यया वेदना सारेति न दुर्ब्बलेति युज्यते। न श्रोत्रसंस्पर्शप्रत्यया वेदना सारेति न दुर्ब्बलेति युज्यते। न घ्राणसंस्पर्शप्रत्यया वेदना सारेति न दुर्ब्बलेति युज्यते। न

* चपुस्तके, ख, ग, घ पुस्तकेषु च संस्पर्शविशेषणयोः सारदुर्ब्बलशब्दयोः पुंसिप्रयोगदृश्यते। रूपवेदनादिशब्दानां द्वितीयान्तत्वं पूर्व्वं निर्दिष्टं संस्पर्शादिशब्दानाञ्च प्रथमान्तत्वं। दृग् केनाभिप्रायेणेदृग् वैषम्यं यन्त्रयता कृतं तन्नाऽनुभवपथमधिरोहति; अथवा लेखकदोषः प्रसिद्धिमागतः।

जिह्वासंस्पर्शप्रत्यया वेदना सारेति न दुर्ब्बलेति युज्यते । न काय संस्पर्शप्रत्यया वेदना सारेति न दुर्ब्बलेति युज्यते। न मनः संस्पर्शप्रत्यय वेदना सारेति न दुर्ब्बलेति युज्यते । न पृथिवीधातुः सारइति न दुर्ब्बलइति युज्यते। नाऽब्धातुः सारइति न दुर्ब्बलइति युज्यते। न तेजोधातुः सारइति न दुर्ब्बलइति युज्यते। न वायुधातुः सारइति न दुर्ब्बलइति युज्यते। नाऽऽकाशधातुः सारइति न दुर्ब्बलइति युज्यते । न विज्ञानधातुः सारइति न दुर्ब्बलइति युज्यते। नाऽविद्यासारेति न दुर्ब्बलेति युज्यते। न संस्कारान् साराइति न दुर्ब्बलाइति युज्यते । न विज्ञानं सारमिति न दुर्ब्बलमिति युज्यते। न नामरूपं सारमिति न दुर्ब्बलमिति युज्यते। न षडायतनं सारमिति न दुर्ब्बलमिति युज्यते । न स्पर्शः सारइति न दुर्ब्बलइति युज्यते। न वेदनासारेति न दुर्ब्बलेति युज्यते। न तृष्णासारेति न दुर्ब्बलेति युज्यते। नोपादानं सारमिति न दुर्ब्बलमिति युज्यते। न भवं सारमिति न दुर्ब्बलमिति युज्यते। न जातिं सारेति न दुर्ब्बलेति युज्यते। न जरामरणं सारमिति न दुर्ब्बलमिति युज्यते। न दानपारमितासारेति न दुर्ब्बलेति युज्यते । न शीलपारमिता सारेति न दुर्ब्बलेति युज्यते। न क्षान्तिपारमिता सारेति न दुर्ब्बलेति युज्यते । न वीर्य्यपारमिता सारेति न दुर्ब्बलेति युज्यते । न ध्यानपारमिता सारेति न दुर्ब्बलेति युज्यते। न प्रज्ञापारमिता सारेति न दुर्ब्बलेति युज्यते। नाऽध्यात्मशून्यता सारेति न दुर्ब्बलेति युज्यते। न बहिर्द्धाशून्यता सारेति न दुर्ब्बलेति युज्यते। नाऽध्यात्मबहिर्द्धाशून्यता सारेति न दुर्ब्बलेति युज्यते। न शून्यताशून्यता सारेति

न दुर्बलेति युज्यते । न महाशून्यता सारेति न दुर्बलेति युज्यते न परमार्थशून्यता सारेति न दुर्बलेति युज्यते । न संस्कृतशून्यता सारेति न दुर्बलेति युज्यते । नाऽसंस्कृतशून्यता सारेति न दुर्बले युज्यते । नाऽत्यन्तशून्यता सारेति न दुर्बलेति युज्यते । नाऽनवराग्र शून्यता सारेति न दुर्बलेति युज्यते । नाऽनवकारशून्यता सारेति दुर्बलेति युज्यते । न प्रकृतिशून्यता सारेति न दुर्बलेति युज्यते । सर्वधर्मशून्यतासारेति न दुर्बलेति युज्यते । न स्वलक्षणशून्यत सारेति न दुर्बलेति युज्यते । नाऽनुपलम्भशून्यता सारेति न दुर्बले युज्यते । नाऽभावशून्यता सारेति न दुर्बलेति युज्यते । न स्वभावशू न्यता सारेति न दुर्बलेति युज्यते । नाऽभावस्वभावशून्यता सारेति दुर्बलेति युज्यते । न स्मृत्युपस्थानानि साराणीति न दुर्बलानी युज्यते । न सम्यक्प्रहाणानि साराणीति न दुर्बलानीति युज्यते द्धिपादाः सारा इति न दुर्बला इति युज्यते । नेन्द्रियाणिसाराणी न दुर्बलानीति युज्यते । न बलानि सारानीति न दुर्बला नीति युज्यते । न बोध्यङ्गानिसाराणीति न दुर्बलानीति युज्यते नार्य्याऽऽष्टाङ्गमार्गः सार इति न दुर्बल इति युज्यते । नाऽर्य्यसत्या साराणीति न दुर्बलानीति युज्यते । न ध्यानानि साराणीति दुर्बलानीति युज्यते । नाऽप्रमाणानि साराणीति न दुर्बलानी युज्यते । नाऽऽरूप्यसमापत्तीः सारा इति न दुर्बला इति युज्यते नाऽष्टौविमोक्षाः सारा इति न दुर्बला इति युज्यते । न नवाऽनुपूर्व्व विहारसमापत्तीः सारा इति न दुर्बला इति युज्यते । न शून्यता सारा इति न दुर्बलेति युज्यते । न समाधयः सारा इति

दुर्ब्बलाइति युज्यते। नाऽऽनिमित्तं सारमिति न दुर्ब्बलमिति युज्यते। नाऽप्रणिहितं सारमिति न दुर्ब्बलमिति युज्यते। नाऽभिज्ञाः साराइति न दुर्ब्बलाइति युज्यते। न धारणीमुखानि साराणीति न दुर्ब्बलानीति युज्यते। न दशतथागतबलानि साराणीति न दुर्ब्बलानीति युज्यते। न चत्वारिवैशारद्यानि साराणीति न दुर्ब्बलानीति युज्यते। न चतस्रः प्रतिसम्बिदः साराइति न दुर्ब्बलाइति युज्यते। न महामैत्री सारेति न दुर्ब्बलेति युज्यते। न महाकरुणा सारेति न दुर्ब्बलेति युज्यते। नाऽष्टादशाऽऽवेणिकबुद्धधर्म्माः साराइति न दुर्ब्बलाइति युज्यते। न स्रोतआपत्तिफलं सारमिति न दुर्ब्बलमिति युज्यते। न सकृदागामिफलं सारमिति न दुर्ब्बलमिति युज्यते। नाऽनागामिफलं सारमिति न दुर्ब्बलमिति युज्यते। नाऽर्हत्त्वं सारमिति न दुर्ब्बलमिति युज्यते। न प्रत्येकबोधिं सारेति न दुर्ब्बलेति युज्यते। न मार्गाऽऽकारज्ञता सारेति न दुर्ब्बलेति युज्यते। न सर्व्वाऽऽकारज्ञता सारेति न दुर्ब्बलेति युज्यते। एवञ्शारद्वतीपुत्रबोधिसत्त्वोमहासत्त्वः प्रज्ञापारमितायां युक्तइति वक्तव्यः।

पुनरपरं शारद्वतीपुत्र बोधिसत्त्वोमहासत्त्वः प्रज्ञापारमितायां चरन् न रूपमस्तीति न नाऽस्तीति युज्यते न वियुज्यते। न वेदनाऽस्तीति न नाऽस्तीति युज्यते न वियुज्यते। न संज्ञाऽस्तीति न नाऽस्तीति युज्यते न वियुज्यते। न संस्काराः* अस्तीति

* न संस्कारा अस्तीति न नास्तीति पाठः पुस्तकपञ्चके दृश्यते। सन्तीति न सन्तीति पाठोऽस्माकं।

न नास्तीति युज्यते न वियुज्यते । न विज्ञानमस्तीति न
नास्तीति युज्यते न वियुज्यते । न चक्षुरस्तीति न नास्तीति
युज्यते न वियुज्यते । न श्रोत्रमस्तीति न नास्तीति युज्यते
न वियुज्यते । न घ्राणमस्तीति न नास्तीति युज्यते न वियुज्यते ।
न जिह्वामस्तीति* नास्तीति युज्यते न वियुज्यते । न काय-
मस्तीति न नास्तीति युज्यते न वियुज्यते । न मनोऽस्तीति
न नास्तीति युज्यते न वियुज्यते । न रूपमस्तीति न नास्तीति
युज्यते न वियुज्यते । न शब्दोऽस्तीति न नास्तीति युज्यते न
वियुज्यते । न गन्धोऽस्तीति न नास्तीति युज्यते न वियुज्यते । न
रसोऽस्तीति न नास्तीति युज्यते न वियुज्यते । न स्पर्शोऽस्तीति
न नास्तीति युज्यते न वियुज्यते । न धर्मोऽस्तीति न
नास्तीति युज्यते न वियुज्यते । न चक्षुर्विज्ञानमस्तीति न नास-
स्तीति युज्यते न वियुज्यते । न श्रोत्रविज्ञानमस्तीति न नास्तीति
युज्यते न वियुज्यते । न घ्राणविज्ञानमस्तीति न नास्तीति
युज्यते न वियुज्यते । न जिह्वाविज्ञानमस्तीति न नास्तीति
युज्यते न वियुज्यते । न कायविज्ञानमस्तीति न नास्तीति युज्यते
न वियुज्यते । न मनोविज्ञानमस्तीति न नास्तीति युज्यते न
वियुज्यते । न चक्षुःसंस्पर्शोऽस्तीति न नास्तीति युज्यते न वियु-
ज्यते । न श्रोत्रसंस्पर्शोऽस्तीति न नास्तीति युज्यते न वियुज्यते ।
न घ्राणसंस्पर्शोऽस्तीति न नास्तीति युज्यते न वियुज्यते । न

---

* एष पाठः पुस्तकपञ्चके दृश्यते । जिह्वेति पाठोयुक्तः प्रतिभाति ।

न जिह्वासंस्पर्शोऽस्तीति न नाऽस्तीति युज्यते न वियुज्यते। न कायसंस्पर्शोऽस्तीति न नाऽस्तीति युज्यते न वियुज्यते। न मनः संस्पर्शोऽस्तीति न नाऽस्तीति युज्यते न वियुज्यते। न चक्षुः संस्पर्शप्रत्यया वेदनाऽस्तीति न नाऽस्तीति युज्यते न वियुज्यते। न श्रोत्रसंस्पर्शप्रत्यया वेदनाऽस्तीति न नाऽस्तीति युज्यते न वियुज्यते। न घ्राणसंस्पर्शप्रत्यया वेदनाऽस्तीति न नाऽस्तीति युज्यते न वियु-ज्यते। न जिह्वासंस्पर्शप्रत्यया वेदनाऽस्तीति न नाऽस्तीति युज्यते न वियुज्यते। न कायसंस्पर्शप्रत्यया वेदनाऽस्तीति न नाऽस्तीति युज्यते न वियुज्यते। न मनः संस्पर्शप्रत्यया वेदनाऽस्तीति न नाऽस्तीति युज्यते न वियुज्यते। न पृथिवीधातुरस्तीति न नाऽस्तीति युज्यते न वियुज्यते। नाऽब्धातुरस्तीति न नाऽस्तीति युज्यते न वियुज्यते। न तेजोधातुरस्तीति न नाऽस्तीति युज्यते न वियु-ज्यते। न वायुधातुरस्तीति न नाऽस्तीति युज्यते न वियुज्यते। नाऽऽकाशधातुरस्तीति न नाऽस्तीति युज्यते न वियुज्यते। न विज्ञानधातुरस्तीति न नाऽस्तीति युज्यते न वियुज्यते। नाऽवि-द्याऽस्तीति न नाऽस्तीति युज्यते न वियुज्यते। न संस्कारा अस्तीति न नाऽस्तीति युज्यते न वियुज्यते। न विज्ञानमस्तीति न नाऽस्तीति युज्यते न वियुज्यते। न नामरूपमस्तीति न नाऽस्तीति युज्यते न वियुज्यते। न षडायतनमस्तीति न नाऽस्तीति युज्यते न वियुज्यते। न स्पर्शोऽस्तीति न नाऽस्तीति युज्यते न वियुज्यते। न वेदनाऽस्तीति न नाऽस्तीति युज्यते न वियुज्यते। न तृष्णा-ऽस्तीति न नाऽस्तीति युज्यते न वियुज्यते। नोपादानमस्तीति

न नाऽस्तीति युज्यते न वियुज्यते। न भवोऽस्तीति न नाऽस्तीति युज्यते न वियुज्यते। न जातिरस्तीति न नाऽस्तीति युज्यते न वियुज्यते। न जरामरणमस्तीति न नाऽस्तीति युज्यते न वियुज्यते। न दानपारमिताऽस्तीति न नाऽस्तीति युज्यते न वियुज्यते। न शीलपारमिताऽस्तीति न नाऽस्तीति युज्यते न वियुज्यते। न क्षान्तिपारमिताऽस्तीति न नाऽस्तीति युज्यते न वियुज्यते। न वीर्य्यपारमिताऽस्तीति न नाऽस्तीति युज्यते न वियुज्यते। न ध्यानपारमिताऽस्तीति न नाऽस्तीति युज्यते न वियुज्यते। न प्रज्ञापारमिताऽस्तीति न नाऽस्तीति युज्यते न वियुज्यते। नाऽध्यात्मशून्यताऽस्तीति न नाऽस्तीति युज्यते न वियुज्यते। न वहिर्द्धाशून्यताऽस्तीति न नाऽस्तीति युज्यते न वियुज्यते। नाऽध्यात्मवहिर्द्धाशून्यताऽस्तीति न नाऽस्तीति युज्यते न वियुज्यते। न शून्यताशून्यताऽस्तीति न नाऽस्तीति युज्यते न वियुज्यते। न महाशून्यताऽस्तीति न नास्तीति युज्यते न वियुज्यते। न परमार्थशून्यताऽस्तीति न नाऽस्तीति युज्यते न वियुज्यते। न संस्कृतशून्यताऽस्तीति न नाऽस्तीति युज्यते न वियुज्यते। नाऽसंस्कृतशून्यताऽस्तीति न नाऽस्तीति युज्यते न वियुज्यते। नाऽत्यन्तशून्यताऽस्तीति न नाऽस्तीति युज्यते न वियुज्यते। नाऽनवराग्रशून्यताऽस्तीति न नाऽस्तीति युज्यते न वियुज्यते। नाऽनवकारशून्यताऽस्तीति न नाऽस्तीति युज्यते न वियुज्यते। न प्रकृतिशून्यताऽस्तीति न नाऽस्तीति युज्यते न वियुज्यते। न सर्व्वधर्मशून्यताऽस्तीति न नाऽस्तीति युज्यते न

वियुज्यते । न स्वलक्षणशून्यताऽस्तीति न नाऽस्तीति युज्यते न वियुज्यते । नाऽनुपलम्भशून्यताऽस्तीति न नाऽस्तीति युज्यते न वियुज्यते । नाऽभावशून्यताऽस्तीति न नाऽस्तीति युज्यते न वियुज्यते । न स्वभावशून्यताऽस्तीति न नाऽस्तीति युज्यते न वियुज्यते । नाऽभावस्वभावशून्यताऽस्तीति न नाऽस्तीति युज्यते न वियुज्यते । न स्मृत्युपस्थानान्यस्तीति* न नाऽस्तीति युज्यते न वियुज्यते । न सम्यक्प्रहाणान्यस्तीति न नाऽस्तीति युज्यते न वियुज्यते । नर्द्धिपादाअस्तीति न नाऽस्तीति युज्यते न वियुज्यते । नेन्द्रियाण्यस्तीति न नाऽस्तीति युज्यते न वियुज्यते । न बलान्यस्तीति न नाऽस्तीति युज्यते न वियुज्यते । न बोध्यङ्गान्यस्तीति न नाऽस्तीति युज्यते न वियुज्यते । नाऽऽर्योऽष्टाङ्गमार्गोऽस्तीति न नाऽस्तीति युज्यते न वियुज्यते । नाऽऽर्यसत्यान्यस्तीति न नाऽस्तीति युज्यते न वियुज्यते । न ध्यानान्यस्तीति न नाऽस्तीति युज्यते न वियुज्यते । नाऽप्रमाणान्यस्तीति न नाऽस्तीति युज्यते न वियुज्यते । नाऽऽरूप्यसमापत्तयोऽस्तीति न नाऽस्तीति युज्यते न वियुज्यते । नाऽष्टौविमोक्षा अस्तीति न नाऽस्तीति युज्यते न वियुज्यते । न नवाऽनुपूर्व्वविहारसमापत्तयोऽस्तीति न नाऽस्तीति युज्यते न वियुज्यते । न शून्यताऽऽनिमित्ताऽप्रणिहितविमोक्षमुखान्यस्तीति न नाऽस्तीति युज्यते न वियुज्यते । नाऽभिज्ञाः अस्तीति न नाऽस्तीति युज्यते न

* अस्ति सत्त्वे रुषोक्तावू इत्यमरोक्तेर्विद्यमानतावाचिनाऽस्तीत्यव्ययेनोपपादनीयानि बहुवचनान्तैः पदैः सामानाधिकरण्यानि । क्रियापदत्वे त्वसङ्गतिरेव स्यादस्तीत्यस्य ।

विमुच्यते । न समाधयोऽस्तीति न नास्तीति युज्यते न विमुच्यते । न धारणीमुखान्यस्तीति न नास्तीति युज्यते न वियुज्यते । न तथागतबलान्यस्तीति न नास्तीति युज्यते न वियुज्यते । न चत्वारि वैशारद्यान्यस्तीति न नास्तीति युज्यते न वियुज्यते । न चतस्रः प्रतिसम्विदोऽस्तीति न नास्तीति युज्यते न वियुज्यते । न महामैत्र्यस्तीति न नास्तीति युज्यते न वियुज्यते । न महाकरुणाऽस्तीति न नास्तीति युज्यते न वियुज्यते। नाऽष्टादशाऽऽवेणिकबुद्धधर्मा अस्तीति न नास्तीति युज्यते न वियुज्यते । न स्रोतआपत्तिफलमस्तीति न नास्तीति युज्यते न वियुज्यते । न सकृदागामिफलमस्तीति न नास्तीति युज्यते न वियुज्यते । नाऽनागामिफलमस्तीति न नास्तीति युज्यते न वियुज्यते । नाऽर्हत्त्वमस्तीति न नास्तीति युज्यते न वियुज्यते। न प्रत्येकबोधिरस्तीति न नास्तीति युज्यते न वियुज्यते। न मार्गाऽऽकारज्ञताऽस्तीति न नास्तीति युज्यते न वियुज्यते । न सर्व्वाऽऽकारज्ञताऽस्तीति न नास्तीति युज्यते न वियुज्यते[१]। एवम्भरद्वाजकारद्वतीपुत्र बोधिसत्त्वोमहासत्त्वः प्रज्ञापारमितायां युक्तइति वक्तव्यः ।

पुनरपरं शारद्वतीपुत्र बोधिसत्त्वोमहासत्त्वः प्रज्ञापारमितायां चरन् न दानपारमितायाः कृते प्रज्ञापारमितायां चरति । न शील पारमितायाः कृते प्रज्ञापारमितायां चरति । न क्षान्तिपारमितायाः

(१) स प्रज्ञापारमितायां चरतीति नोपैति न चरतीति नोपैति चरति न चरतीति नोपैति नैव चरति न चरतीति नोपैति । एष पाठः ख, ग, घ पुस्तकेऽधिकः । प्रक्रान्ताऽननुरूपतया प्रामादिकः प्रतिभाति ।

कृते प्रज्ञापारमितायां चरति । न वीर्य्यपारमितायाः कृते प्रज्ञापारमितायां चरति । न ध्यानपारमितायाः कृते प्रज्ञापारमितायां चरति । न प्रज्ञापारमितायाः कृते प्रज्ञापारमितायां चरति । नाऽध्यात्मशून्यतायाः कृते प्रज्ञापारमितायां चरति । न बहिर्द्धाशून्यतायाः कृते प्रज्ञापारमितायां चरति । नाऽध्यात्मबहिर्द्धाशून्यतायाः कृते प्रज्ञापारमितायां चरति । न शून्यताशून्यतायाः कृते प्रज्ञापारमितायां चरति । न महाशून्यतायाः कृते प्रज्ञापारमितायां चरति । न परमाऽर्थशून्यतायाः कृते प्रज्ञापारमितायां चरति । न संस्कृतशून्यतायाः कृते प्रज्ञापारमितायां चरति। नाऽसंस्कृतशून्यतायां कृते प्रज्ञापारमितायां चरति । नाऽत्यन्तशून्यतायाः कृते प्रज्ञापारमितायां चरति । नाऽनवराऽग्रशून्यतायाः कृते प्रज्ञापारमितायां चरति । नाऽनवकारशून्यतायाः कृते प्रज्ञापारमितायां चरति। न प्रकृतिशून्यतायाः कृते प्रज्ञापारमितायां चरति। न सर्व्वधर्म्मशून्यतायाः कृते प्रज्ञापारमितायां चरति । न स्वलक्षणशून्यतायाः कृते प्रज्ञापारमितायां चरति। नाऽनुपलम्भशून्यतायाः कृते प्रज्ञापारमितायां चरति । नाऽभावशून्यतायाः कृते प्रज्ञापारमितायां चरति । न स्वभावशून्यतायाः कृते प्रज्ञापारमितायां चरति। नाऽभावस्वभावशून्यतायाः कृते प्रज्ञापारमितायां चरति । नाऽवैवर्त्त्यभूमेः कृते प्रज्ञापारमितायां चरति । न सत्त्वपरिपाकहेतोः प्रज्ञापारमितायां चरति । न बुद्धक्षेत्रपरिशोधनार्थं प्रज्ञापारमितायां चरति। न स्मृत्युपस्थानानां कृते प्रज्ञापारमितायां चरति। न सम्यक्प्रहाणानां कृते प्रज्ञापारमितायां चरति । नर्द्धिपादानां

कृते प्रज्ञापारमितायां चरति । नेन्द्रियाणां कृते प्रज्ञापारमितायां चरति । न बलानां कृते प्रज्ञापारमितायां चरति । न बोध्यङ्गानां कृते प्रज्ञापारमितायां चरति । नाऽऽर्य्याऽष्टाङ्गमार्गस्य कृते प्रज्ञापारमितायां चरति । नाऽर्य्यसत्यानां कृते प्रज्ञापारमितायां चरति । न ध्यानानां कृते प्रज्ञापारमितायां चरति । नाऽप्रमाणानां कृते प्रज्ञापारमितायां चरति । नाऽऽरूप्यसमापत्तीनां कृते प्रज्ञापारमितायां चरति । नाऽष्टानां विमोक्षाणां कृते प्रज्ञापारमितायां चरति । न नवाऽनुपूर्व्यविहारसमापत्तीनां कृते प्रज्ञापारमितायां चरति । न शून्यतायाः कृते प्रज्ञापारमितायां चरति । नाऽऽनिमित्तस्य कृते प्रज्ञापारमितायां चरति । नाऽप्रणिहितस्य कृते प्रज्ञापारमितायां चरति । नाऽभिज्ञानां कृते प्रज्ञापारमितायां चरति । न समाधीनां कृते प्रज्ञापारमितायां चरति । न धारणीमुखानां कृते प्रज्ञापारमितायां चरति। न दशानां तथागतबलानां कृते प्रज्ञापारमितायां चरति। न चतुर्णां वैशारद्यानां कृते प्रज्ञापारमितायां चरति । न चतसृणां प्रतिसम्विदां कृते प्रज्ञापारमितायां चरति । न महामैत्र्याः कृते-प्रज्ञापारमितायां चरति । न महाकरुणायाः कृते प्रज्ञापारमितायां चरति। नाऽष्टादशानामावेणिकानां बुद्धधर्म्माणां कृते प्रज्ञापारमितायां चरति । न तथतायाः कृते प्रज्ञापारमितायां चरति । न धर्म्मधातोः कृते प्रज्ञापारमितायां चरति । न भूतकोटेः कृते प्रज्ञापारमितायां चरति ।

तत्कस्य हेतोर्न हि बोधिसत्त्वोमहासत्त्वः प्रज्ञापारमितायां

चरति*। कस्यचिद्धर्मस्य सम्भेदं वा नानाकरणं वा विशेषं वा समनुपश्यति। एवञ्चरञ्छारद्वतीपुत्र वोधिसत्त्वोमहासत्त्वः प्रज्ञापारमितायां युक्त इति वक्तव्यः।

न स दिव्यस्य चक्षुषः कृते प्रज्ञापारमितायां चरति। न दिव्यस्य श्रोत्रस्य कृते प्रज्ञापारमितायां चरति। न परचित्तज्ञानस्य कृते प्रज्ञापारमितायां चरति। न पूर्व्वनिवासाऽनुस्मृतेः कृते प्रज्ञापारमितायां चरति। नर्द्धिविधेः कृते प्रज्ञापारमितायां चरति। नाऽऽस्रवक्षयज्ञानस्य कृते प्रज्ञापारमितायां चरति।

तत्कस्य हेतोः। तथाहि प्रज्ञापारमितायां चरन्नप्रज्ञापारमितामेव समनुपश्यति प्रागेव वोधिसत्त्वः कुत एव सर्व्वाकारं सर्व्वाऽभिज्ञा उपलप्स्यते। एवञ्चरञ्छारद्वतीपुत्र वोधिसत्त्वोमहासत्त्वः प्रज्ञापारमितायां युक्त इति वक्तव्यः।

पुनरपरं शारद्वतीपुत्र वोधिसत्त्वस्य महासत्त्वस्य प्रज्ञापारमितायां चरतो नैवं भवत्यहमृद्धिपादेषु स्थित्वा पूर्व्वस्यांदिशि गङ्गानदीवालुकोपमेषु लोकधातुषु ये वुद्धाभगवन्तस्तान् सर्व्वान् सत्करिष्यामि गुरूकरिष्यामि मानयिष्यामि पूजयिष्यामि। नैवं भवत्यहमृद्धिपादेषु स्थित्वा दक्षिणस्यांदिशि गङ्गानदीवालुकोपमेषु लोकधातुषु ये वुद्धाभगवन्तस्तान् सर्व्वान् सत्करिष्यामि गुरूकरिष्यामि मानयिष्यामि पूजयिष्यामि। नैवं भवत्यहमृद्धिपादेषु स्थित्वा पश्चिमायांदिशि गङ्गानदीवालुकोपमेषु लोकधातुषु ये [illegible] सर्व्वान् सत्करिष्यामि गुरूकरिष्यामि मानयि-

---

* चरन्निति पाठोयुक्तः।

ष्यामि पूजयिष्यामि। मैवं भवत्यहमृद्धिपादेषु स्थित्वा उत्तरपश्चिमा-
यां दिशि गङ्गानदीवालुकोपमेषु लोकधातुषु ये बुद्धाभगवन्तस्तान्
सर्वान् सत्करिष्यामि गुरुकरिष्यामि मानयिष्यामि पूजयिष्यामि।
मैवं भवत्यहमृद्धिपादेषु स्थित्वा उत्तरपूर्वस्यां दिशि गङ्गानदीवालु-
कोपमेषु लोकधातुषु ये बुद्धाभगवन्तस्तान् सर्वान् सत्करिष्यामि
गुरुकरिष्यामि मानयिष्यामि पूजयिष्यामि। मैवं भवत्यहमृद्धि-
पादेषु स्थित्वा पूर्वदक्षिणस्यां दिशि गङ्गानदीवालुकोपमेषु लोक-
धातुषु ये बुद्धाभगवन्तस्तान् सर्वान् सत्करिष्यामि गुरुकरिष्यामि
मानयिष्यामि पूजयिष्यामि। मैवं भवत्यहमृद्धिपादेषु स्थित्वा
दक्षिणपश्चिमायां दिशि गङ्गानदीवालुकोपमेषु लोकधातुषु ये
बुद्धाभगवन्तस्तान् सर्वान् सत्करिष्यामि गुरुकरिष्यामि मानयि-
ष्यामि पूजयिष्यामि। मैवं भवत्यहमृद्धिपादेषु स्थित्वा पश्चिमो-
त्तरस्यां दिशि गङ्गानदीवालुकोपमेषु लोकधातुषु ये बुद्धाभगवन्त-
स्तान् सर्वान् सत्करिष्यामि गुरुकरिष्यामि मानयिष्यामि पूजयि-
ष्यामि। मैवं भवत्यहमृद्धिपादेषु स्थित्वा उपरिष्टाद्दिशि गङ्गा-
नदीवालुकोपमेषु लोकधातुषु ये बुद्धाभगवन्तस्तान् सर्वान्
सत्करिष्यामि गुरुकरिष्यामि मानयिष्यामि पूजयिष्यामि। मैवं
भवत्यहमृद्धिपादेषु स्थित्वाऽधस्ताद्दिशि गङ्गानदीवालुकोपमेषु
लोकधातुषु ये बुद्धाभगवन्तस्तान् सर्वान् सत्करिष्यामि गुरु-
करिष्यामि मानयिष्यामि पूजयिष्यामि।

न चाऽप्येवं भवति यत्ते बुद्धाभगवन्तो भाषन्ते तत्सर्वं दिव्येन
श्रोत्रेण श्रोष्याम्यहं। न च लोकधातुषु सत्त्वानां चेतसैवचित्तं प्रज्ञा-

ष्याम्यहं । तेषां पूर्व्वनिवासमनुस्मरिष्याम्यहं । दिव्येन चक्षुषा तान् सर्व्वांश्च्यवमानानुपपद्यमानानुपपन्नांश्च द्रक्ष्यामि । अहमप्रमेया-ऽसंख्येयान् सत्त्वान् परिनिर्व्वापयिष्यामीति । एवं खलु शारद्वती-पुत्र बोधिसत्त्वोमहासत्त्व प्रज्ञापारमितां युक्तइति वक्तव्यः ।

एवं खलु शारद्वतीपुत्र बोधिसत्त्वस्य महासत्त्वस्य प्रज्ञापार-मितायां चरतोमाच्छिद्रान्वेष्यवतारगवेष्यवतारं न लभते । यान्यपि कानिचिल्लौकिकलोकोत्तराणिकरणीयानि तान्यपि सर्व्वाणि प्रद-लितानि भवन्ति । अनाभोगेनापरिकल्पितानि ये चाऽस्य केचि-ल्लौकिकाः क्लेशास्ते सर्व्वे प्रदलिता भवन्ति । ये च ते पूर्व्वस्यां-दिशि गङ्गानदीवालुकोपमेषु लोकधातुषु बुद्धाभगवन्तस्तेऽपि तं बोधिसत्त्वं महासत्त्वमारक्षन्ति । माश्रावकभूमिं वा प्रत्येकबुद्धभूमिं वा पतेदिति ।

ये च चत्वारो महाराजाः(१) त्रायस्त्रिंशादेवाः यामा(२)स्तु-

---

(१) विंशत्यधिकशतद्वयसंख्याते गणदेवताभेदे । अष्टौ वसव एकादश-रुद्रा द्वादशादित्याः इमे एव द्यावापृथिवीत्रयस्त्रिंशद्वै देवाः प्रजापतिश्चतु-स्त्रिंशस्तदेनं प्रजापतिम् । शतपथब्राह्मणः ।

(२) स्वायम्भव मनोः प्रसूतिनामिकायां कन्यायां दक्षप्रजापतिना यज्ञो दक्षिणा च दम्पतीजनितौ । यज्ञेन दक्षिणायां द्वादशयामसंज्ञकाः उत्पादिताः ।

यज्ञस्य दक्षिणायान्तु पुत्राद्वादशजज्ञिरे ।
यामा इति समाख्याता देवाः स्वायम्भुवेऽन्तरे ॥
तस्य पुत्रास्तु यज्ञस्य दक्षिणायां सभास्वराः । मार्कण्डेयपुराणम् ।
मन्वन्तराणि वक्ष्याम आद्यः स्वायम्भुवो मनुः ।
आग्नीध्राद्यास्तस्य सुताः यामनाम तदासुराः ॥ अग्निपुराणम् ।

[illegible]

(१) [illegible] ।
[illegible] ।
[illegible] ।
[illegible] । [illegible] ।
[illegible] ।
[illegible] । [illegible] ।

(२) [illegible] ।
[illegible] ।
[illegible] । मार्कण्डेयपुराणम् ।

(३) [illegible] । [illegible] ।

(४) [illegible] । [illegible] । [illegible] । [illegible] ।

[illegible] गणदेवताभेदे ।

[illegible] दमो दान्तः शान्तिर्ज्ञानं [illegible] ॥

कामक्रोधौ मदो मोहो [illegible] द्वादश [illegible] इमे ॥

[illegible] द्वादशमिते गणभेदे । [illegible] तथात्वम् ।

(५) [illegible] । [illegible] वेदनिन्दाख्ये पापे [illegible] ।
[illegible] गणदेवता भेदे ।

महासत्त्वमारक्षन्ति माहैव कश्चिद्बोधिसत्त्वस्य महासत्त्वस्याऽन्तरायं कार्षीदिति । ये केचित् कायिकादोषास्तेऽपि तस्य दृष्ट एवधर्म्मे सर्व्वेण सर्व्वं न भवन्ति । तत्कस्य हेतोस्तथाहि बोधिसत्त्वोमहासत्त्वः सर्व्वसत्वान् मैत्र्यास्फुरति । ये च ते दक्षिणस्यांदिशि गङ्गानदी-वालुकोपमेषु लोकधातुषु बुद्धाभगवन्तस्तेऽपि तं बोधिसत्त्वं महा-सत्त्वमारक्षन्ति माश्रावकभूमिं प्रत्येकबुद्धभूमिं वा पतेदिति ।

ये च चत्वारो महाराजास्त्रायस्त्रिंशाद्देवायामास्तुषितानिर्म्माण-रतयः परनिर्म्मितवशवर्त्तिनोदेवाः ब्रह्मकायिकाः ब्रह्मपुरोहिताः ब्रह्मपार्षद्याः महाब्रह्माः आभाः परीत्ताऽऽभाः अप्रमाणाऽऽभाः आभास्वराः शुभाः परीत्तशुभाः अप्रमाणशुभाः शुभकृत्स्नाः वृहाः परीत्तवृहा अप्रमाणवृहाः वृहत्फलाः अवृहाः अतपाः सुदृशाः सुदर्शनाः अकनिष्ठादेवास्तेऽपि तं बोधिसत्त्वं महासत्त्वमारक्षन्ति । माहैव कश्चिद्बोधिसत्त्वस्य महासत्त्वस्याऽन्तरायं कार्षीदिति । येऽपि केचित्* कायिकादोषास्तेऽपि तस्य दृष्ट एव धर्म्मे सर्व्वेण सर्व्वं न भवन्ति तत्कस्य हेतोस्तथाहि बोधिसत्त्वोमहासत्त्वः सर्व्वसत्त्वान् मैत्र्यास्फुरति। ये च ते पश्चिमायांदिशि गङ्गानदीवालुकोपमेषु लोकधातुषु बुद्धाभगवन्तस्तेऽपि तं बोधिसत्त्वं महासत्त्वमारक्षन्ति माश्रावकभूमिं वा प्रत्येकबुद्धभूमिं वा पतेदिति ।

ये च चत्वारो महाराजास्त्रायस्त्रिंशाद्देवायामाः तुषिताः निर्म्माणरतयः परनिर्म्मितवशवर्त्तिनोदेवाः ब्रह्मकायिकादेवाब्रह्मपुरो-

---

* वाक्कायिका (घ) पुस्तके पाठः ।

हिता ब्रह्मपार्षद्याः महाब्रह्माणः आभाः परीत्ताऽऽभाः अप्रमाणाऽऽभाः आभास्वराः शुभाः परीत्तशुभाः अप्रमाणशुभाः शुभकृत्स्नाः वृहाः परीत्तवृहाः अप्रमाणवृहाः वृहत्फलाः अवृहाः अतपाः सुदृशाः सुदर्शनाः अकनिष्ठादेवास्तेऽपि तं बोधिसत्त्वं महासत्त्वमारक्षन्ति । माहैव कश्चिद्बोधिसत्त्वस्य महासत्त्वस्याऽन्तरायं कार्षीदिति । येऽपि च केचित् कायिका दोषास्तेऽपि तस्य दृष्ट एव धर्म्मे सर्व्वेण सर्व्वं न भवन्ति । तत्कस्य हेतोस्तथाहि बोधिसत्त्वो महासत्त्वः सर्व्वसत्त्वान् मैत्र्या स्फुरति । ये उत्तरस्यां दिशि गङ्गानदीवालुकोपमेषु लोकधातुषु बुद्धा भगवन्तस्तेऽपि तं बोधिसत्त्वं महासत्त्वमारक्षन्ति श्रावकभूमिं वा प्रत्येकबुद्धभूमिं वा पतेदिति ।

ये च चत्वारो महाराजास्त्रायस्त्रिंशाद्देवा यामाः तुषिता-निर्म्माणरतयः परनिर्म्मितवशवर्त्तिनो देवा ब्रह्मकायिका ब्रह्मपुरोहिता-ब्रह्मपार्षद्या महाब्रह्माणः आभाः परीत्ताऽऽभाः अप्रमाणाऽऽभाः आभा-स्वराः शुभाः परीत्तशुभाः अप्रमाणशुभाः शुभकृत्स्नाः वृहाः परी-त्तवृहाः अप्रमाणवृहाः वृहत्फलाः अवृहा अतपाः सुदृशाः सुदर्शनाः अकनिष्ठादेवास्तेऽपि तं बोधिसत्त्वं महासत्त्वमारक्षन्ति । माहैव कश्चिद्बोधिसत्त्वस्य महासत्त्वस्याऽन्तरायं कार्षीदिति । येऽपि केचित् कायिकादोषास्तेऽपि तस्य दृष्ट एव धर्म्मे सर्व्वेण सर्व्वं न भवन्ति । तत्कस्य हेतोस्तथाहि बोधिसत्त्वोमहासत्त्वः सर्व्वसत्त्वान् मैत्र्या-स्फुरति । ये च ते उत्तरपूर्व्वस्यांदिशि गङ्गानदीवालुकोपमेषु लोकधातुषु बुद्धाभगवन्तस्तेऽपि तं बोधिसत्त्वं महासत्त्वमारक्षन्ति श्रावकभूमिं वा प्रत्येकबुद्धभूमिं वा पतेदिति ।

ये च चत्वारो महाराजास्त्रायस्त्रिंशादेवायामाः तुषिताः निर्म्माणरतयः परनिर्म्मितवशवर्त्तिनोदेवाब्रह्मकायिकाब्रह्मपुरोहिताः ब्रह्मपार्षद्यामहाब्रह्माणः आभाः परीत्ताऽऽभाः अप्रमाणाऽऽभाः आभास्वराः शुभाः परीत्तशुभाः अप्रमाणशुभाः शुभकृत्स्नाः वृहाः परीत्तवृहाः अप्रमाणवृहाः वृहत् फलाः अवृहाः अतपाः सुदृशाः सुदर्शनाः अकनिष्ठादेवास्तेपि तं बोधिसत्त्वं महासत्त्वमारक्षन्ति। माहैव कश्चिद्बोधिसत्त्वस्य महासत्त्वस्याऽन्तरायं कार्षीदिति । येऽपि केचित् कायिकादोषास्तेऽपि तस्य दृष्ट एव धर्म्मे सर्व्वेण सर्व्वं न भवन्ति । तत्कस्य हेतोस्तथाहि बोधिसत्त्वोमहासत्त्वः सर्व्वसत्त्वान् मैत्र्यास्फुरति । ये च ते पूर्व्वदक्षिणस्यांदिशि गङ्गानदीवालुकोपमेषु लोकधातुषु बुद्धाभगवन्तस्तेऽपि तं बोधिसत्त्वं महासत्त्वमारक्षन्ति माश्रावकभूमिं वा प्रत्येकबुद्धभूमिं वा पतेदिति ।

ये च चत्वारो महाराजास्त्रायस्त्रिंशादेवायामाः तुषिताः निर्म्माणरतयः परनिर्म्मितवशवर्त्तिनोदेवाः ब्रह्मकायिका—ब्रह्मपुरोहिताः ब्रह्मपार्षद्याः महाब्रह्माणः आभाः परीत्ताऽऽभाः अप्रमाणाऽऽभाः आभास्वराः शुभाः परीत्तशुभाः अप्रमाणशुभाः शुभकृत्स्नाः वृहाः परीत्तवृहाः अप्रमाणवृहाः वृहत्फलाः अवृहाः अतपाः सुदृशाः सुदर्शनाः अकनिष्ठास्तेऽपि तं बोधिसत्त्वं महासत्त्वमारक्षन्ति। माहैव कश्चिद्बोधिसत्त्वस्य महासत्त्वस्याऽन्तरायं कार्षीदिति । येऽपि केचित् कायिकादोषास्तेऽपि तस्य दृष्ट एव धर्म्मे सर्व्वेण सर्व्वं न भवन्ति । तत्कस्य हेतोस्तथाहि बोधिसत्त्वोमहासत्त्वः सर्व्वसत्त्वान् मैत्र्या-स्फुरति । ये च ते दक्षिणपश्चिमायांदिशि गङ्गानदीवालुकोपमेषु

लोकधातुषु, बुद्धा भगवन्तस्तेऽपि तं बोधिसत्त्वं महासत्त्वमारक्षन्ति माश्रावकभूमिं वा प्रत्येकबुद्धभूमिं वा पतेदिति ।

ये च चतुर्महाराजकायिकादेवा यामाः तुषिताः निर्माणरतयः परनिर्मितवशवर्तिनो देवा ब्रह्मकायिका ब्रह्मपुरोहिता-ब्रह्मपार्षद्याः महाब्रह्माणः आभाः परीत्ताऽऽभाः अप्रमाणाऽऽभाः आभास्वराः शुभाः परीत्तशुभाः अप्रमाणशुभाः शुभकृत्स्नाः वृहाः परीत्तवृहाः अप्रमाणवृहाः वृहत्फलाः अवृहाः अतपाः सुदृशाः सुदर्शनाः अकनिष्ठादेवास्तेऽपि तं बोधिसत्त्वं महासत्त्व मारक्षन्ति । मा हैव कश्चिद्बोधिसत्त्वस्य महासत्त्वस्याऽन्तरायं कार्षीदिति । येऽपि केचित् कायिकादोषास्तेऽपि तस्य दृष्ट एव धर्मे सर्वेण सर्वं न भवन्ति । तस्मात् देशोत्क्षेपाय बोधिसत्त्वो महासत्त्वः सर्वतस्मात् देशाद्व्युत्तिष्ठति । येऽपि च ते पश्चिमायां दिशि गङ्गानदी-वालुकोपमेषु लोकधातुषु बुद्धा भगवन्तस्तेऽपि तं बोधिसत्त्वं महा-सत्त्वमारक्षन्ति । माश्रावकभूमिं वा प्रत्येकबुद्धभूमिं वा पतेदिति ।

ये च चातुर्महाराजकायिकदेवा यामाः तुषिता निर्माणरतयः परनिर्मितवशवर्तिनोदेवाब्रह्मकायिकाब्रह्मपुरोहिता-ब्रह्मपार्षद्याः महाब्रह्माणः आभाः परीत्ताऽऽभाः अप्रमाणाऽऽभाः आभास्वराः शुभाः परीत्तशुभाः अप्रमणशुभाः शुभकृत्स्नाः वृहाः परीत्तवृहाः अप्रमाणवृहाः वृहत्फलाः अवृहाः अतपाः सुदृशाः सुदर्शनाः अकनिष्ठादेवास्तेऽपि तं बोधिसत्त्वं महासत्त्वमारक्षन्ति । मा हैव कश्चिद्बोधिसत्त्वस्य महासत्त्वस्याऽन्तरायं कार्षीदिति । येऽपि केचित् कायिकादोषास्तेऽपि तस्य दृष्ट एव धर्मे सर्वेण सर्वं न

भवन्ति। तत्कस्य हेतोस्तथाहि बोधिसत्त्वोमहासत्त्वः सर्व्वसत्त्वान् मैत्र्यास्फुरति। ये च तेऽधस्ताद्दिशि गङ्गानदीवालुकोपमेषु लोकधातुषु बुद्धाभगवन्तस्तेऽपि तं बोधिसत्त्वं महासत्त्वमारक्षन्ति माश्रावकभूमिं वा प्रत्येकबुद्धभूमिं वा पतेदिति।

ये च चत्वारोमहाराजास्त्रायस्त्रिंशादेवायामाः तुषिताः निर्म्माणरतयः परनिर्म्मितवशवर्त्तिनोदेवा ब्रह्मकायिकाः ब्रह्मपुरोहिताः ब्रह्मपार्षद्याः महाब्रह्माणः आभाः परीत्ताऽऽभाः अप्रमाणाऽऽभाः आभास्वराः शुभाः परीत्तशुभाः अप्रमाणशुभाः शुभकृत्स्नाः वृहाः परीत्तवृहाः अप्रमाणवृहाः वृहत्फलाः अवृहाः अतपाः सुदृशाः सुदर्शनाः अकनिष्ठादेवास्तेऽपि तं बोधिसत्त्वं महासत्त्वमारक्षन्ति। माहैव कश्चिद्बोधिसत्त्वस्य महासत्त्वस्याऽन्तरायं कार्षीदिति। येऽपि च केचित् कायिकादोषास्तेऽपि तस्य दृष्ट एव धर्म्मे सर्व्वेण सर्व्वं न भवन्ति। तत्कस्य हेतोस्तथाहि बोधिसत्त्वोमहासत्त्वः सर्व्वसत्त्वान् मैत्र्यास्फुरति। ये च ते उपरिष्टाद्दिशि गङ्गानदीवालुकोपमेषु लोकधातुषु बुद्धाभगवन्तस्तेऽपि तं बोधिसत्त्वं महासत्त्वमारक्षन्ति माश्रावकभूमिं वा प्रत्येकबुद्धभूमिं वा पतेदिति।

ये च चत्वारोमहाराजास्त्रायस्त्रिंशादेवायामाः तुषिता देवा निर्म्माणरतयः परनिर्म्मितवशवर्त्तिनो देवा ब्रह्मकायिकाः ब्रह्मपुरोहिताः ब्रह्मपार्षद्याः महाब्रह्माणः आभाः परीत्ताऽऽभाः अप्रमाणाऽऽभाः आभास्वराः शुभाः परीत्तशुभाः अप्रमाणशुभाः शुभकृत्स्नाः वृहाः परीत्तवृहाः अप्रमाणवृहाः वृहत्फलाः अवृहाः अतपाः सुदृशाः सुदर्शनाः अकनिष्ठादेवास्तेऽपि तं बोधिसत्त्वं महा-

समनुपश्यामि । नापि च सर्वबोधिसत्त्वा महासत्त्वाऽन्यत्र
नाभिनिर्हरति । किंचापि च कश्चिद् धारयिता बोधायाऽपि तस्य दृष्ट एव
धर्मे सर्वेण सर्वं न भवति । तत्कस्य हेतोस्तथाहि बोधिसत्त्वो-
महासत्त्वः सर्वधर्मान् शून्यान् पश्यति । एवं खलु शारद्वतीपुत्र बोधि-
सत्त्वो महासत्त्वः प्रज्ञापारमितायां युक्त इति वक्तव्यः ।

पुनरपरं शारद्वतीपुत्र बोधिसत्त्वस्य महासत्त्वस्य प्रज्ञापारमि-
तायां चरतोऽष्टादशावेणिकान् धारणीमुखसमाधिमुखानि प्रतिभानप्रति-
संविन्मुखानि चाऽभिमुखीभवन्ति । सर्वोपपत्त्यायतनेषु च तथागता-
र्हन्तः सम्यक्संबुद्धानाराधयति । तेन बुद्धैर्भगवद्भिर्न कदाचिद्विर-
हितो भवति यावदनुत्तरां सम्यक्संबोधिमभिसंबुध्यते ।

पुनरपरं शारद्वतीपुत्र बोधिसत्त्वस्य महासत्त्वस्य प्रज्ञापारमि-
तायां चरतो नैवं भवति कश्चिद्धर्मो धर्मैः सार्द्धं संयुज्यते वा
वियुज्यते वा । समेति वा न समेति वा । तत्कस्य हेतोस्तथाहि
स तद्धर्मं न समनुपश्यति यो युज्यते वा वियुज्यते वा । समीयाद्वा
न समीयाद्वा । एवं खलु शारद्वतीपुत्र बोधिसत्त्वो महासत्त्वः प्रज्ञा-
पारमितायां चरन् युक्त इति वक्तव्यः ।

पुनरपरं शारद्वतीपुत्र बोधिसत्त्वस्य महासत्त्वस्य प्रज्ञापारमि-
तायां चरतो नैवं भवति कच्चिदहं धर्मधातुमभिसम्बुध्येयं न वाऽ-
भिसम्बुध्येयं वा । तत्कस्य हेतोस्तथाहि न हि धर्मधातुमभिसम्बु-
द्धेनाऽभिसम्बुध्यते नाऽभिसम्भोत्स्यते । एवं खलु शारद्वतीपुत्र बो-
धिसत्त्वो महासत्त्वः प्रज्ञापारमितायां चरन् युक्त इति वक्तव्यः ।

पुनरपरं शारद्वतीपुत्र बोधिसत्त्वो महासत्त्वः प्रज्ञापारमितायां

चरन् *न कश्चिद्धर्मं धातुव्यतिरिक्तं समनुपश्यति एवं खलु शार-
तीपुत्र बोधिसत्त्वोमहासत्त्वः प्रज्ञापारमितायां चरन् युक्त इ
वक्तव्यः ।

पुनरपरं शारद्वतीपुत्र बोधिसत्त्वोमहासत्त्वः प्रज्ञापारमिता
चरन् न धर्मधातोर्धर्माणाञ्च नानाकरणं करोति । एवं ख
शारद्वतीपुत्र बोधिसत्त्वोमहासत्त्वः प्रज्ञापारमितायां चरन् यु
इति वक्तव्यः ।

पुनरपरं शारद्वतीपुत्र बोधिसत्त्वस्य महासत्त्वस्य प्रज्ञापार-
मितायां चरतो नैवं भवति धर्मधातुं प्रतिविध्येयं । तथा हि न स
कश्चिद्धर्मं समनुपश्यति येन धर्मेण योधर्मः प्रतिविध्येत । तथापि
स न धर्मधातुं शून्यइति योजयति नाऽशून्यइति योजयति । एवं
खलु शारद्वतीपुत्र बोधिसत्त्वोमहासत्त्वः प्रज्ञापारमितायां चरन्
युक्त इति वक्तव्यः ।

पुनरपरं शारद्वतीपुत्र बोधिसत्त्वोमहासत्त्वः प्रज्ञापारमितायां
चरन् न रूपं शून्यतया योजयति न शून्यतां रूपेण योजयति ।
न वेदनां शून्यतया योजयति न शून्यतां वेदनया योजयति । न
संज्ञां शून्यतया योजयति न शून्यतां संज्ञया योजयति । न
संस्कारान् शून्यतया योजयति न शून्यतां संस्कारैर्योजयति । न
विज्ञानं शून्यतया योजयति न शून्यतां विज्ञानेन योजयति । न
चक्षुः शून्यतया योजयति न शून्यतां चक्षुषा योजयति । न श्रोत्रं
शून्यतया योजयति न शून्यतां श्रोत्रेण योजयति । न घ्राणं शून्य-

---

* न कश्चिद्धर्मं धर्मधातुव्यतिरिक्तमिति ग पुस्तके पाठः ।

तया योजयति न शून्यतां घ्राणेन योजयति । न जिह्वां शून्यतया योजयति न शून्यतां जिह्वया योजयति । न कायं शून्यतया योजयति न शून्यतां कायेन योजयति । न मनः शून्यतया योजयति न शून्यतां मनसा योजयति । न रूपं शून्यतया योजयति न शून्यतां रूपेण योजयति । न शब्दं शून्यतया योजयति न शून्यतां शब्देन योजयति । न गन्धं शून्यतया योजयति न शून्यतां गन्धेन योजयति । न रसं शून्यतया योजयति न शून्यतां रसेन योजयति । न स्पर्शं शून्यतया योजयति न शून्यतां स्पर्शेन योजयति । न धर्माञ्छून्यतया योजयति न शून्यतां धर्मेण योजयति । न चक्षुर्धातुं शून्यतया योजयति न शून्यतां चक्षुर्धातुना योजयति। न रूपधातुं शून्यतया योजयति न शून्यतां रूपधातुना योजयति । न चक्षुर्विज्ञानधातुं शून्यतया योजयति न शून्यतां चक्षुर्विज्ञानधातुना योजयति । न श्रोत्रधातुं शून्यतया योजयति न शून्यतां श्रोत्रधातुना योजयति । न शब्दधातुं शून्यतया योजयति न शून्यतां शब्दधातुना योजयति । न श्रोत्रविज्ञानधातुं शून्यतया योजयति न शून्यतां श्रोत्रविज्ञानधातुना योजयति । न घ्राणधातुं शून्यतया योजयति न शून्यतां घ्राणधातुना योजयति । न गन्धधातुं शून्यतया योजयति न शून्यतां गन्धधातुना योजयति। न घ्राणविज्ञानधातुं शून्यतया योजयति न शून्यतां घ्राणविज्ञानधातुना योजयति। न जिह्वाधातुं शून्यतया योजयति न शून्यतां जिह्वाधातुना योजयति । न रसधातुं शून्यतया योजयति न शून्यतां रसधातुना योजयति । न जिह्वावि-

ज्ञानधातुं शून्यतया योजयति न शून्यतां जिह्वाविज्ञानधातुना योजयति। न कायधातुं शून्यतया योजयति न शून्यतां कायधातुना योजयति। न स्प्रष्टव्यधातुं शून्यतया योजयति न शून्यतां स्प्रष्टव्यधातुना योजयति। न कायविज्ञानधातुं शून्यतया योजयति। न शून्यतां कायविज्ञानधातुना योजयति। न मनोधातुं शून्यतया योजयति न शून्यतां मनोधातुना योजयति। न धर्म्मधातुं शून्यतया योजयति न शून्यतां धर्म्मधातुना योजयति। न रूपधातुं शून्यतया योजयति न शून्यतां रूपधातुना योजयति। न चक्षुर्विज्ञानधातुं शून्यतया योजयति न शून्यतां चक्षुर्विज्ञानधातुना योजयति। न मनोविज्ञानधातुं शून्यतया योजयति न शून्यतां मनोविज्ञानधातुना योजयति। तत्कस्य हेतोरेषहि शारद्वतीपुत्र परमोयोगोयदुत शून्यतायोगः शून्यतायां शारद्वतीपुत्र चरन् बोधिसत्त्वोमहासत्त्वोन श्रावकभूमौ वा न प्रत्येक बुद्धभूमौ वा पतति। बुद्धक्षेत्रञ्च परिशोधयति सत्त्वांश्च परिपाचयति। क्षिप्रञ्चाऽनुत्तरां सम्यक्सम्बोधिमभिसम्बुध्यते। ये केचिच्छारद्वतीपुत्र योगाः प्रज्ञापारमितायोगस्तेषामग्रआख्यायते ज्येष्ठआख्यायते श्रेष्ठआख्यायते वर आख्यायते प्रवर आख्यायते प्रणीत आख्यायते। तत्कस्य हेतोरनुत्तरएष योगोयदुत प्रज्ञापारमितायोगः शून्यताऽऽनिमित्ताऽप्रणिहितयोगः। एवं युज्यमानः शारद्वतीपुत्रबोधिसत्त्वोमहासत्त्वो व्याकृतोवक्तव्यः।

आसन्नीभूतश्चाऽनुत्तरायां सम्यक्सम्बोधौ। एवं युज्यमानः शारद्वतीपुत्र बोधिसत्त्वोमहासत्त्वोऽप्रमेयाऽसंख्येयानां सत्त्वानां अर्थं

करोतीति । न चाप्येवं मन्यते प्रज्ञापारमितायां युज्यते वा नियुज्यते* वा मां बुद्धा भगवन्तो व्याकरिष्यन्त्यहमासन्नीभूतो व्याकरणस्य । अहं बुद्धक्षेत्रं परिशोधयिष्याम्यहं सत्त्वान् परिपाचयिष्याम्यहमनुत्तरां सम्यक्सम्बोधिमभिसम्बुध्य धर्म्मचक्रं प्रवर्त्तयिष्यामि । तत्कस्य हेतोस्तथाहि । स धर्म्मधातुं व्यतिरेकीकरोति । न स धर्म्मधातोः किञ्चिदन्यद्धर्म्मं समनुपश्यति । यः प्रज्ञापारमितायां चरेद्यो वा बुद्धैर्भगवद्भिर्व्याक्रियेत । यो वाऽनुत्तरां सम्यक्सम्बोधिमभिसम्बुध्येत । तत्कस्य हेतोस्तथाहि बोधिसत्त्वस्य महासत्त्वस्य प्रज्ञापारमितायां चरतो न सत्त्वसंज्ञोत्पद्यते । नाऽऽत्मसंज्ञोत्पद्यते । न जीवसंज्ञोत्पद्यते । न जन्तुसंज्ञोत्पद्यते । न पोषसंज्ञोत्पद्यते । न पुरुषसंज्ञोत्पद्यते । न पुद्गलसंज्ञोत्पद्यते । न मनुजसंज्ञोत्पद्यते । न मानवसंज्ञोत्पद्यते । न कारकसंज्ञोत्पद्यते । न वेदकसंज्ञोत्पद्यते । न जानकसंज्ञोत्पद्यते । न पश्यकसंज्ञोत्पद्यते । तत्कस्य हेतोस्तथाह्यत्यन्तं सत्त्वो नोत्पद्यते न निरुध्यते न हि सत्त्वस्योत्पादो निरोधः । यस्य च नोत्पादो न निरोधः स कथं प्रज्ञापारमितायां चरिष्यति । एवं शारद्वतीपुत्र बोधिसत्त्वो महासत्त्वः सत्त्वाऽनुत्पादतया प्रज्ञापारमितायां चरति । सत्त्वशून्यतया प्रज्ञापारमितायां चरति । सत्त्वाऽनुपलब्ध्या प्रज्ञापारमितायां चरति । सत्त्वविविक्ततया प्रज्ञापारमितायां चरति । सत्त्वप्रकृत्या प्रज्ञापारमितायां चरति । सत्त्वाऽस्वभावतया प्रज्ञापारमितायां चरति । एष शारद्वतीपुत्र बोधिसत्त्वानां महासत्त्वानां परमो-

* अय एव पाठः पञ्चसु पुस्तकेषु । युज्ये इति युक्तम् ।

योगोयदुत प्रज्ञापारमिता योगः अयं शारद्वतीपुत्रबोधिसत्त्वस्य
महासत्त्वस्य प्रज्ञापारमितायां चरतोयोगोयस्तदन्यान् योगानभिभूय
तिष्ठति।

अत्र च शारद्वतीपुत्रयोगे चरन् बोधिसत्त्वोमहासत्त्वोदश
तथागतबलान्यभिनिर्हरति। चत्वारिवैशारद्यानि चतस्रः प्रतिसं
म्विदोमहामैत्रीं महाकरुणामष्टादशाऽऽवेणिकबुद्धधर्मानभिनिर्हरति
अत्र शारद्वतीपुत्रयोगे चरन् बोधिसत्त्वोमहासत्त्वो न मात्सर्यचित्त
मुत्पादयति। न दौःशील्यचित्तं न व्यापादचित्तं न कौसीद्य
चित्तं न विक्षेपचित्तं न दौष्प्रज्ञचित्तमुत्पादयति। एवमुक्ते
आयुष्मान् शारद्वतीपुत्रोभगवन्तमेतदवोचत्। योभगवन् बोधि
सत्त्वोमहासत्त्वोऽनेन प्रज्ञापारमितायोगेन विहरति। स कुतश्च्युतेहो
पपन्नः। इतो वा च्युतः कुत्रोपपत्स्यते।

भगवानाह। यः शारद्वतीपुत्र बोधिसत्त्वोमहासत्त्वोऽनेन प्रज्ञा-
पारमितायोगेन विहरति सोऽन्येभ्यो बुद्धक्षेत्रेभ्यश्च्युतेहोपपन्नो-
वेदितव्यः। तुषितेभ्योदेवनिकायेभ्यो मनुष्येभ्योवा च्युतेहोपपन्नो-
वेदितव्यः। तत्र शारद्वतीपुत्रयोऽयं बोधिसत्त्वोमहासत्त्वोऽन्येभ्यो
बुद्धक्षेत्रेभ्यश्च्युतेहोपपन्नः। एषक्षिप्रमिमं योगं समापद्यते। यदुत
प्रज्ञापारमितायोगं। अस्य [illegible] गम्भीरा धर्मा-
भिमुखीभवन्ति। पश्चात् प्रज्ञापारमितायोगं समापद्यते। [illegible]
[illegible] बुद्धेषु [illegible] सम्यक्सम्बुद्धान् [illegible]
[illegible] तेषु तथागतार्हतः सम्यक् सम्बुद्धा
[illegible]

[illegible]पपन्नोदितमः। स सर्वज्ञतानियतिज्ञा-
स्तस्यैवाऽभिमुख्यात् भवति षट् पारमिता। अस्याऽभ्यासतानि भवन्ति
सर्वेभ्यः[illegible]भिमुखानि। यः पुनः शारद्वतीपुत्र बोधि-
सत्त्वो[illegible] स्वभावगताया उपपद्यते।
तस्य बोधिसत्त्वस्य महासत्त्वस्यैक[illegible] बोधिसत्त्वं महासत्त्वं
स्थापयित्वा धर्माणीन्द्रियाणि भवन्ति। न च* [illegible]
प्रज्ञापारमितायोगं समापद्यते। बुद्धक्षेत्रात् बुद्धक्षेत्रं संक्राम-
न्ति च बुद्धान् भगवत आराधयन्ति प्रियन्ते यापयन्ति। न च कदा-
चिदपि बुद्धैर्भगवद्भिर्विरहितो भविष्यति यावदनुत्तरां सम्यक्-
सम्बोधिमभिसम्बुद्धः।

सन्ति शारद्वतीपुत्र बोधिसत्त्वामहासत्त्वा अनुपायकुशलाः प्रथमं ध्यानं समापद्यन्ते। द्वितीयं ध्यानं समापद्यन्ते। तृतीयं ध्यानं समापद्यन्ते। चतुर्थं ध्यानं समापद्यन्ते। षट् पारमितासु चरन्ति। ते ध्यानप्रतिलम्भेन दीर्घाऽऽयुष्केषु देवेषूपपद्यन्ते। स चेत् पुनर्मानुष्यं प्रतिलभ्यं लब्ध्वा बुद्धान् भगवत आरागयन्ति†। तेषां धन्यानीन्द्रियाणि भवन्ति न तीक्ष्णानि।

सन्ति पुनः शारद्वती पुत्र बोधिसत्त्वामहासत्त्वाध्यानानि समापद्यन्ते प्रज्ञापारमितायां चरन्ति ते चाऽनुपायकुशलाः ध्याना-न्युत्सृजन्ति। ते पुनरेव कामधातावुपपद्यन्ते। तेषामपि शारद्वती-पुत्र बोधिसत्त्वानां महासत्त्वानां धन्यानीन्द्रियाणि भवन्ति। न

---

* स च इति युक्तं प्रतिभाति।

† एष पाठः सर्वपुस्तकेषु।

तीक्ष्णानि। अस्ति शारद्वतीपुत्र बोधिसत्त्वा महासत्त्वाः प्रथमं ध्यानं समापद्यन्ते। द्वितीयं ध्यानं समापद्यन्ते। तृतीयं ध्यानं समापद्यन्ते। चतुर्थं ध्यानं समापद्यन्ते। मैत्रीं समापद्यन्ते। करुणां समापद्यन्ते। मुदितां समापद्यन्ते। उपेक्षां समापद्यन्ते। आकाशाऽऽनन्त्याऽऽयतनं समापद्यन्ते। विज्ञानाऽऽनन्त्याऽऽयतनं समापद्यन्ते। आकिञ्च-न्याऽऽयतनं समापद्यन्ते। नैवसंज्ञानासंज्ञाऽऽयतनं समापद्यन्ते। चत्वारि स्मृत्युपस्थानानि समापद्यन्ते। चत्वारि सम्यक्प्रहाणानि समापद्यन्ते। चतुर ऋद्धिपादान् समापद्यन्ते। पञ्चेन्द्रियाणि समापद्यन्ते। पञ्च बलानि समापद्यन्ते। सप्त बोध्यङ्गानि समापद्यन्ते। आर्याष्टाङ्गमार्गं समापद्यन्ते। महाकरुणां समापद्यन्ते। महा-करुणाः सन्त उपाय कौशल्येन। न ध्यानवशेनोपपद्यन्ते[1]। न आरूप्यविहारवशेन। नाऽऽरूप्यसमापत्तिवशेनोपपद्यन्ते। तत्र पुनरुप-पद्यन्ते यत्र बुद्धा भगवन्तस्तिष्ठन्ति ध्रियन्ते यापयन्ति। ते पुनः प्रज्ञापारमितायोगेनाऽविरहिता एव भद्रकल्पेऽनुत्तरां सम्यक्-सम्बोधिमभिसम्भोत्स्यन्ते।

अस्ति पुनः शारद्वतीपुत्र बोधिसत्त्वा महासत्त्वाः प्रथमं ध्यानं समापद्यन्ते। द्वितीयं ध्यानं समापद्यन्ते। तृतीयं ध्यानं समापद्यन्ते। चतुर्थं ध्यानं समापद्यन्ते। मैत्रीं समापद्यन्ते। करुणां समापद्यन्ते। मुदितां समापद्यन्ते। उपेक्षां समापद्यन्ते। आकाशाऽऽ-नन्त्याऽऽयतनं समापद्यन्ते। विज्ञानाऽऽनन्त्याऽऽयतनं समापद्यन्ते।

[1] [illegible]

आकिञ्चन्यायतनं समापद्यन्ते । नैवसंज्ञानासंज्ञायतनं समापद्यन्ते । ते उपायकौशलेन ध्यानसमाधिसमापत्तिवशेनोपपद्यन्ते । ते यथाकर्म मनुष्याणामुपपद्यन्ते । क्षत्रियमहाशालकुलेषूपपद्यन्ते । ब्राह्मणमहाशालकुलेषूपपद्यन्ते । गृहपतिमहाशालकुलेषूपपद्यन्ते सत्त्वपरिपाकाय च बुद्धानामभिरागणाय ।

अस्ति शारद्वतीपुत्र बोधिसत्त्वा महासत्त्वाः प्रथमं ध्यानं समापद्यन्ते । द्वितीयं ध्यानं समापद्यन्ते । तृतीयं ध्यानं समापद्यन्ते । चतुर्थं ध्यानं समापद्यन्ते । मैत्रीं समापद्यन्ते । करुणां समापद्यन्ते । मुदितां समापद्यन्ते । उपेक्षां समापद्यन्ते । आकाशानन्त्यायतनं समापद्यन्ते । विज्ञानानन्त्यायतनं समापद्यन्ते । आकिञ्चन्यायतनं समापद्यन्ते । नैवसंज्ञानासंज्ञायतनं समापद्यन्ते । उपायकौशलवशेन च ध्यानसमाधिसमापत्तिवशेनोपपद्यन्ते । ते चातुर्महाराजकायिकानां देवानां सभागतायां उपपद्यन्ते । त्रायस्त्रिंशानां देवानां सभागतायां उपपद्यन्ते । यामानां देवानां सभागतायां उपपद्यन्ते । तुषितानां देवानां सभागतायां उपपद्यन्ते । निर्माणरतीनां देवानां सभागतायां उपपद्यन्ते । परनिर्मितवशवर्तिनां देवानां सभागतायां उपपद्यन्ते । तत्र स्थिता सत्त्वान् परिपाचयन्ति बुद्धक्षेत्रं परिशोधयन्ति । बुद्धांश्च भगवतश्चारागयन्ति । अस्ति शारद्वतीपुत्र बोधिसत्त्वामहासत्त्वाः प्रज्ञापारमितायां चरन्तः उपायकौशलेन प्रथमं ध्यानं समापद्यन्ते । द्वितीयं ध्यानं समापद्यन्ते । तृतीयं ध्यानं समापद्यन्ते । चतुर्थं ध्यानं समापद्यन्ते । मैत्रीं समापद्यन्ते । करुणां समापद्यन्ते ।

मुदितां समापद्यन्ते । उपेक्षां समापद्यन्ते । आकाशाऽऽनन्त्याऽऽयतनं समापद्यन्ते । विज्ञानाऽऽनन्त्याऽऽयतनं समापद्यन्ते । आकिञ्चन्याऽऽयतनं समापद्यन्ते । नैव संज्ञानासंज्ञाऽऽयतनं समापद्यन्ते । तद्-तश्च्युत्वा ब्रह्मलोक उपपद्यन्ते तत्र ब्रह्माणो भवन्ति । महाब्रह्माणः । अभिभुवोद्गगतवर्षवर्त्तिनस्तेषां सत्त्वानामग्र्यावरा प्रवरावरिष्ठास्ते तत्र स्थित्वा बुद्धक्षेत्रेण बुद्धक्षेत्रं संक्रामन्ति । यथा तथागतार्हन्तः सम्यक्सम्बुद्धा अनुत्तरां सम्यक्सम्बोधिमभिसम्बुध्य धर्मचक्रं प्रवर्त्तयन्ति । ते तां स्तथागतानर्हतः सम्यक् सम्बुद्धानध्येषन्ते धर्मचक्रप्रवर्त्तनाय ।

अस्ति शारद्वतीपुत्र बोधिसत्त्वा महासत्त्वाः एकजातिप्रतिबद्धाः । प्रज्ञापारमितायां चरन्त उपायकौशलेन प्रथमं ध्यानं समापद्यन्ते । द्वितीयं ध्यानं समापद्यन्ते । तृतीयं ध्यानं समापद्यन्ते । चतुर्थं ध्यानं समापद्यन्ते । मैत्रीं समापद्यन्ते । करुणां समापद्यन्ते । मुदितां समापद्यन्ते । उपेक्षां समापद्यन्ते । आकाशाऽनन्त्याऽयतन समापत्तिं समापद्यन्ते । विज्ञानाऽनन्त्याऽयतन समापत्ति समापद्यन्ते । आकिञ्चन्याऽऽयतन समापत्तिं समापद्यन्ते । नैवसंज्ञानासंज्ञायतन समापत्तिं समापद्यन्ते । चत्वारिस्मृत्युपस्थानानि भावयन्ति । चत्वारिसम्यक्प्रहाणानिभावयन्ति । पञ्चेन्द्रियाणि भावयन्ति । सप्तबोध्यङ्गानि भावयन्ति । आर्य्याऽष्टाङ्गमार्गं भावयन्ति । शून्यताऽऽनिमित्ताऽप्रणिहितान् समाधीन् समापद्यन्ते । न च तेषां वशेनोपपद्यन्त । ते सम्मुखीभूतान् बुद्धान् भगवतआराध्य* तत्र ब्रह्मचर्य्यं चरित्वा तुषितानां देवानां सभागतायां उपपद्यन्ते । ते तत्र

* आराध्य इति युक्तम् ।

मासमात्रान्, तिष्ठन्ति कांश्चित्तिष्ठन्तः सत्त्वाः समापन्नास्तैस्तैर्नानाकारै-र्निर्मुक्तमानसाः परिवृत्ताः सत्त्वाः दृष्टोपपत्तिं दर्शयन्त्यनन्त[illegible] [illegible]अनुत्तरायां सम्यक्संबोधौ प्रतिष्ठापयन्ति नाना बुद्धक्षेत्रेषु ।

सन्ति शारद्वतीपुत्र बोधिसत्त्वा महासत्त्वाः पञ्चाभिज्ञानां लाभि-नस्ते ध्यानाध्यानानुपपद्यन्ते । नाऽऽरूप्यध्यानानुपपद्यन्ते । ते बुद्धक्षेत्रेण बुद्धक्षेत्रं संक्रामन्ति । तथागतानर्हतः सम्यक्संबुद्धान् सत्कुर्वन्तो गुरुकुर्वन्तो मानयन्तः पूजयन्तः ।

सन्ति शारद्वतीपुत्र बोधिसत्त्वा महासत्त्वाः पञ्चाभिज्ञानां लाभिनस्ते ताभिरभिज्ञाभिर्विक्रीडन्तो बुद्धक्षेत्रेण बुद्धक्षेत्रं संक्रा-मन्ति । यत्र बुद्धक्षेत्रे न श्रावकयानस्य न प्रत्येकबुद्धयानस्य शब्दोऽपि प्रज्ञायतेऽन्यत्र बुद्धयानात् ।

सन्ति शारद्वतीपुत्र बोधिसत्त्वा महासत्त्वाः पञ्चाभिज्ञानां लाभिनस्ते ताभिरभिज्ञाभिर्विक्रीडमाना बुद्धक्षेत्रेण बुद्धक्षेत्रं संक्रा-मन्ति । यत्र बुद्धक्षेत्रेऽपरिमितमायुष्प्रमाणं सत्त्वानां ।

सन्ति शारद्वतीपुत्रबोधिसत्त्वामहासत्त्वाः पञ्चाभिज्ञानां लाभिनो लोकधातुं संक्रामन्ति । यत्र न बुद्धशब्दो न धर्मशब्दो न संघशब्दस्तत्र गत्वा बुद्धस्य वर्णं भाषन्ते धर्मस्य संघस्य वर्णं भाषन्ते ते च सत्त्वास्तेन बुद्धशब्देन संघशब्देन चित्तानि प्रसाद्य यत्र बुद्धा भगवन्तस्तत्रोपपद्यन्ते ।

अस्ति शारद्वतीपुत्र बोधिसत्त्वामहासत्त्वाः प्रथमचित्तोत्पाद-मुपादाय चतुर्णां ध्यानानां चतुर्णामप्रमाणानां चतसृणामारूप्यस-मापत्तीनां पञ्चानामभिज्ञानां लाभिनश्चतुर्णां स्मृत्युपस्थानानां चतुर्णां

सम्यक्प्रहाणानां चतुर्णामृद्धिपादानां पञ्चानामिन्द्रियाणां पञ्चानां बलानां सप्तानां बोध्यङ्गानामार्य्याऽष्टाऽङ्गस्य मार्गस्य दशानां तथागतबलानां चतुर्णां वैशारद्यानां चतसृणां प्रतिसम्विदां महामैत्र्याः महाकरुणायाः अष्टादशाऽऽवेणिकबुद्धधर्म्माणां नाभिनस्ते न कदाचित्कामधातावुपपद्यन्ते । न रूपधातावुपपद्यन्ते । नाऽऽरूप्यधातावुपपद्यन्ते । तत्र च सत्त्वानामर्थं कुर्वन्ति ।

अस्ति शारद्वतीपुत्र बोधिसत्त्वामहासत्त्वाः षट्पारमितासु चरन्तः प्रथमचित्तोत्पादेनैव बोधिसत्त्वन्याममवक्रामन्त्यवैवर्त्तिकभूमिं वाऽनुप्राप्नुवन्ति ।

अस्ति शारद्वतीपुत्र बोधिसत्त्वामहासत्त्वाः प्रथमचित्तोत्पादेनैवाऽनुत्तरां सम्यक्सम्बोधिमभिसम्बुध्यन्ते । अभिसम्बुध्य सधर्म्मचक्रं प्रवर्त्त्याऽप्रमेयाणामसंख्येयानां सत्त्वानामर्थं कृत्वाऽनुपधिशेषेनिर्व्वाणधातौ परिनिर्व्वान्ति । तेषां परिनिर्वृतानां कल्पं वा कल्पाऽवशेषं वा सद्धर्म्मस्तिष्ठति ।

अस्ति शारद्वतीपुत्र बोधिसत्त्वामहासत्त्वाः प्रथमचित्तोत्पादेनैव प्रज्ञापारमितायोगं समापद्यन्ते । तेऽनेकैर्बोधिसत्त्वकोटीनियुतशतसहस्रैः सार्द्धं बुद्धक्षेत्रेण बुद्धक्षेत्रं संक्रामन्ति । बुद्धानां भगवतां दर्शनायसत्त्वपरिपाचनाय बुद्धक्षेत्रपरिशोधनाय । अस्ति शारद्वतीपुत्र बोधिसत्त्वामहासत्त्वाः प्रज्ञापारमितायां चरन्तश्चतुर्णां ध्यानानां लाभिनश्चतुर्णामप्रमाणानां चतसृणामारूप्यसमापत्तीनां लाभिनस्ते-नानि* ध्यानाप्रमाणारूप्यसमापत्तीरनेकविधं विक्रीडन्ति ।

* ना इति पुस्तकम् ।

यदुत प्रथमं ध्यानं समापद्यन्ते ततः प्रथमध्यानाद्व्युत्थाय निरोधसमापत्तिं समापद्यन्ते। निरोधसमापत्तेर्व्युत्थाय द्वितीयं ध्यानं समापद्यन्ते। द्वितीयात् ध्यानाद्व्युत्थाय निरोधसमापत्तिं समापद्यन्ते। निरोधसमापत्तेर्व्युत्थाय तृतीयं ध्यानं समापद्यन्ते। तृतीयात् ध्यानाद्व्युत्थाय निरोधसमापत्तिं समापद्यन्ते। निरोधसमापत्तेर्व्युत्थाय चतुर्थं ध्यानं समापद्यन्ते। चतुर्थात् ध्यानाद्व्युत्थाय निरोधसमापत्तिं समापद्यन्ते। निरोधसमापत्तेर्व्युत्थायाऽऽकाशाऽऽनन्त्याऽऽयतनं समापद्यन्ते। आकाशाऽऽनन्त्याऽऽयतनाद्व्युत्थाय निरोधसमापत्तिं समापद्यन्ते। निरोधसमापत्तेर्व्युत्थाय विज्ञानाऽऽनन्त्याऽऽयतनं समापद्यन्ते। विज्ञानाऽऽनन्त्याऽऽयतनाद्व्युत्थाय निरोधसमापत्तिं समापद्यन्ते। निरोधसमापत्तेर्व्युत्थायाऽऽकिञ्चन्याऽऽयतनं समापद्यन्ते। आकिञ्चन्याऽऽयतनाद्व्युत्थाय निरोधसमापत्तिं समापद्यन्ते। निरोधसमापत्तेर्व्युत्थाय नैव संज्ञानासंज्ञाऽऽयतनं समापद्यन्ते। नैव संज्ञानासंज्ञाऽऽयतनाद्व्युत्थाय निरोधसमापत्तिं समापद्यन्ते। एवं खलु शारद्वतीपुत्र बोधिसत्त्वामहासत्त्वाः प्रज्ञापारमितायाञ्चरन्तउपायकौशलेन समन्वागतादिमानि ध्यानानि अप्रमाणानि च समाधिसमापत्तीश्च विष्कद्य समापद्यन्ते।

अस्ति शारद्वतीपुत्र बोधिसत्त्वामहासत्त्वाश्चतुर्णां स्मृत्युपस्थानानां लाभिनश्चतुर्णां सम्यक्प्रहाणानां लाभिनश्चतुर्णामृद्धिपादानां लाभिनः पञ्चानामिन्द्रियाणां लाभिनः पञ्चानां बलानां लाभिनः सप्तानां बोध्यङ्गानां लाभिनः आर्य्याऽष्टाङ्गमार्गस्य लाभिनः चतुर्णामार्य्यसत्यानां लाभिनः ध्यानानां लाभिनः चतुर्णामप्रमाणानां

लाभिनश्चतसृणामारूप्यसमापत्तीनां लाभिनः अष्टानां विमोक्षाणां
लाभिनः नवानामनुपूर्वविहारसमापत्तीनां लाभिनः शून्यताऽनि-
मित्ताऽप्रणिहितविमोक्षमुखानां लाभिनः अभिज्ञानां लाभिनः
समाधीनां लाभिनः धारणीमुखानां लाभिनः दशानां तथागत-
बलानां लाभिनः चतुर्णां वैशारद्यानां लाभिनः चतसृणां प्रति-
संविदां लाभिनः अष्टादशानामावेणिकबुद्धधर्म्माणां लाभिनः त्रयाणां
विमोक्षमुखानां लाभिनः न च स्रोत-आपत्तिफलमनुप्राप्नुवन्ति। न
सकृदागामिफलमनुप्राप्नुवन्ति। नाऽनागामिफलमनुप्राप्नुवन्ति। नाऽर्ह-
त्त्वमनुप्राप्नुवन्ति। न प्रत्येकबोधिमनुप्राप्नुवन्ति। प्रज्ञापारमितायां
चरन्त उपाय कौशलेन परिगृहीताः आर्य्याऽष्टाऽङ्गमार्गं सत्त्वेभ्य उप-
दर्शयन्ति येन ते सत्त्वाः स्रोत आपत्तिफलमनुप्राप्नुवन्ति। सकृदा-
गामिफलमनुप्रप्नुवन्ति। अनागामिफलमनुप्राप्नुवन्ति। अर्हत्त्वमनु-
प्राप्नुवन्ति। प्रत्येकबोधिमनुप्राप्नुवन्ति। यच्छारद्वतीपुत्र श्रावकप्रत्ये-
कबुद्धानां फलप्राप्तिज्ञानं सा बोधिसत्त्वस्य महासत्त्वस्य क्षान्तिः।
इमे शारद्वतीपुत्र बोधिसत्त्वमहासत्त्वा अवैवर्त्तिकावेदितव्या।
येऽनया प्रज्ञापारमितयैवं विहरन्ति।

अस्ति शारद्वतीपुत्र बोधिसत्त्वामहासत्त्वा ये षट्पारमिता
सुस्थित्वा तुषितभवनं शोधयन्ति। ते खलु पुनः शारद्वतीपुत्र
बोधिसत्त्वामहासत्त्वाः भद्रकल्पिकावेदितव्याः।

अस्ति शारद्वतीपुत्र बोधिसत्त्वामहासत्त्वाः प्रज्ञापारमितायां
चरन्त श्चतुर्णां ध्यानानां लाभिन श्चतुर्णामप्रमाणानां लाभिन श्चत-
सृणामारूप्यसमापत्तीनां लाभिनः सप्तत्रिंशतां बोधिपक्षाणां धर्म्माणां

लाभिनः षण्णामभिज्ञानां लाभिनो दशतथागतबलानां लाभिन श्चतुर्णां वैशारद्यानां लाभिन श्चतसृणां प्रतिसम्विदां लाभिनः अष्टादशाऽऽवेणिक बुद्धधर्म्माणां लाभिनः *तेऽन्नाऽनुबोधायचरन्ति चतुर्णां सत्यानां न च सत्यानि प्रतिविध्यन्ति। ते खलु पुनः शारद्वतीपुत्र बोधिसत्त्वामहासत्त्वा एकजातिप्रतिबद्धावेदितव्याः।

अस्ति शारद्वतीपुत्र बोधिसत्त्वामहासत्त्वा षट्सु पारमितासु चरन्तो लोकधातोर्लोकधातुं संक्रामन्ति। तत्र सत्त्वान् बोधौ समादापयन्ति। बुद्धक्षेत्रञ्च परिशोधयन्ति। ते खलु पुनः शारद्वतीपुत्रबोधिसत्त्वामहात्त्वाः अप्रमेयै रसंख्येयैः कल्पैरनुत्तरां सम्यक् सम्बोधिमभिसम्भोत्स्यन्ते।

अस्ति शारद्वतीपुत्र बोधिसत्त्वामहासत्त्वाः षट्सुपारमितासु स्थितानित्यमुद्युक्ताः सत्त्वानां कृते। ते न कदाचिदनर्थोपसंहितां वाचमाभाषन्ते। नाऽप्यनर्थोपसहितं कायवाङ्मनस्कर्म्मकुर्व्वन्ति।

अस्ति शारद्वतीपुत्र बोधिसत्त्वामहासत्त्वाः षट्सुपारमितासुस्थिता स तत्रो युक्ताः सत्त्वानां कृते बुद्धक्षेत्रेण बुद्धक्षेत्रं संक्रामन्ति। सत्त्वानां त्रीन पायपथां च्छिद्यन्तः।

अस्ति शारद्वतीपुत्र बोधिसत्त्वामहासत्त्वाः षट्सुपारमितासु स्थिता दानपारमितायां पुरस्कृत्य सर्व्वसत्त्वानां सर्व्वसुखोपधानमुपसंहरन्ति। अन्नमन्नाऽर्थिकेभ्यः पानं पानाऽर्थिकेभ्यः यानं यानाऽर्थिकेभ्यः पुष्पं पुष्पाऽर्थिकेभ्यः गन्धं गन्धाऽर्थिकेभ्यः माल्यं माल्याऽर्थिकेभ्यः विलेपनं विलेपनाऽर्थिकेभ्यः शय्यासनं शय्यासनाऽर्थिभ्यः

* तेच इति च पुस्तके पाठः.

वस्त्रं वस्त्राऽर्थिकेभ्यः शयनासनमासनाऽर्थिकेभ्यः प्रासौनिकं प्रासौ-निकाऽर्थिकेभ्यः उपाश्रयमुपाश्रयाऽर्थिकेभ्यः कल्पिकजीवितपरिष्कारानुपसंहरन्ति ।

अस्ति शारद्वतीपुत्र बोधिसत्त्वामहासत्त्वाः ये षट् पारमितासु स्थित्वा शीलपारमितां पुरस्कृत्यसत्त्वान् कायवाङ्मनः सम्बरे-प्रतिष्ठापयन्ति । अस्ति शारद्वतीपुत्र बोधिसत्त्वामहासत्त्वा ये षट्सु-पारमितासु स्थित्वा क्षान्तिपारमितां पुरस्कृत्याक्रोधव्यापादे सत्त्वान् प्रतिष्ठापयन्ति ।

अस्ति शारद्वतीपुत्र बोधिसत्त्वामहासत्त्वाः ये षट्सुपारमितासु स्थित्वा वीर्य्यपारमितां पुरस्कृत्य सर्व्वकुशलधर्म्माऽभियोगे सत्त्वान् प्रतिष्ठापयन्ति ।

अस्ति शारद्वतीपुत्र बोधिसत्त्वामहासत्त्वाः ये षट्सु पारमितासु स्थित्वाध्यानपारमितां पुरस्कृत्य शमथैकाग्रतायां कामविवेके च सत्त्वान् प्रतिष्ठापयन्ति ।

अस्ति शारद्वतीपुत्र बोधिसत्त्वामहासत्त्वाः ये षट्सुपारमितासु स्थित्वा प्रज्ञापारमितां पुरस्कृत्य यादृश एव तथागतविग्रहस्तादृश-मात्मभावमभिनिर्म्माय नैरयिकाणां सत्त्वानां तिर्य्यग्योनिगतानां सत्त्वानां यामलौकिकानां सत्त्वानां सर्व्वदुर्गतिसमतिक्रमायधर्म्मं देशयन्ति ।

अस्ति शारद्वतीपुत्र बोधिसत्त्वामहासत्त्वाः ये षट्सुपारमितासु स्थित्वा यादृशोबुद्धविग्रहस्तादृशमात्मभावमभिनिर्म्माय पूर्व्वस्यांदिशि गङ्गानदीवालुकोपमानि बुद्धक्षेत्राण्युपसंक्रम्य सत्त्वेभ्योधर्म्मं देशयन्ति ।

तथागतान् पर्य्युपासन्ते धर्मञ्च शृण्वन्ति । बोधिसत्त्वसंघञ्च बुद्धक्षेत्र-गुणव्यूहांश्च पश्यन्ति । ते तत्र बुद्धक्षेत्रेषु निर्म्मितानि गृहीत्वा उदारतराणि च विशिष्टतराणि च बुद्धक्षेत्राणि निष्पादयन्त्येकजा-तिप्रतिबद्धाश्च बोधिसत्त्वामहासत्त्वास्तत्र बुद्धक्षेत्रेषु निष्पद्यन्ते ।

दक्षिणस्यांदिशि गङ्गानदीवालुकोपमानि बुद्धक्षेत्राण्युपसंक्रम्य सत्त्वेभ्योधर्मं देशयन्ति । तथागतान् पर्य्युपासन्ते धर्मञ्च शृण्वन्ति । बोधिसत्त्वसङ्घञ्च बुद्धक्षेत्रगुणव्यूहांश्च पश्यन्ति । ते तत्र बुद्धक्षेत्रेषु निर्म्मितानि गृहीत्वा उदारतराणि च विशिष्टतराणि च बुद्धक्षेत्राणि निष्पादयन्त्येकजातिप्रतिलब्धा*श्च बोधिसत्त्वामहासत्त्वास्तत्र बुद्धक्षेत्रेषु निष्पद्यन्ते । पश्चिमायांदिशि गङ्गानदीवालुकोपमानि बुद्धक्षेत्रा-ण्युपसंक्रम्य सत्त्वेभ्योधर्मं देशयन्ति । तथागतान् पर्य्युपासन्ते । धर्मञ्च शृण्वन्ति बोधिसत्त्वसङ्घञ्च बुद्धक्षेत्रगुणव्यूहांश्च पश्यन्ति । ते तत्र बुद्धक्षेत्रेषु निर्म्मितानि गृहीत्वा उदारतराणि च विशिष्टतराणि च बुद्धक्षेत्राणि निष्पादयन्त्येकजाति प्रतिबद्धाश्च बोधिसत्त्वामहासत्त्वाः तत्र बुद्धक्षेत्रेषु निष्पद्यन्ते । उत्तरस्यांदिशि गङ्गानदीवालुकोपमानि बुद्धक्षेत्राण्युपसंक्रम्य सत्त्वेभ्योधर्मं देशयन्ति । तथागतान् पर्य्युपासन्ते । धर्मञ्च शृण्वन्ति बोधिसत्त्वसंघञ्च बुद्धक्षेत्रगुणव्यूहांश्च पश्यन्ति । ते तत्र बुद्धक्षेत्रेषु निर्म्मितानि गृहीत्वा उदारतराणि च विशिष्टतराणि च बुद्धक्षेत्राणि निष्पादयन्त्येकजातिप्रतिलब्धाश्च बोधिसत्त्वामहासत्त्वाः तत्र बुद्धक्षेत्रेषु निष्पद्यन्ते । उत्तरपूर्व्वस्यांदिशि गङ्गानदीवालुको-पमानि बुद्धक्षेत्राण्युपसंक्रम्य सत्त्वेभ्योधर्मं देशयन्ति । तथागतान्

* प्रतिबद्धा इति ख, ग, घ, पुस्तकेषु पाठः एवं परत्र ।

पर्य्युपासन्ते। धर्म्मञ्च शृण्वन्ति बोधिसत्त्वसंघञ्च बुद्धक्षेत्रगुणव्यूहांश्च
पश्यन्ति। ते तत्र बुद्धक्षेत्रेषु निर्म्मितानि गृहीत्वा उदारतराणि च
विशिष्टतराणि च बुद्धक्षेत्राणि निष्पादयन्ति। एकजातिप्रतिलब्धाश्च
बोधिसत्त्वामहासत्त्वास्तत्र बुद्धक्षेत्रेषु निष्पद्यन्ते। पूर्वदक्षिणस्यांदिशि
गङ्गानदीवालुकोपमानि बुद्धक्षेत्राण्युपसंक्रम्य सत्त्वेभ्योधर्म्मं देशयन्ति।
तथागतान् पर्य्युपासन्ते। धर्म्मञ्च शृण्वन्ति। बोधिसत्त्वसंघञ्च बुद्धक्षे-
त्रगुणव्यूहांश्च पश्यन्ति। ते तत्र बुद्धक्षेत्रेषु निर्म्मितानि गृहीत्वा उदा-
रतराणि च विशिष्टतराणि च बुद्धक्षेत्राणि निष्पादयन्ति। एकजा-
तिप्रतिलब्धाश्च बोधिसत्त्वामहासत्त्वाः तत्र बुद्धक्षेत्रेषु निष्पद्यन्ते।
दक्षिणपश्चिमायांदिशि गङ्गानदीवालुकोपमानि बुद्धक्षेत्राण्युपसंक्रम्य
सत्त्वेभ्योधर्म्मं देशयन्ति। तथागतान् पर्य्युपासन्ते धर्म्मं शृण्वन्ति
बोधिसत्त्वसंघञ्च बुद्धक्षेत्रगुणव्यूहांश्च पश्यन्ति। ते तत्र बुद्धक्षेत्रेषु
निर्म्मितानि गृहीत्वा उदारतराणि च विशिष्टतराणि च बुद्धक्षे-
त्राणि निष्पादयन्ति। एकजातिप्रतिलब्धाश्च बोधिसत्त्वामहासत्त्वास्तत्र
बुद्धक्षेत्रेषु निष्पद्यन्ते। पश्चिमोत्तरस्यांदिशि गङ्गानदीवालुकोपमानि
बुद्धक्षेत्राण्युपसंक्रम्य सत्त्वेभ्योधर्म्मं देशयन्ति। तथागतान् पर्य्युपासन्ते।
धर्म्मञ्च शृण्वन्ति। बोधिसत्त्वसंघञ्च बुद्धक्षेत्रगुणव्यूहां पश्यन्ति। ते
तत्र बुद्धक्षेत्रेषु निर्म्मितानि गृहीत्वा उदारतराणि च विशिष्टतराणि
च बुद्धक्षेत्राणि निष्पादयन्ति। एकजाति प्रतिलब्धाश्च बोधिसत्त्वा-
महासत्त्वाः तत्र बुद्धक्षेत्रेषु निष्पद्यन्ते। अधस्ताद्दिशि गङ्गानदीवालु-
कोपमानि बुद्धक्षेत्राण्युपसंक्रम्य सत्त्वेभ्योधर्म्मं देशयन्ति। तथागतान्
पर्य्युपासन्ते। धर्म्मञ्च शृण्वन्ति। बोधिसत्त्वसंघञ्च बुद्धक्षेत्रगुणव्यूहांश्च

पश्यन्ति । ते तत्र बुद्धक्षेत्रेषु निर्म्मितानि गृहीत्वा उदारतराणि च विशिष्टतराणि च बुद्धक्षेत्राणि निष्पादयन्ति । एकजाति प्रतिलब्धाश्च बोधिसत्त्वामहासत्त्वाः तत्र बुद्धक्षेत्रेषु निष्पद्यन्ते । उपरिष्टाद्दिशि गङ्गानदीवालुकोपमानि बुद्धक्षेत्राण्युपसंक्रम्य सत्त्वेभ्योधर्म्मं देशयन्ति । तथागतान् पर्य्युपासन्ते । धर्मंश्च शृण्वन्ति । बोधिसत्त्वसंघश्च बुद्धक्षेत्रगुणव्यूहांश्च पश्यन्ति । ते तत्र बुद्धक्षेत्रेषु निर्म्मि*तानि गृहीत्वा उदारतराणि च विशिष्टतराणि च बुद्धक्षेत्राणि निष्पादयन्त्येकजाति प्रतिलब्धाश्च बोधिसत्त्वामहासत्त्वास्तत्र बुद्धक्षेत्रेषु निष्पद्यन्ते ।

अस्ति शारद्वतीपुत्र बोधिसत्त्वामहासत्त्वाः षट्सु पारमितासु चरन्तोद्वात्रिंशतामहापुरुषलक्षणैः समन्वागताभूत्वा उत्तमैरपरिशुद्धैस्त्रेन्द्रियैः समन्वागता भवन्ति । ते तैः परिशुद्धैरात्मभावैर्व्वहुजनस्य प्रीतिप्रसादं जनयन्ति । ते च वहुजनस्य प्रियाश्च भवन्ति† । मनापाश्च ते सत्त्वास्तेनैव चित्तप्रसादकुशलमूलेनाऽपूर्व्वेण त्रिभिर्यानैः परिनिर्व्वान्ति । एवं खलु शारद्वतीपुत्र बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां चरता कायपरिशुद्धौ शिक्षितव्यं । वाक्यपरिशुद्धौ शिक्षितव्यं । मनः परिशुद्धौ शिक्षितव्यं ।

अस्ति शारद्वतीपुत्र बोधिसत्त्वामहासत्त्वाः षट्सु पारमितासु

---

* क्वचित् निर्म्मितानीति क्वचित् निमित्तानीति क च पुस्तके पाठः ।

† मनापाइति पाठः सर्व्वेषु पुस्तकेषु । शब्दोऽयं कस्मिंश्चिदर्थविशेषे पारिभाषिकः ।

चरन्तः उत्तमानीन्द्रियाणि प्रतिलभन्ते तैरुत्तमैरिन्द्रियैरात्मान-मुत्कर्षयन्ति न परान् पंसयन्ति* ।

अस्ति शारद्वतीपुत्र बोधिसत्त्वामहासत्त्वाः प्रथमचित्तोत्पाद-मुपादायदानपारमितायां शीलपारमितायाञ्च स्थित्वा न कदाचि-द्दारिद्र्यं गच्छन्ति। न दुर्गतिविनिपातं प्रपतन्ति। यावन्नाऽवैव-र्त्तिकभूमिमनुप्राप्नुवन्ति ।

अस्ति शारद्वतीपुत्र बोधिसत्त्वामहासत्त्वाः प्रथमचित्तोत्पाद-मुपादाय दशकुशलान् कर्म्मपथान् न जातूत्सृजन्ति। यावन्नाऽवैव-र्त्तिकभूमिमनुप्राप्नुवन्ति ।

अस्ति शारद्वतीपुत्र बोधिसत्त्वामहासत्त्वाः दानपारमितायां शीलपारमितायाञ्च स्थित्वा राजानोभवन्ति चक्रवर्त्तिनः। ते दश-कुशलेषु कर्म्मपथेषु सत्त्वान् प्रतिष्ठापयन्ति । दानेन च प्रियवद्यतया सत्त्वान् संगृह्णन्ति ।

अस्ति शारद्वतीपुत्र बोधिसत्त्वामहासत्त्वाः दानपारमितायां शीलपारमितायाञ्च स्थित्वाऽनेकानि चक्रवर्त्तिराज्यानि परिगृह्णन्त्य-नेकानि चक्रवर्त्तिराज्यशतसहस्राणि कारयन्ति। तत्र च स्थित्वा-ऽनेकानि बुद्धकोटीशतसहस्राण्यारागयन्ति। तांश्च बुद्धान् भगवतः सत्कुर्व्वन्ति गुरु कुर्व्वन्ति मानयन्ति पूजयन्ति सर्व्वोपकरणैः सर्व्वसुखाभिश्च ।

अस्ति शारद्वतीपुत्र बोधिसत्त्वामहासत्त्वाः षट्सु पारमितासु स्थित्वा सत्त्वानां [illegible] कुर्व्वन्ति। यावता

[illegible]

च तेन धर्म्माऽवभासेन न कदाचिद्विरहिता भवन्ति। यावदनुत्तरां सम्यक् सम्बोधिमभिसम्बुध्यन्ते। अयं शारद्वतीपुत्र बोधिसत्त्वानां महासत्त्वानामुदयो बुद्धधर्म्मेषु। तस्मात्तर्हि शारद्वतीपुत्र बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां चरता साऽवद्यानां कायवाङ्मनस्कर्म्मणामवकाशोन दातव्यः। एवमुक्ते आयुष्माञ्छारद्वतीपुत्रोभगवन्तमेतदवोचत्। कतमं भगवन् बोधिसत्त्वस्य महासत्त्वस्य साऽवद्यं* कायकर्म्म साऽवद्यं वाक्कर्म्म साऽवद्यं मनः कर्म्म†। भगवानाह। यदा शारद्वतीपुत्र बोधिसत्त्वस्य महासत्त्वस्यैवं भवति। अयं कायो येन कायारम्भं कुर्य्यां। इयं वाग्यया वागारम्भं कुर्य्यां। इदं मनो येन मन आरम्भं कुर्य्यां। अयं शारद्वतीपुत्र बोधिसत्त्वस्य महासत्त्वस्य साऽवद्यकायवाङ्मनकर्म्मारम्भः। न हि शारद्वतीपुत्र बोधिसत्त्वोमहासत्त्वः प्रज्ञापारमितायां चरन् कायमुपलभते। न वाचमुपलभते। न चित्तमुपलभते। येन कायेन यया वाचा येन मनसा मात्सर्य्यचित्तमुत्पादयेत् दौःशील्यचित्तं व्यापादचित्तं कौशीद्यचित्तं विक्षेपचित्तं दौष्प्रज्ञचित्तमुत्पादयेत् नैवं शारद्वतीपुत्र वेदितव्यम्। यद्बोधिसत्त्वोमहासत्त्वः प्रज्ञापारमितायां चरन् कायदौष्ठुल्यमुत्पादयेत् वाग्दौष्ठुल्यमुत्पादयेत् मनोदौष्ठुल्यमुत्पादयेत् नेदं स्थानं विद्यते। तत्कस्य हेतोस्तथाहि शारद्वतीपुत्र बोधिसत्त्वोमहासत्त्वाः षट्सु पारमितासु चरन् कायदौष्ठुल्यं शोधयति वाग्दौष्ठुल्यं

---

* साऽवद्यं निन्दनीयं। नञ्पूर्व्वस्य वदेर्यप्रत्ययान्तोऽवद्यनिपातः गर्हणीयार्थे।

† सारऽवद्यं वाक्कर्म्म साऽरऽवद्यं मनः कर्म्म ख पुस्तके।

शोधयति मनोदौष्ठुल्यं शोधयति। इदं बोधिसत्त्वस्य महासत्त्वस्याऽनवद्यं कायकर्म्म अनवद्यं वाक्कर्म्म अनवद्यं मनस्कर्म्म। आह कथं पुनर्भगवन् बोधिसत्त्वोमहासत्त्वः कायदौष्ठुल्यं शोधयति वाग्दौष्ठुल्यं शोधयति मनोदौष्ठुल्यं शोधयति। भगवानाह यदा शारद्वतीपुत्र बोधिसत्त्वोमहासत्त्वो न कायमुपलभते न वाचमुपलभते न चित्तमुपलभते। एवं शारद्वतीपुत्र बोधिसत्त्वोमहासत्त्वः कायदौष्ठुल्यं शोधयति वाग्दौष्ठुल्यं शोधयति मनोदौष्ठुल्यं शोधयति।

पुनरपरं शारद्वतीपुत्र बोधिसत्त्वोमहासत्त्वः प्रथमचित्तोत्पादमुपादाय दशकुशलान् कर्म्मपथान् समादाय वर्त्तते। न श्रावकचित्तं वा प्रत्येकबुद्धचित्तं वोत्पादयति। सततसमितञ्चाऽस्य सर्व्वसत्त्वेषु महाकरुणाचित्तं प्रत्युपस्थितं भवति। एवं बोधिसत्त्वस्य महासत्त्वस्य कायदौष्ठुल्यं वाग्दौष्ठुल्यं मनोदौष्ठुल्यं परिशुद्धमिति वदामि।

अस्ति शारद्वतीपुत्र बोधिसत्त्वामहासत्त्वाः प्रज्ञापारमितायां चरन्तो बोधिसत्त्वमार्गं परिशोधयमानाः दानपारमितायां चरन्ति। शीलपारमितायां चरन्ति। क्षान्तिपारमितायां चरन्ति। वीर्य्यपारमितायां चरन्ति। ध्यानपारमितायां चरन्ति। आह कतमोभगवन् बोधिसत्त्वस्य महासत्त्वस्य बोधिमार्गः। भगवानाह। यदा शारद्वतीपुत्र बोधिसत्त्वोमहासत्त्वः प्रज्ञापारमितायां चरन् न कायमुपलभते। न वाचमुपलभते। न चित्तमुपलभते। न दानपारमितामुपलभते। न शीलपारमितामुपलभते। न क्षान्तिपारमितामुपलभते। न वीर्य्यपारमितामुपलभते। न ध्यानपारमितामुपलभते। न प्रज्ञापारमितामुपलभते। न श्रावकयानमुप-

लभते। न प्रत्येकयानमुपलभते। न सम्यक् सम्बुद्धयानमुपलभते। अयं शारद्वतीपुत्र बोधिसत्त्वस्य महासत्त्वस्य बोधिमार्गः। यदुत सर्व्वधर्म्माऽनुपलम्भतो* अनायूहानियूहता। अनेन शारद्वतीपुत्र मार्गेण बोधिसत्त्वामहासत्त्वाः षट्सु पारमितासु चरन्तो गच्छन्ति। ते न शक्यां केनचिदवमर्दितुं। आह कथं चरन्तो भगवन् बोधिसत्त्वामहासत्त्वाः अनवमर्द्या भवन्ति। भगवानाह। यदा बोधिसत्त्वामहासत्त्वाः षट्सु पारमितासु चरन्तो न रूपं मन्यन्ते न वेदनां मन्यन्ते न संज्ञां मन्यन्ते न संस्कारान् मन्यन्ते न विज्ञानं मन्यन्ते चक्षूरूपमपि न मन्यन्ते। श्रोत्रशब्दानपि न मन्यन्ते। घ्राणगन्धानपि न मन्यन्ते। जिह्वारसानपि न मन्यन्ते। कायस्पर्शानपि न मन्यन्ते। मनोधर्म्मानपि न मन्यन्ते। पृथिवीधातुं न मन्यन्ते। अब्धातुं न मन्यन्ते। तेजोधातुं न मन्यन्ते। वायुधातुं न मन्यन्ते। आकाशधातुं न मन्यन्ते। विज्ञानधातुं न मन्यन्ते। चक्षुर्धातुं न मन्यन्ते। रूपधातुं न मन्यन्ते। चक्षुर्व्विज्ञानधातुं न मन्यन्ते। श्रोत्रधातुं न मन्यन्ते। शब्दधातुं न मन्यन्ते। श्रोत्रविज्ञानधातुं न मन्यन्ते। घ्राणधातुं न मन्यन्ते। गन्धधातुं न मन्यन्ते। घ्राणविज्ञानधातुं न मन्यन्ते। जिह्वाधातुं न मन्यन्ते। रसधातुं न मन्यन्ते। जिह्वाविज्ञानधातुं न मन्यन्ते। कायधातुं न मन्यन्ते। स्प्रष्टव्यधातुं न मन्यन्ते। कायविज्ञानधातुं न मन्यन्ते। मनोधातुं न

---

* सर्व्वधर्म्मानुपलभते इति ख, ग, घ पाठः।

† शक्याः इति युक्तं प्रतिभाति।

मन्यन्ते। धर्मधातुं न मन्यन्ते। मनोविज्ञानधातुं न मन्यन्ते। प्रतीत्यसमुत्पादं* न मन्यन्ते। दानं न मन्यन्ते। शीलं न मन्यन्ते। क्षान्तिं न मन्यन्ते। वीर्य्यं न मन्यन्ते। ध्यानं न मन्यन्ते। प्रज्ञां न मन्यन्ते। अध्यात्मशून्यतां न मन्यन्ते। बहिर्द्धाशून्यतां न मन्यन्ते। अध्यात्मबहिर्द्धाशून्यतां न मन्यन्ते। शून्यताशून्यतां न मन्यन्ते। महाशून्यतां न मन्यन्ते। परमार्थशून्यतां न मन्यन्ते। संस्कृतशून्यतां न मन्यन्ते। असंस्कृतशून्यतां न मन्यन्ते। अत्यन्तशून्यतां न मन्यन्ते। अनवराग्रशून्यतां न मन्यन्ते। अनवकारशून्यतां न मन्यन्ते। प्रकृतिशून्यतां न मन्यन्ते। सर्व्वधर्मशून्यतां न मन्यन्ते। स्वलक्षणशून्यतां न मन्यन्ते। अनुपलम्भशून्यतां न मन्यन्ते।

---

* हेतूपनिबन्धनस्य च संग्राहकसूत्रम्। "उत्पादाद्वा तथागतानामनुत्पादाद्वास्थितैवैषां धर्म्माणां धर्म्मताधर्म्मस्थितिताधर्म्मनियामकता च प्रतीत्य समुत्पादाऽनुलोमतेति।" तथागतानां बुद्धानां मते धर्म्माणां कार्य्यकारणरूपाणां या धर्म्मता कार्य्यकारणभावरूपा एषोत्पादादनुत्पादाद्वास्थिता। यस्मिन् सति यदुत्पद्यते तत्तस्य कारणस्य कार्य्यमिति धर्म्मतेत्यस्य विवरणम्। धर्म्मस्य कार्य्यस्य कार्य्यस्य कारणानतिक्रमेण स्थितिः। धर्म्मस्य कारणस्य कार्य्यं प्रतिनियामकता। न त्वयं कार्य्यकारणभावश्चेतनमन्तरेण न सम्भवतीत्यत उक्तं कारणे सति तत्प्रतीत्य प्राप्यसमुत्पादेऽनुलोमता चनुसारिता या सैव धर्म्मता उत्पादादनुत्पादाद्वा धर्म्माणां स्थिता। न वाऽत्र कश्चिच्चेतनोऽधिष्ठातोपलभ्यत इति सूत्रार्थः। यथा प्रतीत्य समुत्पादस्य हेतूपनिबन्धः। वीजादङ्कुरोऽङ्कुरात्काण्डं काण्डान्नालो नालाद्गर्भस्ततः पुष्पं ततः फलमिति :— सर्व्वदर्शनसंग्रहः।

अभावशून्यतां न मन्यन्ते । स्वभावशून्यतां न मन्यन्ते । अभाव-स्वभावशून्यतां न मन्यन्ते । चत्वारि स्मृत्युपस्थानानि न मन्यन्ते । चत्वारि सम्यक् प्रहाणानि न मन्यन्ते । चतुरश्चर्द्धिपादान् न मन्यन्ते । पञ्चेन्द्रियाणि न मन्यन्ते । सप्तबोध्यङ्गानि न मन्यन्ते । आर्य्याऽष्टाऽङ्गमार्गं न मन्यन्ते । चत्वार्य्यार्य्यसत्यानि न मन्यन्ते । चत्वारिध्यानानि न मन्यन्ते । चत्वार्य्यप्रमाणानि न मन्यन्त । चतस्रआरूप्यसमापत्तीर्न मन्यन्ते । अष्टौविमोचान्न मन्यन्ते । नवा-ऽनुपूर्व्वविहारसमापत्तीर्न मन्यन्ते । शून्यतां न मन्यन्ते । आनिमित्तं न मन्यन्ते । अप्रणिहितं न मन्यन्ते । अभिज्ञां न मन्यन्ते । धारणीमुखानि न मन्यन्ते । दश तथागतबलानि न मन्यन्ते । चत्वारि वैशारद्यानि न मन्यन्ते । चतस्रः प्रतिसम्विदोन मन्यन्ते । महामैत्रीं न मन्यन्ते । महाकरुणां न मन्यन्ते । अष्टादशाऽऽवेणि-कान् बुद्धधर्म्मान् न मन्यन्ते । स्रोतआपत्तिफलं न मन्यन्ते । सकृदा-गामिफलं न मन्यन्ते । अनागामिफलं न मन्यन्ते । अर्हत्त्वं न मन्यन्ते । प्रत्येकबोधिं न मन्यन्ते । मार्गाऽऽकारज्ञतां न मन्यन्ते । सर्व्वाऽऽकारज्ञतां न मन्यन्ते । अनुत्तरां सम्यक्सम्बोधिं न मन्यन्ते । संसारं न मन्यन्ते । निर्व्वाणं न मन्यन्ते । एवं खलु शारद्वतीपुत्र बोधिसत्त्वामहासत्त्वाः षड्भिः पारमिताभिर्व्विवर्द्धन्ते । न च केनचिदवमर्द्यन्ते ।

अस्ति शारद्वतीपुत्र बोधिसत्त्वामहासत्त्वाः षट्सु पारमितासु स्थित्वा सर्व्वज्ञज्ञानं परिपूरयन्ति । येन ज्ञानेन समन्वागता न जात्वपायेषूपपद्यन्ते । न मनुष्यदारिद्र्यमनुभवन्ति । न तथारूप-

मात्मभावं परिगृह्णन्ति येनात्मभावेन निन्दनीया भवन्ति सदेवमानुषाऽसुरस्य लोकस्य। अथायुष्माञ्छारद्वतीपुत्रोभगवन्तमेतदवोचत्। कतमं भगवन् बोधिसत्त्वस्य महासत्त्वस्य सर्व्वज्ञज्ञानं येन ज्ञानेन समन्वागताबोधिसत्त्वामहासत्त्वा न जालपायेषूपपद्यन्ते। न मनुष्यदारिद्र्यमनुभवन्ति। न तथारूपमात्मभावं परिगृह्णन्ति येनात्मभावेन निन्दनीयो भवति सदेवमानुषासुरस्य लोकस्य।

भगवानाह। येन शारद्वतीपुत्र ज्ञानेन समन्वागतो बोधिसत्त्वोमहासत्त्वः पूर्व्वस्यांदिशि गङ्गानदीवालुकोपमेषु लोकधातुषु गङ्गानदीवालुकोपमांस्तथागतानर्हतः सम्यक् सम्बुद्धान् पश्यति। धर्म्मांश्च शृणोति बोधिसत्त्वसंघञ्च बुद्धक्षेत्रगुणव्यूहांश्च पश्यति। येन ज्ञानेन समन्वागतो बोधिसत्त्वोमहासत्त्वो दक्षिणस्यांदिशि गङ्गानदीवालुकोपमेषु लोकधातुषु गङ्गानदीवालुकोपमांस्तथागतानर्हतः सम्यक् सम्बुद्धान् पश्यति। धर्म्मांश्च शृणोति बोधिसत्त्वसंघञ्च बुद्धक्षेत्रगुणव्यूहांश्च पश्यति। येन ज्ञानेन समन्वागतो बोधिसत्त्वोमहासत्त्वः पश्चिमायांदिशि गङ्गानदीवालुकोपमेषु लोकधातुषु गङ्गानदीवालुकोपमांस्तथागतानर्हतः सम्यक् सम्बुद्धान् पश्यति। धर्म्मांश्च शृणोति। बोधिसत्त्वसंघञ्च बुद्धक्षेत्रगुणव्यूहांश्च पश्यति। येन ज्ञानेन समन्वागतो बोधिसत्त्वोमहासत्त्व उत्तरस्यांदिशि गङ्गानदीवालुकोपमेषु लोकधातुषु गङ्गानदीवालुकोपमांस्तथागतानर्हतः सम्यक् सम्बुद्धान् पश्यति। धर्म्मांश्च शृणोति। बोधिसत्त्वसंघञ्च बुद्धक्षेत्रगुणव्यूहांश्च पश्यति। येन ज्ञानेन समन्वागतो बोधिसत्त्वोमहासत्त्व उत्तरपूर्व्वस्यांदिशि गङ्गानदीवालुकोपमेषु लोकधातुषु

बोधिसत्त्वसंज्ञामुत्पादयति। न बुद्धसंज्ञामुत्पादयति। (१) नात्म-
संज्ञामुत्पादयति। न परसंज्ञामुत्पादयति। न बुद्धक्षेत्रसंज्ञामु-
त्पादयति। अनेन ज्ञानेन समन्वागतो बोधिसत्त्वो महासत्त्वो दानपार-
मितायां चरति न दानपारमितामुपलभते। शीलपारमितायां
चरति न शीलपारमितामुपलभते। क्षान्तिपारमितायां चरति न
क्षान्तिपारमितामुपलभते। वीर्यपारमितायां चरति न वीर्य-
पारमितामुपलभते। ध्यानपारमितायां चरति न ध्यानपारमिता-
मुपलभते। प्रज्ञापारमितायां चरति न प्रज्ञापारमितामुपलभते।
अध्यात्मशून्यतां भावयति नाऽध्यात्मशून्यतामुपलभते। बहिर्द्धा-
शून्यतां भावयति न बहिर्द्धाशून्यतामुपलभते। अध्यात्मबहिर्द्धा-
शून्यतां भावयति नाऽध्यत्मबहिर्द्धाशून्यतामुपलभते। शून्यताशून्यतां
भावयति न शून्यताशून्यतामुपलभते। महाशून्यतां भावयति न
महाशून्यतामुपलभते। परमार्थशून्यतां भावयति न परमार्थ-
शून्यतामुपलभते। संस्कृतशून्यतां भावयति न संस्कृतशून्यतामुप-
लभते। असंस्कृतशून्यतां भावयति नाऽसंस्कृतशून्यतामुपलभते।
अत्यन्तशून्यतां भावयति नाऽत्यन्तशून्यतामुपलभते। अनवराग्र-
शून्यतां भावयति नाऽनवराग्रशून्यतामुपलभते। अनवकारशून्यतां
भावयति नाऽनवकारशून्यतामुपलभते। प्रकृतिशून्यतां भावयति न
प्रकृतिशून्यतामुपलभते। सर्व्वधर्म्मशून्यतां भावयति न सर्व्वधर्म्म-
शून्यतामुपलभते। स्वलक्षणशून्यतां भावयति न स्वलक्षणशून्यता-
मुपलभते। अनुपलम्भशून्यतां भावयति नाऽनुपलम्भशून्यतामुप-
लभते। अभावशून्यतां भावयति नाऽभावशून्यतामुपलभते।

Pariśiṣṭa Parvan, (Text) Fasc. 1-5 @ /6/ each	...	...	Rs.	1
Prākṛita-Paiṅgalam, Fasc. 1-6 @ /6/ each	...	...	...	2
Pṛthivirāj Rāsa, (Text) Part II, Fasc. 1-5 @ /6/ each	...	...	...	1
Ditto (English) Part II, Fasc. 1	...	...	...	0
Prākṛita Lakshanam, (Text) Fasc. 1	...	...	...	1
Parāçara Smṛiti, (Text) Vol. I, Fasc. 1-8; Vol. II, Fasc. 1-6; Vol. III, Fasc. 1-6 @ /6/ each	...	...	...	7
Parāçara, Institutes of (English)	..		...	0
Prabandhacintāmaṇi (English) Fasc. 1-3 @ /12/ each	...		...	2
*Sāma Veda Saṁhitā, (Text) Vols. I, Fasc. 5-10; II, 1-6; III, 1-7; IV, 1-6; V, 1-8, @ /6/ each Fasc.	..	...	...	13
Sāṅkhya Sūtra Vṛtti, (Text) Fasc. 1-4 @ /6/ each	..		...	1
Ditto (English) Fasc. 1-3 @ /12/ each	..		...	2
Suçruta Saṁhitā, (Eng.) Fasc. 1 @ /12/	...	...	...	0
*Taittereya Saṁhitā, (Text) Fasc. 14-45 @ /6/ each	...		...	12
Tāṇḍya Brāhmaṇa, (Text) Fasc. 1-19 @ /6/ each	..		...	7
Tattva Cintāmaṇi, (Text) Vol. I, Fasc. 1-9, Vol. II, Fasc. 1-10, Vol. III, Fasc. 1-2, Vol. IV, Fasc. 1, Vol. V, Fasc. 1-5, Part IV, Vol. II, Fasc. 1-12 @ /6/ each	...	...	...	14
Trikāṇḍa-Maṇḍanam, (Text) Fasc. 1-2 @ /6/	...	...	..	0
Tulsī Satsaī, (Text) Fasc. 1-5 @ /6/ each	...	..	...	1
Upamita-bhava-prapañca-kathā (Text) Fasc. 1-4 @ /6/ each			...	1
Uvāsagadasāo (Text and English) Fasc. 1-6 @ /12/		...	...	4
Varāha Purāṇa, (Text) Fasc. 1-14 @ /6/ each ...		...	...	5
Varṣa Kriyā Kaumudi, Fasc. 1-5 @ /6/	...	...	...	1
*Vāyu Purāṇa, (Text) Vol. I, Fasc. 2-6; Vol. II, Fasc. 1-7, @ /6/ each	...	...	...	4
Viṣṇu Smṛti, (Text) Fasc. 1-2 @ /6/ each	...	...	...	0
Vivādaratnākara, (Text) Fasc. 1-7 @ /6/ each ...		...	...	2
Vṛhannāradīya Purāṇa, (Text) Fasc. 1-6 @ /6/		...	...	2
Vṛhat Svayambhū Purāṇa, Fasc. 1-6	...	...	...	2

Tibetan Series.

Pag-Sam Thi S'iṅ, Fasc. 1-4 @ 1/ each	...		...	4
Sher-Phyin, Vol. I, Fasc. 1-5; Vol. II, Fasc. 1-3; Vol. III, Fasc. 1-5, @ 1/ each	...		...	13
Rtogs brjod dpag hkhri S'iṅ (Tib. & Sans.) Vol. I, Fasc. 1-5; Vol. II, Fasc. 1-5 @ 1/ each	...		...	10

Arabic and Persian Series.

*Ālamgīrnāmah, with Index, (Text) Fasc. 1-13 @ /6/ each...			...	4
Al-Muqaddasī (English) Vol. I, Fasc. 1-3 @ /12/	...		...	2
Āīn-i-Akbarī, (Text) Fasc. 1-22 @ 1/ each	...	...	...	22
Ditto (English) Vol. I, Fasc. 1-7, Vol. II, Fasc. 1-5, Vol. III, Fasc. 1-5, @ 1/12/ each	...		...	29
Akbarnāmah, with Index, (Text) Fasc. 1-37 @ 1/ each	...		...	37
Ditto English Fasc. 1-6 @ 1/ each	...	...	...	6
Arabic Bibliography, by Dr. A. Sprenger	...	...	...	0
Bādshāhnāmah, with Index, (Text) Fasc. 1-19 @ /6/ each ...			...	7
Catalogue of Arabic Books and Manuscripts	...	...	...	1
Catalogue of the Persian Books and Manuscripts in the Library of the Asiatic Society of Bengal. Fasc. 1-3 @ 1/ each	...		...	3
Dictionary of Arabic Technical Terms, and Appendix, Fasc. 1-21 @ 1/ each	...		...	21
Farhang-i-Rashīdī, (Text) Fasc. 1-14 @ 1/ each	...		...	14
Fihrist-i-Ṭūsī, or, Ṭūsy's list of Shy'ah Books, (Text) Fasc. 1-4 @ /12/ each	...		...	3
Futūḥ-ush-Shām of Wāqidī, (Text) Fasc. 1-9 @ /6/ each	...		...	3
Ditto of Azādī, (Text) Fasc. 1-4 @ /6/ each	...		...	1
Haft Āsmān, History of the Persian Masnawi, (Text) Fasc. 1			...	0
History of the Caliphs, (English) Fasc. 1-6 @ /12/ each	...		...	4
Iqbālnāmah-i-Jahāngīrī, (Text) Fasc. 1-3 @ /6/ each	...		...	1
Iṣābah, with Supplement, (Text) 51 Fasc. @ /12/ each	...		...	35
Maāṣir-ul-Umarā, Vol. I, Fasc. 1-9, Vol. II, Fasc. 1-9; Vol. III, 1-10; Index to Vol. I, Fasc. 10-11; Index to Vol. III, Fasc. 11-12; Index to Vol. II, Fasc. 10-12 @ /6/ each	...		...	13
Maghāzī of Wāqidī, (Text) Fasc. 1-5 @ /6/ each	...		...	1

* The other Fasciculi of these works are out of stock, and complete copies be supplied.

Muntakhabu-t-Tawārīkh, (Text) Fasc. 1–15 @ /6/ each ... Rs. 5
Muntakhabu-t-Tawārīkh, (English) Vol. I, Fasc. 1–7; Vol. II, Fasc. 1–5 and 3 Indexes; Vol. III, Fasc. 1 @ /12/ each 12 0
Muntakhabu-l-Lubāb, (Text) Fasc. 1–19 @ /6/ each 7 2
Ma'āsir-i-'Ālamgīrī, (Text), Fasc. 1–6 @ /6/ each 2 4
Nukhbatu-l-Fikr, (Text) Fasc. 1 ... ... 0 6
Niẓāmī's Khiradnāmah-i-Iskandarī, (Text) Fasc. 1-2 @ /12/ each 1 8
Riyāẓu-s-Salāṭīn, (Text) Fasc. 1–5 @ /6/ each 1 14
Ditto Ditto (English) Fasc. 1. ... ... 0 12
Ṭabaqāt-i-Nāṣirī, (Text) Fasc. 1–5 @ /6/ each 1 14
Ditto (English) Fasc. 1–14 @ /12/ each 10 8
Ditto Index 1 0
Tārīkh-i-Fīrūz Shāhī of Ziyāu-d-dīn Barnī (Text) Fasc. 1–7 @ /6/ each... 2 10
Tārīkh-i-Fīrūzshāhī, of Shams-i-Sirāj Aif, (Text) Fasc. 1–6 @ /6/ each... 2 4
Ten Ancient Arabic Poems, Fasc. 1-2 @ 1/8/ each 3 0
Wis o Rāmīn. (Text) Fasc. 1–5 @ /6/ each 1 14
Ẓafarnāmah, Vol. I, Fasc. 1–9, Vol. II, Fasc. 1–8 @ /6/ each .. 6 6
Tuzuk-i-Jahāngīrī, (Eng.) Fasc. 1 ... ... 0 12

ASIATIC SOCIETY'S PUBLICATIONS.

1. ASIATIC RESEARCHES. Vol. VII, Vols. XI and XVII, and Vols. XIX and XX @ 10/ each 50 0
2. PROCEEDINGS of the Asiatic Society from 1865 to 1869 (incl.) @ /6/ per No.; and from 1870 to date @ /8/ per No.
3. JOURNAL of the Asiatic Society for 1843 (12), 1844 (12), 1845 (12), 1846 (5), 1847 (12), 1848 (12), 1866 (7), 1867 (6), 1868 (6), 1869 (8), 1870 (8), 1871 (7), 1872 (8), 1873 (8) 1874 (8), 1875 (7), 1876 (7), 1877 (8), 1878 (8), 1879 (7), 1880 (8), 1881 (7), 1882, (6), 1883 (5), 1884 (6), 1885 (6), 1886 (8), 1887 (7), 1888 (7), 1889 (10), 1890 (11), 1891 (7), 1892 (8), 1893 (11), 1894 (8), 1895 (7), 1896 (8), 1897 (8), 1898 (8), 1899 (8), *@ 1/8 per No. to Members and @ 2/ per No. to Non-Members*

N. B.—The figures enclosed in brackets give the number of Nos. in each Volume.

4. Centenary Review of the Researches of the Society from 1784–1883 ... 3 0
   A sketch of the Turki language as spoken in Eastern Turkistan, by R. B. Shaw (Extra No., *J.A.S.B.*, 1878) 4 0
   Theobald's Catalogue of Reptiles in the Museum of the Asiatic Society (Extra No., *J.A.S.B.*, 1868) 2 0
   Catalogue of Mammals and Birds of Burmah, by E. Blyth (Extra No., *J.A.S.B.*, 1875) 4 0
   Introduction to the Maithilī Language of North Bihār, by G. A. Grierson, Part II, Chrestomathy and Vocabulary (Extra No., *J.A.S.B.*, 1882) 4 0
5. Anīs-ul-Musharrahīn 3 0
6. Catalogue of Fossil Vertebrata 3 0
7. Catalogue of the Library of the Asiatic Society, Bengal, by W. A. Bion 3 8
8. Ināyah, a Commentary on the Hidāyah, Vols. II and IV, @ 16/ each... 32 0
9. Jawāmiu-l-'ilm ir-riyāẓī, 168 pages with 17 plates, 4to. Part I ... 2 0
10. Khizānatu-l-'ilm 4 0
11. Mahābhārata, Vols. III and IV, @ 20/ each 40 0
12. Moore and Hewitson's Descriptions of New Indian Lepidoptera, Parts I–III, with 8 coloured Plates, 4to. @ 6/ each 15 0
13. Sharaya-ool-Islām 4 0
14. Tibetan Dictionary, by Csoma de Kőrös 10 0
15. Ditto Grammar " " 8 0
16. Kaṣmīraçabdāmṛta, Parts I & II @ 1/8/ 3 0
17. A descriptive catalogue of the paintings, statues, &c., in the rooms of the Asiatic Society of Bengal by C. R. Wilson... ... ... 1 0
18. Memoir on maps illustrating the Ancient Geography of Kaśmīr by M. A. Stein Ph.D., Jl. Extra No. 2 of 1899 ... ... 4 0


Notices of Sanskrit Manuscripts, Fasc. 1-29 @ 1/ each 29 0

BIBLIOTHECA INDICA:

A

COLLECTION OF ORIENTAL WORKS

PUBLISHED BY THE
ASIATIC SOCIETY OF BENGAL.
NEW SERIES, No. 1025.



शतसाहस्रिका प्रज्ञापारमिता ।

ÇATASAHASRIKĀ-PRAJÑĀ-PARAMITA

A

THEOLOGICAL AND PHILOSOPHICAL DISCOURSE

OF

BUDDHA WITH HIS DISCIPLES

(IN A HUNDRED-THOUSAND STANZAS).

EDITED BY
PRATĀPACANDRA GHOṢA.

PART I. FAS. 4.

CALCUTTA:
PRINTED AT THE BAPTIST MISSION PRESS,
AND PUBLISHED BY THE
ASIATIC SOCIETY, 57, PARK STREET,
1902.

LIST OF BOOKS FOR SALE

AT THE LIBRARY OF THE

Asiatic Society of Bengal,

No. 57, PARK STREET, CALCUTTA,

AND OBTAINABLE FROM

THE SOCIETY'S AGENTS, MESSRS. LUZAC & CO., 46, GREAT RUSSELL STREET, LONDON, W.C., AND MR. OTTO HARRASSOWITZ, BOOKSELLER, LEIPZIG, GERMANY.

---

*Complete copies of those works marked with an asterisk * cannot be supplied—some of the Fasciculi being out of stock.*

BIBLIOTHECA INDICA.

Sanskrit Series.

	Rs.	
Advaita Brahma Siddhi, (Text) Fasc. 1-4 @ /6/ each	1	8
Advaitachinta Kaustubhe, Fasc. 1	0	6
*Agni Purāṇa, (Text) Fasc. 4-14 @ /6/ each	4	2
Aitarēya Brāhmaṇa, Vol. I, Fasc. 1-5 and Vol. II, Fasc. 1-5 Vol. III, Fasc. 1-5 Vol. IV, Fasc. 1-5 @ /6/	7	8
Aṇu Bhāṣyam, (Text) Fasc. 1-5 @ /6/ each	1	14
Aphorisms of Sāṇdilya, (English) Fasc. 1	0	12
Aṣṭasāhasrikā Prajñāpāramitā, (Text) Fasc. 1-6 @ /6/ each	2	4
Açvavaidyaka, (Text) Fasc. 1-5 @ /6/ each	1	14
Avadāna Kalpalatā, (Sans. and Tibetan) Vol. I, Fasc. 1-5; Vol. II. Fasc. 1-5 @ 1/ each	10	0
*Bhāmatī, (Text) Fasc. 4-8 @ /6/ each	1	14
Bhāṭṭa Dīpikā Vol. I, Fasc. 1-3	1	2
Bṛhaddēvatā (Text) Fasc. 1-4 @ /6/ each	1	8
Bṛhaddharma Purāṇa, (Text) Fasc. 1-6 @ /6/ each	2	4
Bodhicaryavatara of Cantidevi, Fasc. 1	0	6
Catalogue of Sanskrit Books and MSS., Fasc. 1-3 @ 2/ each	6	0
Çatapatha Brāhmaṇa, Fasc. 1-6	2	4
Catasahasrika Projnaparamita, (Text) Fasc. 1-4 @ /6/ each	1	8
*Caturvarga Chintāmaṇi (Text) Vols. II, 1-25; III. Part I, Fasc. 1-18. Part II, Fasc. 1-10 @ /6/ each	19	14
Catasahasrika-prajna-parimita Part I Fasc. 1-3 @ /6/	1	2
Çlokavartika, (English) Fasc. 1-3	2	4
*Çrauta Sūtra of Āpastamba, (Text) Fasc. 4-16 @ /6/ each	4	14
Ditto Çāṅkhāyana, (Text) Vol. I, Fasc. 1-7; Vol. II, Fasc. 1-4, Vol. III, Fasc. 1-4 @ /6/ each	5	10
Çrī Bhāshyam, (Text) Fasc. 1-3 @ /6/ each	1	2
Gadadhara Paddhati Kālasāra Vol I. Fasc. 1-4	1	8
Kāla Mādhava, (Text) Fasc. 1-4 @ /6/ each	1	8
Kāla Viveka, Fasc. 1-4	1	8
Kātantra, (Text) Fasc. 1-6 @ /12/ each	4	8
Kathā Sarit Sāgara, (English) Fasc. 1-14 @ /12/ each	10	8
Kūrma Purāṇa, (Text) Fasc. 1-9 @ /6/ each	3	6
Lalita-Vistara, (English) Fasc. 1-3 @ /12/ each	2	4
Madana Pārijāta, (Text) Fasc. 1-11 @ /6/ each	4	2
Mahā-bhāṣya-pradīpōdyōta, (Text) Fasc. 1-9 & Vol. II, Fasc. 1-6 @ /6/ each	5	10
Manutīkā Saṅgraha, (Text) Fasc. 1-3 @ /6/ each	1	2
Mārkaṇḍēya Purāṇa, (English) Fasc. 1-6 @ /12/ each	4	8
*Mīmāṃsā Darçana, (Text) Fasc. 7-19 @ /6/ each	4	14
Nārada Smṛti, (Text) Fasc. 1-3 @ /6/	1	2
Nyāyavārtika, (Text) Fasc. 1-5 @ /6/	1	14
*Nirukta, (Text) Vol. III, Fasc. 1-6; Vol. IV, Fasc. 1-8 @ /6/ each	5	4
Nityacarapaddhati Fasc. 1-6 (Text) @ /6/	2	4
Nyayabindutīkā, (Text)	0	10
Nyāya Kusumāñjali Prakaraṇa (Text) Vol. I, Fasc. 1-6 Vol. II, Fasc. 1-3 @ /6/ each	3	6
Padumawati, Fasc. 1-4 @ 2/	8	0

स्वभावशून्यतां भावयति न स्वभावशून्यतामुपलभते। अभावस्वभावशून्यतां भावयति नाऽभावस्वभावशून्यतामुपलभते। चत्वारि-स्मृत्युपस्थानानि भावयति न स्मृत्युपस्थानान्युपलभते। चत्वारि-सम्यक्प्रहाणानि भावयति न च *सम्यक्प्रहाणान्युपलभते। चतुरऋद्धिपादान् भावयति नर्द्धिपादानुपलभते। पञ्चेन्द्रियाणि भावयति न चेन्द्रियाण्युपलभते। पञ्चबलानि भावयति न च बलान्युपलभते। सप्त बोध्यङ्गानि भावयति न च बोध्यङ्गान्युपलभते। आर्य्याऽष्टाऽङ्गमार्गं भावयति नाऽऽर्य्याऽष्टाऽङ्गमार्गमुपलभते। आर्य्य-सत्यानि भावयति नचार्य्यसत्यान्युपलभते। ध्यानानि भावयति न च ध्यानान्युपलभते। अप्रमाणानि भावयति नचाऽप्रमाणान्युप-लभते। आरूप्यसमापत्तीर्भावयति नचारूप्यसमापत्तीरुपलभते। अष्टौ विमोक्षान् भावयति नचाऽष्टौ विमोक्षानुपलभते। नवाऽनु-पूर्व्वविहारसमापत्तीर्भावयति न च नवाऽनुपूर्व्वविहारसमापत्तीरुप-लभते। शून्यताऽऽनिमित्ताऽप्रणिहितविमोक्षमुखानि भावयति न च शून्यताऽऽनिमित्ताऽप्रणिहितविमोक्षमुखान्युपलभते। अभिज्ञां भावयति नचाऽभिज्ञामुपलभते। समाधीन् भावयति न च समा-धीनुपलभते। धारणीमुखानि भावयति न च धारणीमुखान्युपल-भते। दश तथागतबलानि भावयति न च तथागतबलान्युपलभते। चत्वारि वैशारद्यानि भावयति न च वैशारद्यान्युपलभते। चतस्रः प्रतिसम्विदो भावयति न च प्रतिसम्विदउपलभते। महामैत्रीं भावयति न च महामैत्रीमुपलभते। महाकरुणां भावयति न च

* क्वचिन्न इति क्वचिन्न च इति पाठोदृश्यते।

महाकरुणामुपलभते। अष्टादशाऽऽवेणिकान् बुद्धधर्म्मान् भावयति नचाऽष्टादशाऽऽवेणिकान् बुद्धधर्म्मानुपलभते। स्रोतआपत्तिफलं भावयति न च स्रोतआपत्तिफलमुपलभते। सकृदागामिफलं भावयति न च सकृदागामिफलमुपलभते। अनागामिफलं भावयति नचाऽनागामिफलमुपलभते। अर्हत्त्वं भावयति नचाऽर्हत्त्वमुपलभते। प्रत्येकबोधिं भावयति न च प्रत्येकबोधिमुपलभते। मार्गाऽऽकारज्ञतां भावयति न च मार्गाऽऽकारज्ञतामुपलभते। सर्व्वाऽऽकारज्ञतां भावयति न च सर्व्वाऽऽकारज्ञतामुपलभते। इदं बोधिसत्त्वस्य महासत्त्वस्य ज्ञानं। येन ज्ञानेन समन्वागतो बोधिसत्त्वो-महासत्त्वः सर्व्वबुद्धधर्म्मांश्च परिपूरयति सर्व्वबुद्धधर्म्मांश्च न समनुपश्यति।

अस्ति शारद्वतीपुत्र बोधिसत्त्वामहासत्त्वाः प्रज्ञापारमितायां चरन्तः पञ्च चक्षूंषि प्रतिलभन्ते। परिशोधयन्ति। कतमानि पञ्चचक्षूंषि यदुतमांस चक्षुर्दिव्यं चक्षुः प्रज्ञाचक्षुर्धर्मचक्षुर्बुद्धचक्षुः।

आह कतमा भगवन् बोधिसत्त्वस्य महासत्त्वस्य मांसचक्षुष्परिशुद्धिः। भगवानाह। अस्ति शारद्वतीपुत्र बोधिसत्त्वोमहासत्त्वो योजनशतं मांसचक्षुषा पश्यति। अस्ति शारद्वतीपुत्र बोधिसत्त्वो-महासत्त्वो द्वियोजनशतं मांसचक्षुषा पश्यति। अस्ति शारद्वतीपुत्र बोधिसत्त्वोमहासत्त्वस्त्रीणि योजनशतानि मांसचक्षुषा पश्यति। अस्ति शारद्वतीपुत्र बोधिसत्त्वोमहासत्त्वोयश्चत्वारि योजनशतानि मांसचक्षुषा पश्यति। अस्ति शारद्वतीपुत्र बोधिसत्त्वोमहासत्त्वः पञ्च योजनशतानि मांसचक्षुषा पश्यति। अस्ति शारद्वतीपुत्र

बोधिसत्त्वोमहासत्त्वो यः षड्योजनशतानि मांसचक्षुषा पश्यति। अस्ति शारद्वतीपुत्र बोधिसत्त्वोमहासत्त्वो यः सप्त योजनशतानि मांसचक्षुषा पश्यति। अस्ति शारद्वतीपुत्र बोधिसत्त्वोमहासत्त्वो योऽष्टौ योजनशतानि मांसचक्षुषा पश्यति। अस्ति शारद्वतीपुत्र बोधिसत्त्वोमहासत्त्वो यो नवयोजनशतानि मांसचक्षुषापश्यति। अस्ति शारद्वतीपुत्र बोधिसत्त्वोमहासत्त्वो यो दश योजनशतानि मांसचक्षुषा पश्यति। अस्ति शारद्वतीपुत्र बोधिसत्त्वोमहासत्त्वो यो योजनसहस्रं मांसचक्षुषा पश्यति। अस्ति शारद्वतीपुत्र बोधिसत्त्वोमहासत्त्वो यो जम्बुद्वीपं मांसचक्षुषा पश्यति। अस्ति शारद्वतीपुत्र बोधिसत्त्वोमहासत्त्वो यो द्वौ द्वीपौ मांसचक्षुषा पश्यति। अस्ति शारद्वतीपुत्र बोधिसत्त्वोमहासत्त्वो यः साहस्रं लोकधातुं मांसचक्षुषा पश्यति। अस्ति शारद्वतीपुत्र बोधिसत्त्वोमहासत्त्वो यो द्विसाहस्रं लोकधातुं मांसचक्षुषा पश्यति। अस्ति शारद्वतीपुत्र बोधिसत्त्वोमहासत्त्वोयस्त्रिसाहस्रं महासहस्रं लोकधातुं मांसचक्षुषा पश्यति। इयं शारद्वतीपुत्र बोधिसत्त्वस्य महासत्त्वस्य मांसचक्षुः-परिशुद्धिः।

आह। कतमा भगवन् बोधिसत्त्वस्य महासत्त्वस्य दिव्यचक्षुः-परिशुद्धिः। भगवानाह। यच्छारद्वतीपुत्र चातुर्महाराजकायिकानां देवानां दिव्यं चक्षुस्तद्बोधिसत्त्वः प्रजानाति। यत्त्रायस्त्रिंशानां देवानां दिव्यं चक्षुस्तद्बोधिसत्त्वः प्रजानाति। यद् यामानां देवानां दिव्यं चक्षुस्तद्बोधिसत्त्वः प्रजानाति। यत्तुषितानां देवानां दिव्यं चक्षुस्तद्बोधिसत्त्वः प्रजानाति। यन्निर्माणरतीनां

देवानां दिव्यं चक्षुस्तद्बोधिसत्त्वः प्रजानाति। यत्परनिर्म्मितवशवर्त्तिनां देवानां दिव्यं चक्षुस्तद्बोधिसत्त्वः प्रजानाति। यद्ब्रह्मकायिकानां देवानां दिव्यं चक्षुस्तद्बोधिसत्त्वः प्रजानाति। यद्ब्रह्मपुरोहितानां देवानां दिव्यं चक्षुस्तद्बोधिसत्त्वः प्रजानाति। यद्ब्रह्मपार्षद्यानां देवानां दिव्यं चक्षुस्तद्बोधिसत्त्वः प्रजानाति। यन्महाब्रह्मणां देवानां दिव्यं चक्षुस्तद्बोधिसत्त्वः प्रजानाति। यदाभानां देवानां दिव्यं चक्षुस्तद्बोधिसत्त्वः प्रजानाति। यत्परीत्ताभानां देवानां दिव्यं चक्षुस्तद्बोधिसत्त्वः प्रजानाति। यदप्रमाणाभानां देवानां दिव्यं चक्षुस्तद्बोधिसत्त्वः प्रजानाति। यदाभास्वराणां देवानां दिव्यं चक्षुस्तद्बोधिसत्त्वः प्रजानाति। यच्छुभानां देवानां दिव्यं चक्षुस्तद्बोधिसत्त्वः प्रजानाति। यत्परीत्तशुभानां देवानां दिव्यं चक्षुस्तद्बोधिसत्त्वः प्रजानाति। यदप्रमाणशुभानां दिव्यं चक्षुस्तद्बोधिसत्त्वः प्रजानाति। यच्छुभकृत्स्नानां देवानां दिव्यं चक्षुस्तद्बोधिसत्त्वः प्रजानाति। यद्वृहाणां देवानां दिव्यं चक्षुस्तद्बोधिसत्त्वः प्रजानाति। यत्परीत्त वृहाणां देवानां दिव्यं चक्षुस्तद्बोधिसत्त्वः प्रजानाति। यदप्रमाण वृहाणां देवानां दिव्यं चक्षुस्तद्बोधिसत्त्वः प्रजानाति। यत् वृहत्फलानां देवानां दिव्यं चक्षुस्तद्बोधिसत्त्वः प्रजानाति। यदवृहाणां देवानां दिव्यं चक्षुस्तद्बोधिसत्त्वः प्रजानाति। यदतपानां देवानां दिव्यं चक्षुस्तद्बोधिसत्त्वः प्रजानाति। यत् सुदृशानां देवानां दिव्यं चक्षुस्तद्बोधिसत्त्वः प्रजानाति। यत् सुदर्शनानां देवानां दिव्यं चक्षुस्तद्बोधिसत्त्वः प्रजानाति। यदकनिष्ठानां देवानां दिव्यं चक्षुस्तद्बोधिसत्त्वः प्रजानाति।

यच्च पुनः शारद्वतीपुत्र बोधिसत्त्वस्य महासत्त्वस्य दिव्यं चक्षु-श्चातुर्महाराजकायिका देवा न प्रजानन्ति। यद्बोधिसत्त्वस्य महासत्त्वस्य दिव्यं चक्षुस्त्रायस्त्रिंशा देवा न जानन्ति। यद्बोधि-सत्त्वस्य महासत्त्वस्य दिव्यं चक्षुर्यामा देवा न प्रजानन्ति। यद्बोधिसत्त्वस्य महासत्त्वस्य दिव्यं चक्षुस्तुषिता देवा न प्रजानन्ति। यद्बोधिसत्त्वस्य महासत्त्वस्य दिव्यं चक्षुर्निर्माणरतयो देवा न प्रजानन्ति। यद्बोधिसत्त्वस्य महासत्त्वस्य दिव्यं चक्षुः परनिर्मित-वशवर्तिनो देवा न प्रजानन्ति। यद्बोधिसत्त्वस्य महासत्त्वस्य दिव्यं चक्षुस्तद्ब्रह्मकायिका देवा न प्रजानन्ति। यद्बोधिसत्त्वस्य महासत्त्वस्य दिव्यं चक्षुस्तद्ब्रह्मपुरोहिता देवा न प्रजानन्ति। यद्बोधिसत्त्वस्य महासत्त्वस्य दिव्यं चक्षुस्तद्ब्रह्मपार्षद्या देवा न प्रजानन्ति। यद्बोधि-सत्त्वस्य महासत्त्वस्य दिव्यं चक्षुस्तन्महाब्रह्माणो देवा न प्रजानन्ति। यद्बोधिसत्त्वस्य महासत्त्वस्य दिव्यं चक्षुस्तदाभा देवा न प्रजानन्ति। यद्बोधिसत्त्वस्य महासत्त्वस्य दिव्यं चक्षुस्तत्परीत्ताभा देवा न प्रजानन्ति। यद्बोधिसत्त्वस्य महासत्त्वस्य दिव्यं चक्षुस्तदप्रमाणाभा-देवा न प्रजानन्ति। यद्बोधिसत्त्वस्य महासत्त्वस्य दिव्यं चक्षुस्तदा-भास्वरा देवा न प्रजानन्ति। यद्बोधिसत्त्वस्य महासत्त्वस्य दिव्यं चक्षुस्तच्छुभा देवा न प्रजानन्ति। यद्बोधिसत्त्वस्य महासत्त्वस्य दिव्यं चक्षुस्तत्परीत्तशुभा देवा न प्रजानन्ति। यद्बोधिसत्त्वस्य महासत्त्वस्य दिव्यं चक्षुस्तदप्रमाणशुभा देवा न प्रजानन्ति। यद्बोधिसत्त्वस्य महा-सत्त्वस्य दिव्यं चक्षुस्तत् शुभकृत्स्ना देवा न प्रजानन्ति। यद्बोधि-सत्त्वस्य महासत्त्वस्य दिव्यं चक्षुस्तद्बृहा देवा न प्रजानन्ति।

यद्बोधिसत्त्वस्य महासत्त्वस्य दिव्यं चक्षुमत्परीत्ताभाद्देवा न प्रजानन्ति। यद्बोधिसत्त्वस्य महासत्त्वस्य दिव्यं चक्षुमदप्रमाणाभाद्देवा न प्रजानन्ति। यद्बोधिसत्त्वस्य महासत्त्वस्य दिव्यं चक्षुमद्बृहत्फला-देवा न प्रजानन्ति। यद्बोधिसत्त्वस्य महासत्त्वस्य दिव्यं चक्षुमद्-वृहादेवा न प्रजानन्ति। यद्बोधिसत्त्वस्य महासत्त्वस्य दिव्यं चक्षुमदतपादेवा न प्रजानन्ति। यद्बोधिसत्त्वस्य महासत्त्वस्य दिव्यं चक्षुस्तत्सुदृशादेवा न प्रजानन्ति। यद्बोधिसत्त्वस्य महासत्त्वस्य दिव्यं चक्षुस्तत् सुदर्शनादेवा न प्रजानन्ति। यद्बोधिसत्त्वस्य महा-सत्त्वस्य दिव्यं चक्षुस्तदकनिष्ठादेवा न प्रजानन्ति।

येन दिव्येन चक्षुषा समन्वागतो बोधिसत्त्वोमहासत्त्वः पूर्व्व-स्यान्दिशि गङ्गानदीवालुकोपमेषु लोकधातुषु सत्त्वानां च्युतोपपादं प्रजानाति। येन दिव्येन चक्षुषा समन्वागतो बोधिसत्त्वो महासत्त्वो दक्षिणस्यान्दिशि गङ्गानदीवालुकोपमेषु लोकधातुषु सत्त्वानां च्युतोपपादं प्रजानाति। येन दिव्येन चक्षुषा समन्वागतो बोधि-सत्त्वोमहासत्त्वः पश्चिमायां दिशि गङ्गानदीवालुकोपमेषु लोक-धातुषु सत्त्वानां च्युतोपपादं प्रजानाति। येन दिव्येन चक्षुषा समन्वागतो बोधिसत्त्वोमहासत्त्व उत्तरस्यां दिशि गङ्गानदीवालु-कोपमेषु लोकधातुषु सत्त्वानां च्युतोपपादं प्रजानाति। येन दिव्येन चक्षुषा समन्वागतो बोधिसत्त्वोमहासत्त्व उत्तरपूर्व्वस्यां दिशि गङ्गा-नदीवालुकोपमेषु लोकधातुषु सत्त्वानां च्युतोपपादं प्रजानाति। येन दिव्येन चक्षुषा समन्वागतो बोधिसत्त्वो महासत्त्वः पूर्व्वदक्षिणस्यां दिशि गङ्गानदीवालुकोपमेषु लोकधातुषु सत्त्वानां च्युतोपपादं

प्रजानाति। येन दिव्येन चक्षुषा समन्वागतो बोधिसत्त्वो महासत्त्वो दक्षिणपश्चिमायां दिशि गङ्गानदीवालुकोपमेषु लोकधातुषु सत्त्वानां च्युतोपपादं प्रजानाति। येन दिव्येन चक्षुषा समन्वागतो बोधिसत्त्वो महासत्त्वः पश्चिमोत्तरस्यां दिशि गङ्गानदीवालुकोपमेषु लोकधातुषु सत्त्वानां च्युतोपपादं प्रजानाति। येन दिव्येन चक्षुषा समन्वागतो बोधिसत्त्वो महासत्त्वोऽधस्ताद्दिशि गङ्गानदीवालुकोपमेषु लोकधातुषु सत्त्वानां च्युतोपपादं प्रजानाति। येन दिव्येन चक्षुषा समन्वागतो बोधिसत्त्वो महासत्त्व उपरिष्टाद्दिशि गङ्गानदीवालुकोपमेषु लोकधातुषु सत्त्वानां च्युतोपपादं प्रजानाति। इयं शारद्वतीपुत्र बोधिसत्त्वस्य महासत्त्वस्य दिव्यचक्षुःपरिशुद्धिः।

आह। कतमा भगवन् बोधिसत्त्वस्य महासत्त्वस्य प्रज्ञाचक्षुःपरिशुद्धिः। भगवानाह। येन शारद्वतीपुत्र चक्षुषा समन्वागतो बोधिसत्त्वो महासत्त्वः संस्कृतोऽसंस्कृतो वा कुशलो वा ऽकुशलो वा सावद्यो वा ऽनवद्यो वा संक्लेशो वा निःक्लेशो वा लौकिको वा लोकोत्तरो वा साश्रवो वा ऽनाश्रवो वा तद्धर्मं न प्रजानाति। येन प्रज्ञाचक्षुषा न कश्चिद्धर्मोऽदृष्टो ऽश्रुतो ऽविज्ञातो भवेत्। इयं शारद्वतीपुत्र बोधिसत्त्वस्य महासत्त्वस्य प्रज्ञाचक्षुःपरिशुद्धिः।

आह। कतमा बोधिसत्त्वस्य महासत्त्वस्य धर्मचक्षुःपरिशुद्धिः। भगवानाह। इह शारद्वतीपुत्र बोधिसत्त्वो महासत्त्वो धर्मचक्षुषा प्रजानात्ययं पुद्गलः श्रद्धानुसारी अयं पुद्गलो धर्मानुसारी अयं पुद्गलः शून्यताविहारी। अस्य पुद्गलस्य शून्यताविमोक्षमुखेन पञ्चेन्द्रियाण्युत्पत्स्यन्ते। पञ्चभिरिन्द्रियैः आनन्तर्यसमाधिं प्रत्युत्पा-

नन्तर्य्येण समाधिना विमुक्तिज्ञानदर्शनमुत्पादयिष्यति। विमुक्ति-ज्ञानदर्शनेन त्रीणि संयोजनानि प्रहास्यन्ति* सत्कायदृष्टिं विचिकित्सां शीलव्रतपरामर्शम्। अयमुच्यते पुद्गलः स्रोतआपन्नः। स भावनामार्गं प्रतिलभ्य कामरागव्यापादतनुत्वं करोत्ययं पुद्गलः सकृदागामी। स तेनैव मार्गेणाऽधिमात्रभावितेन काम-रागव्यापादप्रहाणमागमिष्यत्ययं पुद्गलोऽनागामी। स तेनैव मार्गेणाधिमात्रभावितेन रूपरागमारूप्यरागमविद्यां मानौद्धत्यञ्च प्रहास्यत्ययं पुद्गलोऽर्हन्। अयमानिमित्तविहारी। अस्य पुद्गलस्य नानिमित्तेन विमोक्षमुखेन पञ्चेन्द्रियाण्युत्पत्स्यन्ते। पञ्चभिरिन्द्रियै-रानन्तर्य्यसमाधिं प्रत्स्यत्यानन्तर्य्येण समाधिना विमुक्तिज्ञानदर्शन-मुत्पादयिष्यति। विमुक्तिज्ञानदर्शनेन त्रीणि संयोजनानि प्रहा-स्यति। सत्कायदृष्टिं विचिकित्सां शीलव्रतपरामर्शमयमुच्यते पुद्गलः स्रोत आपन्नः। स भावनामार्गं प्रतिलभ्य कामरागत्यागा-दतनुत्वं करिष्यत्ययं पुद्गलः सकृदागामी। स तेनैव मार्गेणाधि-मात्रभावितेन कामरागव्यापादप्रहाणमागमिष्यत्ययं पुद्गलोऽना-गामी। स तेनैव मार्गेणाऽधिमात्रभावितेन रूपरागमारूप्यरागम-विद्यां मानौद्धत्यञ्च प्रहास्ययं पुद्गलोऽर्हन्। अयमप्रणिहितविहारी अस्य पुद्गलस्यान् प्रणितेन विमोक्षमुखेन पञ्चेन्द्रियाण्युत्पत्स्यन्ते। पञ्चभिरिन्द्रियैरानन्तर्य्यसमाधिं प्रत्स्यन्ति। आनन्तर्य्येण समाधिना विमुक्तिज्ञानदर्शनमुत्पादयिष्यति। विमुक्तिज्ञानदर्शनेन त्रीणि

---

* प्रहास्यति,—इति पाठः समीचीनः प्रतिभाति।

संयोजनानि प्रहास्यति। सत्कायदृष्टिं विचिकित्सां शीलव्रतपरा-मर्शमप्युच्यते पुद्गलः स्रोतआपन्नः। स भावनामार्गं प्रतिलभ्य काम रागव्यापादतनुत्वं करिष्यत्ययं पुद्गलः सकृदागामी। स तेनैव मार्गेणाधिमात्रभावितेन कामरागव्यापादप्रहाणमागमिष्यत्ययं पुद्गलोऽनागामी। स तेनैव मार्गेणाधिमात्रभावितेन रूपरागमारूप्य रागमविद्यां मानौद्धत्यञ्च प्रहास्यत्ययं पुद्गलोऽर्हन्। इयं शारद्वती-पुत्र बोधिसत्त्वस्य महासत्त्वस्य धर्मचक्षुःपरिशुद्धिः।

पुनरपरं शारद्वतीपुत्र बोधिसत्त्वोमहासत्त्वो जानाति। यत्कि-ञ्चित् समुदयधर्म्मं सर्व्वं तं निरोधधर्म्मेति विदित्वा श्रद्धादीनि पञ्चेन्द्रियाणि प्राप्नोतीयं शारद्वतीपुत्र बोधिसत्त्वस्य महासत्त्वस्य धर्मचक्षुःपरिशुद्धिः।

पुनरपरं शारद्वतीपुत्र बोधिसत्त्वोमहासत्त्वो धर्मचक्षुषा जाना-त्ययं प्रथमचित्तोत्पादिको बोधिसत्त्वोमहासत्त्वो दानपारमितायां चरति। शीलपारमितायां चरति। क्षान्तिपारमितायां चरति। वीर्य्यपारमितायां चरति। ध्यानपारमितायां चरति। प्रज्ञापार-मितायां चरति। ततः श्रद्धेन्द्रियेण वीर्य्येन्द्रियेण समन्वागत उपाय-कौशलेन सञ्चिन्त्याऽऽत्मभावं परिग्रहीष्यति। कुशलमूलोपस्तम्भेन चायं बोधिसत्त्वोमहासत्त्वः क्षत्रियमहाशालकुलेषूपपत्स्यन्ते। ब्राह्मण महाशालकुलेषूपपत्स्यन्ते। गृहपतिमहाशालकुलेषूपपत्स्यन्ते। चातु-र्म्महाराजकायिकेषु देवेषूपपत्स्यन्ते। त्रायस्त्रिंशेषु देवेषूपपत्स्यन्ते। यामेषु देवेषूपपत्स्यन्ते। तुषितेषु देवेषूपपत्स्यन्ते। निर्म्माणरतिषु देवेषूपपत्स्यन्ते। परनिर्म्मितवशवर्त्तिषु देवेषूपपत्स्यते। स तत्र

स्थित्वा सत्त्वान् परिपाचयिष्यति सर्व्वसुखोपधानेन च तान् प्रत्युपस्थास्यति । बुद्धक्षेत्रञ्च परिशोधयिष्यति । तथागतांश्चार्हतः सम्यक् सम्बुद्धानारागयिष्यति सत्करिष्यति । गुरूकरिष्यति । मानयिष्यति । पूजयिष्यति । न च श्रावकभूमौ वा प्रत्येकबुद्धभूमौ वा पतिष्यति । अयं वोधिसत्त्वोमहासत्त्वो न निवर्त्तते यावदनुत्तरां सम्यक् सम्बोधिमभिसम्भोत्स्यते । इदमपि शारद्वतीपुत्र वोधिसत्त्वस्य महासत्त्वस्य परिशुद्धं धर्म्मचक्षुः ।

पुनरपरं शारद्वतीपुत्र वोधिसत्त्वोमहासत्त्वो जानात्ययं वोधिसत्त्वोमहासत्त्वो व्याकृतोनुत्तरायां सम्यक् सम्बोधौ । अयं न व्याकृतः । अयं नियतः । अयमनियतः । इमे व्याकरिष्यन्ति । इमे न व्याकरिष्यन्ति । इमे अवैवर्त्तिकाः इन्द्रियलब्धाः । इमे नाऽवैवर्त्तिकानेन्द्रियप्रतिलब्धाः । अस्याऽभिज्ञाः परिपूर्णाः । अस्य न परिपूर्णाः । अयं वोधिसत्त्वोमहासत्त्वोऽभिज्ञाभिः परिपूर्णाभिः पूर्व्वस्यां दिशि गङ्गानदीवालुकोपमान् लोकधातून् गत्वा तथागतानर्हतः सम्यक् सम्बुद्धानारागयति । पर्य्युपास्ते । सत्करोति । गुरूकरोति । मानयति । पूजयति । दक्षिणस्यां दिशि गङ्गानदीवालुकोपमान् लोकधातून् गत्वा तथागतानर्हतः सम्यक् सम्बुद्धानारागयति । पर्य्युपास्ते । सत्करोति । गुरूकरोति । मानयति । पूजयति । पश्चिमायां दिशि गङ्गानदीवालुकोपमान् लोकधातून् गत्वा तथागतानर्हतः सम्यक् सम्बुद्धानारागयति । पर्य्युपास्ते । सत्करोति । गुरूकरोति । मानयति । पूजयति । उत्तरस्यां दिशि गङ्गानदीवालुकोपमान् लोकधातून् गत्वा तथागतानर्हतः सम्यक् सम्बुद्धानारागयति । पर्य्युपास्ते ।

सत्करोति । गुरूकरोति । मानयति । पूजयति । उत्तरपूर्व्वस्यां दिशि गङ्गानदीवालुकोपमान् लोकधातून् गत्वा तथागतानर्हतः सम्यक् सम्बुद्धानारागयति । पर्य्युपास्ते । सत्करोति । गुरूकरोति । मानयति । पूजयति । पूर्व्वदक्षिणस्यां दिशि गङ्गानदीवालुकोपमान् लोकधातून् गत्वा तथागतानर्हतः सम्यक् सम्बुद्धानारागयति । पर्य्युपास्ते । सत् करोति । गुरूकरोति । मानयति । पूजयति । दक्षिणपश्चिमायां दिशि गङ्गानदीवालुकोपमान् लोकधातून् गत्वा तथागतानर्हतः सम्यक् सम्बुद्धानारागयति । पर्य्युपास्ते । सत्करोति । गुरूकरोति । मानयति । पूजयति । पश्चिमोत्तरस्यां दिशि गङ्गानदीवालुकोपमान् लोकधातून् गत्वा तथागतानर्हतः सम्यक् सम्बुद्धानारागयति । पर्य्युपास्ते । सत्करोति । गुरूकरोति । मानयति । पूजयति । अधस्ताद्दिशि गङ्गानदीवालुकोपमान् लोकधातून् गत्वा तथागतानर्हतः सम्यक् सम्बुद्धानारागयति । पर्य्युपास्ते । सत्करोति । मानयति । पूजयति । उपरिष्टाद्दिशि गङ्गानदीवालुकोपमान् लोकधातून् गत्वा तथागतानर्हतः सम्यक् सम्बुद्धानारागयति । पर्य्युपास्ते । सत्करोति । मानयति । पूजयति । अयमभिज्ञाः प्रतिलप्स्यन्ते अयं न प्रतिलप्स्यते । अयं क्षान्तिं प्रतिलब्धोऽयं न क्षान्तिं प्रतिलब्धः । अयमिन्द्रियप्रतिलब्धोऽयं नेन्द्रियप्रतिलब्धः । अस्य बोधिसत्त्वस्य महासत्त्वस्य परिशुद्धं बुद्धक्षेत्रं भविष्यति । अस्य बोधिसत्त्वस्य महासत्त्वस्य बुद्धक्षेत्रं न परिशुद्धं भविष्यति । अयं बोधिसत्त्वोमहासत्त्वो महाप्रणिधानोऽयं न महाप्रणिधानः । अनेन सत्त्वाः परिपाचिताः अनेन सत्त्वा न परि-

पाचिताः। अस्य बोधिसत्त्वस्य महासत्त्वस्य दशसु दिक्षु गङ्गानदीवालुकोपमेषु लोकधातुषु बुद्धाभगवन्तोवर्णं भाषन्ते। अस्य न वर्णं भाषन्ते। इमे बोधिसत्त्वामहासत्त्वाः बुद्धानां भगवतामासत्त्वस्थायिनो भविष्यन्ति। इमे नासत्त्वस्थायिनः। अस्य बोधिसत्त्वस्य महासत्त्वस्य बोधिप्राप्तस्यायुरपरिमितं भविष्यति। अस्य परिमितं। अस्य प्रभाघोषोभिक्षुसंघस्यापरिमितोभविष्यति। अस्य परिमितः। अस्य बोधिसत्त्वस्याऽनुत्तरां सम्यक् सम्बुद्धस्य बोधिसत्त्वसंघो भविष्यति। अस्य न भविष्यति। अयं दुष्करं चरिष्यत्ययं न चरिष्यति। अयं चरमभविकोऽयं न चरमभविकः। अयं बोधिमण्डे निषत्स्यति नाऽयं निषत्स्यति। एषां बोधिसत्त्वानां महासत्त्वानां मारा भविष्यन्ति। नैषां भविष्यन्ति। एवं खलु शारदतीपुत्र बोधिसत्त्वानां महासत्त्वानां परिशुद्धं धर्मचक्षुः।

आह कतमं पुनर्भगवन् बोधिसत्त्वस्य महासत्त्वस्य परिशुद्धं बुद्धचक्षुः। भगवानाह। यच्छारद्वतीपुत्र बोधिसत्त्वोमहासत्त्वो बोधिचित्ताऽनुत्तरं वज्रोपमं समाधिं समापद्य सर्व्वाकारज्ञतामनुप्राप्नोति। दशभिस्तथागतबलैः समन्वागतो भवति। चतुर्भिर्वैशारद्यैः समन्वागतो भवति। अष्टादशभिरावेणिकैर्बुद्धधर्मैः समन्वागतो भवति। महामैत्र्या समन्वागतो भवति। महाकरुणया समन्वागतो भवति। महामुदितया समन्वागतो भवति। महोपेक्षया समन्वागतो भवति। अनावरणेन च बुद्धविमोक्षेण समन्वागतो भवति। तदस्य सर्वेन चक्षुषा बोधिसत्त्वेन महासत्त्वेन सर्व्वाकारं नास्ति किञ्चिददृष्टमश्रुतममतमविज्ञातं। इदं शारद्वतीपुत्र बोधि-

सत्त्वा महासत्त्वास्यानुत्तरां सम्यक् सम्बोधिमभिसम्बुद्ध्य परिशुद्धं बुद्धचक्षुः ।

एवं शारद्वतीपुत्र बोधिसत्त्वेन महासत्त्वेन पञ्च चक्षूंषि परिशोधयितुकामेन प्रतिलब्धुकामेन च षट्सु पारमितासु योगः करणीयः । तत्कस्य हेतोः । तथाहि । शारद्वतीपुत्र षट्सु पारमितासु सर्व्वकुशलधर्म्मा अन्तर्गताः सर्व्वश्रावकधर्म्माश्च । सर्व्वप्रत्येकबुद्धधर्म्माश्च । ये खलु ते शारद्वतीपुत्र सम्यग्वदन्तोवदेयुः सर्व्वकुशलधर्म्मसंग्रह इति प्रज्ञापारमितान्ते सम्यग्वदन्तो वदेयुः । तत्कस्य हेतोः । जनयित्री शारद्वतीपुत्र प्रज्ञापारमितैषां पञ्चानां चक्षुषां । एषु च पञ्चसु चक्षुषु बोधिसत्त्वामहसत्त्वाः शिक्षित्वाऽनुत्तरां सम्यक्सम्बोधिमभिसम्बुध्यन्ते । अस्यां शारद्वतीपुत्र प्रज्ञापारमितायां चरन् बोधिसत्त्वोमहासत्त्वोऽभिज्ञापारमितां प्रतिलभते । सोऽनेकविधमृद्धिविधिं प्रत्यनुभवति । इमामेव पृथिवीं कम्पयत्येकोऽपि भूत्वा बहुधा भवति । बहुधाऽपि भूत्वा एको भवति । आविर्भवति तिरोभावमपि प्रत्यनुभवति । तिरः कुड्यं तिरः प्राकारं तिरः पर्व्वतमप्यसंज्ञां कायेन गच्छति । तद्यथाऽपि नामाकाशे पर्य्यंकेन क्रामति । तद्यथाऽपि नाम *शकुनिः पृथिव्यामप्युन्मज्जति न निमज्जनं करोति । तद्यथाऽपि नामोदकेऽनुदकेऽप्यभियानेन गच्छति । तद्यथाऽपि नाम पृथिव्यां धूमायते प्रज्वलत्यपि । तद्यथाऽपि नाम महानग्निस्कन्धः । इमावपि सूर्य्याचन्द्रमसावेवं महर्द्धिकावेवं महानुभावावेवं महेशाख्यौ पाणिना

---

* पक्षीशकुनिरिति ख, ग, घ पाठः ।

परामार्ष्टि ब्रह्मलोकं कायेन वशं वर्त्तयति तयाचर्द्ध्या न मन्यते। तथा हि सम्रृद्धिं* नोपलभते यया मन्येत स्वभावशून्यतामुपादाय स्वभावाऽनुत्पादतामुपादाय। स चेतनामपि नोत्पादयति। ऋद्ध्या वा ऋद्ध्यभिनिर्हारेण वाऽन्यत्र सर्व्वज्ञतामनसिकारात्। एवं खलु शारद्वतीपुत्र बोधिसत्त्वोमहासत्त्वः प्रज्ञापारमितायां चरन् ऋद्धिविधिसाचात्क्रियाऽभिज्ञाज्ञानमभिनिर्हरति। स दिव्येन श्रोत्रधातुना विशुद्धेनातिक्रान्तमानुष्यकेनोभयाञ्छव्दान् शृणोति यदुत दिव्यान् वा मानुष्यकान् वा। न च तेन दिव्येन श्रोत्र धातुना मन्यते अहं शब्दान् शृणोमीति। तथा हि स श्रोत्रं शब्दांश्च नोपलभते स्वभावशून्यतामुपादाय स्वभावाऽनुत्पादता-मुपादाय। स चेतनामपि नोत्पादयति दिव्यश्रोत्रधातावन्यत्र सर्व्वज्ञतामनसिकारात्। एवं खलु शारद्वतीपुत्र बोधिसत्त्वो-महासत्त्वः प्रज्ञापारमितायां चरन् दिव्यश्रोत्रधातुसाचात्क्रिया-ऽभिज्ञाज्ञानमभिनिर्हरति। स परसत्त्वानां परपुङ्गलानां चेतसैव चित्तं यथाभूतं प्रजानाति। स सरागचित्तं स रागचित्तमिति यथाभूतं प्रजानाति। स विगतरागं चित्तं विगतरागं चित्तमिति यथाभूतं प्रजानाति। सदोषचित्तं सदोषचित्तमिति यथाभूतं प्रजानाति। विगतदोषं चित्तं विगतदोषं चित्तमिति यथाभूतं प्रजानाति। समोहं चित्तं समोहं चित्तमिति यथाभूतं प्रजा-नाति। विगतमोहं चित्तं विगतमोहं चित्तमिति यथाभूतं प्रजानाति। सतृष्णाचित्तं सतृष्णाचित्तमिति यथाभूतं प्रजानाति।

* स ऋद्धिमिति शुद्धः पाठः।

विगततृष्णं चित्तं विगततृष्णं चित्तमिति यथाभूतं प्रजानाति। सोपादानं चित्तं सोपादानं चित्तमिति यथाभूतं प्रजानाति। अनुपादानं चित्तमनुपादानं चित्तमिति यथाभूतं प्रजानाति। विक्षिप्तचित्तं विक्षिप्तचित्तमिति यथाभूतं प्रजानाति। परीत्तं चित्तं परीत्तं चित्तमिति यथाभूतं प्रजानाति। विपुलं चित्तं विपुलं चित्तमिति यथाभूतं प्रजानाति। महद्गतं चित्तं महद्गतं चित्तमिति यथाभूतं प्रजानाति। अप्रमाणं चित्तमप्रमाणं चित्तमिति यथाभूतं प्रजानाति। समाहितं चित्तं समाहितं चित्तमिति यथाभूतं प्रजानाति। असमाहितं चित्तमसमाहितं चित्तमिति यथाभूतं प्रजानाति। विविक्तं चित्तं विविक्तं चित्तमिति यथाभूतं प्रजानाति। अविविक्तं चित्तमविविक्तं चित्तमिति यथाभूतं प्रजानाति। साऽऽस्रवं चित्तं साऽऽस्रवं चित्तमिति यथाभूतं प्रजानाति। अनास्रवं चित्तमनास्रवं चित्तमिति यथाभूतं प्रजानाति। साऽङ्गणं चित्तं साऽङ्गणं चित्तमिति यथाभूतं प्रजानाति। अनङ्गणं चित्तमनङ्गणं चित्तमिति यथाभूतं प्रजानाति। सोत्तरं चित्तं सोत्तरं चित्तमिति यथाभूतं प्रजानाति। अनुत्तरं चित्तमनुत्तरं चित्तमिति यथाभूतं प्रजानाति। तेन च परचित्तज्ञानेन न मन्यते। तथाहि तच्चित्तमचित्तमचिन्त्यतामुपादाय। सोऽहं प्रजानामीति न मन्यते। तथाहि स तच्चित्तं नोपलभते येन मन्येत स्वभावशून्यतामुपादाय। स्वभावविविक्ततामुपादाय। स्वभावाऽनुत्पादतामुपादाय। स चित्तज्ञानचेतनामपि नोत्पादयति। न चित्तज्ञानाऽभिनिर्हारचेतनामन्यत्र सर्व्वज्ञतामनसिकारात्। एवं

खलु शारद्वतीपुत्र बोधिसत्त्वो महासत्त्वः प्रज्ञापारमितायां चरन् सर्व्वसत्त्वचित्तचरितसाक्षात्क्रियाऽभिज्ञाज्ञानमभिनिर्हरति। सोऽनेकविधपूर्व्वनिवासाऽनुस्मृतिसाक्षात्क्रियाऽभिज्ञाज्ञानमभिनिर्हरति। एकमपि चित्तमनुस्मरति यावच्चित्तशतमप्यनुस्मरति। एकमपि दिवसमनुस्मरति यावद्दिवसशतमप्यनुस्मरति। एकमपि मासमनुस्मरति यावन्मासशतमप्यनुस्मरति। एकमपि वर्षमनुस्मरति यावद्वर्षशतमप्यनुस्मरति। एकमपि कल्पमनुस्मरति यावत् कल्पशतमप्यनुस्मरति। यावदनेकान्यपि कल्पशतान्यनुस्मरति। अनेकान्यपि कल्पसहस्राण्यनुस्मरति। अनेकान्यपि कल्पशतसहस्राण्यनुस्मरति। अनेकान्यपि कल्पकोटीनियुतशतसहस्राण्यनुस्मरति।

अत्राहमेवंनामैवंगोत्र एवंजातिरेवमाहार एवंचिरस्थितिक एवमायुःपर्य्यन्तः सोऽहं ततश्च्युतः सत्त्रोपपन्नः। यावत्ततश्च्युत इहोपपन्नः इति। साकारं सोद्देशं सनिर्द्देशमात्मनः परेषाञ्चानेकविधं पूर्व्वनिवासमनुस्मरति। तेन च पूर्व्वनिवासाऽनुस्मृतिसाक्षात्क्रियाऽभिज्ञाज्ञानेन न मन्यते। तथाहि तज्ज्ञानमज्ञानमचिन्त्यतामुपादाय। सोऽहं प्रजानामीति न मन्यते। तथाहि स तदेव ज्ञानं नोपलभते येन मन्येत। स्वभावशून्यतामुपादाय स्वभावविविक्ततामुपादाय। स्वभावाऽनुत्पादतामुपादाय स चेतनामपि नोत्पादयति। अनुस्मृतिज्ञानेनान्यत्र सर्व्वज्ञतामनसिकारात्। एवं खलु शारद्वतीपुत्र बोधिसत्त्वो महासत्त्वः प्रज्ञापारमितायां चरन् पूर्व्वनिवासाऽनुस्मृतिसाक्षात्क्रियाऽभिज्ञाज्ञानमभिनिर्हरति। स दिव्येन चक्षुषा विशुद्धेनाऽतिक्रान्तमानुषेण सत्त्वान् पश्यति। च्यव-

च्यवमानानुपपद्यमानान् सुवर्णान् दुर्वर्णान् हीनान् प्रणीतान् सुगतान् दुर्गतान् यथाकर्मोपगतान् सत्त्वान् विजानाति । अमी भवन्तः सत्त्वाः कायदुश्चरितेन समन्वागताः वाग्दुश्चरितेन समन्वागताः मनोदुश्चरितेन समन्वागताः । आर्य्याणामपवादकाः मिथ्यादृष्टयस्तद्धेतोस्तत्प्रत्ययं कायस्य भेदादपायदुर्गतिविनिपातं नरकेषूपपद्यन्ते । अमी पुनर्भवन्तः कायसुचरितेन समन्वागताः वाक्सुचरितेन समन्वागताः मनःसुचरितेन समन्वागताः आर्य्याणामनपवादकाः सम्यग्दृष्टयस्तद्धेतोस्तत्प्रत्ययं कायस्य भेदात् सुगतौ स्वर्गलोके देवेषूपपद्यन्ते इति समन्ताद्दशसु दिक्षु सर्व्वलोकधातुषु धर्म्मधातुपरमे लोके आकाशधातुपर्य्यवसाने षड्गति*कानां च्युतोपपादं यथाभूतं प्रजानाति । तेन च न मन्यते । तथाहि तच्चक्षुरचक्षुरचिन्त्यतामुपादाय । सोऽहं पश्यामीति न मन्यते । तथाहि स तदेव चक्षुर्नोपलभते येन मन्येत । स्वभावशून्यतामुपादाय स्वभावविविक्ततामुपादाय स्वभावाऽनुत्पादतामुपादाय । स दिव्यचक्षुश्चेतनामपि नोत्पादयति । न दिव्यचक्षुरभिनिर्हारचेतनामन्यत्र सर्व्वाकारज्ञतामनसिकारात् । एवं खलु शारद्वतीपुत्र बोधिसत्त्वो महासत्त्वः प्रज्ञापारमितायाञ्चरन् दिव्यचक्षुःसाक्षात्क्रियाऽभिज्ञाज्ञानमभिनिर्हरति । न च श्रावकभूमिं वा प्रत्येकबुद्धभूमिं वाऽनुप्राप्नोति । न किञ्चिद्धर्मं पश्यति योऽनुत्तरां सम्यक् सम्बोधिमभिसम्बुध्यते । स तयाऽभिज्ञया वज्रोपमं समाधिमधिगम्य सर्व्ववासनाऽनुसन्धि क्लेशप्रहाणं कुरुते । न च तयाऽऽस्रवक्षयज्ञानसाक्षात्क्रियाऽभिज्ञया मन्यते ।

* षड्गति गतानामिति । ख, ग, घ पाठ ।

तथाहि तज्ज्ञानमज्ञानमचिन्त्यमसत्। अहं प्रजानामीति न मन्यते। तथाहि स तामेवाऽऽस्रवक्षयज्ञानसाक्षात्क्रियाऽभिज्ञां नोपलभते। यया मन्येत। स्वभावशून्यतामुपादाय। स्वभावविविक्ततामुपादाय। स्वभावाऽनुत्पादतामुपादाय। स आस्रवक्षयज्ञानचेतनामपि नोत्पादयति। नाऽऽस्रवक्षयसाक्षात्क्रियाऽभिज्ञाज्ञानाऽभिनिर्हारचेतनामन्यत्र सर्व्वाऽऽकारज्ञतामनसिकारात्। एवं खलु शारद्वतीपुत्र बोधिसत्त्वोमहासत्त्वः प्रज्ञापारमितायां चरन् स आस्रवक्षयसाक्षात्क्रियाऽभिज्ञाज्ञानमभिनिर्हरति। एवञ्च पुनः शारद्वतीपुत्र बोधिसत्त्वोमहासत्त्वः प्रज्ञापारमितायां चरन् षडभिज्ञाः परिपूरयति। वर्द्धतेऽनुत्तरया सम्यक्सम्बोध्या। सन्ति शारद्वतीपुत्र बोधिसत्त्वामहासत्त्वाः प्रज्ञापारमितायां चरन्तो दानपारमितायां स्थित्वा सर्व्वाऽऽकारज्ञतायाः पन्थानं शोधयन्ति। अत्यन्तशून्यतया अनवगृहीतचित्ततामुपादाय। सन्ति शारद्वतीपुत्र बोधिसत्त्वामहासत्त्वाः ये प्रज्ञापारमितायां चरन्तः शीलपारमितायां स्थित्वा सर्व्वाकारज्ञतायाः पन्थानं शोधयन्ति। अत्यन्तशून्यतया आपत्त्यनध्यापत्तितामुपादाय। सन्ति शारद्वतीपुत्र बोधिसत्त्वामहासत्त्वाः ये प्रज्ञापारमितायां चरन्तः क्षान्तिपारमितायां स्थित्वा सर्व्वाकारज्ञतायाः पन्थानं शोधयन्त्यत्यन्तशून्यतया अक्षोभणतामुपादाय। सन्ति शारद्वतीपुत्र बोधिसत्त्वामहासत्त्वाः ये प्रज्ञापारमितायां चरन्तः वीर्यपारमितायां स्थित्वा सर्व्वाकारज्ञतायाः पन्थानं शोधयन्त्यत्यन्तशून्यतया कायिकचैतसिकवीर्य्याऽस्रंसनतामुपादाय। सन्ति शारद्वतीपुत्र बोधिसत्त्वामहासत्त्वाः ये प्रज्ञापारमितायां चरन्तो ध्यानपार-

मितायां स्थित्वा सर्व्वाकारज्ञतायाः पन्थानं शोधयन्त्यत्यन्तशून्यतया अविच्छिन्नचित्ततामुपादाय। सन्ति शारद्वतीपुत्र बोधिसत्त्वामहासत्त्वाः ये प्रज्ञापारमितायां चरन्तः प्रज्ञापारमितायां स्थित्वा सर्व्वाकारज्ञतायाः पन्थानं शोधयन्त्यत्यन्तशून्यतया दौःप्रज्ञचित्ताऽनुपलब्धितामुपादाय । एवं शारद्वतीपुत्र बोधिसत्त्वामहासत्त्वाः प्रज्ञापारमितायां चरन्तः षट्सु पारमितासु स्थित्वा सर्व्वाकारज्ञतायाः पन्थानं शोधयन्त्यत्यन्तशून्यतया अनागमनागमनतामुपादाय । अपरिग्रहतामुपादाय । दानं परिग्रहतामुपादाय प्रज्ञप्यते । शीलमशुचितामुपादाय प्रज्ञप्यते । क्षान्तिं* क्षोभणतामुपादाय प्रज्ञप्यते । वीर्य्यं कुसीदतामुपादाय प्रज्ञप्यते । समाधिरसमाहितमुपादाय प्रज्ञप्यते। प्रज्ञां दुःप्रज्ञतामुपादाय प्रज्ञप्यते । स तीर्ण इति न मन्यते । अतीर्ण इति न मन्यते । स दाता इति न मन्यते । अदाता इति न मन्यते । शीलवानिति न मन्यते। दुःशील इति न मन्यते । क्षान्तिं सम्पन्न इति न मन्यते । क्रोधन इति न मन्यते । आरब्धवीर्य्य इति न मन्यते । कुसीद इति न मन्यते । समाहित इति न मन्यते। असमाहित इति न मन्यते। प्राज्ञइति न मन्यते । दुःप्रज्ञ इति न मन्यते । आक्रुष्ट इति न मन्यते । वन्दित इति न मन्यते। सत्कृत इति न मन्यते । असत्कृत इति न मन्यते । तत्कस्य हेतोः। न हि शारद्वतीपुत्र अनुत्पाद आक्रुष्टोवेति मन्यते वन्दितोवेति मन्यते । सत्कृतो वेति

* क्षान्तिरिति युक्तः पाठः ।

मन्यते । असत्कृतोवेति मन्यते । तत् कस्य हेतोः । तथा
प्रज्ञापारमिता सर्व्वमन्यतां* समुच्छिनत्ति । इह शारद्वतीपु
बोधिसत्त्वस्य महासत्त्वस्य प्रज्ञापारमितायां चरतो ये गुणभवन्ति
तेन श्रावकप्रत्येकबुद्धानां संविद्यन्ते । स इमान् गुणान् परिपूर्य
सत्त्वांश्च परिपाचयन्ति । बुद्धक्षेत्रञ्च परिशोधयन्ति । सर्व्वाका
ज्ञताञ्चाऽनुप्राप्नोति ।

पुनरपरं शारद्वतीपुत्र बोधिसत्त्वोमहासत्त्वः प्रज्ञापारमिता
चरन् सर्व्वसत्त्वानामन्तिके समचित्ततामुत्पादयति । सर्व्वसत्त्वाना
न्तिके समचित्ततामुत्पाद्य सर्व्वधर्म्मसमतां प्रतिलभते । स सर्व्वध
समतां प्रतिलभ्य सर्व्वसत्त्वान् सर्व्वधर्म्मसमतायां प्रतिष्ठापयति ।
दृष्ट एव धर्म्मे बुद्धानां भगवतां प्रियो भवति । मनापश्च । स
बोधिसत्त्वानाञ्च सर्व्वश्रावकाणाञ्च प्रत्येकबुद्धानाञ्च प्रियो भवति
मनापश्च । स यत्र यत्रोपपद्यमान उपपद्यते तत्र तत्र न जा
चक्षुषा अमनापाणि रूपाणि पश्यति । न श्रोत्रेणाऽमनापान् शब्दा
शृणोति । न घ्राणेनाऽमनापान् गन्धान् जिघ्रति । न जिह्वयाऽम
नापान्रसानास्वादयति । न कायेनाऽमनापान् स्पर्शान् स्पृशति
न मनसाऽमनापान् धर्म्मान् विजानाति । एवं खलु शारद्वतीपु
बोधिसत्त्वोमहासत्त्वः प्रज्ञापारमितायां चरन् न परिहीयतेऽनुत्त
रायाः सम्यक्सम्बोधेः ।

अस्मिन् खलु पुनः प्रज्ञापारमितानिर्देशे निर्दिश्यमाने त्री
भिक्षुशतानि यथाप्रावृतैश्चीवरैर्भगवन्तमभिच्छादयन्ति स्म । अ

---

* सर्व्वमन्यतानामसमुच्छिनत्तीति । ख, ग, घ पाठः ।

त्तरायां सम्यक्सम्बोधौ चित्तमुत्पादयन्ति स्म । अथ खलु भग
वांस्तस्यां वेलायां स्मितं प्रादुरकार्षीत् । अथाऽऽयुष्मानान
उत्थायाऽऽसनादेकांसमुत्तरासङ्गं कृत्वा दक्षिणजानुमण्डलं पृथिव
प्रतिष्ठाप्य येन भगवांस्तेनाऽञ्जलिं प्रणम्य भगवन्तमेतदवोचत्
को भगवन् हेतुः कः प्रत्ययः स्मितस्याऽऽविष्करणे । नाऽहेतु
नाऽप्रत्ययं तथागता अर्हन्तः सम्यक्सम्बुद्धाः स्मितमाविष्कुर्व्वन्ति
एवमुक्ते भगवानायुष्मन्तमानन्दमेतदवोचत् । एतान्यानन्द त्रीणि
भिक्षुशतानि एकषष्ठे कल्पे महाकेतुनामानस्तथागता अर्हन
सम्यक्सम्बुद्धाः लोके उत्पत्स्यन्ते । तारकोपमे कल्पे तएत इतश्च्युत
समाना अक्षोभ्यस्य तथागतस्यार्हतः सम्यक्सम्बुद्धस्य बुद्धक्षे
उपपत्स्यन्ते । षष्ट्या च देवपुत्र सहस्रैः कामावचरैरनुत्तराय
सम्यक्सम्बोधौ चित्तान्युत्पादितानि । तानि च मैत्रेयं तथागत
मर्हन्तं सम्यक्सम्बुद्धमारागयिष्यन्ति । तत्रैव च ब्रह्मचर्यं चरिष्यन्ति
स च मैत्रेयस्तथागतस्तान् व्याकरिष्यत्यनुत्तरायां सम्यक्सम्बोधाविति
अथ बुद्धाऽनुभावेन तस्मिन् समये तास्ततस्तः पर्षद इति निषण्ण
एव पूर्व्वस्यां दिशि बुद्धसहस्रं पश्यन्ति स्म । दक्षिणस्यां दिशि
बुद्धसहस्रं पश्यन्ति स्म । पश्चिमायां दिशि बुद्धसहस्रं पश्यन्ति स्म
उत्तरस्यान्दिशि बुद्धसहस्रं पश्यन्ति स्म । उत्तरपूर्व्वस्यान्दिशि बुद्ध
सहस्रं पश्यन्ति स्म । पूर्व्वदक्षिणस्यान्दिशि बुद्धसहस्रं पश्यन्ति स्म
दक्षिणपश्चिमायान्दिशि बुद्धसहस्रं पश्यन्ति स्म । पश्चिमोत्तरस्या
न्दिशि बुद्धसहस्रं पश्यन्ति स्म । अधस्ताद्दिशि बुद्धसहस्रं पश्यन्ति
स्म । उपरिष्टाद्दिशि बुद्धसहस्रं पश्यन्ति स्म । न च तान् बुद्धक्षे

गुणव्यूहानिह सहायां लोकधातौ पश्यन्ति स्म। यान् बुद्धक्षेत्रगुण-
व्यूहांस्तेषां बुद्धानां भगवतां तेषु लोकधातुषु पश्यन्ति स्म। अथ
ततः पर्षदो दशप्राणिसहस्राणि प्रणिधानमकार्षुः। वयं कर्म तथा
करिष्यामो येन कर्मणा कृतेनाऽत्र बुद्धक्षेत्रेषूपपत्स्याम इति। अथ
भगवांस्तेषां कुलपुत्राणां आशयं विदित्वा स्मितं प्रादुरकार्षीत्।

अथायुष्मानानन्द उत्थायाऽऽसनादेकांसमुत्तरासङ्गं कृत्वा दक्षिण-
जानुमण्डलं पृथिव्यां प्रतिष्ठाप्य येन भगवांस्तेनाऽञ्जलिं प्रणम्य
भगवन्तमेतदवोचत्। को भगवन् हेतुः कः प्रत्ययः स्मित-
स्याऽऽविष्करणे। नाहेतु नाऽप्रत्ययं बुद्धा भगवन्तः स्मितमाविष्कुर्व-
न्ति। भगवानाह। पश्यसि त्वमानन्देमानि दश प्राणिसहस्राणि।
आह। पश्यामि भगवन्। भगवानाह। एतान्यानन्द दश प्राणि
सहस्राणि इतश्च्युता तत्र बुद्धक्षेत्रेषूपपत्स्यन्ते। न च तावद् विरहिता
भविष्यन्ति तथागतैरर्हद्भिः सम्यक्सम्बुद्धैस्ततः पश्चाद्व्यूहराजा नामा-
नस्तथागता अर्हन्तः सम्यक्सम्बुद्धा लोके भविष्यन्ति। अथायुष्मान्
शारद्वतीपुत्र आयुष्मांश्च महामौद्गल्यायन आयुष्मांश्च सुभूतिरायु-
ष्मांश्च पूर्णो मैत्रायणीपुत्र आयुष्मांश्च महाकाश्यप एते चान्ये च सं-
बहुला [illegible] बोधिसत्त्वाश्च महासत्त्वा अभिज्ञाताभिज्ञाता
[illegible] भगवन्तमेतदवोचन्। महापारमितेयं
भगवन् [illegible] यदुत प्रज्ञापारमिता। [illegible]
[illegible] यदुत प्रज्ञापारमिता।
[illegible] यदुत प्रज्ञापार-
[illegible]

यदुत प्रज्ञापारमिता। वरपारमितेयं भगवन् बोधिसत्त्वानां महा-सत्त्वानां यदुत प्रज्ञापारमिता। प्रवरपारमितेयं भगवन् बोधि-सत्त्वानां महासत्त्वानां यदुत प्रज्ञापारमिता। प्रणीतपारमितेयं भगवन् बोधिसत्त्वानां महासत्त्वानां यदुत प्रज्ञापारमिता। अनु-त्तरपारमितेयं भगवन् बोधिसत्त्वानां महासत्त्वानां यदुत प्रज्ञापा-रमिता। निरुत्तरपारमितेयं भगवन् बोधिसत्त्वानां महासत्त्वानां यदुत प्रज्ञापारमिता। असमपारमितेयं भगवन् बोधिसत्त्वानां महासत्त्वानां यदुत प्रज्ञापारमिता। असमसमपारमितेयं भगवन् बोधिसत्त्वानां महासत्त्वानां यदुत प्रज्ञापारमिता। असदृशपारमि-तेयं भगवन् बोधिसत्त्वानां महासत्त्वानां यदुत प्रज्ञापारमिता। अनुपमपारमितेयं भगवन् बोधिसत्त्वानां महासत्त्वानां यदुत प्रज्ञापारमिता। आकाशपारमितेयं भगवन् बोधिसत्त्वानां महा-सत्त्वानां यदुत प्रज्ञापारमिता। स्वलक्षणशून्यतापारमितेयं भगवन् बोधिसत्त्वानां महासत्त्वानां यदुत प्रज्ञापारमिता। सर्व्वधर्म्मशून्यता-पारमितेयं भगवन् बोधिसत्त्वानां महासत्त्वानां यदुत प्रज्ञापार-मिता। अभावस्वभावशून्यतापारमितेयं भगवन् बोधिसत्त्वानां महासत्त्वानां यदुत प्रज्ञापारमिता। सर्व्वगुणपरिपूरिपारमितेयं भगवन् बोधिसत्त्वानां महासत्त्वानां यदुत प्रज्ञापारमिता। सर्व्वगुणसमन्वागतपारमितेयं भगवन् बोधिसत्त्वानां महासत्त्वानां यदुत प्रज्ञापारमिता। अनवमृद्यपारमितेयं भगवन् बोधिसत्त्वानां महासत्त्वानां यदुत प्रज्ञापारमिता।

अत्र हि भगवन् प्रज्ञापारमितायां चरद्भिर्ब्बोधिसत्त्वैर्म्महासत्त्वै-

ष्यन्ति। असमसमानां संस्काराणां लाभिनोभविष्यन्ति। असमसमस्य विज्ञानस्य लाभिनोभविष्यन्ति। असमसमां बोधिमभिसम्बुध्याऽसमसमं धर्म्मचक्रं प्रवर्त्तयिष्यन्ति।

प्रत्युत्पन्ना अपि बुद्धाभगवन्तोऽत्रैव प्रज्ञापारमितायां चरन्तोऽसमसमस्य रूपस्य लाभिनोभवन्ति। असमसमायावेदनायालाभिनोभवन्ति। असमसमायाः संज्ञायालाभिनोभवन्ति। असमसमानां संस्काराणां लाभिनोभवन्ति। असमसमस्य विज्ञानस्य लाभिनोभवन्ति। असमसमां बोधिमभिसम्बुध्याऽसमसमं धर्म्मचक्रं प्रवर्त्तयिष्यन्ति।

तस्मात्तर्हि भगवन् बोधिसत्त्वैर्महासत्त्वैः सर्व्वधर्म्माणां पारं गन्तुकामैः प्रज्ञापारमितायां योगः करणीयः। नमस्करणीयास्ते भगवन् बोधिसत्त्वामहासत्त्वाः सदेवमानुषाऽसुरेण लोकेन येऽत्र प्रज्ञापारमितायां चरन्ति।

एवमुक्ते भगवांस्तान् संबहुलान् महाश्रावकान् तांश्च बोधिसत्त्वान् महासत्त्वानेतदवोचत्। एवमेतत् कुलपुत्राएवमेतत् यथातथा, यथा वदथ, नमस्करणीयास्ते बोधिसत्त्वामहासत्त्वाः सदेवमानुषाऽसुरेण लोकेन येऽत्र प्रज्ञापारमितायां चरन्ति। तत्कस्य हेतोः बोधिसत्त्वं हि कुलपुत्रामहासत्त्वमागम्य मनुष्यलोकस्य लोके प्रादुर्भावोभवति। देवलोकस्य लोके प्रादुर्भावोभवति। क्षत्रियमहाशाल*कुलानां लोके प्रादुर्भावोभवति। ब्राह्मणमहाशालकुलानां लोके प्रादुर्भावोभवति। गृहपतिमहाशालकुलानां लोके प्रादुर्-

* महाशालो महागृहस्थ इति माण्डूक्योपनिषद्भाष्ये।

र्भावोभवति। राज्ञां चक्रवर्त्तिनां लोके प्रादुर्भावोभवति। चातुर्महाराजकायिकानां देवानां लोके प्रादुर्भावोभवति। त्राय-स्त्रिंशानां देवानां लोके प्रादुर्भावोभवति। यामानां देवानां लोके प्रादुर्भावोभवति। तुषितानां देवानां लोके प्रादुर्भावो-भवति। निर्म्माणरतीनां देवानां लोके प्रादुर्भावोभवति। परनि-र्म्मितवशवर्त्तिनां देवानां लोके प्रादुर्भावोभवति। ब्राह्मकायिकानां देवानां लोके प्रादुर्भावोभवति। ब्रह्मपुरोहितानां देवानां लोके प्रादुर्भावोभवति। ब्रह्मपार्षद्यानां देवानां लोके प्रादुर्भावोभवति। महाब्रह्मणां देवानां लोके प्रादुर्भावोभवति। आभानां देवानां लोके प्रादुर्भावोभवति। परीत्ताभानां देवानां लोके प्रादुर्भावो-भवति। अप्रमाणाभानां देवानां लोके प्रादुर्भावोभवति। आभा-स्वराणां देवानां लोके प्रादुर्भावोभवति। शुभानां देवानां लोके प्रादुर्भावोभवति। परीत्तशुभानां देवानां लोके प्रादुर्भावोभवति। अप्रमाणशुभानां देवानां लोके प्रादुर्भावोभवति। शुभकृत्स्नानां देवानां लोके प्रादुर्भावोभवति। वृहाणां देवानां लोके प्रादुर्भावो-भवति। परीत्तवृहाणां देवानां लोके प्रादुर्भावोभवति। अप्रमाण-वृहाणां देवानां लोके प्रादुर्भावोभवति। वृहत्फलानां देवानां लोके प्रादुर्भावोभवति। अवृहाणां देवानां लोके प्रादुर्भावोभवति। अतपानां देवानां लोके प्रादुर्भावोभवति। सुदृशानां देवानां लोके प्रादुर्भावोभवति। सुदर्शनानां देवानां लोके प्रादुर्भावोभवति। अकनिष्ठानां देवानां लोके प्रादुर्भावोभवति। स्रोतआपन्नानां लोके प्रादुर्भावोभवति। सकृदागामिनां लोके प्रादुर्भावोभवति।

स्यांदिशि गङ्गानदीवालुकोपमेषु लोकधातुषु अप्रमेयासंख्येया बोधिसत्त्वामहासत्त्वास्तं प्रभाव्यूहं दृष्ट्वा स्वकस्वकेषु बुद्धक्षेत्रेषु बुद्धान् भगवतः परिपृच्छन्तिस्म । कस्यायं भगवन्ननुभावो येनेमे लोकधातव एवं महताऽवभासेन स्फुटाः । ते बुद्धा भगवन्तोऽवोचन् । एष कुलपुत्रा उत्तरे दिग्भागे सहानाम लोकधातुस्तत्र शाक्यमुनिर्नाम तथागतोऽर्हन् सम्यक्सम्बुद्धस्तेनेमे जिह्वेन्द्रियं निर्णमय्य गङ्गानदीवालुकोपमालोकधातवोऽवभासेनस्फुटाः । यदुत बोधिसत्त्वानां महासत्त्वानां प्रज्ञापारमितादेशनतायै । पश्चिमायांदिशि गङ्गानदीवालुकोपमेषु लोकधातुषु अप्रमेयाअसंख्येया बोधिसत्त्वामहासत्त्वास्तं प्रभाव्यूहं दृष्ट्वा स्वकस्वकेषु बुद्धक्षेत्रेषु बुद्धान् भगवतः परिपृच्छन्तिस्म । कस्यायं भगवन्ननुभावोयेनेमे लोकधातव एवं महतादवभासेन स्फुटाः । ते बुद्ध भगवन्तोऽवोचन् । एष कुलपुत्रा पूर्वस्मिन्दिग्भागे सहानामलोकधातुस्तत्र शाक्यमुनिर्नाम तथागतोऽर्हन्सम्यक्सम्बुद्धस्तेनेमं जिह्वेन्द्रियं निर्णमय्य गङ्गानदीवालुकोपमा लोकधातवोऽवभासेन स्फुटाः । यदुत बोधिसत्त्वानां महासत्त्वानां प्रज्ञापारमितादेशनतायै । उत्तरस्मिन्दिग्भागे गङ्गानदीवालुकोपमेषु लोकधातुषु अप्रमेयाअसंख्येयाबोधिसत्त्वामहासत्त्वास्तं प्रभाव्यूहं दृष्ट्वा स्वकस्वकेषु बुद्धक्षेत्रेषु बुद्धान् भगवतः परिपृच्छन्तिस्म । कस्याऽयं भगवन्ननुभावोयेनेमे लोकधातव एवं महताऽवभासेन स्फुटाः । ते बुद्धाभगवन्तोऽवोचन् । एष कुलपुत्रादक्षिणेदिग्भागे सहानाम लोकधातुस्तत्र शाक्यमुनिर्नाम तथागतोऽर्हन् सम्यक्सम्बुद्धस्तेनेमं जिह्वेन्द्रियं निर्णमय्य गङ्गानदीवालुकोपमालोकधातवोऽवभासेन

स्फुटाः । यदुत बोधिसत्त्वानां महासत्त्वानां प्रज्ञापारमितादेशनतायै । उत्तरपूर्वस्मिन्दिग्भागे गङ्गानदीवालुकोपमेषु लोकधातुषु अप्रमेया-असंख्येया बोधिसत्त्वामहासत्त्वास्तं प्रभाव्यूहं दृष्ट्वा स्वकस्वकेषु बुद्ध-क्षेत्रेषु बुद्धान् भगवतः परिपृच्छन्तिस्म । कस्यायं भगवन्ननुभावो येनेमे लोकधातवएवं महताऽवभासेन स्फुटाः । ते बुद्धाभगवन्तोऽवो-चन् । एष कुलपुत्रादक्षिणपश्चिमेदिग्भागे सहानाम लोकधातुस्तत्र शाक्यमुनिर्नाम तथागतोऽर्हन् सम्यक्सम्बुद्धस्तेनेमं जिह्वेन्द्रियं निर्णा-मय्य गङ्गानदीवालुकोपमालोकधातवोऽवभासेन स्फुटाः । यदुत बोधिसत्त्वानां महासत्त्वानां प्रज्ञापारमितादेशनतायै । पूर्वदक्षिण-स्मिन्दिग्भागे गङ्गानदीवालुकोपमेषु लोकधातुषु अप्रमेयाअसंख्येया-बोधिसत्त्वामहासत्त्वास्तं प्रभाव्यूहं दृष्ट्वा स्वकस्वकेषु बुद्धक्षेत्रेषु बुद्धान् भगवतः परिपृच्छन्तिस्म । कस्यायं भगवन्ननुभावो येनेमे लोकधा-तवएवं महताऽवभासेन स्फुटाः । ते बुद्धाभगवन्तोऽवोचन् । एष कुलपुत्राः पश्चिमोत्तरेदिग्भागे सहानाम लोकधातुस्तत्र शाक्यमु-निर्नाम तथागतोऽर्हन् सम्यक्सम्बुद्धस्तेनेमं जिह्वेन्द्रियं निर्णमय्य गङ्गानदीवालुकोपमालोकधातवोऽवभासेन स्फुटाः । यदुत बोधि-सत्त्वानां महासत्त्वानां प्रज्ञापारमितादेशनतायै । दक्षिणपश्चिमे दिग्भागे गङ्गानदीवालुकोपमेषु लोकधातुषु अप्रमेयाअसंख्येया-बोधिसत्त्वामहासत्त्वास्तं प्रभाव्यूहं दृष्ट्वा स्वकस्वकेषु बुद्धक्षेत्रेषु बुद्धान् भगवतः परिपृच्छन्तिस्म । कस्यायं भगवन्ननुभावो येनेमे लोक-धातवएवं महताऽवभासेन स्फुटाः । ते बुद्धाभगवन्तोऽवोचन् । एष कुलपुत्राउत्तरपूर्वेदिग्भागे सहानाम लोकधातुस्तत्र शाक्य-

वासा अवृहा अतपाः सुदृशाः सुदर्शनाः अकनिष्ठादेवा दिव्यानि पुष्पमाल्यविलेपनधूपचूर्णानि दिव्यान्युत्पलपद्मपुण्डरीकानि दिव्यानि मान्दारमहामान्दारकेशरतमालपत्राणि गृहीत्वा येन भगवाञ्छाक्यमुनिस्तथागतोऽर्हन् सम्यक्सम्बुद्धस्तेनोपसंक्रामन्तिस्म। अथ ते बोधिसत्त्वामहासत्त्वास्ते च देवास्ताभिः पुष्पमाल्य गन्धविलेपन चूर्णचीवरच्छत्रध्वजपताकाभिर्भगवन्तं शाक्यमुनितथागतमर्हन्तं सम्यक्सम्बुद्धमवकिरन्तिस्माऽभ्यवकिरन्तिस्म। अभिप्राकिरन्तिस्म। अथ तानि पुष्पादीन्युपरिवैहायसमभ्युद्गम्याऽस्मिंस्त्रिसाहस्रे महासाहस्रे लोकधातौ पुष्पकूटाकारः संस्थितोऽभूत्। चतरस्रश्चतुःस्थूणसमोभागशः सुविभक्तोरमणीयोमनोरमः। अथ ततः पर्षदः प्राणिकोटीनियुतशतसहस्रान्युत्थायासनेभ्योयेन भगवांस्तेनाऽञ्जलिं प्रणम्य भगवन्तमेतदवोचत्। वयमपि भगवन्ननागतेऽध्वन्येवं रूपाणां धर्म्माणां लाभिनोभवेमः। यथा रूपाणां तथागतोऽर्हन् सम्यक्सम्बुद्धः। एवमेव श्रावकसंघः परिहारः से। एवञ्च पर्षद्धिधर्म्मं देशयामः। यथा तथागतएतर्हिधर्म्मं देशयति। अथ भगवांस्तेषामध्याशयं विदित्वा सर्व्वधर्म्माणाञ्चानुत्पादायाऽनिरोधायाऽनभिसंस्कारायाऽप्रादुर्भावाय। क्षान्तिं विदित्वास्मितं प्रादुरकार्षीत्। अथायुष्मानानन्दउत्थायासनादेकांशमुत्तरासङ्गं कृत्वादक्षिणं जानुमण्डलं पृथिव्यां प्रतिष्ठाप्य येन भगवांस्तेनाऽञ्जलिं प्रणम्य भगवन्तमेतदवोचत्। कोभगवन् हेतुः कः प्रत्ययः स्मितस्याविष्करणे नाऽहेतुकं नाऽप्रत्ययं बुद्धा भगवन्तः स्मितमाविष्कुर्व्वन्ति। भगवानाह। इत आनन्दपर्षदः प्राणिकोटीनियुतशतसहस्रैरनुत्पत्तिकेषु धर्म्मेषु क्षान्तिः प्रतिलब्धा। एतेषा-

[illegible]

[illegible] ।

इति शतसाहस्रिकायाः प्रज्ञापारमितायाः

प्रथमः परिवर्तः ॥०॥

मात्रेण व्यवह्रियते। तच्च नाऽध्यात्मं न बहिर्द्धा नोभयमन्तरेणोप-
लभ्यते। तद्यथाऽपि नाम सुभूते येयमाध्यात्मिकी वेदनेति नाम
यावदेवधर्मप्रज्ञप्तिमात्रमेतत्तस्याश्च धर्मप्रज्ञप्तेर्नोत्पादो न निरोधो-
ऽन्यत्र संज्ञासङ्केतमात्रेण व्यवह्रियते। तच्च नाम नाऽध्यात्मं न
बहिर्द्धा नोभयमन्तरेणोपलभ्यते। तद्यथाऽपि नाम सुभूते
येयमाध्यात्मिकी संज्ञेति नाम यावदेवधर्मप्रज्ञप्तिमात्रमेतत्तस्याश्च धर्म-
प्रज्ञप्तेर्नोत्पादो न निरोधोऽन्यत्र संज्ञासङ्केतमात्रेण व्यवह्रियते।
तच्च नाम नाऽध्यात्मं न बहिर्द्धा नोभयमन्तरेणोपलभ्यते। तद्यथाऽपि
नाम सुभूते य इमे आध्यात्मिकाः संस्कारा इति नाम यावदेव
धर्मप्रज्ञप्तिमात्रमेतत्तस्याश्च धर्मप्रज्ञप्तेर्नोत्पादो न निरोधोऽन्यत्र
संज्ञासङ्केतमात्रेण व्यवह्रियते। तच्च नाम नाऽध्यात्मं न बहिर्द्धा नोभ-
यमन्तरेणोपलभ्यते। तद्यथाऽपि नाम सुभूते यदिदमाध्यात्मिकं
विज्ञानमिति नाम यावदेवधर्मप्रज्ञप्तिमात्रमेतत्तस्याश्च धर्म-
प्रज्ञप्तेर्नोत्पादो न निरोधोऽन्यत्र संज्ञासङ्केतमात्रेण व्यवह्रियते। तच्च
नाम नाऽध्यात्मं न बहिर्द्धा नोभयमन्तरेणोपलभ्यते। एव मेव सुभूते
प्रज्ञापारमिता च बोधिसत्त्वश्च बोधिसत्त्व नाम च सर्व्वमेतत् धर्म-
प्रज्ञप्तिमात्रं तस्याश्च धर्मप्रज्ञप्तेर्नोत्पादो न निरोधोऽन्यत्र संज्ञा-
सङ्केतमात्रेण व्यवह्रियते। तच्च नामनाऽध्यात्मं न बहिर्द्धा नोभयम-
न्तरेणोपलभ्यते। चक्षुरिति सुभूते यावदेव धर्मप्रज्ञप्तिमात्रमे-
तत्तस्याश्च धर्मप्रज्ञप्तेर्नोत्पादो न निरोधोऽन्यत्र संज्ञासङ्केतमात्रेण
व्यवह्रियते। यदुत चक्षुरिति। तच्च नाम नाऽध्यात्मं न बहिर्द्धा
नोभयमन्तरेणोपलभ्यते। श्रोत्रमिति सुभूते यावदेव धर्म

एव प्रज्ञप्तिमात्रकेनत्वाद् धर्मप्रज्ञप्तेर्नोत्पादो न निरोधोऽन्यत्र संज्ञा-
संकेतमात्रेण व्यवह्रियते। यदुत श्रोत्रमिति। तच्च नाम
नाऽध्यात्मं न बहिर्धा नोभयमन्तरेणोपलभ्यते। घ्राणमिति सुभूते
यावदेव धर्मप्रज्ञप्तिमात्रकेनत्वाद् धर्मप्रज्ञप्तेर्नोत्पादो न निरोधो-
ऽन्यत्र संज्ञासंकेतमात्रेण व्यवह्रियते। यदुत घ्राणमिति। तच्च नाम-
नाऽध्यात्मं न बहिर्धा नोभयमन्तरेणोपलभ्यते। जिह्वेति सुभूते
यावदेव धर्मप्रज्ञप्तिमात्रकेनत्वाद् धर्मप्रज्ञप्तेर्नोत्पादो न निरोधो-
ऽन्यत्र संज्ञासंकेतमात्रेण व्यवह्रियते। यदुत जिह्वेति। तच्च
नाम नाऽध्यात्मं न बहिर्धा नोभयमन्तरेणोपलभ्यते। कायइति
सुभूते यावदेव धर्मप्रज्ञप्तिमात्रकेनत्वाद् धर्मप्रज्ञप्तेर्नोत्पादो
न निरोधोऽन्यत्र संज्ञासंकेतमात्रेण व्यवह्रियते। यदुत काय
इति। तच्च नाम नाऽध्यात्मं न बहिर्धा नोभयमन्तरेणोपलभ्यते।
मनइति सुभूते यावदेव धर्मप्रज्ञप्तिमात्रकेनत्वाद् धर्म-
प्रज्ञप्तेर्नोत्पादो न निरोधोऽन्यत्र संज्ञासंकेतमात्रेण व्यवह्रियते। यदुत
मनइति। तच्च नाम नाऽध्यात्मं न बहिर्धा नोभयमन्तरेणोपल-
भ्यते। रूपमिति सुभूते यावदेव धर्मप्रज्ञप्तिमात्रकेनत्वाद्
धर्मप्रज्ञप्तेर्नोत्पादो न निरोधोऽन्यत्र संज्ञासंकेतमात्रेण व्यवह्रियते।
यदुत रूपमिति। तच्च नाम नाऽध्यात्मं न बहिर्धा नोभयमन्तरेणो-
पलभ्यते। शब्दइति सुभूते यावदेव धर्मं प्रज्ञप्तिमात्रकेनत्व-
त्वाद् धर्मप्रज्ञप्तेर्नोत्पादो न निरोधोऽन्यत्र संज्ञासंकेतमात्रेण व्यव-
ह्रियते। यदुत शब्द इति। तच्च नाम नाऽध्यात्मं न बहिर्धा
नोभयमन्तरेणोपलभ्यते। गन्धइति सुभूते यावदेव धर्मप्रज्ञप्तिमात्र-

देव धर्मप्रज्ञप्तिमात्रमेतत्तस्याश्च धर्मप्रज्ञप्तेर्नोत्पादो न निरोधो-
ऽन्यत्र संज्ञासङ्केतमात्रेण व्यवह्रियते। यदुत श्रोत्रधातुरिति। तच्च
नाम नाध्यात्मं न बहिर्द्धा नोभयमन्तरेणोपलभ्यते। शब्दधातु-
रिति सुभूते यावदेव धर्मप्रज्ञप्तिमात्रमेतत्तस्याश्च धर्मप्रज्ञप्तेर्नोत्पादो
न निरोधोऽन्यत्र संज्ञासङ्केतमात्रेण व्यवह्रियते। यदुत शब्द-
धातुरिति। तच्च नाम नाध्यात्मं न बहिर्द्धा नोभयमन्तरेणोपल-
भ्यते। श्रोत्रविज्ञानधातुरिति सुभूते यावदेव धर्मप्रज्ञप्तिमात्रमे-
तत्तस्याश्च धर्मप्रज्ञप्तेर्नोत्पादो न निरोधोऽन्यत्र संज्ञासङ्केतमात्रेण
व्यवह्रियते। यदुत श्रोत्रविज्ञानधातुरिति। तच्च नाम नाध्यात्मं
न बहिर्द्धा नोभयमन्तरेणोपलभ्यते। घ्राणधातुरिति सुभूते याव-
देव धर्मप्रज्ञप्तिमात्रमेतत्तस्याश्च धर्मप्रज्ञप्तेर्नोत्पादो न निरोधोऽन्यत्र
संज्ञासङ्केतमात्रेण व्यवह्रियते। यदुत घ्राणधातुरिति। तच्च नाम
नाध्यात्मं न बहिर्द्धा नोभयमन्तरेणोपलभ्यते। गन्धधातुरिति
सुभूते यावदेव धर्मप्रज्ञप्तिमात्रमेतत्तस्याश्च धर्मप्रज्ञप्तेर्नोत्पादो न
निरोधोऽन्यत्र संज्ञासङ्केतमात्रेण व्यवह्रियते। यदुत गन्धधातुरि-
ति। तच्च नाम नाध्यात्मं न बहिर्द्धा नोभयमन्तरेणोपलभ्यते।
घ्राणविज्ञानधातुरिति सुभूते यावदेव धर्मप्रज्ञप्तिमात्रमेतत्तस्याश्च
धर्मप्रज्ञप्तेर्नोत्पादो न निरोधोऽन्यत्र संज्ञासङ्केतमात्रेण व्यवह्रियते।
यदुत घ्राणविज्ञानधातुरिति। तच्च नाम नाध्यात्मं न बहिर्द्धा
नोभयमन्तरेणोपलभ्यते। जिह्वाधातुरिति सुभूते यावदेव धर्म-
प्रज्ञप्तिमात्रमेतत्तस्याश्च धर्मप्रज्ञप्तेर्नोत्पादो न निरोधेऽन्यत्र संज्ञा-
सङ्केतमात्रेण व्यवह्रियत। यदुत जिह्वाधातुरिति। तच्च नाम

नाऽध्यात्मं न बहिर्द्धा नोभयमन्तरेणोपलभ्यते । रसधातुरिति प्रज्ञप्तिमात्रमेतत्तस्याश्च धर्म्मप्रज्ञप्तेर्नोत्पादो न निरोधोऽन्यत्र संज्ञासङ्केतमात्रेण व्यवह्रियते । यदुत रसधातुरिति । तच्च नाम नाऽध्यात्मं न बहिर्द्धा नोभयमन्तरेणोपलभ्यते । जिह्वा विज्ञानधातुरिति सुभूते यावदेव धर्म्मप्रज्ञप्तिमात्रमेतत्तस्याश्च धर्म्मप्रज्ञप्तेर्नोत्पादो न निरोधोऽन्यत्र संज्ञासङ्केतमात्रेण व्यवह्रियते । यदुत जिह्वाविज्ञानधातुरिति । तच्च नाम नाऽध्यात्मं न बहिर्द्धा नोभयमन्तरेणोपलभ्यते । कायधातुरिति सुभूते यावदेव धर्म्मप्रज्ञप्तिमात्रमेतत्तस्याश्च धर्म्मप्रज्ञप्तेर्नोत्पादो न निरोधोऽन्यत्र संज्ञासङ्केतमात्रेण व्यवह्रियते । यदुत कायधातुरिति । तच्च नाम नाऽध्यात्मं न बहिर्द्धा नोभयमन्तरेणोपलभ्यते । स्प्रष्टव्यधातुरिति सुभूते यावदेव धर्म्मप्रज्ञप्तिमात्रमेतत्तस्याश्च धर्म्मप्रज्ञप्तेर्नोत्पादो न निरोधोऽन्यत्र संज्ञासङ्केतमात्रेण व्यवह्रियते । यदुत स्प्रष्टव्यधातुरिति । तच्च नाम नाऽध्यात्मं न बहिर्द्धा नोभयमन्तरेणोपलभ्यते । कायविज्ञानधातुरिति सुभूते यावदेव धर्म्मप्रज्ञप्तिमात्रमेतत्तस्याश्च धर्म्मप्रज्ञप्तेर्नोत्पादो न निरोधोऽन्यत्र संज्ञासङ्केतमात्रेण व्यवह्रियते । यदुत कायविज्ञानधातुरिति । तच्च नाम नाऽध्यात्मं न बहिर्द्धा नोभयमन्तरेणोपलभ्यते । मनोधातुरिति सुभूते यावदेव धर्म्मप्रज्ञप्तिमात्रमेतत्तस्याश्च धर्म्मप्रज्ञप्तेर्नोत्पादो न निरोधोऽन्यत्र संज्ञासङ्केतमात्रेण व्यवह्रियते । यदुत मनोधातुरिति । तच्च नामनाऽध्यात्मं न बहिर्द्धा नोभयमन्तरेणोपलभ्यते । धर्म्मधातुरिति सुभूते यावदेवधर्म्मप्रज्ञप्तिमात्रमेतत् तस्याश्च धर्म्मप्रज्ञप्तेर्नोत्पादो न निरोधोऽन्यत्र संज्ञा

ङ्केतमात्रेण व्यवह्रियते। यदुत पुद्गलधातुरिति। तच्च नाम नाऽध्या-
न्तं न बहिर्द्धा नोभयमन्तरेणोपलभ्यते। मनोविज्ञानधातुरिति
भूते यावदेव धर्मप्रज्ञप्तिमात्रमेतत्तस्याश्च धर्मप्रज्ञप्तेर्नोत्पादो न
निरोधोऽन्यत्र संज्ञासङ्केतमात्रेण व्यवह्रियते। यदुत मनोविज्ञान धातु-
रिति। तच्च नाम नाऽध्यात्मं न बहिर्द्धा नोभयमन्तरेणोप-
लभ्यते। एवमेव सुभूते यदिदमुच्यते प्रज्ञापारमितेति बोधि-
सत्त्व इति बोधिसत्त्वनामेति। यावदेव धर्मप्रज्ञप्तिमात्रमेतत्तस्याश्च
धर्मप्रज्ञप्तेर्नोत्पादो न निरोधोऽन्यत्र संज्ञासङ्केतमात्रेण व्यवह्रियते।
प्रज्ञापारमितेति बोधिसत्त्व इति बोधिसत्त्वनामेति। तच्च नाम
नाऽध्यात्मं न बहिर्द्धा नोभयमन्तरेणोपलभ्यते। तद्यथाऽपि नाम
सुभूते योयमाध्यात्मिक आत्मभाव इति नाम मात्रेण व्यवह्रियते।
शीर्षाऽस्यीनीति नाम व्यवह्रियते। ग्रीवाऽस्थीनीति नाम व्यवह्रि-
यते। स्कन्धाऽस्थीनीति नाम व्यवह्रियते। पृष्ठाऽस्थीनीति व्यव-
ह्रियते। पार्श्वकाऽस्थीनीति व्यवह्रियते। कट्यस्थीनीति नाम
व्यवह्रियते। ऊर्वस्थीनीति नाम व्यवह्रियते। जङ्घाऽस्थीनीति
नाम व्यवह्रियते। पादाऽस्थीनीति नाम व्यवह्रियते। धर्मप्रज्ञप्ति-
मात्रमेतत्तस्याश्च धर्मप्रज्ञप्तेर्नोत्पादो न निरोधोऽन्यत्र संज्ञा सङ्केत-
मात्रेण व्यवह्रियते। शीर्षाऽस्थीनीति नाम* ग्रीवाऽस्थीनीति नाम

---

* ग, घ, पुस्तके नाम शब्दात् परं सर्व्वत्र "व्यवह्रियते" इति क्रियापदं लिखितं दृश्यते। अत्र केषाञ्चित् पदानां पुनरुक्तिरुपलभ्यते। किमयं लेखकदोषः। ग्रन्थकर्त्तुर्व्वा रचनाचातुर्य्यं प्रयोजनविशेषोवाऽस्तीति तत्त्वतोनविद्मः।

वाह्यम्यौनौति नाम पश्चाऽम्यौनौति नाम पार्श्वाऽम्यौनौति नाम कायम्यौनौति नाम उर्द्धम्यौनौति नाम गङ्गाऽम्यौनौति नाम। तच नाम नाऽध्यात्मं न वहिर्द्धा नोभयमन्तरेणोपलभ्यते। एवमेव सुभूते यदिदमुच्यते प्रज्ञापारमितेति वोधिसत्त्व इति वोधिसत्त्वनामेति यावदेवधर्मप्रज्ञप्तिमात्रमेतत्तस्याश्च धर्मप्रज्ञप्तेर्नोत्पादो न निरोधोऽन्यत्रसंज्ञासङ्केतमात्रेण व्यवह्रियते। तच नाम नाऽध्यात्मं न वहिर्द्धा नोभयमन्तरेणोपलभ्यते। तद्यथाऽपि नाम सुभूते यानीमानि वाह्यानि तृणकाष्ठशाखापत्रपलाशानि सर्व्वाण्येतानि नानानामधेयैर्व्यवह्रियन्ते तानि च एषाञ्च नोत्पादो न निरोधोऽन्यत्र संज्ञासङ्केतमात्रेण व्यवह्रियते। तानि च नामानि नाऽध्यात्मं न वहिर्द्धा नोभयमन्तरेणोपलभ्यते।

एवमेव सुभूते यदिदमुच्यते प्रज्ञापारमितेति वोधिसत्त्व इति। वोधिसत्त्वनामेति। यावदेवधर्म्मप्रज्ञप्तिमात्रमेतत्तस्याश्च धर्म्मप्रज्ञप्तेर्नोत्पादो न निरोधोऽन्यत्र संज्ञासङ्केतमात्रेण व्यवह्रियते। तच्च नाम नाऽध्यात्मं न वहिर्द्धा नोभयमन्तरेणोपलभ्यते। तद्यथाऽपि नाम सुभूते अतीतानां बुद्धानां भगवतां यावदेव नाम मात्रं तिष्ठति। तच्च नाम नाऽध्यात्मं न वहिर्द्धा नोभयमन्तरेणोपलभ्यते। तद्यथाऽपि नाम सुभूते स्वप्नः प्रतिश्रुत्का प्रतिभासोमायामरीचि उदकचन्द्रस्तथागतनिर्म्मितः सर्व्वएते धर्म्माः प्रज्ञप्तिमात्रं यस्याश्च धर्म्मप्रज्ञप्तेर्नोत्पादो न निरोधोऽन्यत्रसंज्ञासङ्केतमात्रेण व्यवह्रियते। तच्च नाम नाऽध्यात्मं न वहिर्द्धा नोभयमन्तरेणोपलभ्यते। एवमेव सुभूते यदिदमुच्यते प्रज्ञापारमितेति वोधिसत्त्वइति वोधिसत्त्वनामेति। सर्व्व एते

धर्म्माः प्रज्ञप्तिमात्रमेतत्तस्मान्न धर्म्मप्रज्ञप्तेर्नोत्पादो न निरोधोऽन्यत्र संज्ञासङ्केतमात्रेण व्यवह्रियते । तच्च नाम नाऽध्यात्मं न वहिर्द्धा नोभयमन्तरेणोपलभ्यते । एवं खलु सुभूते बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां चरता नामसङ्केत प्रज्ञप्त्यावाधर्म्मप्रज्ञप्त्या च शिक्षितव्यं ।

एवं खलु सुभूते बोधिसत्त्वोमहासत्त्वः प्रज्ञापारमितायां चरन् न रूपं नाम नित्यमिति समनुपश्यति । न रूपं नामाऽनित्यमिति समनुपश्यति । न रूपं नाम सुखमिति समनुपश्यति । न रूपं नाम दुःखमिति समनुपश्यति । न रूपं नामात्मेति समनुपश्यति । न रूपं नामाऽनात्मेति समनुपश्यति । न रूपं नाम शान्तमिति समनुपश्यति । न रूपं नामऽशान्तमिति समनुपश्यति । न रूपं नाम शून्यमिति समनुपश्यति । न रूपं नामाऽशून्यमिति समनुपश्यति । न रूपं नाम निमित्तमिति समनुपश्यति । न रूपं नामाऽनिमित्तमिति समनुपश्यति । न रूपं नाम प्रणिहितमिति समनुपश्यति । न रूपं नामाऽप्रणिहितमिति समनुपश्यति । न रूपं नाम संस्कृतमिति समनुपश्यति । न रूपं नामाऽसंस्कृतमिति समनुपश्यति । न रूपं नाम संक्लेशमिति समनुपश्यति । न रूपं नामाऽसंक्लेशमिति समनुपश्यति । न रूपं नाम व्यवदानमिति समनुपश्यति । न रूपं नामोत्पाद इति समनुपश्यति । न रूपं नाम निरोध इति समनुपश्यति । न रूपं नाम विविक्तमिति समनुपश्यति । न रूपं नामाऽविविक्तमिति समनुपश्यति । न रूपं नाम कुशलमिति समनुपश्यति । न रूपं नामाऽकुशलमिति

समनुपश्यति । न रूपं नाम साऽवद्यमिति समनुपश्यति । न रूपं
नाम निरवद्यमिति समनुपश्यति । न रूपं नाम सास्रवमिति
समनुपश्यति । न रूपं नामाऽनास्रवमिति समनुपश्यति । न रूपं
नाम संक्लेशमिति समनुपश्यति । न रूपं नाम निःक्लेशमिति सम-
नुपश्यति । न रूपं नाम लौकिकमिति समनुपश्यति । न रूपं
नाम लोकोत्तरमिति समनुपश्यति । न रूपं नाम संसार इति
समनुपश्यति । न रूपं नाम निर्व्वाणमिति समनुपश्यति ।

न वेदनां नाम नित्येति समनुपश्यति । न वेदनां नामाऽनि-
त्येति समनुपश्यति । न वेदनां नाम सुखेति समनुपश्यति । न वेदनां
नाम दुःखेति समनुपश्यति । न वेदनां नामात्मेति समनुपश्यति । न
वेदनां नामानात्मेति समनुपश्यति । न वेदनां नाम शान्तेति समनु-
पश्यति । न वेदनां नामाऽशान्तेति समनुपश्यति । न वेदनां नाम शून्येति
समनुपश्यति । न वेदनां नामाऽशून्येति समनुपश्यति । न वेदनां
नाम निमित्तेति समनुपश्यति । न वेदनां नामाऽनिमित्तेति समनु-
पश्यति । न वेदनां नाम प्रणिहित*मिति समनुपश्यति । न वेदनां
नामाऽप्रणिहितमिति समनुपश्यति । न वेदनां नाम संस्कृतमिति
समनुपश्यति । न वेदनां नामाऽसंस्कृतमिति समनुपश्यति । न
वेदनां नाम संक्लेशमिति समनुपश्यति । न वेदनां नाम व्यावदान-
मिति समनुपश्यति । न वेदनां नामोत्पाद इति समनुपश्यति ।

---

* [illegible]

न वेदनां नाम निरोध इति समनुपश्यति। न वेदनां नाम विविक्तेति समनुपश्यति। न वेदनां नामाऽविविक्तेति समनुपश्यति। न वेदनां नाम कुशलेति समनुपश्यति। न वेदनां नामाऽकुशलेति समनुपश्यति। न वेदनां नाम सावद्येति समनुपश्यति। न वेदनां नामाऽनवद्येति समनुपश्यति। न वेदनां नामसास्रवेति समनुपश्यति। न वेदनां नामाऽनास्रवेति समनुपश्यति। न वेदनां नाम संक्लेशेति समनुपश्यति। न वेदनां नाम निःक्लेशेति समनुपश्यति। न वेदनां नाम लौकिकेति समनुपश्यति। न वेदनां नाम लोकोत्तरेति समनुपश्यति। न वेदनां नाम संसार इति समनुपश्यति। न वेदनां नाम निर्व्वाण* इति समनुपश्यति।

न संज्ञां नामनित्येति समनुपश्यति। न संज्ञां नामाऽनित्येति समनुपश्यति। न संज्ञां नाम सुखमिति समनुपश्यति। न संज्ञां नाम दुःखमिति समनुपश्यति। न संज्ञां नामात्मेति समनुपश्यति। न संज्ञां नामाऽनात्मेति समनुपश्यति। न संज्ञां नाम शान्तमिति समनुपश्यति। न संज्ञां नामाऽशान्तमिति समनुपश्यति। न संज्ञां नाम शून्येति समनुपश्यति। न संज्ञां नामाऽशून्येति समनुपश्यति। न संज्ञां नाम निमित्तमिति समनुपश्यति। न संज्ञां नामाऽनिमित्तमिति समनुपश्यति। न संज्ञां नाम प्रणिहितमिति समनुपश्यति। न संज्ञां नामाऽप्रणिहितमिति समनुपश्यति। न संज्ञां नामसंस्कृतमिति समनुपश्यति। न संज्ञां नामाऽसंस्कृतमिति समनुपश्यति। न संज्ञां नामोत्पाद इति समनुपश्यति। न संज्ञां नाम निरोध

* निर्व्वाणमिति युक्तं प्रतिभाति।

इति समनुपश्यति। न संज्ञां नाम संक्लेश इति समनुपश्यति। न संज्ञां नाम व्यवदानमिति समनुपश्यति। न संज्ञां नाम विविक्तमिति समनुपश्यति। न संज्ञां नामाऽविविक्तमिति समनुपश्यति। न संज्ञां नाम कुशलेति समनुपश्यति। न संज्ञां नामाऽकुशलेति समनुपश्यति। न संज्ञां नाम सावद्येति समनुपश्यति। न संज्ञां नामाऽनवद्येति समनुपश्यति। न संज्ञां नाम सास्रवेति समनुपश्यति। न संज्ञां नामाऽनास्रवेति समनुपश्यति। न संज्ञां नाम संक्लेशइति समनुपश्यति। न संज्ञां नाम निःक्लेशेति समनुपश्यति। न संज्ञां नाम लौकिकमिति समनुपश्यति। न संज्ञां नाम लोकोत्तरेति समनुपश्यति। न संज्ञां नाम संसारइति समनुपश्यति। न संज्ञां नाम निर्व्वाणमिति समनुपश्यति।

न संस्कारानाम नित्याइति समनुपश्यति। न संस्कारानामाऽनित्याइति समनुपश्यति। न संस्कारानाम सुखाइति समनुपश्यति। न संस्कारानाम दुःखाइति समनुपश्यति। न संस्कारानामाऽऽत्मान इति समनुपश्यति। नसंस्कारा नामाऽनात्मान इति समनुपश्यति। न संस्कारानाम शान्ताइति समनुपश्यति। न संस्कारानामाऽशान्ताइति समनुपश्यति। न संस्कारानाम शून्याइति समनुश्यति। न संस्कारानामाऽशून्या इति समनुपश्यति। न संस्कारानाम निमित्ताइति समनुपश्यति। न संस्कारानामाऽनिमित्ताइति समनुपश्यति। न संस्कारानाम प्रणिहिताइति समनुपश्यति। न संस्कारानामाऽप्रणिहिताइति समनुपश्यति। न संस्कारा नाम संस्कृता इति समनुपश्यति। न संस्कारानामाऽसंस्कृताइति समनु-

श्यति। न संस्कारानामोत्पादादिति समनुपश्यति। न संस्कारानाम निरोधादिति समनुपश्यति। न संस्कारानाम संक्लेशादिति समनुपश्यति। न संस्कारानाम व्यवदानादिति समनुपश्यति। न संस्कारानाम विविक्ता इति समनुपश्यति। न संस्कारानामाऽविविक्तादिति समनुपश्यति। न संस्कारानाम कुशलादिति समनुपश्यति। न संस्कारानामाऽकुशला इति समनुपश्यति। न संस्कारानाम सावद्यादिति समनुपश्यति। न संस्कारानाम निरवद्यादिति समनुपश्यति। न संस्कारानाम साश्रवादिति समनुपश्यति। न संस्कारा नामाऽनाश्रवा इति समनुपश्यति। न संस्कारानाम संक्लेशा इति समनुपश्यति। न संस्कारानाम निःक्लेशादिति समनुपश्यति। न संस्कारानाम लौकिकादिति समनुपश्यति। न संस्कारानाम लोकोत्तरा इति समनुपश्यति। न संस्कारानाम संसारइति समनुपश्यति। न संस्कारानाम निर्व्वाणमिति समनुपश्यति।

न विज्ञानं नाम नित्यमिति समनुपश्यति। न विज्ञानं नामाऽनित्यमिति समनुपश्यति। न विज्ञानं नाम सुखमिति समनुपश्यति। न विज्ञानं नाम दुःखमिति समनुपश्यति। न विज्ञानं नामाऽऽत्मेति समनुपश्यति। न विज्ञानं नामाऽनात्मेति समनुपश्यति। न विज्ञानं नाम शान्तमिति समनुपश्यति। न विज्ञानं नामाऽशान्तमिति समनुपश्यति। न विज्ञानं नाम शून्यमिति समनुपश्यति। न विज्ञानं नामाऽशून्यमिति समनुपश्यति। न विज्ञानं नाम निमित्तमिति समनुपश्यति। न विज्ञानं नामाऽनिमित्तमिति समनुपश्यति। न विज्ञानं नाम प्रणिहितमिति समनुपश्यति। न

विज्ञानं नामाऽप्रणिहितमिति समनुपश्यति। न विज्ञानं नाम संस्कृतमिति समनुपश्यति। न विज्ञानं नामाऽसंस्कृतमिति समनुपश्यति। न विज्ञानं नामोत्पादइति समनुपश्यति। न विज्ञानं नाम निरोधइति समनुपश्यति। न विज्ञानं नाम संक्लेशइति समनुपश्यति। न विज्ञानं नाम व्यवदानमिति समनुपश्यति। न विज्ञानं नाम विविक्तमिति समनुपश्यति। न विज्ञानं नामाऽविविक्तमिति समनुपश्यति। न विज्ञानं नाम कुशलमिति समनुपश्यति। न विज्ञानं नामाऽकुशलमिति समनुपश्यति। न विज्ञानं नाम साऽवद्यमिति समनुपश्यति। न विज्ञानं नाम निरवद्यमिति समनुपश्यति। न विज्ञानं नाम साऽऽस्रवमिति समनुपश्यति। न विज्ञानं नामाऽनास्रवमिति समनुपश्यति। न विज्ञानं नाम संक्लेशइति समनुपश्यति। न विज्ञानं नाम निःक्लेशइति समनुपश्यति। न विज्ञानं नाम लौकिकमिति समनुपश्यति। न विज्ञानं नाम लोकोत्तरमिति समनुपश्यति। न विज्ञानं नाम संसारइति समनुपश्यति। न विज्ञानं नाम निर्वाणमिति समनुपश्यति।

न चक्षुर्नाम नित्यमिति समनुपश्यति। न चक्षुर्नामाऽनित्यमिति समनुपश्यति। न चक्षुर्नाम सुखमिति समनुपश्यति। न चक्षुर्नाम दुःखमिति समनुपश्यति। न चक्षुर्नामाऽऽत्मेति समनुपश्यति। न चक्षुर्नामाऽनात्मेति समनुपश्यति। न चक्षुर्नाम शान्तमिति समनुपश्यति। न चक्षुर्नामाऽशान्तमिति समनुपश्यति। न चक्षुर्नाम शून्यमिति समनुपश्यति। न चक्षुर्नामाऽशून्यमिति समनुपश्यति।

न चक्षुर्नाम निमित्तमिति समनुपश्यति । न चक्षुर्नामाऽनिमित्तमिति समनुपश्यति । न चक्षुर्नाम प्रणिहितमिति समनुपश्यति । न चक्षुर्नामाऽप्रणिहितमिति समनुपश्यति । न चक्षुर्नाम संस्कृतमिति समनुपश्यति । न चक्षुर्नामाऽसंस्कृतमिति समनुपश्यति । न चक्षुर्नामोत्पाद इति समनुपश्यति । न चक्षुर्नाम निरोध इति समनुपश्यति । न चक्षुर्नाम संक्लेशमिति समनुपश्यति । न चक्षुर्नाम व्यवदानमिति समनुपश्यति । न चक्षुर्नाम विविक्तमिति समनुपश्यति । न चक्षुर्नामाऽविविक्तमिति समनुपश्यति । न चक्षुर्नाम कुशलमिति समनुपश्यति । न चक्षुर्नामाऽकुशलमिति समनुपश्यति । न चक्षुर्नाम साऽवद्यमिति समनुपश्यति । न चक्षुर्नाम निरवद्यमिति समनुपश्यति । न चक्षुर्नाम साऽऽस्रवमिति समनुपश्यति । न चक्षुर्नामाऽनास्रवमिति समनुपश्यति । न चक्षुर्नाम संक्लेशमिति समनुपश्यति । न चक्षुर्नाम निक्लेशमिति समनुपश्यति । न चक्षुर्नाम लौकिकमिति समनुपश्यति । न चक्षुर्नाम लोकोत्तरमिति समनुपश्यति । न चक्षुर्नाम संसारइति समनुपश्यति । न चक्षुर्नाम निर्व्वाणमिति समनुपश्यति ।

न रूपं नाम नित्यमिति समनुपश्यति । न रूपं नामाऽनित्यमिति समनुपश्यति । न रूपं नाम सुखमिति समनुपश्यति । न रूपं नाम दुःखमिति समनुपश्यति । न रूपं नामाऽऽत्मेति समनुपश्यति । न रूपं नामाऽनात्मेति समनुपश्यति । न रूपं नाम शान्तमिति समनुपश्यति । न रूपं नामाऽशान्तमिति समनुपश्यति । न रूपं नाम शून्यमिति समनुपश्यति । न रूपं नामाऽशून्यमिति समनुपश्यति । न रूपं नाम निमित्तमिति समनुपश्यति । न रूपं

चक्षुः संस्पर्शोनामाऽऽत्मेति समनुपश्यति। न चक्षुःसंस्पर्शोनामाऽना-त्मेति समनुपश्यति। न चक्षुःसंस्पर्शोनाम शान्तमिति समनुपश्यति। न चक्षुः संस्पर्शोनामाऽशान्तमिति समनुपश्यति। न चक्षुः संस्पर्शो-नाम शून्यमिति समनुपश्यति। न चक्षुःसंस्पर्शो नामाऽशून्यमिति समनुपश्यति। न चक्षुः संस्पर्शोनाम निमित्तइति समनुपश्यति। न चक्षुः संस्पर्शोनामाऽनिमित्तइति समनुपश्यति। न चक्षुः संस्पर्शो-नाम प्रणिहितमिति समनुपश्यति। न चक्षुः संस्पर्शोनामाऽप्रणि-हितमिति समनुपश्यति। न चक्षुः संस्पर्शोनाम संस्कृतमिति समनु-पश्यति। न चक्षुःसंस्पर्शोनामाऽसंस्कृतमिति समनुपश्यति। न चक्षुः-संस्पर्शोनाम संक्लेशइति समनुपश्यति। न चक्षुःसंस्पर्शोनाम व्यवदान-मिति समनुपश्यति। न चक्षुः संस्पर्शोनामोत्पाद इति समनुपश्यति। न चक्षुः संस्पर्शोनाम निरोध इति समनुपश्यति। न चक्षुः संस्पर्शो-नाम विविक्तइति समनुपश्यति। न चक्षुः संस्पर्शोनामाऽविविक्तमिति समनुपश्यति। न चक्षुः संस्पर्शोनाम कुशलइति समनुपश्यति। न चक्षुः संस्पर्शोनामाऽकुशल इति समनुपश्यति। न चक्षुःसंस्पर्शोनाम साऽवद्यमिति समनुपश्यति। न चक्षुः संस्पर्शोनामाऽनवद्य इति समनुपश्यति। न चक्षुः संस्पर्शोनाम साऽऽस्रवइति समनुपश्यति। न चक्षुः संस्पर्शोनामाऽनास्रव इति समनुपश्यति। न चक्षुः संस्पर्शोनाम संक्लेशइति समनुपश्यति। न चक्षुः संस्पर्शोनाम निःक्लेशइति समनु-पश्यति। न चक्षुःसंस्पर्शोनाम लौकिकइति समनुपश्यति। न चक्षुः-संस्पर्शोनाम लोकोत्तरइति समनुपश्यति। न चक्षुःसंस्पर्शोनाम संसार-इति समनुपश्यति। न चक्षुःसंस्पर्शोनाम निर्व्वाणमिति समनुपश्यति।

यदपि तच्चक्षूरूपचक्षुःसंस्पर्शप्रत्ययादुत्पद्यते वेदयितं सुखं दुःखं वा तदपि नाम न नित्यमिति समनुपश्यति। नाऽनित्यमिति समनुपश्यति। न सुखमिति समनुपश्यति। न दुःखमिति समनुपश्यति। नाऽऽत्मेति समनुपश्यति। नाऽनात्मेति समनुपश्यति। न शान्तमिति समनुपश्यति। नाऽशान्तमिति समनुपश्यति। न शून्यमिति समनुपश्यति। नाऽशून्यमिति समनुपश्यति। न निमित्तमिति समनुपश्यति। नाऽनिमित्तमिति समनुपश्यति। न प्रणिहितमिति समनुपश्यति। नाऽप्रणिहितमिति समनुपश्यति। न संस्कृतमिति समनुपश्यति। नाऽसंस्कृतमिति समनुपश्यति। न संक्लेशमिति समनुपश्यति। न व्यवदानमिति समनुपश्यति। नोत्पादइति समनुपश्यति। न निरोधइति समनुपश्यति। न विविक्तमिति समनुपश्यति। नाऽविविक्तमिति समनुपश्यति। न कुशलमिति समनुपश्यति। नाऽकुशलमिति समनुपश्यति। न साऽवद्यमिति समनुपश्यति। नाऽनवद्यमिति समनुपश्यति। न साऽऽस्रवमिति समनुपश्यति। नाऽनास्रवमिति समनुपश्यति। न संक्लेशइति समनुपश्यति। न निःक्लेशइति समनुपश्यति। न लौकिकमिति समनुपश्यति। न लोकोत्तरमिति समनुपश्यति। न संसारइति समनुपश्यति। न निर्व्वाणमिति समनुपश्यति।

न श्रोत्रं नाम नित्यमिति समनुपश्यति। न श्रोत्रं नामाऽनित्यमिति समनुपश्यति। न श्रोत्रं नाम सुखमिति समनुपश्यति। न श्रोत्रं नाम दुःखमिति समनुपश्यति। न श्रोत्रं नामाऽऽत्मेति समनुपश्यति। न श्रोत्रं नामाऽनात्मेति समनुपश्यति। न श्रोत्रं नाम

शान्तमिति समनुपश्यति। न श्रोत्रं नामाऽशान्तमिति समनुपश्यति। न श्रोत्रं नाम शून्यमिति समनुपश्यति। न श्रोत्रं नामाऽशून्यमिति समनुपश्यति। न श्रोत्रं नाम निमित्तमिति समनुपश्यति। न श्रोत्रं नामाऽनिमित्तमिति समनुपश्यति। न श्रोत्रं नाम प्रणिहितमिति समनुपश्यति। न श्रोत्रं नामाऽप्रणिहितमिति समनुपश्यति। न श्रोत्रं नाम संस्कृतमिति समनुपश्यति। न श्रोत्रं नामाऽसंस्कृतमिति समनुपश्यति। न श्रोत्रं नाम संक्लेशमिति समनुपश्यति। न श्रोत्रं नाम व्यवदानमिति समनुपश्यति। न श्रोत्रं नामोत्पादइति समनुपश्यति। न श्रोत्रं नाम निरोधइति समनुपश्यति। न श्रोत्रं नाम विविक्तमिति समनुपश्यति। न श्रोत्रं नामाऽविविक्तमिति समनुपश्यति। न श्रोत्रं नाम कुशलमिति समनुपश्यति। न श्रोत्रं नामाऽकुशलमिति समनुपश्यति। न श्रोत्रं नाम साऽवद्यमिति समनुपश्यति। न श्रोत्रं नामाऽनवद्यमिति समनुपश्यति। न श्रोत्रं नाम साऽऽश्रवमिति समनुपश्यति। न श्रोत्रं नामाऽनाश्रवमिति समनुपश्यति। न श्रोत्रं नाम संक्लेशइति समनुपश्यति। न श्रोत्रं नाम निःक्लेशइति समनुपश्यति। न श्रोत्रं नाम लौकिकमिति समनुपश्यति। न श्रोत्रं नाम लोकोत्तरमिति समनुपश्यति। न श्रोत्रं नाम संसारइति समनुपश्यति। न श्रोत्रं नाम निर्व्वाणमिति समनुपश्यति।

न शब्दोनाम नित्यइति समनुपश्यति। न शब्दोनामाऽनित्यइति समनुपश्यति। न शब्दोनाम सुखमिति समनुपश्यति। न शब्दोनाम दुःखमिति समनुपश्यति। न शब्दोनामाऽऽत्मेति समनुपश्यति। न शब्दोनामाऽनात्मेति समनुपश्यति। न शब्दोनाम

शान्तमिति समनुपश्यति। न शब्दोनामाऽशान्तमिति समनुपश्यति। न शब्दोनाम शून्यमिति समनुपश्यति। न शब्दोनामाऽशून्यमिति समनुपश्यति। न शब्दोनाम निमित्तमिति समनुपश्यति। न शब्दोनामाऽनिमित्तमिति समनुपश्यति। न शब्दोनाम प्रणिहित-मिति समनुपश्यति। न शब्दोनामाऽप्रणिहितमिति समनुपश्यति। न शब्दोनाम संस्कृतमिति समनुपश्यति। न शब्दोनामाऽसंस्कृत-मिति समनुपश्यति। न शब्दोनाम संक्लेशइति समनुपश्यति। न शब्दोनाम व्यवदानमिति समनुपश्यति। न शब्दोनामोत्पादइति समनुपश्यति। न शब्दोनाम निरोधइति समनुपश्यति। न शब्दो-नाम विविक्तइति समनुपश्यति। न शब्दोनामाऽविविक्तइति समनु-पश्यति। न शब्दोनाम कुशलइति समनुपश्यति। न शब्दोनामा-ऽकुशलइति समनुपश्यति। न शब्दोनाम साऽवद्यमिति समनुपश्यति। न शब्दोनामाऽनवद्यमिति समनुपश्यति। न शब्दोनाम साऽऽस्रव-मिति समनुपश्यति। न शब्दोनामाऽनास्रवमिति समनुपश्यति। न शब्दोनाम संक्लेशइति समनुपश्यति। न शब्दोनाम निःक्लेशइति समनुपश्यति। न शब्दोनाम लौकिकमिति समनुपश्यति। न शब्दोनाम लोकोत्तरमिति समनुपश्यति। न शब्दोनाम संसारइति समनुपश्यति। न शब्दोनाम निर्व्वाणमिति समनुपश्यति।

न श्रोत्रविज्ञानं नाम नित्यमिति समनुपश्यति। न श्रोत्रविज्ञानं नामाऽनित्यमिति समनुपश्यति। न श्रोत्रविज्ञानं नाम सुखमिति समनुपश्यति। न श्रोत्रविज्ञानं नाम दुःखमिति समनुपश्यति। न श्रोत्रविज्ञानं नामाऽऽत्मेति समनुपश्यति। न श्रोत्रविज्ञानं नामा-

ऽनात्मेति समनुपश्यति। न श्रोत्रविज्ञानं नाम शान्तमिति समनुपश्यति। न श्रोत्रविज्ञानं नामाऽशान्तमिति समनुपश्यति। न श्रोत्रविज्ञानं नाम शून्यमिति समनुपश्यति। न श्रोत्रविज्ञानं नामाऽशून्यमिति समनुपश्यति। न श्रोत्रविज्ञानं नाम निमित्तमिति समनुपश्यति। न श्रोत्रविज्ञानं नामाऽनिमित्तमिति समनुपश्यति। न श्रोत्रविज्ञानं नाम प्रणिहितमिति समनुपश्यति। न श्रोत्रविज्ञानं नामाऽप्रणिहितमिति समनुपश्यति। न श्रोत्रविज्ञानं नाम संस्कृतमिति समनुपश्यति। न श्रोत्रविज्ञानं नामाऽसंस्कृतमिति समनुपश्यति। न श्रोत्रविज्ञानं नाम संक्लेशमिति समनुपश्यति। न श्रोत्रविज्ञानं नाम व्यवदानमिति समनुपश्यति। न श्रोत्रविज्ञानं नामोत्पादइति समनुपश्यति। न श्रोत्रविज्ञानं नाम निरोधइति समनुपश्यति। न श्रोत्रविज्ञानं नाम विविक्तमिति समनुपश्यति। न श्रोत्रविज्ञानं नामाऽविविक्तमिति समनुपश्यति। न श्रोत्रविज्ञानं नाम कुशलमिति समनुपश्यति। न श्रोत्रविज्ञानं नामाऽकुशलमिति समनुपश्यति। न श्रोत्रविज्ञानं नाम सा:वद्यमिति समनुपश्यति। न श्रोत्रविज्ञानं नामाऽनवद्यमिति समनुपश्यति। न श्रोत्रविज्ञानं नाम साऽऽस्रवइति समनुपश्यति। न श्रोत्रविज्ञानं नामाऽनास्रवइति समनुपश्यति। न श्रोत्रविज्ञानं नाम संक्लेशइति समनुपश्यति। न श्रोत्रविज्ञानं नाम निःक्लेशइति समनुपश्यति। न श्रोत्रविज्ञानं नाम लौकिकमिति समनुपश्यति। न श्रोत्रविज्ञानं नाम लोकोत्तरमिति समनुपश्यति। न श्रोत्रविज्ञानं नाम संसारइति समनुपश्यति। न श्रोत्रविज्ञानं नाम निर्वाणमिति समनुपश्यति।

न श्रोत्रसंस्पर्शो नाम नित्यइति समनुपश्यति। न श्रोत्रसंस्पर्शोनामाऽनित्यइति समनुपश्यति। न श्रोत्रसंस्पर्शोनाम सुखइति समनुपश्यति। न श्रोत्रसंस्पर्शोनाम दुःखइति समनुपश्यति। न श्रोत्रसंस्पर्शोनामाऽऽत्मेति समनुपश्यति। न श्रोत्रसंस्पर्शोनामाऽनात्मेति समनुपश्यति। न श्रोत्रसंस्पर्शोनाम शून्यइति समनुपश्यति। न श्रोत्रसंस्पर्शोनामाऽशून्यइति समनुपश्यति। न श्रोत्रसंस्पर्शोनाम निमित्तमिति समनुपश्यति। न श्रोत्रसंस्पर्शोनामाऽनिमित्तमिति समनुपश्यति। न श्रोत्रसंस्पर्शोनाम प्रणिहितइति समनुपश्यति। न श्रोत्रसंस्पर्शोनामाऽप्रणिहितइति समनुपश्यति। न श्रोत्रसंस्पर्शोनाम संस्कृतइति समनुपश्यति। न श्रोत्रसंस्पर्शोनामाऽसंस्कृतइति समनुपश्यति। न श्रोत्रसंस्पर्शो नाम संक्लेशइति समनुपश्यति। न श्रोत्रसंस्पर्शो नामव्यवदानमिति समनुपश्यति। न श्रोत्रसंस्पर्शोनामोत्पादइति समनुपश्यति। न श्रोत्रसंस्पर्शोनाम निरोधइति समनुपश्यति। न श्रोत्रसंस्पर्शोनामविविक्तइति समनुपश्यति। न श्रोत्रसंस्पर्शोनामाऽविविक्तइति समनुपश्यति। न श्रोत्रसंस्पर्शोनाम कुशलइति समनुपश्यति। न श्रोत्रसंस्पर्शोनामाऽकुशलइति समनुपश्यति। न श्रोत्रसंस्पर्शोनाम साऽवद्यइति समनुपश्यति। न श्रोत्रसंस्पर्शोनामाऽनवद्यइति समनुपश्यति। न श्रोत्रसंस्पर्शोनाम साऽऽस्रवइति समनुपश्यति। न श्रोत्रसंस्पर्शोनामाऽनास्रवइति समनुपश्यति। न श्रोत्रसंस्पर्शोनाम संक्लेशइति समनुपश्यति। न श्रोत्रसंस्पर्शोनाम निःक्लेशइति समनुपश्यति। न श्रोत्रसंस्पर्शोनाम लौकिकइति समनुपश्यति। न श्रोत्रसंस्पर्शोनाम लोकोत्तरइति

समनुपश्यति । न श्रोत्रसंस्पर्शोनाम संसारइति समनुपश्यति । न श्रोत्रसंस्पर्शोनाम निर्व्वाणमिति समनुपश्यति ।

यदपि तच्छ्रोत्रशब्दश्रोत्रविज्ञानश्रोत्रसंस्पर्शप्रत्ययदुत्पद्यते वेदितं सुखं दुःखं वा अदुःखाऽसुखं वा तदपि नाम न नित्यमिति समनुपश्यति । नाऽनित्यमिति समनुपश्यति । न सुखमिति समनुपश्यति । न दुःखमिति समनुपश्यति । नाऽऽत्मेति समनुपश्यति । नाऽनात्मेति समनुपश्यति । न शान्तमिति समनुपश्यति । नाऽशान्तमिति समनुपश्यति । न शून्यमिति समनुपश्यति । नाऽशून्यमिति समनुपश्यति । न निमित्तमिति समनुपश्यति । नाऽनिमित्तमिति समनुपश्यति । न प्रणिहितमिति समनुपश्यति । नाऽप्रणिहितमिति समनुपश्यति । न संस्कृतमिति समनुपश्यति । नाऽसंस्कृतमिति समनुपश्यति । न संक्लेशमिति समनुपश्यति । न व्यवदानमिति समनुपश्यति । नोत्पादइति समनुपश्यति । न निरोधइति समनुपश्यति । न विविक्तमिति समनुपश्यति । नाऽविविक्तमिति समनुपश्यति । न कुशलमिति समनुपश्यति । नाऽकुशलमिति समनुपश्यति । नसाऽवद्यमिति समनुपश्यति । नाऽनवद्यमिति समनुपश्यति । न साऽऽस्रावमिति समनुपश्यति । नाऽनास्रवमिति समनुपश्यति । न संक्लेशइति समनुपश्यति । न निःक्लेशइति समनुपश्यति । न लौकिकमिति समनुपश्यति । न लोकोत्तरमिति समनुपश्यति । न संसारइति समनुपश्यति । न निर्व्वाणमिति समनुपश्यति ।

न घ्राणं नाम नित्यमिति समनुपश्यति । न घ्राणं नामाऽनित्यमिति समनुपश्यति । न घ्राणं नाम सुखमिति समनुपश्यति ।

न घ्राणं नाम दुःखमिति समनुपश्यति । न घ्राणं नामाऽऽत्मेति समनुपश्यति । न घ्राणं नामाऽनात्मेति समनुपश्यति । न घ्राणं नाम शान्तमिति समनुपश्यति । न घ्राणं नामाऽशान्तमिति समनुपश्यति । न घ्राणं नाम निमित्तमिति समनुपश्यति । न घ्राणं नामाऽनिमित्तमिति समनुपश्यति । न घ्राणं नाम प्रणिहितमिति समनुपश्यति । न घ्राणं नामाऽप्रणिहितमिति समनुपश्यति । न घ्राणं नाम संस्कृतमिति समनुपश्यति । न घ्राणं नामाऽसंस्कृतमिति समनुपश्यति । न घ्राणं नाम संक्लेशइति समनुपश्यति । न घ्राणं नाम व्यवदानमिति समनुपश्यति । न घ्राणं नामोत्पादइति समनुपश्यति । न घ्राणं नाम निरोधइति समनुपश्यति । न घ्राणं नाम विविक्तमिति समनुपश्यति । न घ्राणं नामाऽविविक्तमिति समनुपश्यति । न घ्राणं नाम कुशलमिति समनुपश्यति । न घ्राणं नामाऽकुशलमिति समनुपश्यति । न घ्राणं नाम साऽवद्यमिति समनुपश्यति । न घ्राणं नामाऽनवद्यमिति समनुपश्यति । न घ्राणं नाम साऽऽस्रवमिति समनुपश्यति । न घ्राणं नामाऽनास्रवमिति समनुपश्यति । न घ्राणं नाम संक्लेशइति समनुपश्यति । न घ्राणं नाम निःक्लेशइति समनुपश्यति । न घ्राणं नाम लौकिकमिति समनुपश्यति । न घ्राणं नाम लोकोत्तरमिति समनुपश्यति । न घ्राणं नाम संसारइति समनुपश्यति । न घ्राणं नाम निर्व्वाणमिति समनुपश्यति ।

न गन्धोनाम नित्यइति समनुपश्यति । न गन्धो नामाऽनित्यमिति समनुपश्यति । न गन्धोनाम सुखमिति समनुपश्यति ।

न गन्धोनाम दुःखमिति समनुपश्यति। न गन्धोनामाऽऽत्मेति समनुपश्यति। न गन्धोनामाऽनात्मेति समनुपश्यति। न गन्धोनाम शान्तइति समनुपश्यति। न गन्धोनामाऽशान्तइति समनुपश्यति। न गन्धोनाम शून्यइति समनुपश्यति। न गन्धोनामाऽशून्यइति समनुपश्यति। न गन्धोनाम निमित्तइति समनुपश्यति। न गन्धोनामाऽनिमित्तइति समनुपश्यति। न गन्धोनाम प्रणिहितमिति समनुपश्यति। न गन्धोनामाऽप्रणिहितमिति समनुपश्यति। न गन्धोनाम संस्कृतमिति समनुपश्यति। न गन्धोनामाऽसंस्कृतमिति समनुपश्यति। न गन्धोनाम संक्लेशइति समनुपश्यति। न गन्धोनाम व्यवदानमिति समनुपश्यति। न गन्धोनामोत्पादइति समनुपश्यति। न गन्धोनाम निरोधइति समनुपश्यति। न गन्धोनाम विविक्तइति समनुपश्यति। न गन्धोनामाऽविविक्तइति समनुपश्यति। न गन्धोनाम कुशलमिति समनुपश्यति। न गन्धोनामाऽकुशलमिति समनुपश्यति। न गन्धोनाम साऽवद्यमिति समनुपश्यति। न गन्धोनामाऽनवद्यमिति समनुपश्यति। न गन्धोनाम साऽऽस्रवइति समनुपश्यति। न गन्धोनामाऽनास्रवइति समनुपश्यति। न गन्धोनाम संक्लेशइति समनुपश्यति। न गन्धोनाम निःक्लेशइति समनुपश्यति। न गन्धोनाम लौकिकइति समनुपश्यति। न गन्धोनाम लोकोत्तरइति समनुपश्यति। न गन्धोनाम संसारइति समनुपश्यति। न गन्धोनाम निर्वाणमिति समनुपश्यति।

न घ्राणविज्ञानं नित्यमिति समनुपश्यति। न घ्राणविज्ञानम-

नित्यमिति समनुपश्यति। न घ्राणविज्ञानं नाम सुखमिति समनुपश्यति। न घ्राणविज्ञानं नाम दुःखमिति समनुपश्यति। न घ्राणविज्ञाननामाऽऽत्मेति समनुपश्यति। न घ्राणविज्ञानं नामाऽनात्मेति समनुपश्यति। न घ्राणविज्ञानं नाम शान्तमिति समनुपश्यति। न घ्राणविज्ञानं नामाऽशान्तमिति समनुपश्यति। न घ्राणविज्ञानं नाम शून्यमिति समनुपश्यति। न घ्राणविज्ञानं नामाऽशून्यमिति समनुपश्यति। न घ्राणविज्ञानं नाम निमित्तमिति समनुपश्यति। न घ्राणविज्ञानं नामाऽनिमित्तमिति समनुपश्यति। न घ्राणविज्ञानं नाम प्रणिहितमिति समनुपश्यति। न घ्राणविज्ञानं नामाऽप्रणिहितमिति समनुपश्यति। न घ्राणविज्ञानं नाम संस्कृतमिति समनुपश्यति। न घ्राणविज्ञानं नामाऽसंस्कृतमिति समनुपश्यति। न घ्राणविज्ञानं नाम संक्लेशमिति समनुपश्यति। न घ्राणविज्ञानं नाम व्यवदानमिति समनुपश्यति। न घ्राणविज्ञानं नामोत्पादइति समनुपश्यति। न घ्राणविज्ञानं नाम निरोधइति समनुपश्यति। न घ्राणविज्ञानं नाम विविक्तमिति समनुपश्यति। न घ्राणविज्ञानं नामाऽविविक्तमिति समनुपश्यति। न घ्राणविज्ञानं नाम कुशलमिति समनुपश्यति। न घ्राणविज्ञानं नामाऽकुशलमिति समनुपश्यति। न घ्राणविज्ञानं नाम साऽवद्यमिति समनुपश्यति। न घ्राणविज्ञानं नामाऽनवद्यमिति समनुपश्यति। न घ्राणविज्ञानं नाम साऽऽस्रवमिति समनुपश्यति। न घ्राणविज्ञान नामाऽनास्रवमिति समनुपश्यति। न घ्राणविज्ञानं नाम संक्लेशइति समनुपश्यति। न घ्राणविज्ञानं नाम निःक्लेशइति समनुपश्यति। न घ्राणविज्ञानं नाम

लौकिकमिति समनुपश्यति। न घ्राणविज्ञानं नाम लोकोत्तरमिति समनुपश्यति। न घ्राणविज्ञानं नाम संसारइति समनुपश्यति। न घ्राणविज्ञानं नाम निर्व्वाणमिति समनुपश्यति।

न घ्राणसंस्पर्शो नाम नित्यइति समनुपश्यति। न घ्राणसंस्पर्शो नामाऽनित्यइति समनुपश्यति। न घ्राणसंस्पर्शोनाम सुखमिति समनुपश्यति। न घ्राणसंस्पर्शोनाम दुःखमिति समनुपश्यति। न घ्राणसंस्पर्शोनामाऽऽत्मेति समनुपश्यति। न घ्राणसंस्पर्शोनामाऽनात्मेति समनुपश्यति। न घ्राणसंस्पर्शोनाम शान्तइति समनुपश्यति। न घ्राणसंस्पर्शोनामाऽशान्तइति समनुपश्यति। न घ्राणसंस्पर्शोनाम शून्यइति समनुपश्यति। न घ्राणसंस्पर्शोनामाऽशून्यइति समनुपश्यति। न घ्राणसंस्पर्शोनाम निमित्तइति समनुपश्यति। न घ्राणसंस्पर्शोनामाऽनिमित्तइति समनुपश्यति। न घ्राणसंस्पर्शोनाम प्रणिहितइति समनुपश्यति। न घ्राणसंस्पर्शोनामाऽप्रणिहितइति समनुपश्यति। न घ्राणसंस्पर्शोनाम संस्कृतइति समनुपश्यति। न घ्राणसंस्पर्शोनामाऽसंस्कृतइति समनुपश्यति। न घ्राणसंस्पर्शोनाम संक्लेशइति समनुपश्यति। न घ्राणसंस्पर्शोनाम व्यवदानमिति समनुपश्यति। न घ्राणसंस्पर्शोनामोत्पादइति समनुपश्यति। न घ्राणसंस्पर्शोनाम निरोधइति समनुपश्यति। न घ्राणसंस्पर्शोनाम विविक्तइति समनुपश्यति। न घ्राणसंस्पर्शोनामाऽविविक्तइति समनुपश्यति। न घ्राणसंस्पर्शोनाम कुशलइति समनुपश्यति। न घ्राणसंस्पर्शोनामाऽकुशलइति समनुपश्यति। न घ्राणसंस्पर्शोनाम सावद्यइति समनुपश्यति। न घ्राणसंस्पर्शोनामाऽनवद्यइति समनुपश्यति। न घ्राण-

संस्पर्शोनाम साश्रवइति समनुपश्यति। न घ्राणसंस्पर्शोनामाऽनाश्रवइति समनुपश्यति। न घ्राणसंस्पर्शोनाम संक्लेशइति समनुपश्यति। न घ्राणसंस्पर्शोनाम निःक्लेशइति समनुपश्यति। न घ्राणसंस्पर्शोनाम लौकिकइति समनुपश्यति। न घ्राणसंस्पर्शोनाम लोकोत्तरइति समनुपश्यति। न घ्राणसंस्पर्शोनाम संसारइति समनुपश्यति। न घ्राणसंस्पर्शोनाम निर्व्वाणमिति समनुपश्यति।

यदपि तद्घ्राण-गन्धघ्राणविज्ञानघ्राणसंस्पर्शप्रत्ययादुत्पद्यते वेदयितं सुखं वा दुःखं वा अदुःखाऽसुखं वा तदपि नाम न नित्यमिति समनुपश्यति। नाऽनित्यमिति समनुपश्यति। न सुखमिति समनुपश्यति। न दुःखमिति समनुपश्यति। नाऽऽत्मेति समनुपश्यति। नाऽनात्मेति समनुपश्यति। न शान्तइति समनुपश्यति। नाऽशान्तइति समनुपश्यति। न शून्यइति समनुपश्यति। नाऽशून्यइति समनुपश्यति। न निमित्तइति समनुपश्यति। नाऽनिमित्तइति समनुपश्यति। न प्रणिहित इति समनुपश्यति। नाऽप्रणिहित इति समनुपश्यति। न संस्कृतइति समनुपश्यति। नाऽसंस्कृतइति समनुपश्यति। न संक्लेशइति समनुश्यति। न व्यवदानमिति समनुपश्यति। नोत्पादइति समनुपश्यति। न निरोधइति समनुपश्यति। न विविक्तइति समनुपश्यति। नाऽविविक्तइति समनुपश्यति। न कुशलइति समनुपश्यति। नाऽकुशलइति समनुपश्यति। न साऽवद्यइति समनुपश्यति। नाऽनवद्यइति समनुपश्यति। न साऽऽश्रवइति समनुपश्यति। नाऽनाश्रवइति समनुपश्यति। न संक्लेशइति समनुपश्यति। न निःक्लेशइति समनुपश्यति।

न लौकिकइति समनुपश्यति। न लोकोत्तरइति समनुपश्यति। न संसारइति समनुपश्यति। न निर्व्वाणमिति समनुपश्यति।

न जिह्वां नाम नित्येति समनुपश्यति। न जिह्वां नामाऽनित्येति समनुपश्यति। न जिह्वां नाम सुखेति समनुपश्यति। न जिह्वां नाम दुःखेति समनुपश्यति। न जिह्वां नामाऽऽत्मेति समनुपश्यति। न जिह्वां नामाऽनात्मेति समनुपश्यति। न जिह्वां नाम शान्तेति समनुपश्यति। न जिह्वां नामाऽशान्तेति समनुपश्यति। न जिह्वां नाम शून्येति समनुपश्यति। न जिह्वां नामाऽशून्येति समनुपश्यति। न जिह्वां नाम निमित्तेति समनुपश्यति। न जिह्वां नामाऽनिमित्तेति समनुपश्यति। न जिह्वां नाम प्रणिहितेति समनुपश्यति। न जिह्वां नामाऽप्रणिहितेति समनुपश्यति। न जिह्वां नाम संस्कृतेति समनुपश्यति। न जिह्वां नामाऽसंस्कृतेति समनुपश्यति। न जिह्वां नाम संक्लेशइति समनुपश्यति। न जिह्वां नाम व्यवदानेति समनुपश्यति। न जिह्वां नामोत्पादइति समनुपश्यति। न जिह्वां नाम निरोधइति समनुपश्यति। न जिह्वां नाम विविक्तेति समनुपश्यति। न जिह्वां नामाऽविविक्तेति समनुपश्यति। न जिह्वां नाम कुशलेति समनुपश्यति। न जिह्वां नामाऽकुशलेति समनुपश्यति। न जिह्वां नाम सावद्येति समनुपश्यति। न जिह्वां नामाऽनवद्येति समनुपश्यति। न जिह्वां नाम साऽऽस्रवेति समनुपश्यति। न जिह्वां नामाऽनास्रवेति समनुपश्यति। न जिह्वां नाम संक्लेशइति समनुपश्यति। न जिह्वां नाम नि[illegible]इति समनुपश्यति। न जिह्वां नाम लौकिकेति समनुपश्यति। न

जिह्वा नाम लोकोत्तरेति समनुपश्यति। न जिह्वा नाम संसार-इति समनुपश्यति। न जिह्वा नाम निर्व्वाणमिति समनुपश्यति।

न रसोनाम नित्यइति समनुपश्यति। न रसोनामाऽनित्य-इति समनुपश्यति। न रसोनाम सुखइति समनुपश्यति। न रसो-नाम दुःखइति समनुपश्यति। न रसोनामाऽऽत्मेति समनुपश्यति। न रसोनामाऽनात्मेति समनुपश्यति। न रसोनाम शान्तइति समनुपश्यति। न रसोनामाऽशान्तइति समनुपश्यति। न रसो-नाम शून्यइति समनुपश्यति। न रसोनामाऽशून्यइति समनुपश्यति। न रसोनाम निमित्तइति समनुपश्यति। न रसोनामाऽनिमित्त-इति समनुपश्यति। न रसोनाम प्रणिहितइति समनुपश्यति। न रसोनामाऽप्रणिहितइति समनुपश्यति। न रसोनाम संस्कृत-इति समनुपश्यति। न रसोनामाऽसंस्कृतइति समनुपश्यति। न रसोनाम संक्लेशइति समनुपश्यति। न रसोनाम व्यवदानइति समनुपश्यति। न रसोनामोत्पादइति समनुपश्यति। न रसो-नाम निरोधइति समनुपश्यति। न रसोनाम विविक्तइति समनुपश्यति। न रसोनामाऽविविक्तइति समनुपश्यति। न रसो-नाम कुशलइति समनुपश्यति। न रसोनामाऽकुशलइति समनु-पश्यति। न रसोनाम साऽवद्यइति समनुपश्यति। न रसोनामा-ऽनवद्यइति समनुपश्यति। न रसोनाम साऽऽस्रवइति समनुपश्यति। न रसोनामाऽनास्रवइति समनुपश्यति। न रसोनाम संक्लेशइति समनुपश्यति। न रसोनाम निःक्लेशइति समनुपश्यति। न रसो-नाम लौकिकइति समनुपश्यति। न रसो नाम लोकोत्तरइति

समनुपश्यति। न रसोनाम संसारइति समनुपश्यति। न रसो-नाम निर्व्वाणमिति समनुपश्यति।

न जिह्वाविज्ञानं नाम नित्यमिति समनुपश्यति। न जिह्वा-विज्ञानं नामाऽनित्यमिति समनुपश्यति। न जिह्वाविज्ञानं नाम सुखमिति समनुपश्यति। न जिह्वाविज्ञानं नाम दुःखमिति समनु-पश्यति। न जिह्वाविज्ञानं नामाऽऽत्मेति समनुपश्यति। न जिह्वा-विज्ञानं नामाऽनात्मेति समनुपश्यति। न जिह्वाविज्ञानं नाम शान्तमिति समनुपश्यति। न जिह्वाविज्ञानं नामाऽशान्तमिति समनुपश्यति। न जिह्वाविज्ञानं नाम शून्यमिति समनुपश्यति। न जिह्वाविज्ञानं नामाऽशून्यमिति समनुपश्यति। न जिह्वाविज्ञानं नाम निमित्तमिति समनुपश्यति। न जिह्वाविज्ञानं नामाऽनि-मित्तमिति समनुपश्यति। न जिह्वाविज्ञानं नाम प्रणिहितमिति समनुपश्यति। न जिह्वाविज्ञानं नामाऽप्रणिहितमिति समनुपश्यति। न जिह्वाविज्ञानं नाम संस्कृतमिति समनुपश्यति। न जिह्वाविज्ञानं नामाऽसंस्कृतमिति समनुपश्यति। न जिह्वाविज्ञानं नाम संक्लेशइति समनुपश्यति। न जिह्वाविज्ञानं नाम व्यवदानमिति समनुपश्यति। न जिह्वाविज्ञानं नामोत्पादइति समनुपश्यति। न जिह्वाविज्ञानं नाम निरोधइति समनुपश्यति। न जिह्वाविज्ञानं नाम विविक्त-मिति समनुपश्यति। न जिह्वाविज्ञानं नामाऽविविक्तमिति समनु-पश्यति। न जिह्वाविज्ञानं नाम कुशलमिति समनुपश्यति। न जिह्वाविज्ञानं नामाऽकुशलमिति समनुपश्यति। न जिह्वाविज्ञानं नाम साऽवद्यमिति समनुपश्यति। न जिह्वाविज्ञानं नामाऽनवद्य-

मिति समनुपश्यति। न जिह्वाविज्ञानं नाम साऽऽस्रवमिति समनुपश्यति। न जिह्वाविज्ञानं नामाऽनास्रवमिति समनुपश्यति। न जिह्वाविज्ञानं नाम सक्लेशइति समनुपश्यति। न जिह्वाविज्ञानं नाम निःक्लेशइति समनुपश्यति। न जिह्वाविज्ञानं नाम लौकिकमिति समनुपश्यति। न जिह्वाविज्ञानं नाम लोकोत्तरइति समनुपश्यति। न जिह्वाविज्ञानं नाम संसारइति समनुपश्यति। न जिह्वाविज्ञानं नाम निर्व्वाणमिति समनुपश्यति।

न जिह्वासंस्पर्शोनाम नित्यइति समनुपश्यति। न जिह्वासंस्पर्शोनामाऽनित्यइति समनुपश्यति। न जिह्वासंस्पर्शोनाम सुखइति समनुपश्यति। न जिह्वासंस्पर्शोनाम दुःखइति समनुपश्यति। न जिह्वासंस्पर्शोनामाऽऽत्मेति समनुपश्यति। न जिह्वासंस्पर्शोनामाऽनात्मेति समनुपश्यति। न जिह्वासंस्पर्शोनाम शान्तइति समनुपश्यति। न जिह्वासंस्पर्शोनामाऽशान्तइति समनुपश्यति। न जिह्वासंस्पर्शोनाम शून्यइति समनुपश्यति। न जिह्वासंस्पर्शोनामाऽशून्यइति समनुपश्यति। न जिह्वासंस्पर्शोनाम निमित्तइति समनुपश्यति। न जिह्वासंस्पर्शोनामाऽनिमित्तइति समनुपश्यति। न जिह्वासंस्पर्शोनाम प्रणिहित इति समनुपश्यति। न जिह्वासंस्पर्शोनामाऽप्रणिहितइति समनुपश्यति। न जिह्वासंस्पर्शोनाम संस्कृतइति समनुपश्यति। न जिह्वासंस्पर्शोनामाऽसंस्कृतइति समनुपश्यति। न जिह्वासंस्पर्शोनाम संक्लेशइति समनुपश्यति। न जिह्वासंस्पर्शोनाम व्यवदानमिति समनुपश्यति। न जिह्वासंस्पर्शोनामोत्पादइति समनुपश्यति। न जिह्वासंस्पर्शोनाम निरोधइति

समनुपश्यति । न जिह्वासंस्पर्शो नाम विविक्त इति समनुपश्यति । न जिह्वासंस्पर्शो नामाऽविविक्त इति समनुपश्यति । न जिह्वासंस्पर्शो नाम कुशल इति समनुपश्यति । न जिह्वासंस्पर्शो नामाऽकुशल इति समनुपश्यति । न जिह्वासंस्पर्शो नाम साऽवद्य इति समनुपश्यति । न जिह्वासंस्पर्शो नामाऽनवद्य इति समनुपश्यति । न जिह्वासंस्पर्शो नाम साऽऽस्रव इति समनुपश्यति । न जिह्वासंस्पर्शो नामाऽनास्रव इति समनुपश्यति । न जिह्वासंस्पर्शो नाम संक्लेश इति समनुपश्यति । न जिह्वासंस्पर्शो नाम निःक्लेश इति समनुपश्यति । न जिह्वासंस्पर्शो नाम लौकिक इति समनुपश्यति । न जिह्वासंस्पर्शो नाम लोकोत्तर इति समनुपश्यति । न जिह्वासंस्पर्शो नाम संसार इति समनुपश्यति । न जिह्वासंस्पर्शो नाम निर्वाणमिति समनुपश्यति ।

यदपि जिह्वासंस्पर्शजिह्वाविज्ञानजिह्वासंस्पर्शादुत्पद्यते वेदि[तं] सुखं वा दुःखं वा अदुःखाऽसुखं वा तदपि नाम न नित्य[मिति] समनुपश्यति । नाऽनित्यमिति समनुपश्यति । न सुखमिति सम[नु]पश्यति । न दुःखमिति समनुपश्यति । नाऽऽत्मेति समनु[पश्यति] । [illegible] समनुपश्यति । न शान्तमिति समनुपश्यति । [illegible] समनुपश्यति । न शून्यमिति समनुपश्यति । [illegible]

[illegible]

समनुपश्यति। न विविक्तमिति समनुपश्यति। नाऽविविक्तमिति समनुपश्यति। न कुशलमिति समनुपश्यति। नाऽकुशलमिति समनुपश्यति। न सावद्यमिति समनुपश्यति। नाऽनवद्यमिति समनुपश्यति। न सास्रवमिति समनुपश्यति। नाऽनास्रवमिति समनुपश्यति। न संक्लेशमिति समनुपश्यति। न निःक्लेशमिति समनुपश्यति। न लौकिकमिति समनुपश्यति। न लोकोत्तरमिति समनुपश्यति। न संसार इति समनुपश्यति। न निर्वाणमिति समनुपश्यति।

न कायं नाम नित्यमिति समनुपश्यति। न कायं नामाऽनित्यमिति समनुपश्यति। न कायं नाम सुखमिति समनुपश्यति। न कायं नाम दुःखमिति समनुपश्यति। न कायं नामाऽऽत्मेति समनुपश्यति। न कायं नामाऽनात्मेति समनुपश्यति। न कायं नाम शान्तमिति समनुपश्यति। न कायं नामाऽशान्तमिति समनुपश्यति। न कायं नाम शून्यमिति समनुपश्यति। न कायं नामाऽशून्यमिति समनुपश्यति। न कायं नाम निमित्तमिति समनुपश्यति। न कायं नामाऽनिमित्तमिति समनुपश्यति। न कायं नाम प्रणिहितमिति समनुपश्यति। न कायं नामाऽप्रणिहितमिति समनुपश्यति। न कायं नाम संस्कृतमिति समनुपश्यति। न कायं नामाऽसंस्कृतमिति समनुपश्यति। न कायं नाम संक्लेशमिति समनुपश्यति। न कायं नाम व्यवदानमिति समनुपश्यति। न कायं नामोत्पादइति समनुपश्यति। न कायं नाम निरोधइति समनुपश्यति। न कायं नाम विविक्तमिति समनुपश्यति। न कायं

नामाऽविविक्तमिति समनुपश्यति। न कायं नाम कुशलमिति समनुपश्यति। न कायं नामाऽकुशलमिति समनुपश्यति। न कायं नाम सावद्यमिति समनुपश्यति। न कायं नामाऽनवद्यमिति समनुपश्यति। न कायं नाम साश्रवमिति समनुपश्यति। न कायं नामाऽनाश्रवमिति समनुपश्यति। न कायं नाम संक्लेशमिति समनुपश्यति। न कायं नाम निःक्लेशमिति समनुपश्यति। न कायं नाम लौकिकमिति समनुपश्यति। न कायं नाम लोकोत्तरमिति समनुपश्यति। न कायं नाम संसार इति समनुपश्यति। न कायं नाम निर्व्वाणमिति समनुपश्यति।

न स्प्रष्टव्यं नाम नित्यमिति समनुपश्यति। न स्प्रष्टव्यं नामाऽनित्यमिति समनुपश्यति। न स्प्रष्टव्यं नाम सुखमिति समनुपश्यति। न स्प्रष्टव्यं नाम दुःखमिति समनुपश्यति। न स्प्रष्टव्यं नामाऽऽत्मेति समनुपश्यति। न स्प्रष्टव्यं नामाऽनात्मेति समनुपश्यति। न स्प्रष्टव्यं नाम शान्तमिति समनुपश्यति। न स्प्रष्टव्यं नामाऽशान्तमिति समनुपश्यति। न स्प्रष्टव्यं नाम शून्यमिति समनुपश्यति। न स्प्रष्टव्यं नामाऽशून्यमिति समनुपश्यति। न स्प्रष्टव्यं नाम निमित्तमिति समनुपश्यति। न स्प्रष्टव्यं नामाऽनिमित्तमिति समनुपश्यति। न स्प्रष्टव्यं नाम प्रणिहितमिति समनुपश्यति। न स्प्रष्टव्यं नामाऽप्रणिहितमिति समनुपश्यति। न स्प्रष्टव्यं नाम संस्कृतमिति समनुपश्यति। न स्प्रष्टव्यं नामाऽसंस्कृतमिति समनुपश्यति। न स्प्रष्टव्यं नाम [illegible] समनुपश्यति। न स्प्रष्टव्यं नाम [illegible] समनुपश्यति। न स्प्रष्टव्यं नाम [illegible] समनुपश्यति। न स्प्रष्टव्यं नाम निरो-

इति समनुपश्यति। न स्प्रष्टव्यं नाम विविक्तमिति समनुपश्यति। न स्प्रष्टव्यं नामाऽविविक्तमिति समनुपश्यति। न स्प्रष्टव्यं नाम कुशलमिति समनुपश्यति। न स्प्रष्टव्यं नामाऽकुशलमिति समनुपश्यति। न स्प्रष्टव्यं नाम साऽवद्यमिति समनुपश्यति। न स्प्रष्टव्यं नामाऽनवद्यमिति समनुपश्यति। न स्प्रष्टव्यं नाम सास्रवमिति समनुपश्यति। न स्प्रष्टव्यं नामाऽनास्रवमिति समनुपश्यति। न स्प्रष्टव्यं नाम संक्लेशइति समनुपश्यति। न स्प्रष्टव्यं नाम निःक्लेशइति समनुपश्यति। न स्प्रष्टव्यं नाम लौकिकमिति समनुपश्यति। न स्प्रष्टव्यं नाम लोकोत्तरमिति समनुपश्यति। न स्प्रष्टव्यं नाम संसार इति समनुपश्यति। न स्प्रष्टव्यं नाम निर्व्वाणमिति समनुपश्यति।

न कायविज्ञानं नाम नित्यमिति समनुपश्यति। न कायविज्ञानं नामाऽनित्यमिति समनुपश्यति। न कायविज्ञानं नाम सुखमिति समनुपश्यति। न कायविज्ञानं नाम दुःखमिति समनुपश्यति। न कायविज्ञानं नामाऽऽत्मेति समनुपश्यति। न कायविज्ञानं नामाऽनात्मेति समनुपश्यति। न कायविज्ञानं नाम शान्तमिति समनुपश्यति। न कायविज्ञानं नामाऽशान्तमिति समनुपश्यति। न कायविज्ञानं नाम शून्यमिति समनुपश्यति। न कायविज्ञानं नामाऽशून्यमिति समनुपश्यति। न कायविज्ञानं नाम निमित्तमिति समनुपश्यति। न कायविज्ञानं नामाऽनिमित्तमिति समनुपश्यति। न कायविज्ञानं नाम प्रणिहितमिति समनुपश्यति। न कायविज्ञानं नामाऽप्रणिहितमिति समनुपश्यति। न कायविज्ञानं नाम संस्कृतमिति समनुपश्यति। न कायविज्ञानं नामाऽसंस्कृतमिति समनु-

पश्यति। न कायविज्ञानं नाम संक्लेशमिति समनुपश्यति। न काय-विज्ञानं नाम व्यवदानमिति समनुपश्यति। न कायविज्ञानं नामो-त्पादद्रति समनुपश्यति। न कायविज्ञानं नाम विविक्तमिति समनु-पश्यति। न कायविज्ञानं नामाऽविविक्तमिति समनुपश्यति। न कायविज्ञानं नाम कुशलमिति समनुपश्यति। न कायविज्ञानं नामाऽकुशलमिति समनुपश्यति। न कायविज्ञानं नाम साऽवद्यमिति समनुपश्यति। न कायविज्ञानं नामाऽनवद्यमिति समनुपश्यति। न कायविज्ञानं नाम साश्रवमिति समनुपश्यति। न कायविज्ञानं नामाऽनाश्रवमिति समनुपश्यति। न कायविज्ञानं नाम संक्लेशमिति समनुपश्यति। न कायविज्ञानं नाम निःक्लेशमिति समनुपश्यति। न कायविज्ञानं नाम लौकिकमिति समनुपश्यति। न कायविज्ञानं नाम लोकोत्तरमिति समनुपश्यति। न कायविज्ञानं नाम संसार-द्रति समनुपश्यति। न कायविज्ञानं नाम निर्व्वाणमिति समनु-पश्यति।

न कायसंस्पर्शं नाम नित्यमिति समनुपश्यति। न कायसंस्पर्शं नामाऽनित्यमिति समनुपश्यति। न कायसंस्पर्शं नाम सुखमिति समनुपश्यति। न कायसंस्पर्शं नाम दुःखमिति समनुपश्यति। न कायसंस्पर्शं नामाऽऽत्मेति समनुपश्यति। न कायसंस्पर्शं नामाऽना-त्मेति समनुपश्यति। न कायसंस्पर्शं नाम शान्तमिति समनुपश्यति। न कायसंस्पर्शं नामाऽशान्तमिति समनुपश्यति। न कायसंस्पर्शं नाम शून्यमिति समनुपश्यति। न कायसंस्पर्शं नामाऽशून्यमिति समनुपश्यति। न कायसंस्पर्शं नाम निमित्तमिति समनुपश्यति। न

कायसंस्पर्शं नामाऽनिमित्तमिति समनुपश्यति। न कायसंस्पर्शं नाम प्रणिहितमिति समनुपश्यति। न कायसंस्पर्शं नामाऽप्रणिहितमिति समनुपश्यति। न कायसंस्पर्शं नाम संस्कृतमिति समनुपश्यति। न कायसंस्पर्शं नामाऽसंस्कृतमिति समनुपश्यति। न कायसंस्पर्शं नाम संक्लेशमिति समनुपश्यति। न कायसंस्पर्शं नाम व्यवदानमिति समनुपश्यति। न कायसंस्पर्शं नामोत्पादइति समनुपश्यति। न कायसंस्पर्शं नाम निरोधइति समनुपश्यति। न कायसंस्पर्शं नाम विविक्तमिति समनुपश्यति। न कायसंस्पर्शं नामाऽविविक्तमिति समनुपश्यति। न कायसंस्पर्शं नाम कुशलमिति समनुपश्यति। न कायसंस्पर्शं नामाऽकुशलमिति समनुपश्यति। न कायसंस्पर्शं नाम साऽवद्यमिति समनुपश्यति। न कायसंस्पर्शं नामाऽनवद्यमिति समनुपश्यति। न कायसंस्पर्शं नाम साश्रवमिति समनुपश्यति। न कायसंस्पर्शं नामाऽनाश्रवमिति समनुपश्यति। न कायसंस्पर्शं नाम संक्लेशमिति समनुपश्यति। न कायसंस्पर्शं नाम निःक्लेशमिति समनुपश्यति। न कायसंस्पर्शं नाम लौकिकमिति समनुपश्यति। न कायसंस्पर्शं नाम लोकोत्तरमिति समनुपश्यति। न कायसंस्पर्शं नाम संसारइति समनुपश्यति। न कायसंस्पर्शं नाम निर्व्वाणमिति समनुपश्यति।

यदपि तत् कायस्प्रष्टव्य कायविज्ञान कायसंस्पर्शप्रत्ययादुत्पद्यते वेदयितं सुखं दुःखं वा अदुःखाऽसुखं वा। तदपि नाम न नित्यमिति समनुपश्यति। नाऽनित्यमिति समनुपश्यति। सुखमिति न समनुपश्यति। दुःखमिति न समनुपश्यति। नाऽऽत्मेति समनुपश्यति।

नाऽनात्मेति समनुपश्यति। न शान्तमिति समनुपश्यति। नाऽशान्तमिति समनुपश्यति। न शून्यमिति समनुपश्यति। नाऽशून्यमिति समनुपश्यति। न निमित्तमिति समनुपश्यति। नाऽनिमित्तमिति समनुपश्यति। न प्रणिहितमिति समनुपश्यति। नाऽप्रणिहितमिति समनुपश्यति। न संस्कृतमिति समनुपश्यति। नाऽसंस्कृतमिति समनुपश्यति। न संक्लेशइति समनुपश्यति। न व्यवदानमिति समनुपश्यति। नोत्पादमिति समनुपश्यति। न निरोधमिति समनुपश्यति। न विविक्तमिति समनुपश्यति। न कुशलमिति समनुपश्यति। नाऽकुशलमिति समनुपश्यति। न साऽवद्यमिति समनुपश्यति। नाऽनवद्यमिति समनुपश्यति। न साश्रवमिति समनुपश्यति। नाऽनाश्रवमिति समनुपश्यति। न संक्लेशमिति समनुपश्यति। न निःक्लेशमिति समनुपश्यति। न लौकिकमिति समनुपश्यति। न लोकोत्तरमिति समनुपश्यति। न संसारमिति समनुपश्यति। न निर्व्वाणमिति समनुपश्यति।

न मनोनाम नित्यमिति समनुपश्यति। न मनोनामाऽनित्यमिति समनुपश्यति। न मनोनाम सुखमिति समनुपश्यति। न मनोनाम दुःखमिति समनुपश्यति। न नमोनामाऽऽत्मेति समनुपश्यति। न मनोनामाऽनात्मेति समनुपश्यति। न मनोनाम शान्तमिति समनुपश्यति। न मनोनामाऽशान्तमिति समनुपश्यति। न मनोनाम शून्यमिति समनुपश्यति। न मनोनामाऽशून्यमिति समनुपश्यति। न मनोनाम निमित्तमिति समनुपश्यति। न मनोनामाऽनिमित्तमिति समनुपश्यति। न मनोनाम प्रणिहितमिति

समनुपश्यति । न मनोनामाऽप्रणिहितमिति समनुपश्यति । न मनोनाम संस्कृतमिति समनुपश्यति । न मनोनामाऽसंस्कृतमिति समनुपश्यति । न मनोनाम संक्लेशमिति समनुपश्यति । न मनोनाम व्यवदानमिति समनुपश्यति । न मनोनामोत्पाद इति समनुपश्यति । न मनोनाम निरोध इति समनुपश्यति । न मनोनाम विविक्तमिति समनुपश्यति । न मनोनामाऽविविक्तमिति समनुपश्यति । न मनोनाम कुशलमिति समनुपश्यति । न मनोनामाऽकुशलमिति समनुपश्यति । न मनोनाम सावद्यमिति समनुपश्यति । न मनोनामाऽनवद्यमिति समनुपश्यति । न मनोनाम सास्रवमिति समनुपश्यति । न मनोनामाऽनास्रवमिति समनुपश्यति । न मनोनाम संक्लेशमिति समनुपश्यति । न मनोनाम निःक्लेशमिति समनुपश्यति । न मनोनाम लौकिकमिति समनुपश्यति । न मनोनाम लोकोत्तरमिति समनुपश्यति । न मनोनाम संसारमिति समनुपश्यति । न मनोनाम निर्वाणमिति समनुपश्यति ।

न धर्मान्नाम नित्या इति समनुपश्यति । न धर्मान्नामाऽनित्या इति समनुपश्यति । न धर्मान्नाम सुखा इति समनुपश्यति । न धर्मान्नाम दुःखा इति समनुपश्यति । न धर्मान्नामाऽऽत्मान इति समनुपश्यति । न धर्मान्नामाऽनात्मान इति समनुपश्यति । न धर्मान्नाम शान्ता इति समनुपश्यति । न धर्मान्नामाऽशान्ता इति समनुपश्यति । न धर्मान्नाम शून्या इति समनुपश्यति । न धर्मान्नामाऽशून्या इति समनुपश्यति । न धर्मान्नाम निमित्ता इति समनुपश्यति । न धर्मान्नामाऽनिमित्ता इति समनुपश्यति । न धर्मान्नाम प्रणिहिता

इति समनुपश्यति । न धर्म्मान्नामाऽप्रणिहितादिति समनुपश्यति। न धर्म्मान्नाम संस्कृतादिति समनुपश्यति। न धर्म्मान्नामाऽसंस्कृतादिति समनुपश्यति। न धर्म्मान्नाम संक्लेशादिति समनुपश्यति। न धर्म्मान्नाम व्यवदानादिति समनुपश्यति। न धर्म्मान्नामोत्पादादिति समनुपश्यति। न धर्म्मान्नामा निरोधादिति समनुपश्यति । न धर्म्मान्नाम विविक्तादिति समनुपश्यति । न धर्म्मान्नामाऽविविक्तादिति समनुपश्यति। न धर्म्मान्नाम कुशलादिति समनुपश्यति । न धर्म्मान्नामाऽकुशलादिति समनुपश्यति । न धर्म्मान्नाम सावद्यादिति समनुपश्यति । न धर्म्मान्नामाऽनवद्यादिति समनुपश्यति । न धर्म्मान्नाम सास्रवादिति समनुपश्यति । न धर्म्मान्नामाऽनास्रवादिति समनुपश्यति । न धर्म्मान्नाम संक्लेशादिति समनुपश्यति। न धर्म्मान्नाम निःक्लेशादिति समनुपश्यति। न धर्म्मान्नाम लौकिकादिति समनुपश्यति । न धर्म्मान्नाम लोकोत्तरादिति समनुपश्यति । न धर्म्मान्नाम संसारादिति समनुपश्यति। न धर्म्मान्नाम निर्व्वाणादिति समनुपश्यति ।

न मनोविज्ञानं नाम नित्यमिति समनुपश्यति। न मनोविज्ञानं नामाऽनित्यमिति समनुपश्यति । न मनोविज्ञानं नाम सुखमिति समनुपश्यति। न मनोविज्ञानं नाम दुःखमिति समनुपश्यति। न मनोविज्ञानं नामाऽऽत्मेति समनुपश्यति। न मनोविज्ञानं नामाऽनात्मेति समनुपश्यति । न मनोविज्ञानं नाम शान्तमिति समनुपश्यति । न मनोविज्ञानं नामाऽशान्तमिति समनुपश्यति। न मनोविज्ञानं नाम शून्यमिति समनुपश्यति । न मनोविज्ञानं नामाऽशून्यमिति समनुपश्यति । न मनोविज्ञानं नाम निमित्त-

N.B.—All Cheques, Money Orders, &c., must be made payable to the "Treasurer, Asiatic Society," only.

12-2-03.

Books are supplied by V.-P P.

BIBLIOTHECA INDICA:


A

COLLECTION OF ORIENTAL WORKS

PUBLISHED BY THE

ASIATIC SOCIETY OF BENGAL.

NEW SERIES, No. 1068.



शतसाहस्रिका प्रज्ञापारमिता।

ÇATASĀHASRIKĀ-PRAJÑĀ-PARAMITA

A

THEOLOGICAL AND PHILOSOPHICAL DISCOURSE

OF

BUDDHA WITH HIS DISCIPLES

(IN A HUNDRED-THOUSAND STANZAS).

EDITED BY

PRATAPACANDRA GHOṢA.

PART 1. FAS. 6.

CALCUTTA:

PRINTED AT THE BAPTIST MISSION PRESS,

AND PUBLISHED BY THE

ASIATIC SOCIETY, 57, PARK STREET,

1904.

शिक्षितव्यं। चत्वारि सम्यक् प्रहाणानि परिपूरयितुकामेन बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां शिक्षितव्यं। चतुरऋद्धिपादान् परिपूरयितुकामेन बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां शिक्षितव्यं। पञ्चेन्द्रियाणि परिपूरयितुकामेन बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां शिक्षितव्यं। पञ्च बलानि परिपूरयितुकामेन बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां शिक्षितव्यं। सप्तबोध्यङ्गानि परिपूरयितुकामेन बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां शिक्षितव्यं। आर्य्याऽष्टाऽङ्ग मार्गं परिपूरयितुकामेन बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां शिक्षितव्यं। चत्वार्य्यार्य्यसत्यानि परिपूरयितुकामेन बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां शिक्षितव्यं। अष्टौ विमोक्षान् परिपूरयितुकामेन बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां शिक्षितव्यं। दशतथागत बलानि परिपूरयितुकामेन बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां शिक्षितव्यं। चत्वारि वैशारद्यानि परिपूरयितुकामेन बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां शिक्षितव्यं। चतस्रः प्रतिसम्विदः परिपूरयितुकामेन बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां शिक्षितव्यं। महामैत्रीं परिपूरयितुकामेन बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां शिक्षितव्यम्। महाकरुणां परिपूरयितुकामेन बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां शिक्षितव्यं। अष्टादशाऽऽवेणिकान् बुद्धधर्मान् परिपूरयितुकामेन बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां शिक्षितव्यं। बोध्यङ्गवतिं समाधिं समापत्तुकामेन बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां शिक्षितव्यम्।

यत्र प्रथमध्याननिरोधः समापद्यते। निरो*धाद्व्युत्थाय द्वितीयं ध्यानं समापद्यते। द्वितायात् ध्यानाद्व्युत्थायनिरोधः समापद्यते। निरोधाद्व्युत्थाय तृतीयं ध्यानं समापद्यते। तृतीयात् ध्यानाद्व्युत्थाय निरोधः समापद्यते। निरोधाद्व्युत्थाय चतुर्थं ध्यानं समापद्यते। चतुर्थात् ध्यानाद्व्युत्थाय निरोधः समापद्यते। निरोधाद्व्युत्थाय मैत्रीं समाधिं समापद्यते। मैत्र्याः समाधेर्व्युत्थाय निरोधः समापद्यते। निरोधाद्व्युत्थाय करुणासमाधिं समापद्यते। करुणासमाधेर्व्युत्थाय निरोधः समापद्यते। निराधाद्व्युत्थाय मुदितासमाधिं समापद्यते। मुदितासमाधेर्व्युत्थाय निरोधः समापद्यते। निरोधाद्व्युत्थायोपेक्षा-समाधिं समापद्यते। उपेक्षासमाधेर्व्युत्थाय निरोधः समापद्यते। निरोधाद्व्युत्थायाऽऽकाशाऽऽनन्त्याऽऽयतनं समापद्यते। आकाशा-

---

* निरुध्यते प्रज्ञाऽनेनेतिनिरोधः परं वैराग्यमिति पातञ्जलभाष्य वाचस्पतिमिश्रकृतटीका।

† समाधिप्रज्ञाप्रभवः संस्कारोव्युत्थानसंस्कारशेषं वाधते। व्युत्थान संस्काराऽभिभवात् तत् प्रभवाः प्रत्यया न भवन्तीति पातञ्जलदर्शनीय व्यासभाष्यम् तज्जः संस्कारोऽन्यसंस्कारप्रतिवन्धी। पातञ्जलदर्शनसमाधिपाद ५१ सूत्रम्।

‡ मैत्रीकरुणामुदितोपेक्षानां सुखदुःखपुण्याऽपुण्यविषयाणां भावना-तश्चित्त प्रसादनं। पातञ्जलदर्शन समाधिपाद (३३) सूत्रम्। तत्र सर्वप्राणिषु सुखसम्भोगापन्नेषु मैत्रीं भावयेत्। दुःखितेषु करुणां। पुण्यात्मकेषु—मुदितां। अपुण्यशीलेषू पेक्षाम्। एवमस्य भावयतः शुक्लोधर्म्म उपजायते। ततश्चित्तं प्रसीदति। प्रसन्नमेकाग्रं स्थितिपदं लभते॥ पातञ्जलदर्शनसमाधिपाद (३३) सूत्रभाष्यम्।

ऽऽनन्त्याऽऽयतनाद्व्युत्थाय निरोधः समापद्यते। निरोधाद्व्युत्थाय आकिञ्चन्याऽऽयतनं समापद्यते। आकिञ्चन्यायतनाद्व्युत्थाय निरोधः समापद्यते। निरोधाद्व्युत्थाय विज्ञानानन्त्याऽऽयतनं समापद्यते। विज्ञानाऽऽनन्त्याऽयनाद्व्युत्थाय निरोधः समापद्यते। निरोधाद्व्युत्थाय नैव संज्ञानाऽसंज्ञाऽऽयतनं समापद्यते। नैवसंज्ञानासंज्ञाऽऽयतनाद्व्युत्थाय निरोधः समापद्यते। निरोधाद्व्युत्थाय सिंहविजृम्भितं समाधिं समापत्तुकामेन बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां शिक्षितव्यं। सिंहविक्रीडितं समाधिं समापत्तुकामेन बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां शिक्षितव्यं। सर्व्वधारणीमुखसमाधिमुखानि प्रतिलब्धुकामेन बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां शिक्षितव्यं। शूरङ्गमं समाधिं समापत्तुकामेन बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां शिक्षितव्यं। रत्नमुद्रां समाधिं समापत्तुकामेन बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां शिक्षितव्यं। चन्द्रप्रभं समाधिं समापत्तुकामेन बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां शिक्षितव्यं। चन्द्रध्वजकेतुं समाधिं समापत्तुकामेन बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां शिक्षितव्यं। सर्व्वधर्म्ममुद्रागतं समाधिं समापत्तुकामेन बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां शिक्षितव्यं। अवलोकितमुद्रां समाधिं समापत्तुकामेन बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां शिक्षितव्यं। धर्म्मधातुनियतं समाधिं समापत्तुकामेन बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां शिक्षितव्यं। नियतध्वजकेतुं समाधिं समापत्तुकामेन बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां शिक्षितव्यं। वज्रोपमं समाधिं समापत्तुकामेन बोधिसत्त्वेन

महासत्त्वेन प्रज्ञापारमितायां शिक्षितव्यं। सर्व्वधर्म्मसंगमुखं समा-
समापत्तुकामेन बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां शिक्षि-
तव्यं। समाधिराज समाधिं समापत्तुकामेन बोधिसत्त्वेन महासत्त्वे-
प्रज्ञापारमितायां शिक्षितव्यं। राजमुद्रां समाधिं समापत्तुका-
बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां शिक्षितव्यं। वज्र-
समाधिं समापत्तुकामेन बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमिता-
शिक्षितव्यं। समुद्गतं समाधिं समापत्तुकामेन बोधिसत्त्वेन मह-
सत्त्वेन प्रज्ञापारमितायां शिक्षितव्यं। सर्व्वधर्म्मनिरुक्तिं नियतप्रवे-
समाधिं समापत्तुकामेन बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमिता-
शिक्षितव्यं। सर्व्वधर्म्मज्ञानाऽधिवासनप्रवेशं समाधिं समापत्तुका-
बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां शिक्षितव्यं। दशदिग्-
व्यवलोकितं समाधिं समापत्तुकामेन बोधिसत्त्वेन महासत्त्वेन प्रज्ञा-
पारमितायां शिक्षितव्यं। सर्व्वधारणीमुखमुद्रां समाधिं समापत्तु-
कामेन बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां शिक्षितव्यं।
सर्व्वधर्म्माऽसम्प्रमोषं समाधिं समापत्तुकामेन बोधिसत्त्वेन महासत्त्वे-
प्रज्ञापारमितायां शिक्षितव्यं। सर्व्वधर्म्मसमवसरणाकारमुद्रां समाधिं
समापत्तुकामेन बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां शिक्षि-
तव्यं। आकाशस्थानस्थितं समाधिं समापत्तुकामेन बोधिसत्त्वे-
महासत्त्वेन प्रज्ञापारमितायां शिक्षितव्यं। त्रिमण्डलपरिशुद्धं
समाधिं समापत्तुकामेन बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमिताया-
शिक्षितव्यं। अच्युताऽभिज्ञां समाधिं समापत्तुकामेन बोधिसत्त्वेन
महासत्त्वेन प्रज्ञापारमितायां शिक्षितव्यं। पात्रगतं समाधिं समा-

पद्मकामेन बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां शिक्षितव्यं । प्रज्ञाप्रदीपं समाधिं समापत्तुकामेन बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां शिक्षितव्यं । सर्व्वक्लेशनिर्दहनं समाधिं समापत्तुकामेन बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां शिक्षितव्यं । चतुर्मारबलनिराकरणं समाधिं समापत्तुकामेन बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां शिक्षितव्यं । आकाशाऽसङ्गविमुक्तिनिरुपलेपं समाधिं समापत्तुकामेन बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां शिक्षितव्यं । इति एतान्यन्यानि च समाधिमुखानि प्रतिलब्धुकामेन बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां शिक्षितव्यं ।

पुनरपरं भगवन् सर्व्वसत्त्वानामभिप्रायान् परिपूरयितुकामेन बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां शिक्षितव्यं । पुनरपरं भगवन् बोधिसत्त्वेन महासत्त्वेन कुशलमूलानिपरिपूरयितुकामेन यैः कुशलमूलैः परिपूर्णो नाऽपायेषु पतति । नहीनकुलेषूपपद्यते । न श्रावकभूमौ न प्रत्येकबुद्धभूमौ तिष्ठति । न च बोधिसत्त्वो महासत्त्वो मूधामं* पततीति । प्रज्ञापारमितायां शिक्षितव्यं ।

अथायुष्माञ्छारद्वतीपुत्र आयुष्मन्तं सुभूतिमेतद्वोचत् । कथमायुष्मन् सुभूते बोधिसत्त्वो महासत्त्वो मूर्धानं पतति । एव मुक्त आयुष्मान् सुभूतिरायुष्मन्तं शारद्वतीपुत्रमेतद्वोचत् । यदायुष्मन्

* मूर्धानं इति पुस्तकत्रयके पाठः मुधाशब्दो व्यर्थार्थः व्यामोधर्मा- ष्टमा ततश्च व्यर्थधर्म्माभिलाष इति तदर्थः । मुधाशब्दोऽक्षरादिः प्रतिभाति ।

तायां चरन् रूपमप्रणिहितमित्यभिनिविशतेऽधितिष्ठति संजानाति। वेदनामप्रणिहितेत्यभिनिविशतेऽधितिष्ठति संजानाति। संज्ञामप्रणिहितेत्यभिनिविशतेऽधितिष्ठति संजानाति। संस्कारानप्रणिहितमित्यभिनिविशतेऽधितिष्ठति संजानाति। विज्ञानमप्रणिहितमित्यभिनिविशतेऽधितिष्ठति संजानाति। इयमुच्यते आयुष्मन् शारद्वतीपुत्र बोधिसत्त्वस्य महासत्त्वस्याऽऽनुलोमिकीधर्मतृष्णा आमः।

इदं रूपं प्रहातव्यमनेनरूपं प्रहातव्यं। इयं वेदनाप्रहातव्या अनेन वेदनाप्रहातव्या। इयं संज्ञाप्रहातव्या अनेन संज्ञाप्रहातव्या। इमे संस्काराः प्रहातव्याः। अनेन संस्काराः प्रहातव्याः। इदं विज्ञानं प्रहातव्यम्। अनेन विज्ञानं प्रहातव्यमिति। इदं दुःखं परिज्ञेयं। अनेन दुःखं परिज्ञेय मिति। अयं समुदयः प्रहातव्यः। अनेन समुदयः प्रहातव्यः इति। अयं निरोधः साक्षात् कर्त्तव्यः। अनेन निरोधः साक्षात् कर्त्तव्यः। अयं मार्गोभावयितव्यः। अनेन मार्गोभावयितव्यः इति। अयं संक्लेशः। इदं व्यवदानमिति। इमे धर्म्माः सेवितव्याः। इमे धर्म्मा न सेवितव्याः। इह बोधिसत्त्वेन महासत्त्वेन चरितव्यमिह न चरितव्यमिति। अयं बोधिसत्त्वस्य महासत्त्वस्य मार्गोऽयं न मार्ग इति। इयं बोधिसत्त्वस्य महासत्त्वस्य शिक्षेयं न शिक्षेति। इयं बोधिसत्त्वस्य महासत्त्वस्य दानपारमितेयं न दानपारमिता। इयं बोधिसत्त्वस्य महासत्त्वस्य शीलपारमितेयं न शीलपारमितेति। इयं बोधिसत्त्वस्य महासत्त्वस्य क्षान्तिपारमितेयं न क्षान्तिपारमिता। इयं बोधिसत्त्वस्य महासत्त्वस्य वीर्य्यपारमितेयं न व र्य्यपारमिता। इयं बोधिसत्त्वस्य महासत्त्वस्य ध्यानपार-

मितेयं न ध्यानपारमिता। इयं बोधिसत्त्वस्य महासत्त्वस्य प्रज्ञापारमितेयं न प्रज्ञापारमिता। इदं बोधिसत्त्वस्य महासत्त्वस्योपाय कौशलमिदमनुपायकौशलमिति। अयं बोधिसत्त्वस्य महासत्त्वस्य न्यामः।

सचेदायुष्मञ्छारद्वतीपुत्र बोधिसत्त्वोमहासत्त्वः प्रज्ञापारमितायां चरन्निमान् धर्म्मानेवमभिनिविशतेऽधितिष्ठति संजानाति। अयं बोधिसत्त्वस्य महासत्त्वस्याऽऽनुलोमिकीधर्म्मतृष्णा आमः। आह। कतम आयुष्मन् सुभूते बोधिसत्त्वस्य महासत्त्वस्य न्यामः। सुभूतिराह। इहायुष्मञ्छारद्वतीपुत्र बोधिसत्त्वोमहासत्त्वः प्रज्ञापारमितायां चरन्नाध्यात्मशून्यतायामध्यात्मबहिर्द्धाशून्यतां समनुपश्यति। न बहिर्द्धाशून्यतायां अध्यात्मशून्यतां समनुपश्यति। न बहिर्द्धाशून्यतायामध्यात्मबहिर्द्धाशून्यतां समनुपश्यति। नाऽध्यात्मशून्यतायां बहिर्द्धाशून्यतां समनुपश्यति। नाऽध्यात्मबहिर्द्धाशून्यतायां शून्यताशून्यतां समनुपश्यति। न शून्यताशून्यतायामध्यात्मबहिर्द्धाशून्यतां समनुपश्यति। न शून्यताशून्यतायां महाशून्यतां समनुपश्यति। न महाशून्यतायां परमाऽर्थशून्यतां समनुपश्यति। न परमाऽर्थशून्यतायां महाशून्यतां समनुपश्यति। न परमाऽर्थशून्यतायां संस्कृतशून्यतां समनुपश्यति। न संस्कृतशून्यतायां परमाऽर्थशून्यतां समनुपश्यति। न संस्कृतशून्यतायामसंस्कृतशून्यतां समनुपश्यति। नाऽसंस्कृतशून्यतायां संस्कृतशून्यतां समनुपश्यति। नाऽसंस्कृतशून्यतायामनवराऽग्रशून्यतां समनुपश्यति। नाऽनवराऽग्रशून्यतायामसंस्कृतशून्यतां समनुपश्यति। नाऽनवराऽग्रशून्यतायामनवकारशून्यतां समनुपश्यति। नाऽनवकारशून्यतायामनवराऽग्रशून्यतां समनुपश्य-

ति। नाऽनवकारशून्यतायामत्यन्तशून्यतां समनुपश्यति। नाऽत्यन्तशून्यतायां प्रकृतिशून्यतां समनुपश्यति। न प्रकृतिशून्यतायामत्यन्तशून्यतां समनुपश्यति। न प्रकृतिशून्यतायां सर्व्वधर्म्मशून्यतां समनुपश्यति। न सर्व्वधर्म्मशून्यतायां प्रकृतिशून्यतां समनुपश्यति। न सर्व्वधर्म्मशून्यतायां स्वलक्षणशून्यतां समनुपश्यति। न स्वलक्षणशून्यतायां सर्व्वधर्म्मशून्यतां समनुपश्यति। न स्वलक्षणशून्यतायामनुपलम्भशून्यतां समनुपश्यति। नाऽनुपलम्भशून्यतायां स्वलक्षणशून्यतां समनुपश्यति। नाऽनुपलम्भशून्यतायामभावशून्यतां समनुपश्यति। नाऽभावशून्यतायामनुपलम्भशून्यतां समनुपश्यति। नाऽभावशून्यतायां स्वभावशून्यतां समनुपश्यति। न स्वभावशून्यतायामभावशून्यतां समनुपश्यति। न स्वभावशून्यतायामभावस्वभावशून्यतां समनुपश्यति। नाऽभावस्वभावशून्यतायां सर्व्वधर्म्मशून्यतां समनुपश्यति।

एवं खल्वायुष्मञ्छारद्वतीपुत्र बोधिसत्त्वो महासत्त्वः प्रज्ञापारमितायां चरन् बोधिसत्त्वन्याममवक्रामति। पुनरपरमायुष्मञ्छारद्वतीपुत्र बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां चरतैवं शिक्षितव्यम्। यथा शिक्षमाणेनरूपं ज्ञातव्यं तेन च न मन्तव्यं*। वेदनाज्ञातव्या-

---

* अत्रायं भावः। लौकिकानामिव प्रज्ञापारमितायां चरतां बोधिसत्त्वानामपि ज्ञानजनकेन्द्रियादिसामग्रीसत्त्वात् रूपादिज्ञानमवश्यम्भावि। सति च रूपादीनां ज्ञाने तत्र रागद्वेषादयो प्रसज्यमानाः। अनन्तेषु ज्ञातेष्वपि रूपादिषु अभिमानं न कार्यमित्युपदिशति रूपं ज्ञातव्यमित्यादिना। तथाच परकीयधनग्रहणे दृष्टेऽपि यथा तत्राऽभिमानाऽभावात्तत्र रागादयो नायान्ति एवं ज्ञातेष्वपि रूपादि-

तया च वेदनया न मन्तव्यं। संज्ञा ज्ञातव्या तया च संज्ञया न मन्तव्यं। संस्कारा ज्ञातव्याः तैश्च संस्कारै र्न मन्तव्यं। विज्ञानं ज्ञातव्यं तेन च विज्ञानेन न मन्तव्यं। चक्षुर्ज्ञातव्यं तेन च चक्षुषा न मन्तव्यं। श्रोत्रं ज्ञातव्यं तेन च श्रोत्रेण न मन्तव्यं। घ्राणं ज्ञातव्यं तेन च घ्राणेन न मन्तव्यं। जिह्वा ज्ञातव्या तया च जिह्वया न ज्ञातव्यं। कायं ज्ञातव्यं तेन च कायेन न मन्तव्यं। मनो ज्ञातव्यं तेन च मनसा न मन्तव्यं। रूपं ज्ञातव्यं तेन च रूपेण न मन्तव्यं। शब्दो ज्ञातव्यस्तेन च शब्देन न मन्तव्यं। गन्धो ज्ञातव्यस्तेन च गन्धेन न मन्तव्यं। रसो ज्ञातव्यस्तेन च रसेन न मन्तव्यं। स्पर्शो ज्ञातव्यस्तेन च स्पर्शेन न मन्तव्यं। धर्मा ज्ञातव्यास्तैश्च धर्मै र्न मन्तव्यं। चक्षुर्विज्ञानं ज्ञातव्यं तेन च चक्षुर्विज्ञानेन न मन्तव्यं। श्रोत्रविज्ञानं ज्ञातव्यं तेन च श्रोत्रविज्ञानेन न मन्तव्यं। घ्राणविज्ञानं ज्ञातव्यं तेन च घ्राणविज्ञानेन न मन्तव्यं। जिह्वाविज्ञानं ज्ञातव्यं तेन च जिह्वाविज्ञानेन न मन्तव्यं। कायविज्ञानं ज्ञातव्यं तेन च कायविज्ञानेन न मन्तव्यं। मनोविज्ञानं ज्ञातव्यं तेन च मनोविज्ञानेन न मन्तव्यम्।

चक्षुः संस्पर्शो ज्ञातव्यस्तेन च चक्षुः संस्पर्शेन न मन्तव्यं। श्रोत्रसंस्पर्शो ज्ञातव्यस्तेन च श्रोत्रसंस्पर्शेन न मन्तव्यं। घ्राणसंस्पर्शो ज्ञातव्यस्तेन च घ्राणसंस्पर्शेन न मन्तव्यं। जिह्वासंस्पर्शो ज्ञातव्यस्तेन च जि-

---

स्वभिमानाभावाद्रागादयः सम्भवन्ति। अतएव रघुवंशकाव्ये "असक्तः सुखमन्वभू"दित्युक्तं भगवद्गीतायामपि युक्ताहारविहारस्ये- त्यादिना सौकर्यं प्रतिपादितम्।

ह्वासंस्पर्शेन न मन्तव्यं। कायसंस्पर्शोज्ञातव्यस्तेन च कायसंस्
मन्तव्यं। मनः संस्पर्शोज्ञातव्यस्तेन च मनः संस्पर्शेन न मन्तव्

चक्षुः संस्पर्शप्रत्यया वेदना ज्ञातव्या। तया च चक्षुः संस्प
वेदनया न मन्तव्यं। श्रोत्रसंस्पर्शप्रत्ययवेदना ज्ञातव्या त
श्रोत्रसंस्पर्शप्रत्ययवेदनया न मन्तव्यं। घ्राणसंस्पर्शप्रत्ययवे
ज्ञातव्या तया च घ्राणसंस्पर्शप्रत्ययवेदनया न मन्तव्यं। जि
स्पर्शप्रत्ययवेदना ज्ञातव्या। तया च जिह्वासंस्पर्शप्रत्ययवेदन
मन्तव्यं। कायसंस्पर्शप्रत्ययवेदना ज्ञातव्या तया च कायसंस्प
वेदनया न मन्तव्यं। मनः संस्पर्शप्रत्ययवेदनाज्ञातव्या। त
मनःसंस्पर्शप्रत्ययवेदनया न मन्तव्यम्।

पृथिवीधातुर्ज्ञातव्यस्तेन च पृथिवीधातुना न मन्तव्यं। अ
तुर्ज्ञातव्यस्तेन चाऽब्धातुना न मन्तव्यं। तेजोधातुर्ज्ञातव्यस्तेन
तेजोधातुना न मन्तव्यं। वायुधातुर्ज्ञातव्यस्तेन च वायुधातुन
मन्तव्यं। आकाशधातुर्ज्ञातव्यस्तेन चाकाशधातुना न मन्त
विज्ञानधातुर्ज्ञातव्यस्तेन च विज्ञानधातुना न मन्तव्यं। अवि
ज्ञातव्या तया चाऽविद्यया न मन्तव्यं। संस्काराज्ञातव्यास्तैश्च संस्
र्न मन्तव्यं। विज्ञानं ज्ञातव्यं तेन च विज्ञानेन न मन्तव्यं। न
रूपं ज्ञातव्यं तेन च नामरूपेण न मन्तव्यं। षडायतनं ज्ञा
तेन च षडायतनेन न मन्तव्यं। स्पर्शोज्ञातव्यस्तेन च स्पर्शेन
मन्तव्यं। वेदनाज्ञातव्या तया च वेदनया न मन्तव्यं। तृ
ज्ञातव्यातया च तृष्णया न मन्तव्यं। उपादानं ज्ञातव्यं तेन चो
दानेन न मन्तव्यं। भवोज्ञातव्यस्तेन च भवेन न मन्तव्यं। जा

ह्वासंस्पर्शेन न मन्तव्यं। कायसंस्पर्शो ज्ञातव्यस्तेन च कायसंस्पर्शेन न मन्तव्यं। मनःसंस्पर्शो ज्ञातव्यस्तेन च मनःसंस्पर्शेन न मन्तव्यं।

चक्षुःसंस्पर्शप्रत्यया वेदना ज्ञातव्या। तया च चक्षुःसंस्पर्शप्रत्यय वेदनया न मन्तव्यं। श्रोत्रसंस्पर्शप्रत्ययवेदना ज्ञातव्या तया च श्रोत्रसंस्पर्शप्रत्ययवेदनया न मन्तव्यं। घ्राणसंस्पर्शप्रत्ययवेदना ज्ञातव्या तया च घ्राणसंस्पर्शप्रत्ययवेदनया न मन्तव्यं। जिह्वासंस्पर्शप्रत्ययवेदना ज्ञातव्या। तया च जिह्वासंस्पर्शप्रत्ययवेदनया न मन्तव्यं। कायसंस्पर्शप्रत्ययवेदना ज्ञातव्या तया च कायसंस्पर्शप्रत्यय वेदनया न मन्तव्यं। मनःसंस्पर्शप्रत्ययवेदना ज्ञातव्या। तया च मनःसंस्पर्शप्रत्ययवेदनया न मन्तव्यम्।

पृथिवीधातुर्ज्ञातव्यस्तेन च पृथिवीधातुना न मन्तव्यं। अब्धातुर्ज्ञातव्यस्तेन चाऽब्धातुना न मन्तव्यं। तेजोधातुर्ज्ञातव्यस्तेन च तेजोधातुना न मन्तव्यं। वायुधातुर्ज्ञातव्यस्तेन च वायुधातुना न मन्तव्यं। आकाशधातुर्ज्ञातव्यस्तेन चाकाशधातुना न मन्तव्यं। विज्ञानधातुर्ज्ञातव्यस्तेन च विज्ञानधातुना न मन्तव्यं। अविद्या ज्ञातव्या तया चाऽविद्यया न मन्तव्यं। संस्कारा ज्ञातव्यास्तैश्च संस्कारैर्न मन्तव्यं। विज्ञानं ज्ञातव्यं तेन च विज्ञानेन न मन्तव्यं। नामरूपं ज्ञातव्यं तेन च नामरूपेण न मन्तव्यं। षडायतनं ज्ञातव्यं तेन च षडायतनेन न मन्तव्यं। स्पर्शो ज्ञातव्यस्तेन च स्पर्शेन न मन्तव्यं। वेदना ज्ञातव्या तया च वेदनया न मन्तव्यं। तृष्णा ज्ञातव्या तया च तृष्णया न मन्तव्यं। उपादानं ज्ञातव्यं तेन चोपादानेन न मन्तव्यं। भवो ज्ञातव्यस्तेन च भवेन न मन्तव्यं। जा

ज्ञातव्या तया च जात्या न मन्तव्यं। जरामरणं ज्ञातव्यं तेन च जरामरणेन न मन्तव्यं।

दानपारमिता ज्ञातव्या तया च दानपारमितया न मन्तव्यं। शीलपारमिता ज्ञातव्या तया च शीलपारमितया न मन्तव्यं। क्षान्तिपारमिता ज्ञातव्या तया च क्षान्तिपारमितया न मन्तव्यं। वीर्य्यपारमिता ज्ञातव्या तया च वीर्य्यपारमितया न मन्तव्यं। ध्यानपारमिता ज्ञातव्या तया च ध्यानपारमितया न मन्तव्यं। प्रज्ञापारमिता ज्ञातव्या तया च प्रज्ञापारमितया न मन्तव्यं।

अध्यात्मशून्यता ज्ञातव्या तया चाऽध्यात्मशून्यतया न मन्तव्यं। वहिर्द्धाशून्यता ज्ञातव्या तया च वहिर्धाशून्यतया न मन्तव्यं। अध्यात्मवहिर्द्धाशून्यता ज्ञातव्या तया चाऽध्यात्मवहिर्द्धाशून्यतया न मन्तव्यं। शून्यताशून्यता ज्ञातव्या तया च शून्यताशून्यतया न मन्तव्यं। महाशून्यता ज्ञातव्या तया च महाशून्यतया न मन्तव्यं। परमाऽर्थशून्यता ज्ञातव्या तया च परमाऽर्थशून्यतया न मन्तव्यं। संस्कृतशून्यता ज्ञातव्या तया च संस्कृतशून्यतया न मन्तव्यं। असंस्कृतशून्यता ज्ञातव्या तया चाऽसंस्कृतशून्यतया न मन्तव्यं। अत्यन्तशून्यता ज्ञातव्या तया च अत्यन्तशून्यतया न मन्तव्यं। अनवराऽग्रशून्यता ज्ञातव्या तया चाऽनवराऽग्रशून्यतया न मन्तव्यं। अनवकारशून्यता ज्ञातव्या तया चाऽनवकारशून्यतया न मन्तव्यं। अनुपलम्भशून्यता ज्ञातव्या तया चाऽनुपलम्भशून्यतया न मन्तव्यं। अभावशून्यता ज्ञातव्या तया चाऽभावशून्यतया न मन्तव्यं। स्वभावशून्यता ज्ञातव्या तया च स्वभावशून्यतया न

मन्तव्यं। स्वलक्षणशून्यता ज्ञातव्या तया च स्वलक्षणशून्यतया न मन्तव्यं। अभावस्वभावशून्यता ज्ञातव्या तया चाऽभावस्वभावशून्यतया न मन्तव्यं।

ध्यानानि ज्ञातव्यानि तैश्च ध्यानैर्न मन्तव्यं। अप्रमाणानि ज्ञातव्यानि तैश्चाऽप्रमाणैर्न मन्तव्यं। आरूप्यसमापत्तयो ज्ञातव्यास्ताभिश्चाऽऽरूप्यसमापत्तिभिर्न मन्तव्यं। अभिज्ञाः ज्ञातव्यास्ताभिश्चाऽभिज्ञाभिर्न मन्तव्यं। पञ्चचक्षूंषि ज्ञातव्यानि तैश्च पञ्चचक्षुर्भिर्न मन्तव्यं। स्मृत्युपस्थानानि ज्ञातव्यानि तैश्च स्मृत्युपस्थानैर्न मन्तव्यं। सम्यक् प्रहाणानि ज्ञातव्यानि तैश्च सम्यक्प्रहाणैर्न मन्तव्यं। ऋद्धिपादा ज्ञातव्यास्तैश्च ऋद्धिपादैर्न मन्तव्यं। इन्द्रियाणि ज्ञातव्यानि तैश्चेन्द्रियैर्न मन्तव्यं। बलानि ज्ञातव्यानि तैश्च बलैर्न मन्तव्यं। बोध्यङ्गानि ज्ञातव्यानि तैश्च बोध्यङ्गैर्न मन्तव्यं। आर्योऽष्टाऽङ्गमार्गो ज्ञातव्यस्तेन चार्य्याऽष्टाऽङ्गमार्गेण न मन्तव्यं। आर्य्यसत्यानि ज्ञातव्यानि तैश्चार्य्यसत्यैर्न मन्तव्यं। अष्टौ विमोक्षा ज्ञातव्यास्तैश्चाऽष्टविमोक्षैर्न मन्तव्यं। नवाऽनुपूर्व्वविहारसमापत्तयो ज्ञातव्यास्ताभिश्च नवाभिरनुपूर्व्वविहारसमापत्तिभिर्न मन्तव्यं। शून्यतानिमित्ताऽप्रणिहितविमोक्षमुखानि ज्ञातव्यानि तैश्च शून्यतानिमित्ताऽप्रणिहितविमोक्षमुखैर्न मन्तव्यं। समाधयो ज्ञातव्यास्तैश्च समाधिभिर्न मन्तव्यं। धारणीमुखानि ज्ञातव्यानि तैश्च धारणीमुखैर्न मन्तव्यं। दशतथागतबलानि ज्ञातव्यानि तैश्च दशतथागतबलैर्न मन्तव्यं। चत्वारि वैशारद्यानि ज्ञातव्यानि तैश्च वैशारद्यैर्न मन्तव्यं। चतस्रः प्रतिसम्विदो ज्ञातव्याः ताभिश्च प्रतिसम्विद्भिर्न मन्तव्यं। महामैत्री ज्ञातव्या तया च महामैत्र्या न मन्तव्यं। महाकरुणा ज्ञातव्या तया च महाकरुणया न

ान्तव्यं । अष्टादशाऽऽवेणिकबुद्धधर्म्मा ज्ञातव्यास्तैश्चाऽष्टादशाऽऽवेणिक-
बुद्धधर्म्मैर्न मन्तव्यं ।

एवं खलु आयुष्मञ्छारद्वतीपुत्र बोधिसत्त्वेन महासत्त्वेन प्रज्ञा-
पारमितायां चरताऽनेनाऽपि बोधिचित्तेन न मन्तव्यं । असमसम-
चित्तेन न मन्तव्यं । उदारचित्तेन न मन्तव्यं । तत्कस्य हेतोस्त-
थाहि तच्चित्तमचित्तं प्रकृतिश्चित्तस्य प्रभास्वरता। आह । का पुन-
रायुष्मन् सुभूते चित्तस्य प्रकृतिप्रभास्वरता । सुभूतिराह । यदा-
युष्मञ्छारद्वतीपुत्र चित्तं न रागेण संयुक्तं नविसंयुक्तं न संयोजनैः
संयुक्तं नविसंयुक्तं । न दृष्टिकृतैः संयुक्तं नविसंयुक्तं । न श्रावकचित्ते-
न संयुक्तं न विसंयुक्तं। न प्रत्येकबुद्धचित्तेन संयुक्तं न विसंयुक्तं। इयमा-
युष्मञ्छारद्वतीपुत्र बोधिसत्त्वस्य महासत्त्वस्य चित्तस्य प्रकृतिप्रभास्व-
रता। आह । किं पुनरायुष्मन् सुभूते अस्ति तच्चित्तं यच्चित्तमचि-
त्तं । सुभूतिराह । किं पुनरायुष्मन् शारद्वतीपुत्र या अचित्तता
तत्राऽस्तिताया अस्तिता वा नाऽस्तिता वा न संविद्यते नोपलभ्यते ।
आह नोहीदं आयुष्मन् सुभूते । सुभूतिराह । स चेदायुष्मञ्छार-
द्वतीपुत्र तत्राऽस्तिताया अस्तिता वा नाऽस्तिता वा न संविद्यते नोपल-
भ्यते । अपि नु युक्तस्ते एषपर्य्यनुयोगो यदायुष्मञ्छारद्वतीपुत्र एवमा-
हाऽस्ति तच्चित्तमचित्तमिति । आह । का पुनरायुष्मन् सुभूते
अचित्तता । सुभूतिराह । अविकारा अविकल्पा आयुष्मञ्छारद्वती-
पुत्राऽचित्ततायाः सर्व्वधर्म्माणां तथता । इयमुच्यते अचिन्त्या
अचित्तता । आह । किं पुनरायुष्मन् सुभूते यथैवचित्तमविकारम-
विकल्पं तथैवरूपमप्यविकारमविकल्पं तथैव वेदनाऽप्यविकारा अवि-

कल्पा। तथैव संज्ञाप्यविकारा अविकल्पा। तथैवसंस्कारा अप्यविकारा अविकल्पाः। तथैवविज्ञानमप्यविकारमविकल्पम्।

यथैवचित्तमविकारमविकल्पं तथैव चक्षुरप्यविकारमविकल्पं। तथैव श्रोत्रमप्यविकारमविकल्पं। तथैव घ्राणमप्यविकारमप्यविकल्पं। तथैव जिह्वाऽप्यविकारा अविकल्पा। तथैव कायोऽप्यविकारोऽविकल्पः। तथैव मनोऽप्यविकारमविकल्पं। तथैव चित्तमविकारमविकल्पं। तथैव रूपमप्यविकारमविकल्पं। तथैव शब्दोऽप्यविकारोऽविकल्पः। तथैव गन्धोऽप्यविकारोऽविकल्पः। तथैव रसोऽप्यविकारोऽविकल्पः। तथैव स्पर्शोऽप्यविकारोऽविकल्पः। तथैव धर्मा अप्यविकारा अविकल्पाः। तथैव चित्तमप्यविकारमविकल्पं। तथैव चक्षुर्धातुरप्यविकारोऽविकल्पः। तथैव रूपधातुरप्यविकारोऽविकल्पः। तथैव चक्षुर्विज्ञानधातुरप्यविकारोऽविकल्पः। तथैवश्रोत्रधातुरप्यविकारोऽविकल्पः। तथैव शब्दधातुरप्यविकारोऽविकल्पः। तथैव श्रोत्रविज्ञानधातुरप्यविकारोऽविकल्पः। तथैव घ्राणधातुरप्यविकारोऽविकल्पः। तथैव गन्धधातुरप्यविकारोऽविकल्पः। तथैव घ्राणविज्ञानधातुरप्यविकारोऽविकल्पः। तथैव जिह्वाधातुरप्यविकारोऽविकल्पः। तथैव रसधातुरप्यविकारोऽविकल्पः। तथैव जिह्वाविज्ञानधातुरप्यविकारोऽविकल्पः। तथैव कायधातुरप्यविकारोऽविकल्पः। तथैव स्प्रष्टव्यधातुरप्यविकारोऽविकल्पः। तथैव कायविज्ञानधातुरप्यविकारोऽविकल्पः। तथैव मनोधातुरप्यविकारोऽविकल्पः। तथैव धर्मधातुरप्यविकारोऽविकल्पः। तथैवमनोविज्ञानधातुरप्यविकारोऽविकल्पः।

यथैव चित्तमविकारमविकल्पं। तथैवाऽविद्याऽप्यविकाराऽविकल्पा। तथैव संस्कारा अप्यविकारा अविकल्पाः। तथैव विज्ञानमप्यविकारमविकल्पं। तथैव नामरूपमप्यविकारमविकल्पं। तथैव षडायतनमप्यविकारमविकल्पं। तथैव स्पर्शोऽप्यविकारोऽविकल्पः। तथैव वेदनाऽप्यविकारा अविकल्पाः। तथैव तृष्णाप्यविकारा अविकल्पाः। तथैवोपादानमप्यविकारमविकल्पं। तथैव भवोऽप्यविकारोऽविकल्पः। तथैव जातिरप्यविकारा अविकल्पा। तथैव जरामरणमप्यविकारमविकल्पं।

यथैव चित्तमविकारमविकल्पं। तथैव दानपारमिताऽप्यविकाराऽविकल्पा। तथैव शीलपारमिताऽप्यविकाराऽविकल्पा। तथैव क्षान्तिपारमिताऽप्यविकाराऽविकल्पा। तथैव वीर्य्यपारमिताऽप्यविकाराऽविकल्पा। तथैव ध्यानपारमिताऽप्यविकाराऽविकल्पा। तथैव प्रज्ञापारमिताऽप्यविकाराऽविकल्पा।

यथैव चित्तमविकारमविकल्पं। तथैवाऽध्यात्मशून्यताऽप्यविकाराऽविकल्पा। तथैव बहिर्द्धाशून्यताऽप्यविकाराऽविकल्पा। तथैवाऽध्यात्मबहिर्द्धाशून्यताऽप्यविकाराऽविकल्पा। तथैव शून्याशून्यताऽप्यविकाराऽविकल्पा। तथैव महाशून्यताऽप्यविकाराऽविकल्पा। तथैव परमार्थशून्यताऽप्यविकाराऽविकल्पा। तथैव संस्कृतशून्यताऽप्यविकाराऽविकल्पा। तथैवाऽत्यन्तशून्यताऽप्यविकाराऽविकल्पा। तथैवाऽनवराग्रशून्यताऽप्यविकाराऽविकल्पा। तथैवाऽनवकारशून्यताऽप्यविकाराऽविकल्पा। तथैव प्रकृतिशून्यताऽप्यविकाराऽविकल्पा। तथैव सर्व्वधर्म्मशून्यताऽप्यविकाराऽविकल्पा। तथैव स्वलक्षणशून्यताऽप्यविकाराऽवि-

कल्पा । तथैवाऽनुपलम्भशून्यताऽप्यविकाराऽविकल्पा । तथैवाऽभाव-
शून्यताऽप्यविकाराऽविकल्पा । तथैव स्वभावशून्यताऽप्यविकाराऽवि-
कल्पा । तथैवाऽभा स्वभावशून्यताऽप्यविकाराऽविकल्पा ।

यथैव चित्तमविकारमविकल्पं । तथैव स्मृत्युपस्थानान्यविकाराण्य-
विकल्पानि । तथैव सम्यक् प्रहाणान्यविकाराण्यविकल्पानि । तथै-
वर्द्धिपादा अप्यविकारा अविकल्पाः । तथैवेन्द्रियाण्यविकाराण्यवि-
कल्पानि । तथैव ध्यानान्यविकाराण्यविकल्पानि । तथैव बोध्यङ्गान्य-
विकाराण्यविकल्पानि । तथैवार्य्योऽष्टाङ्गमार्गोऽप्यविकारोऽविकल्पः ।
तथैवार्य्यसत्यान्यविकाराण्यविकल्पानि । तथैव ध्यानान्यविकाराण्यवि-
कल्पानि । तथैवाऽप्रमाणान्यविकाराण्यविकल्पानि । तथैवारूप्यसमा-
पत्तयोऽप्यविकाराः अविकल्पाः । तथैवाष्टौ विमोक्षा अप्यविकारा
अविकल्पाः । तथैव नवाऽनुपूर्व्वविहारसमापत्तयोऽप्यविकारा अवि-
कल्पाः । तथैव शून्यतानिमित्ताऽप्रणिहितविमोक्षमुखान्यविकाराण्य-
विकल्पानि । तथैवाऽभिज्ञाऽप्यविकाराः अविकल्पा । तथैव समा-
धयोऽप्यविकाराः अविकल्पाः । तथैव धारणीमुखान्यविकाराण्य-
विकल्पानि । तथैव दशतथागतबलान्यविकाराण्यविकल्पानि । तथै-
व वैशारद्यान्यविकाराण्यविकल्पानि । तथैव चतस्रः प्रतिसंविदोऽप्य-
विकारा अविकल्पाः । तथैव महामैत्र्यप्यविकाराऽविकल्पा । तथैव
महाकरुणाऽप्यविकाराऽविकल्पा । तथैवाऽष्टादशावेणिका बुद्धधर्म्मा
अप्यविकारा अविकल्पाः ।

यथैव चित्तमविकारमविकल्पं । तथैव स्रोतआपत्तिफलम-
प्यविकारमविकल्पं । तथैव सकृदागामिफलमप्यविकारमविकल्पं ।

तथैवऽनागामिफलमप्यविकारमविकल्पं। तथैवाऽर्हत्त्वमप्यविकारम-विकल्पं। तथैव प्रत्येकबोधिरप्यविकाराविकल्पा। तथैव मार्गाकार-ज्ञताऽप्यविकाराऽविकल्पा। तथैव सर्व्वाकारज्ञताऽप्यविकाराऽवि-कल्पा।

सुभूतिराह। एवमेतदायुष्मञ्छारद्वतीपुत्र यथैवचित्तमचित्त-मविकारमविकल्पं। तथैव चक्षुरप्यविकारमविकल्पं। तथैव श्रोत्र-मप्यविकारमविकल्पं। तथैव घ्राणमप्यविकारमविकल्पं। तथैव जिह्वाऽप्यविकाराऽविकल्पा। तथैव कायोऽप्यविकारोऽविकल्पः। तथैव मनोऽप्यविकारमविकल्पं।

यथैव चित्तमचित्तमविकारमविकल्पं। तथैव रूपमप्यविकार-मविकल्पं। तथैव शब्दोऽप्यविकारोऽविकल्पः। तथैव गन्धोऽप्यवि-कारोऽविकल्पः। तथैव रसोऽप्यविकारोऽविकल्पः। तथैव स्पर्शोऽप्य-विकारोऽविकल्पः। तथैव धर्म्मा अप्यविकारा अविकल्पाः।

*यथैव चित्तमचित्तमविकारमविकल्पं। तथैव चक्षुर्धातुरप्यवि-

---

* पूर्व्वं चित्तस्य प्रकृति प्रभास्वरताऽभिहिता साच प्रकृत्यास्वभावेन प्रभास्वरता स्वप्रकाशरूपता। तथाच तस्य प्रकृति प्रभास्वरतया तस्य ज्ञानस्वरूपप्रकाशने नान्यस्यचित्तस्यापेक्षाऽस्तीति चित्तमचित्तं चित्तान्तर शून्यं चित्तस्य चित्तान्तरापेक्षाया मनवस्था प्रसङ्गात् एवं बौद्धमते चित्तस्य क्षणिकतया न विकार विकल्पयोः सम्भवः। विका-रोहि स्थिरस्य दुग्धादेर्दध्यादिरूपोदृष्टः एवं स्थिरस्य स्वर्णादेः कुण्डल-वलयादिविविधकल्पनारूपो विकल्पो दृश्यते। बौद्धमते तु सर्व्वपदा-र्थानां क्षणिकतया न कुत्रापि पदार्थे विकारविकल्पयोः सम्भावनेति मनसिकृत्य सुभूतिः शारद्वतीपुत्रेण प्रश्नमुखेनाभिहितं सर्व्वमनूद्या-

कारोऽविकल्पः । तथैवरूपधातुरप्यविकारोऽविकल्पः । तथैवचक्षुर्वि-
ज्ञानधातुरप्यविकारोऽविकल्पः । तथैव श्रोत्रधातुरप्यविकारोऽविक-
ल्पः । तथैव शब्दधातुरप्यविकारोऽविकल्पः । तथैव श्रोत्रविज्ञानधातु-
रप्यविकारोऽविकल्पः । तथैवघ्राणधातुरप्यविकारोऽविकल्पः । तथैव-
गन्धधातुरप्यविकारोऽविकल्पः । तथैवघ्राणविज्ञानधातुरप्यविकारो-
ऽविकल्पः । तथैवजिह्वाधातुरप्यविकारोऽविकल्पः । तथैवरसधातुर-
प्यविकारोऽविकल्पः । तथैवजिह्वाविज्ञानधातुरप्यविकारोऽविकल्पः ।
तथैवकायधातुरप्यविकारोऽविकल्पः । तथैवस्प्रष्टव्यधातुरप्यविकारो-
ऽविकल्पः । तथैवकायविज्ञानधातुरप्यविकारोऽविकल्पः । तथैवमनो-
धातुरप्यविकारोऽविकल्पः । तथैव धर्मधातुरप्यविकारोऽविकल्पः ।
तथैवमनोविज्ञानधातुरप्यविकारोऽविकल्पः ।

यथैवचित्तमचित्तमविकारमविकल्पं । तथैवाऽविद्याऽप्यविकारा-
ऽविकल्पा । तथैव संस्कारा अप्यविकारा अविकल्पाः । तथैव
विज्ञानमप्यविकारमविकल्पं । तथैव नामरूपमप्यविकारमविकल्पं ।
तथैव षड़ायतनमप्यविकारमविकल्पं । तथैव स्पर्शोऽप्यविकारो-
ऽविकल्पः । तथैव वेदनाऽप्यविकाराऽविकल्पा । तथैव तृष्णाऽप्यविका-
राऽविकल्पा । तथैवोपादानमप्यविकारमविकल्पं । तथैव भवोऽप्यवि-
कारोऽविकल्पः । तथैव जातिरप्यविकाराऽविकल्पा । तथैव जरामर-
णमप्यविकारमविकल्पं । तथैव दानपारमिताऽप्यविकाराऽविकल्पा ।
तथैव शीलपारमिताऽप्यविकाराऽविकल्पा । तथैव क्षान्तिपारमिता-

ऽङ्गीकरोति यथैवेत्यादिना । चित्तदृष्टान्तेन चक्षुरादौ तदुपपादयति
तथैवेत्यादिना । एतन्मते चित्तमनसोर्भेदात् न दृष्टान्ताऽनुपपत्तिः ।

प्यविकाराऽविकल्पा । तथैव वीर्य्यपारमिताऽप्यविकाराऽविकल्पा । तथैव ध्यानपारमिताऽप्यविकाराऽविकल्पा । तथैव प्रज्ञापारमिताऽप्यविकाराऽविकल्पा ।

यथैवचित्तमचित्तमविकारमविकल्पं । तथैवाऽध्यात्मशून्यताऽप्यविकाराऽविकल्पा । तथैव वहिर्द्धाशून्यताऽप्यविकाराऽविकल्पा । तथैवाऽध्यात्मवहिर्द्धाशून्यताऽप्यविकाराऽविकल्पा । तथैव शून्यताशून्यताऽप्यविकाराऽविकल्पा । तथैव महाशून्यताऽप्यविकाराऽविकल्पा । तथैव परमाऽर्थशून्यताऽप्यविकाराऽविकल्पा । तथैव संस्कृतशून्यताऽप्यविकाराऽविकल्पा । तथैवाऽसंस्कृतशून्यताऽप्यविकाराऽविकल्पा । तथैवाऽत्यन्तशून्यशून्यताऽप्यविकाराऽविकल्पा । तथैवाऽनवराऽग्रशून्यताऽप्यविकाराऽविकल्पा। तथैवाऽनवकारशून्यताऽप्यविकाराऽविकल्पा। तथैव प्रकृतिशून्यताऽप्यविकाराऽविकल्पा । तथैव सर्व्वधर्म्मशून्यताऽप्यविकाराऽविकल्पा । तथैव स्वलक्षणशून्यताऽप्यविकाराऽविकल्पा । तथैवाऽनुपलम्भशून्यताऽप्यविकाराऽविकल्पा । तथैवाऽभावशून्यताऽप्यविकाराऽविकल्पा । तथैव स्वभावशून्यताऽप्यविकाराऽविकल्पा । तथैवाऽभावस्वभावशून्यताऽप्यविकाराऽविकल्पा ।

यथैव चित्तमचित्तमविकारमविकल्पं । तथैव स्मृत्युपस्थानान्यप्यविकाराण्यविकल्पानि। तथैव सम्यक् प्रहाणान्यप्यविकाराण्यविकल्पानि । तथैवर्द्धिपादा अप्यविकारा अविकल्पाः। तथैवेन्द्रियाण्यप्यविकाराण्यविकल्पानि । तथैव बोध्यङ्गान्यप्यविकाराण्यविकल्पानि । तथैवार्य्याऽष्टाऽङ्गमार्गोऽप्यविकारोऽविकल्पः । तथैवार्य्यसत्यान्यविकाराण्यविकल्पानि । तथैव ध्यानान्यप्यविकाराण्यविकल्पानि । तथैवा-

अप्रमाणान्यप्यविकाराण्यविकल्पानि। तथैवारूप्यसमापत्तयोऽप्यविकारा अविकल्पाः। तथैवाष्टौ विमोक्षा अप्यविकारा अविकल्पाः। तथैवानुपूर्वविहारसमापत्तयोऽप्यविकाराः अविकल्पाः। तथैव शून्यतानिमित्ताऽप्रणिहितविमोक्षमुखान्यप्यविकाराण्यविकल्पानि। तथैवाऽभिज्ञा अप्यविकारा अविकल्पाः। तथैव समाधयोऽप्यविकारा अविकल्पाः। तथैव धारणीमुखान्यप्यविकाराण्यविकल्पानि। तथैव महामैत्र्यप्यविकारा अविकल्पा। तथैव महाकरुणाऽप्यविकाराऽविकल्पा। तथैव दशतथागतबलान्यप्यविकाराण्यविकल्पानि। तथैव चत्वारि वैशारद्यान्यप्यविकाराण्यविकल्पानि। तथैव चतस्रः प्रतिसंविदोऽप्यविकारा अविकल्पाः। तथैवाऽष्टादशावेणिका बुद्धधर्मा अप्यविकारा अविकल्पाः।

यथैव चित्तमविकारमविकल्पं। तथैव स्रोतआपत्तिफलमप्यविकारमविकल्पं। तथैव सकृदागामिफलमप्यविकारमविकल्पं। तथैवाऽनागामिफलमप्यविकारमविकल्पं। तथैवाऽर्हत्त्वमप्यविकारमविकल्पं। तथैव प्रत्येकबोधिरप्यविकाराऽविकल्पा। तथैव मार्गाकारज्ञताऽप्यविकाराऽविकल्पा। तथैव सर्वाकारज्ञताऽप्यविकाराऽविकल्पा। तथैव सर्वज्ञताऽप्यविकाराऽविकल्पा।

अथायुष्मान् शारद्वतीपुत्र आयुष्मते सुभूतये साधुकारमदात्। साधु साधु आयुष्मन् सुभूते। यथाऽपि नाम त्वं भगवतः पुत्र औरसो मुखजो धर्मजो धर्मनिर्मितो धर्मदायादो नामिषदायादः प्रत्यक्षकायसाक्षी चक्षुष्मान्। यथाऽपि तद्धर्मतायां निर्दिश्यमानायां [illegible] धर्मताऽनिर्दिष्टा [illegible]। एवमायुष्मन् सुभूते

बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां शिक्षितव्यं। अतो बोधिसत्त्वो महासत्त्वोऽवैवर्त्तिक उपपरीक्षितव्यः। अविरहितस्य बोधिसत्त्वो महासत्त्वः प्रज्ञापारमितायां वेदितव्यः। श्रावकभूमावपि शिक्षितुकामेनायुष्मन् सुभूते बोधिसत्त्वेन महासत्त्वेन इयमेव प्रज्ञापारमिता प्रयत्नतः श्रोतव्या ग्रहीतव्या धारयितव्या वाचयितव्या पर्य्यवाप्तव्या योनिशश्च मनसिकर्त्तव्या। प्रत्येकबुद्धभूमावपि शिक्षितुकामेनायुष्मन् सुभूते बोधिसत्त्वेन महासत्त्वेन इयमेव प्रज्ञापारमिता श्रोतव्या ग्रहीतव्याधारयितव्या वाचयितव्या पर्य्यवाप्तव्या योनिशश्च मनसि कर्त्तव्या। बोधिसत्त्वभूमावपि शिक्षितुकामेनायुष्मन् सुभूते बोधिसत्त्वेन महासत्त्वेन इयमेव प्रज्ञापारमिता श्रोतव्या ग्रहीतव्या धारयितव्या वाचयितव्या पर्य्यवाप्तव्या योनिशश्च मनसि कर्त्तव्या। बुद्धभूमावपि शिक्षितुकामेनायुष्मन् सुभूते बोधिसत्त्वेन महासत्त्वेन इयमेव प्रज्ञापारमिता श्रोतव्या ग्रहीतव्या धारयितव्या वाचयितव्या पर्य्यवाप्तव्या योनिशश्च मनसि कर्त्तव्या। तत्कस्य हेतोः? अत्र हि प्रज्ञापारमितायां विस्तरेण त्रीणि यानान्युपदिश्यन्ते यत्र बोधिसत्त्वैः श्रावकैः प्रत्येकबुद्धैश्च सततसमितं शिक्षितव्यं॥ ०॥

शतसाहस्रयां प्रज्ञापारमितायां तृतीयः परिवर्त्तः॥ ०॥

अथ चतुर्थपरिवर्त्तः ।

अथायुष्मान् सुभूतिर्भगवन्तमेतदवोचत् । योऽहं भगवन् बोधिसत्त्वं प्रज्ञापारमितां न विन्दामि नोपलभते । सोऽहं बोधिसत्त्वं महासत्त्वं प्रज्ञापारमिताञ्चाऽविन्दन्ननुपलभमानः कतमं बोधिसत्त्वं महासत्त्वं कतमस्यां प्रज्ञापारमितायामववदिष्याम्यनुशासिष्यामि । एतदेव मे भगवन् कौकृत्यं स्याद्योऽहं सर्व्वधर्म्माणामायं व्ययञ्चानुपलभमानो नामधेयमात्रेणायव्ययं कुर्य्यात् । यदुत बोधिसत्त्व इति प्रज्ञापारमितेति वा । अपि नु खलु पुनर्भगवंस्तदपि नामधेयं न स्थितं न विष्ठितं नाऽधिष्ठितं । तत्कस्य हेतो रविद्यमानत्वात्तस्य नामधेयस्य । एवं तन्नामधेयं न स्थितं न विष्ठितं नाऽधिष्ठितम् ।

* रूपस्याहं भगवन्नायं व्ययञ्च नोपलभे न समनुपश्यामि । सोऽहं

[illegible] [illegible] व्ययञ्चाऽनुपलभमान इत्यादिना सर्व्वधर्म्माणामु[illegible] रूपलम्भाभावमभिधाय तदेव प्रपञ्चयति रूपस्याह-

दिनारूपस्यरूपस्कन्धस्यायमुत्पाद व्ययं विनाशं नोपलभे न प्र[illegible] प्रमाणे न जानामि । नच प्रत्यक्षेण समनुपश्यामि । तृभिर[illegible] [illegible] परः नचाद्युमज्ञानवचनः । कस्यनामधेयमिति [illegible]स्यायमभिप्रायः । विद्यमानत्वेनोपलभ्यमानस्य हि वस्तुनोनामधे[illegible] सम्भवति नत्वसतः खपुष्पादि तुल्यत्वादिति । यस्य च ना[illegible]

भगवन् रूपस्यायं व्ययस्थाऽनुपलभमानोऽसमनुपश्यं कस्य नाम धेयं करिष्यामि बोधिसत्त्व इति । अपि तु खलु पुनर्भगवंस्तदपि नामधेयं न स्थितं नाऽधिस्थितं । तत्कस्य हेतोरविद्यमानत्वात् तस्य नामधेयस्य । एवं तन्नामधेयं न स्थितं न विष्ठितं नाऽधिष्ठितं । वेदनाया अहं भगवन्नायं व्ययस्य नोपलभेन समनुपश्यामि । सोऽहं भगवन् वेदनाया आयं व्ययस्थाऽनुपलभमानोऽसमनुपश्यन् कस्य नामधेयं करिष्यामि बोधिसत्त्व इति । अपि तु खलु पुनर्भगवं स्तदपि नामधेयं न स्थितं न विष्ठितं नाऽधिष्ठितं । तत्कस्य हेतोरविद्यमानत्वात्तस्य नामधेयस्य । एवं तन्नामधेयं न स्थितं न विष्ठितं नाऽधिष्ठितं । (वेदनाया) संज्ञाया अहं भगवन्नायं व्ययस्य नोपलभे न समनुपश्यामि । सोऽहं भगवन् संज्ञाया आयं व्ययस्थाऽनुपलभमानोऽसमनुपश्यन् कस्य नामधेयं करिष्यामि बोधिसत्त्व इति । अपि तु खलु पुनर्भगवन्स्तदपि संज्ञानामधेयं न स्थितं न विष्ठितं नाऽधिष्ठितं । तत्कस्य हेतोरविद्यमानत्वात्तस्य नामधेयस्य । एवं तन्नामधेयं न स्थितं न विष्ठितं नाऽधिष्ठितं । संस्कारानामहं भगवन्नायं व्ययस्य नोपलभे न समनुपश्यामि । । सोऽहं भगवन् संस्कारानामायं व्ययस्थाऽनुपलभमानोऽसमनुपश्यन् कस्य नामधेयं करिष्यामि बोधिसत्त्व इति । अपि तु खलु पुनर्भवन्

धेयस्य कर्तव्यता, तदापि नामधेयं न स्थितं न स्थितिमत् कस्मिंश्चि-दासत् । न विष्ठितं न विशेषेण स्थितं । न रूपमात्रादिवस्तुप्रत्ययत्वेनाऽन-भुवमानमविभागमाकारयन्तिष्ठत् । नाऽधिष्ठितं नाऽधिकारित्वेन स्व-रूपेणाधिष्ठितं भवतीत्यर्थः । एवं वेदनादिष्वालेयम् ।

६१

अथ चतुर्थपरिवर्त्तः ।

अथायुष्मान् सुभूतिर्भगवन्तमेतदवोचत् । योऽहं भगवन् वोधिसत्त्वं प्रज्ञापारमितां न विन्दामि नोपलभते । सोऽहं वोधिसत्त्वं महासत्त्वं प्रज्ञापारमिताञ्चाऽविन्दन्ननुपलभमानः कतमं वोधिसत्त्वं महासत्त्वं कतमस्यां प्रज्ञापारमितायामववदिष्याम्यनुशासिष्यामि । एतदेव मे भगवन् कौकृत्यं स्याद्योऽहं सर्व्वधर्म्माणामायं व्ययञ्चानुपलभमानोनामधेयमात्रेणायव्ययं कुर्य्यात् । यदुत वोधिसत्त्व इति प्रज्ञापारमितेति वा । अपि नु खलु पुनर्भगवंस्तदपि नामधेयं न स्थितं न विष्ठितं नाऽधिस्थितं। तत्कस्य हेतो रविद्यमानत्वात्तस्य नामधेयस्य । एवं तन्नामधेयं न स्थितं न विष्ठितं नाऽधिस्थितम् ।

* रूपस्याहं भगवन्नयं व्ययञ्च नोपलभे न समनुपश्यामि। सोऽहं

---

* पूर्व्वं सर्व्वधर्म्माणामायं व्ययञ्चाऽनुपलभमान इत्यादिना सर्व्वधर्म्माणामुत्पादविनाशयो रुपलम्भाभावमभिधाय तदेव प्रपञ्चयति 'रूपस्याहमित्यादिनारूपस्यरूपस्कन्धस्यायमुत्पाद व्ययं विनाशं नोपलभे न प्रत्यक्षेण प्रमाणे न जानामि । नच प्रत्यक्षेण समनुपश्यामि । दृशिरत्र-प्रत्यक्षज्ञानमात्र परः नचाक्षुषज्ञानवचनः। कस्यनामधेयमिति । अस्यायमभिप्रायः। विद्यमानत्वेनोपलभ्यमानस्य हि वस्तुनोनामधेयकरणं सम्भवति नत्वसतः खपुष्पादि तुल्यत्वादिति । यस्य च नाम-

भगवन् रूपस्यायं व्ययस्थाऽनुपलभमानोऽसमनुपश्यं कस्य नाम धेयं करिष्यामि बोधिसत्त्व इति। अपि तु खलु पुनर्भगवंस्तदपि नामधेयं न स्थितं नाऽधिस्थितं। तत्कस्य हेतोरविद्यमानत्वात् तस्य नामधेयस्य। एवं तन्नामधेयं न स्थितं न विष्ठितं नाऽधिस्थितं। वेदनाया अहं भगवन्नायं व्ययस्य नोपलभेन समनुपश्यामि। सोऽहं भगवन् वेदनाया आयं व्ययस्थाऽनुपलभमानोऽसमनुपश्यन् कस्य नामधेयं करिष्यामि बोधिसत्त्व इति। अपि तु खलु पुनर्भगवं स्तदपि नामधेयं न स्थितं न विष्ठितं नाऽधिष्ठितं। तत्कस्य हेतोरविद्यमानत्वात्तस्य नामधेयस्य। एवं तन्नामधेयं न स्थितं न विष्ठितं नाऽधिष्ठितं। (वेदनाया) संज्ञाया अहं भगवन्नायं व्ययस्य नोपलभे न समनुपश्यामि। सोऽहं भगवन् संज्ञाया आयं व्ययस्थाऽनुपलभमानोऽसमनुपश्यन् कस्य नामधेयं करिष्यामि बोधिसत्त्व इति। अपि तु खलु पुनर्भगवन्स्तदपि संज्ञानामधेयं न स्थितं न विष्ठितं नाऽधिष्ठितं। तत्कस्य हेतोरविद्यमानत्वात्तस्य नामधेयस्य। एवं तन्नामधेयं न स्थितं न विष्ठितं नाऽधिष्ठितं। संस्कारानामहं भगवन्नायं व्ययस्य नोपलभे न समनुपश्यामि।। सोऽहं भगवन् संस्कारानामायं व्ययस्थाऽनुपलभमानोऽसमनुपश्यन् कस्य नामधेयं करिष्यामि बोधिसत्त्व इति। अपि तु खलु पुनर्भवन्

धेयस्यकर्त्तव्यता, तदापि नामधेयं न स्थितं न स्थितिमत् स्वरादिति-यावत्। नविष्ठितं न विशेषेणास्थितं। न परमाण्वादिवत्प्रत्यक्षतोऽनभूयमानमपिमानान्तरप्रसिद्धम्। नाऽधिष्ठितं नाकेनापितत्स्वरूपेण स्वरूपेणाधिष्ठितं व्यवहृतमित्यर्थः। एवं परत्रापि व्याख्येयम्।

यदपि संस्कारनामधेयं न स्थितं न विस्थितं नाधिष्ठितं। तत्कस्य हेतोरविद्यमानत्वात्तस्य नामधेयस्य। एवं तन्नामधेयं न स्थितं न विस्थितं नाधिष्ठितं। विज्ञानस्याहं भगवन्नाग्रं व्यग्रं नोपलभे न समनुपश्यामि। सोऽहं भगवन् विज्ञानस्याग्रं व्यग्रञ्चानुपलभमानोऽसमनुपश्यन् कस्य नामधेयं करिष्यामि यदुत बोधिसत्त्व इति। यदपि तु खलु पुनर्बोधिसत्त्व इत्यपि नामधेयं न स्थितं न विस्थितं नाधिष्ठितं। तत्कस्य हेतोरविद्यमानत्वात् तस्य नामधेयस्य। एवं नामधेयं न स्थितं न विस्थितं नाधिष्ठितं।

रूपस्याहं भगवन्नाग्रं व्यग्रं नोपलभे न समनुपश्यामि। सोऽहं भगवन् रूपस्य नाग्रं व्यग्रञ्चानुपलभमानोऽसमनुपश्यन् कस्य नामधेयं करिष्यामि यदुत बोधिसत्त्व इति। यदपि तु खलु पुनर्बोधिसत्त्व इत्यपि नामधेयं तदपि न स्थितं न विस्थितं नाधिष्ठितं। तत्कस्य हेतोरविद्यमानत्वात्तस्य नामधेयस्य। एवं नामधेयं न स्थितं न विस्थितं नाधिष्ठितं। [illegible]

धिष्ठितं। तत्कस्य हेतोरविद्यमानत्वात्तस्य नामधेयस्य। एवं नामधेयं न स्थितं न विष्ठितं नाऽधिष्ठितं। जिह्वाया अहं भगवन्नायं व्ययस्त्र नोपलभे न समनुपश्यामि। सोऽहं भगवन् जिह्वाया आयं व्ययस्वानुपलभमानोऽसमनुपश्यन् कस्य नामधेयं करिष्यामि बोधिसत्त्व इति। अपि तु खलु पुनर्भगवंस्तदपि नामधेयं न स्थितं न विष्ठितं नाऽधिष्ठितं। तत्कस्य हेतोरविद्यमानत्वात्तस्य नामधेयस्य। एवं तन्नामधेयं न स्थितं न विष्ठितं नाऽधिष्ठितं। कायस्याहं भगवन्नायं व्ययस्त्र नोपलभे न समनुपश्यामि। सोऽहं भगवन् कायस्यायं व्ययस्वानुपलभमानोऽसमनुपश्यन् कस्य नामधेयं करिष्यामि बोधिसत्त्व इति। अपि तु खलु पुनर्भगवं स्तदपि नामधेयं न स्थितं न विष्ठितं नाऽधिष्ठितं। तत्कस्य हेतोरविद्यमानत्वात्तस्य नामधेयस्य। एवं तन्नामधेयं न स्थितं न विष्ठितं नाऽधिष्ठितं। मनसोऽहं भगवन्नायं व्ययस्त्र नोपलभे न समनुपश्यामि। सोऽहं भगवन् मनस आयं व्ययस्वाऽनुपलभमानोऽसमनुपश्यन् कस्य नामधेयं करिष्यामि बोधिसत्त्व इति। अपि तु खलु पुनर्भगवंस्तदपि नामधेयं न स्थितं न विष्ठितं नाऽधिष्ठितं। तत्कस्य हेतोरविद्यमानत्वात्तस्य नामधेयस्य एवं तन्नामधेयं न स्थितं न विष्ठितं नाऽधिष्ठितं।

रूपस्याहं भगवन्नायं व्ययस्त्र नोपलभे न समनुपश्यामि। सोऽहं भगवन् रूपस्यायं व्ययस्वाऽनुपलभमानोऽसमनुपश्यन्। तत्कस्य नामधेयं करिष्यामि बोधिसत्त्व इति। अपि तु खलु पुनर्भगवंस्तदपि रूपनामधेयं न स्थितं न विष्ठितं नाऽधिष्ठितं। तत्कस्य हेतोरविद्यमानत्वात्तस्य नामधेयस्य। एवं तन्नामधेयं न स्थितं न

विष्ठितं नाऽधिष्ठितं । शब्दस्याहं भगवन्नायं व्ययञ्च नोपलभे न समनुपश्यामि । सोऽहं भगवन् शब्दस्यायं व्ययञ्चाऽनुपलभमानोऽसमनुपश्यन् कस्य नामधेयं करिष्यामि बोधिसत्त्व इति । अपि तु खलु पुनर्भगवंस्तदपि नामधेयं न स्थितं न विष्ठितं नाऽधिष्ठितं । तत्कस्य हेतोरविद्यमानत्वात्तस्य नामधेयस्य । एवं तन्नामधेयं न स्थितं न विष्ठितं नाऽधिष्ठितं । गन्धस्याहं भगवन्नायं व्ययञ्च नोपलभे न समनुपश्यामि । सोऽहं भगवन् गन्धस्यायं व्ययञ्चानुपलभमानोऽसमनुपश्यन् कस्य नामधेयं करिष्यामि बोधिसत्त्व इति । अपि तु खलु पुनर्भगवंस्तदपि गन्धनामधेयं न स्थितं न विष्ठितं नाऽधिष्ठितं । तत्कस्य हेतोरविद्यमानत्वात्तस्य नामधेयस्य । एवं तन्नामधेयं न स्थितं न विष्ठितं नाऽधिष्ठितं । रसस्याहं भगवन्नायं व्ययञ्च नोपलभे न समनुपश्यामि । सोऽहं भगवन् रसस्यायं व्ययञ्चाऽनुपलभमानोऽसमनुपश्यन् कस्य नामधेयं करिष्यामि बोधिसत्त्व इति । अपि तु खलु पुनर्भगवंस्तदपि नामधेयं न स्थितं न विष्ठितं नाऽधिष्ठितं । तत्कस्य हेतोरविद्यमानत्वात्तस्य नामधेयस्य । एवं तन्नामधेयं न स्थितं न विष्ठितं नाऽधिष्ठितं । स्पर्शस्याऽहं भगवन्नायं व्ययञ्च नोपलभे न समनुपश्यामि । सोऽहं भगवन् स्पर्शस्यायं व्ययञ्चाऽनुपलभमानोऽसमनुपश्यन् । कस्य नामधेयं करिष्यामि बोधिसत्त्व इति । अपि तु खलु पुनर्भगवंस्तदपि स्पर्शनामधेयं न स्थितं न विष्ठितं नाऽधिष्ठितं । तत्कस्य हेतोरविद्यमानत्वात्तस्य नामधेयस्य । एवं तन्नामधेयं न स्थितं न विष्ठितं नाऽधिष्ठितं । धर्म्माणामहं भगवन्नायं व्ययञ्च नोपलभे न समनुपश्यामि । सोऽहं भगवन् धर्म्मा-

णामायं व्ययस्थाऽनुपलभमानोऽसमनुपश्यन्। कस्य नामधेयं करिष्यामि बोधिसत्त्व इति। अपि तु खलु पुनर्भगवंस्तदपि नामधेयं न स्थितं न विष्ठितं नाऽधिष्ठितं। तत्कस्य हेतोरविद्यमानत्वात्तस्य नामधेयस्य। एवं तन्नामधेयं न स्थितं न विष्ठितं नाऽधिष्ठितं।

चक्षुर्विज्ञानस्याऽहं भगवन्नायं व्ययस्थ नोपलभे न समनुपश्यामि। सोऽहं भगवन् चक्षुर्विज्ञानस्यायं व्ययस्थाऽनुपलभमानोऽसमनुपश्यन्। कस्य नामधेयं करिष्यामि बोधिसत्त्व इति। अपि तु खलु पुनर्भगवंस्तदपि चक्षुर्विज्ञान नामधेयं न स्थितं न विष्ठितं नाऽधिष्ठितं। तत्कस्य हेतोरविद्यमानत्वात्तस्य नामधेयस्य। एवं तन्नामधेयं न स्थितं न विष्ठितं नाऽधिष्ठितं। श्रोत्रविज्ञानस्याऽहं भगवन्नायं व्ययस्थ नोपलभे न समनुपश्यामि। सोऽहं भगवन् श्रोत्रविज्ञानस्यायं व्ययस्थाऽनुपलभमानोऽसमनुपश्यन्। कस्य नामधेयं करिष्यामि बोधिसत्त्व इति। अपि तु खलु पुनर्भगवंस्तदपि श्रोत्रविज्ञान नामधेयं न स्थितं न विष्ठितं नाऽधिष्ठितं। तत्कस्य हेतोरविद्यमानत्वात्तस्य नामधेयस्य। एवं तन्नामधेयं न स्थितं न विष्ठितं नाऽधिष्ठितं। घ्राणविज्ञानस्याऽहं भगवन्नायं व्ययस्थ नोपलभे न समनुपश्यामि। सोऽहं भगवन् घ्राणविज्ञानस्यायं व्ययस्थाऽनुपलभमानोऽसमनुपश्यन्। कस्य नामधेयं करिष्यामि बोधिसत्त्व इति। अपि तु खलु पुनर्भगवंस्तदपि घ्राणविज्ञाननामधेयं न स्थितं न विष्ठितं नाऽधिष्ठितं। तत्कस्य हेतोरविद्यमानत्वात्तस्य नामधेयस्य। एवं तन्नामधेयं न स्थितं न विष्ठितं नाऽधिष्ठितं। जिह्वाविज्ञानस्याऽहं भगवन्नायं व्ययस्थ नोपलभे न समनुपश्यामि। सोऽहं भगवन् जिह्वाविज्ञान-

स्यायं व्ययञ्चाऽनुपलभमानोऽसमनुपश्यन्। कस्य नामधेयं करिष्यामि बोधिसत्त्व इति। अपि तु खलु पुनर्भगवंस्तदपि जिह्वाविज्ञान नामधेयं न स्थितं न विष्ठितं नाऽधिष्ठितं। तत्कस्य हेतोरविद्यमानत्वात्तस्य नामधेयस्य। एवं तन्नामधेयं न स्थितं न विष्ठितं नाऽधिष्ठितं। कायविज्ञानस्याहं भगवन्नायं व्ययञ्च नोपलभे न समनुपश्यामि। सोऽहं भगवन् कायविज्ञानस्यायं व्ययञ्चाऽनुपलभमानोऽसमनुपश्यन् कस्य नामधेयं करिष्यामि बोधिसत्त्व इति। अपि तु खलु पुनर्भगवंस्तदपि कायविज्ञाननामधेयं न स्थितं नविष्ठितं नाऽधिष्ठितं। तत्कस्य हेतोरविद्यमानत्वात्तस्य नामधेयस्य। एवं तन्नामधेयं च स्थितं न विष्ठितं नाऽधिष्ठितं। मनोविज्ञानस्याहं भगवन्नायं व्ययञ्च नोपलभे न समनुपश्यामि। सोऽहं भगवन् मनोविज्ञानस्यायं व्ययञ्चाऽनुपलभमानोऽसमनु श्यन् कस्य नामधेयं करिष्यामि बोधिसत्त्व इति। अपि तु खलु पुनर्भगवंस्तदपि मनोविज्ञाननामधेयं न स्थितं न विष्ठितं नाऽधिष्ठितं। तत्कस्य हेतोरविद्यमानत्वात्तस्य नामधेयस्य। एवं तन्नामधेयं न स्थितं न विष्ठितं नाऽधिष्ठितं।

चक्षुः संस्पर्शस्याऽहं भगवन्नायं व्ययञ्च नोपलभे न समनुपश्यामि। सोऽहं भगवन् चक्षुः संस्पर्शस्यायं व्ययञ्चाऽनुपलभमानोऽसमनुपश्यन् कस्य नामधेयं करिष्यामि बोधिसत्त्व इति। अपि तु खलु पुनर्भगवंस्तदपि चक्षुः संस्पर्शनामधेयं न स्थितं न विष्ठितं नाऽधिष्ठितं। तत्कस्य हेतोरविद्यमानत्वात्तस्य नामधेयस्य। एवं तन्नामधेयं न स्थितं न विष्ठितं नाऽधिष्ठितं। श्रोत्रसंस्पर्शस्याऽहं भगवन्नायं व्ययञ्च

नोपलभे न समनुपश्यामि। सोऽहं भगवन् श्रोत्रसंस्पर्शस्यायं व्ययञ्चाऽनुपलभमानोऽसमनुपश्यन् कस्य नामधेयं करिष्यामि बोधिसत्त्व इति। अपि तु खलु पुनर्भगवंस्तदपि श्रोत्रसंस्पर्शनामधेयं न स्थितं न विष्ठितं नाऽधिष्ठितं। तत्कस्य हेतोरविद्यमानत्वात्तस्य नामधेयस्य। एवं तन्नामधेयं न स्थितं न विष्ठितं नाऽधिष्ठितं। घ्राणसंस्पर्शस्याऽहं भगवन्नायं व्ययञ्च नोपलभे न समनुपश्यामि। सोऽहं भगवन् घ्राणसंस्पर्शस्यायं व्ययञ्चाऽनुपलभमानोऽसमनुपश्यन् कस्य नामधेयं करिष्यामि बोधिसत्त्व इति। अपि तु खलु पुनर्भगवंस्तदपि घ्राणसंस्पर्शनामधेयं न स्थितं न विष्ठितं नाऽधिष्ठितं। तत्कस्य हेतोरविद्यमानत्वात्तस्य नामधेयस्य। एवं तन्नामधेयं न स्थितं न विष्ठितं नाऽधिष्ठितं। जिह्वासंस्पर्शस्याऽहं भगवन्नायं व्ययञ्च नोपलभे न समनुपश्यामि। सोऽहं भगवन् जिह्वासंस्पर्शस्यायं व्ययञ्चाऽनुपलभमानोऽसमनुपश्यन् कस्य नामधेयं करिष्यामि बोधिसत्त्व इति। अपि तु खलु पुनर्भगवंस्तदपि जिह्वासंस्पर्शनामधेयं न स्थितं न विष्ठितं नाऽधिष्ठितं। तत्कस्य हेतोरविद्यमानत्वात्तस्य नामधेयस्य। एवं तन्नामधेयं न स्थितं न विष्ठितं नाऽधिष्ठितं। कायसंस्पर्शस्याऽहं भगवन्नायं व्ययञ्च नोपलभे न समनुपश्यामि। सोऽहं भगवन् कायसंस्पर्शस्यायं व्ययञ्चाऽनुपलभमानोऽसमनुपश्यन् कस्य नामधेयं करिष्यामि बोधिसत्त्व इति। अपि तु खलु पुनर्भगवंस्तदपि कायसंस्पर्शनामधेयं न स्थितं न विष्ठितं नाऽधिष्ठितं। तत् कस्य हेतोरविद्यमानत्वात्तस्य नामधेयस्य। एवं तन्नामधेयं न स्थितं न विष्ठितं नाऽधिष्ठितं। मनःसंस्पर्शस्याऽहं भगवन्नायं व्ययञ्च नो-

पलभे न समनुपश्यामि । सोऽहं भगवन् मनः संस्पर्शस्यायं व्ययञ्चा-
ऽनुपलभमानोऽसमनुपश्यन् कस्य नामधेयं करिष्यामि बोधिसत्त्व
इति । अपि तु खलु पुनर्भगवंस्तदपि मनः संस्पर्शनामधेयं न स्थित
न विष्ठितं नाऽधिष्ठितं । तत्कस्य हेतोरविद्यमानत्वात्तस्य नामधेयस्य
एवं तन्नामधेयं न स्थितं न विष्ठितं नाऽधिष्ठितं ।

चक्षुः संस्पर्शजायावेदनायाऽहं भगवन्नायं व्ययञ्च नोपलभे न
समनुपश्यामि । सोऽहं भगवंश्चक्षुः संस्पर्शजावेदनाया आयं व्ययञ्चा-
ऽनुपलभमानोऽसमनुपश्यन् कस्य नामधेयं करिष्यामि बोधिसत्त्व-
इति । अपि तु खलु पुनर्भगवंस्तदपि चक्षुः संस्पर्शजा वेदनानाम-
धेयं न स्थितं न विष्ठितं नाऽधिष्ठितं । तत्कस्य हेतोरविद्यमान-
त्वात्तस्य नामधेयस्य । एवं तन्नामधेयं न स्थितं न विष्ठितं नाऽधि-
ष्ठितं । श्रोत्रसंस्पर्शजावेदनाया अहं भगवन्नायं व्ययञ्च नोपलभे न
समनुपश्यामि । सोऽहं भगवन् श्रोत्रसंस्पर्शजावेदनाया आयं व्ययञ्चा-
ऽनुपलभमानोऽसमनुपश्यन् कस्य नामधेयं करिष्यामि बोधिसत्त्व-
इति । अपि तु खलु पुनर्भगवंस्तदपि श्रोत्रसंस्पर्शजावेदनानामधेयं
न स्थितं न विष्ठितं नाऽधिष्ठितं । तत्कस्य हेतोरविद्यमानत्वा-
त्तस्य नामधेयस्य । एवं तन्नामधेयं न स्थितं न विष्ठितं नाधिष्ठितं ।
घ्राणसंस्पर्शजा वेदनाया अहं भगवन्नायं व्ययञ्च नोपलभे न समनु-
पश्यामि । सोऽहं भगवन् घ्राणसंस्पर्शजावेदनाया आयं व्ययञ्चा-
ऽनुपलभमानोऽसमनुपश्यन् कस्य नामधेयं करिष्यामि बोधिसत्त्व-
इति । अपि तु खलु पुनर्भगवंस्तदपि घ्राणसंस्पर्शजा वेदनानामधेयं
न स्थितं न विष्ठितं नाऽधिष्ठितं । तत्कस्य हेतोरविद्यमानत्वात्तस्य

नामधेयस्य। एवं तन्नामधेयं न स्थितं न विष्ठितं नाऽधिष्ठितं। जिह्वासंस्पर्शजावेदनायाश्चहं भगवन्नायं व्ययञ्च नोपलभे न समनुपश्यामि। सोऽहं भगवन् जिह्वासंस्पर्शजावेदनायाश्चायं व्ययञ्चानुपलभमानोऽसमनुपश्यन् कस्य नामधेयं करिष्यामि बोधिसत्त्व इति। अपि तु खलु पुनर्भगवंस्तदपि जिह्वासंस्पर्शजावेदनानामधेयं न स्थितं न विष्ठितं नाऽधिष्ठितं। तत्कस्य हेतोरविद्यमानत्वात्तस्य नामधेयस्य। एवं तन्नामधेयं न स्थितं न विष्ठितं नाऽधिष्ठितं। कायसंस्पर्शजाया वेदनाया अहं भगवन्नायं व्ययञ्च नोपलभे न समनुपश्यामि। सोऽहं भगवन् कायसंस्पर्शजावेदनाया आयं व्ययञ्चाऽनुपलभमानोऽसमनुपश्यन् कस्य नामधेयं करिष्यामि बोधिसत्त्व इति। अपि तु खलु पुनर्भगवंस्तदपि कायसंस्पर्शजावेदनानामधेयं न स्थितं न विष्ठितं नाऽधिष्ठितं। तत्कस्य हेतोरविद्यमानत्वात्तस्य नामधेयस्य। एवं तन्नामधेयं न स्थितं न विष्ठितं नाऽधिष्ठितं। तत्कस्य हेतोरविद्यमानत्वात्तस्य नामधेयस्य। एवं तन्नामधेयं न स्थितं न विष्ठितं नाऽधिष्ठितं। मनः संस्पर्शजावेदनायाश्चहं भगवन्नायं व्ययञ्च नोपलभे न समनुपश्यामि। सोऽहं भगवन् मनः संस्पर्शजावेदनाया आयं व्ययञ्चाऽनुपलभमानोऽसमनुपश्यन् कस्य नामधेयं करिष्यामि बोधिसत्त्व इति। अपि तु खलु पुनर्भगवंस्तदपि मनः संस्पर्शजावेदनानामधेयं न स्थितं न विष्ठितं नाऽधिष्ठितं। तत्कस्य हेतोरविद्यमानत्वात्तस्य नामधेयस्य। एवं तन्नामधेयं न स्थितं न विष्ठितं नाऽधिष्ठितं।

पृथिवीधातोरहं भगवन्नायं व्ययञ्च नोपलभे न समनुपश्यामि।

सोऽहं भगवन् पृथिवीधातोरायं व्ययञ्चाऽनुपलभमानोऽसमनुपश्यन् कस्य नामधेयं करिष्यामि बोधिसत्त्व इति। अपि तु खलु पुनर्भगवंस्तदपि पृथिवीधातुनामधेयं न स्थितं न विष्ठितं नाऽधिष्ठितं। तत्कस्य हेतोरविद्यमानत्वात्तस्य नामधेयस्य। एवं तन्नामधेयं न स्थितं न विष्ठितं नाऽधिष्ठितं। अब्धातोरहं भगवन्नायं व्ययञ्च नोपलभे न समनुपश्यामि। सोऽहं भगवन्नब्धातोरायं व्ययञ्चाऽनुपलभमानोऽसमनुपश्यन् कस्य नामधेयं करिष्यामि बोधिसत्त्व इति। अपि तु खलु पुनर्भगवंस्तदपि अब्धातुनामधेयं न स्थितं न विष्ठितं नाऽधिष्ठितं। तत्कस्य हेतोरविद्यमानत्वात्तस्य नामधेयस्य। एवं तन्नामधेयं न स्थितं न विष्ठितं नाऽधिष्ठितं। तेजोधातोरहं भगवन्नायं व्ययञ्च नोपलभे न समनुपश्यामि। सोऽहं भगवंस्तेजोधातोरायं व्ययञ्चानुपलभमानोऽसमनुपश्यन् कस्य नामधेयं करिष्यामि बोधिसत्त्व इति। अपि तु खलु पुनर्भगवंस्तदपि तेजोधातुनामधेयं न स्थितं न विष्ठितं नाऽधिष्ठितं। तत्कस्य हेतोरविद्यमानत्वात्तस्य नामधेयस्य। एवं तन्नामधेयं न स्थितं न विष्ठितं नाऽधिष्ठितं। वायुधातोरहं भगवन्नायं व्ययञ्च नोपलभे न समनुपश्यामि। सोऽहं भगवन् वायुधातोरायं व्ययञ्चाऽनुपलभमानोऽसमनुपश्यन् कस्य नामधेयं करिष्यामि बोधिसत्त्व इति। अपि तु खलु पुनर्भगवंस्तदपि वायुधातुनामधेयं न स्थितं न विष्ठितं नाऽधिष्ठितं। तत्कस्य हेतोरविद्यमानत्वात्तस्य नामधेयस्य। एवं तन्नामधेयं न स्थितं न विष्ठितं नाऽधिष्ठितं। आकाशधातोरहं भगवन्नायं व्ययञ्च नोपलभे न समनुपश्यामि। सोऽहं भगवन्नाकाशधा-

तोरायं व्ययस्वाऽनुपलभमानोऽसमनुपश्यन् कस्य नामधेयं करिष्यामि बोधिसत्त्व इति। अपि तु खलु पुनर्भगवंस्तद्प्याकाशधातुनामधेयं न स्थितं न विष्ठितं नाऽधिष्ठितं। तत्कस्य हेतोरविद्यमानत्वात्तस्य नामधेयस्य। एवं तन्नामधेयं न स्थितं न विष्ठितं नाऽधिष्ठितं।

विज्ञानधातोरहं भगवन्नायं व्ययस्व नोपलभे न समनुपश्यामि। सोऽहं भगवन् विज्ञानधातोरायं व्ययस्वाऽनुपलभमानोऽसमनुपश्यन् कस्य नामधेयं करिष्यामि बोधिसत्त्व इति। अपि तु खलु पुनर्भगवंस्तदपि विज्ञानधातुनामधेयं न स्थितं न विष्ठितं नाऽधिष्ठितं। तत्कस्य हेतोरविद्यमानत्वात्तस्य नामधेयस्य। एवं तन्नामधेयं न स्थितं न विष्ठितं नाऽधिष्ठितं। अविद्याया अहं भगवन्नायं व्ययस्व नोपलभे न समनुपश्यामि। सोऽहं भगवन्नविद्याया आयं व्ययस्वाऽनुपलभमानोऽसमनुपश्यन् कस्य नामधेयं करिष्यामि बोधिसत्त्व-इति। अपि तु खलु पुनर्भगवंस्तद्प्यविद्यानामधेयं न स्थितं न विष्ठितं नाऽधिष्ठितं। तत्कस्य हेतोरविद्यमानत्वात्तस्य नामधेयस्य। एवं तन्नामधेयं न स्थितं न विष्ठितं नाऽधिष्ठितं। संस्काराणामहं भगवन्नायं व्ययस्व नोपलभे न समनुपश्यामि। सोऽहं भगवन् संस्काराणामायं व्ययस्वाऽनुपलभमानोऽसमनुपश्यन् कस्य नामधेयं करिष्यामि बोधिसत्त्वइति। अपि तु खलु पुनर्भगवंस्तदपि संस्कारनामधेयं न स्थितं न विष्ठितं नाऽधिष्ठितं। तत्कस्य हेतोर-विद्यमानत्वात्तस्य नामधेयस्य। एवं तन्नामधेयं न स्थितं न विष्ठितं नाऽधिष्ठितं।

विज्ञानस्याऽहं भगवन्नायं व्ययस्व नोपलभे न समनुपश्यामि।

सोऽहं भगवन् विज्ञानस्यायं व्ययञ्चाऽनुपलभमानोऽसमनु
कस्य नामधेयं करिष्यामि बोधिसत्त्व इति। अपि तु
पुनर्भगवंस्तदपि विज्ञाननामधेयं न स्थितं न विष्ठितं नाऽधि
तत्कस्य हेतोरविद्यमानत्वात्तस्य नामधेयस्य। एवं तन्नामधे
स्थितं न विष्ठितं नाऽधिष्ठितं। नामरूपस्याहं भगवन्नायं व्य
नोपलभे न समनुपश्यामि। सोऽहं भगवन् नामरूपस्यायं व्यय
ऽनुपलभमानोऽसमनुपश्यन् कस्य नामधेयं करिष्यामि बोधि
इति। अपि तु खलु पुनर्भगवंस्तदपि नामरूपनामधेयं न
न विष्ठितं नाऽधिष्ठितं। तत्कस्य हेतोरविद्यमानत्वात्तस्य नाम
यस्य। एवं तन्नामधेयं न स्थितं न विष्ठितं नाऽधिष्ठितं। षड़ा
तनस्याऽहं भगवन्नायं व्ययञ्च नोपलभे न समनुपश्यामि। सो
भगवन् षड़ायतनस्यायं व्ययञ्चाऽनुपलभमानोऽसमनुपश्यन् क
नामधेयं करिष्यामि बोधिसत्त्व इति। अपि तु खलु पुनर्भगवंस्त
दपि षडायतन नामधेयं न स्थितं न विष्ठितं नाऽधिष्ठितं। तत्
कस्य हेतोरविद्यमानत्वात्तस्य नामधेयस्य। एवं तन्नामधेयं न स्थि
न विष्ठितं नाऽधिष्ठितं। स्पर्शस्याऽहं भगवन्नायं व्ययञ्च नोपलभे
समनुपश्यामि। सोऽहं भगवन् स्पर्शस्यायं व्ययञ्चाऽनुपलभमानोऽस-
मनुपश्यन् कस्य नामधेयं करिष्यामि बोधिसत्त्व इति। अपि तु
खलु पुनर्भगवंस्तदपि स्पर्शनामधेयं न स्थितं न विष्ठितं नाऽधिष्ठितं।
तत्कस्य हेतोरविद्यमानत्वात्तस्य नामधेयस्य। एवं तन्नामधेयं न
स्थितं न विष्ठितं नाऽधिष्ठितं। वेदनायाऽहं भगवन्नायं व्ययञ्च
नोपलभे न समनुपश्यामि। सोऽहं भगवन् वेदनाया आयं व्ययञ्चा-

ऽनुपलभमानोऽसमनुपश्यन्
इति । अपि तु खलु पुन
विष्ठितं नाऽधिष्ठितं ।
यस्य । एवं तन्नामधेयं न
अहं भगवन्नायं व्ययस्य नं
स्तृष्णायाश्चायं व्ययस्याऽ
करिष्यामि बोधिसत्त्व
तृष्णानामधेयं न स्थितं
विद्यमानत्वात्तस्य नामधेय
नाऽधिष्ठितं ।

उपादानस्याहं भगव
सोऽहं भगवन्नुपादानस्या
नामधेयं करिष्यामि बो
स्तदपि उपादाननामधेयं
कस्य हेतोरविद्यमानत्वा
न विष्ठितं नाऽधिष्ठितं
समनुपश्यामि । सोऽहं भ
नुपश्यन् कस्य नामधेयं

रणस्यायं व्ययञ्चाऽनुपलभमानोऽसमनुपश्यन् कस्य नामधेयं करिष्यामि वोधिसत्त्व इति । अपि तु खलु पुनर्भगवंस्तदपि जरामरण नामधेयं न स्थितं न विष्ठितं नाऽधिष्ठितं । तत्कस्य हेतोरविद्यमानत्वात्तस्य नामधेयस्य । एवं तन्नामधेयं न स्थितं न विष्ठितं नाऽधिष्ठितं ।

अविद्यानिरोधस्याहं भगवन्नायं व्ययञ्च नोपलभे न समनुपश्यामि । सोऽहं भगवन्नविद्यानिरोधस्यायं व्ययञ्चाऽनुपलभमानोऽसमनुपश्यन् कस्य नामधेयं करिष्यामि वोधिसत्त्व इति । अपि तु खलु पुनर्भगवंस्तदपि अविद्यानिरोध नामधेयं न स्थितं न विष्ठितं नाऽधिष्ठितं । तत्कस्य हेतोरविद्यमानत्वात्तस्य नामधेयस्य । एवं तन्नामधेयं न स्थितं न विष्ठितं नाऽधिष्ठितं । संस्कारनिरोधस्याहं भगवन्नायं व्ययञ्च नोपलभे न समनुपश्यामि । सोऽहं भगवन् संस्कारनिरोधस्यायं व्ययञ्चाऽनुपलभमानोऽसमनुपश्यन् कस्य नामधेयं करिष्यामि वोधिसत्त्व इति । अपि तु खलु पुनर्भगवंस्तदपि संस्कारनिरोधनामधेयं न स्थितं न विष्ठितं नाऽधिष्ठितं । तत्कस्य हेतोरविद्यमानत्वात्तस्य नामधेयस्य । एवं तन्नामधेयं न स्थितं न विष्ठितं नाऽधिष्ठितं । विज्ञाननिरोधस्याहं भगवन्नायं व्ययञ्च नोपलभे न समनुपश्यामि । सोऽहं भगवन् विज्ञाननिरोधस्यायं व्ययञ्चाऽनुपलभमानोऽसमनुपश्यन् कस्य नामधेयं करिष्यामि वोधिसत्त्व इति । अपि तु खलु पुनर्भगवंस्तदपि विज्ञाननिरोधनामधेयं न स्थितं न विष्ठितं नाऽधिष्ठितं । तत्कस्य हेतोरविद्यमानत्वात्तस्य नामधेयस्य । एवं तन्नामधेयं न स्थितं न

विष्ठितं नाऽधिष्ठितं। नामरूपनिरोधस्याहं भगवन्नायं व्ययञ्च नोपलभे न समनुपश्यामि। सोऽहं भगवन् नामरूपनिरोधस्यायं व्ययञ्चाऽनुपलभमानोऽसमनुपश्यन् कस्य नामधेयं करिष्यामि बोधिसत्त्व इति। अपि तु खलु पुनर्भगवंस्तदपि नामरूपनिरोधनामधेयं न स्थितं न विष्ठितं नाऽधिष्ठितं। तत्कस्य हेतोरविद्यमानत्वात्तस्य नामधेयस्य। एवं तन्नामधेयं न स्थितं न विष्ठितं नाऽधिष्ठितं। षडायतननिरोधस्याहं भगवन्नायं व्ययञ्च नोपलभे न समनुपश्यामि। सोऽहं भगवन् षडायतन निरोधस्यायं व्ययञ्चाऽनुपलभमानोऽसमनुपश्यन् कस्य नामधेयं करिष्यामि बोधिसत्त्व इति। अपि तु खलु पुनर्भगवंस्तदपि षडायतननिरोधनामधेयं न स्थितं न विष्ठितं नाऽधिष्ठितं। तत्कस्य हेतोरविद्यमानत्वात्तस्य नामधेयस्य। एवं तन्नामधेयं न स्थितं न विष्ठितं नाऽधिष्ठितं। स्पर्शनिरोधस्याहं भगवन्नायं व्ययञ्च नोपलभे न समनुपश्यामि। सोऽहं भगवन् स्पर्शनिरोधस्यायं व्ययञ्चाऽनुपलभमानोऽसमनुपश्यन् कस्य नामधेयं करिष्यामि बोधिसत्त्व इति। अपि तु खलु पुनर्भगवंस्तदपि स्पर्शनिरोधनामधेयं न स्थितं न विष्ठितं नाऽधिष्ठितं। तत्कस्य हेतोरविद्यमानत्वात्तस्य नामधेयस्य। एवं तन्नामधेयं न स्थितं न विष्ठितं नाऽधिष्ठितं। वेदनानिरोधस्याहं भगवन्नायं व्ययञ्च नोपलभे न समनुपश्यामि। सोऽहं भगवन् वेदनानिरोधस्यायं व्ययञ्चाऽनुपलभमानोऽसमनुपश्यन् कस्य नामधेयं करिष्यामि बोधिसत्त्व इति। अपि तु खलु पुनर्भगवंस्तदपि वेदनानिरोधनामधेयं न स्थितं न विष्ठितं नाऽधिष्ठितं। तत्कस्य हेतोरविद्यमानत्वात्तस्य नाम-

धेयस्य । एवं तन्नामधेयं न स्थितं न विष्ठितं नाऽधिष्ठितं । तृष्णा-
निरोधस्याहं भगवन्नायं व्ययञ्च नोपलभे न समनुपश्यामि । सोऽहं
भगवन् तृष्णानिरोधस्यायं व्ययञ्चानुपलभमानोऽसमनुपश्यन् कस्य
नामधेयं करिष्यामि बोधिसत्त्व इति । अपि तु खलु पुनर्भगवंस्त-
दपि तृष्णानिरोधनामधेयं न स्थितं न विष्ठितं नाऽधिष्ठितं । तत्
कस्य हेतोरविद्यमानत्वात्तस्य नामधेयस्य । एवं तन्नामधेयं न
स्थितं न विष्ठितं नाऽधिष्ठितं । उपादाननिरोधस्याहं भगवन्नायं
व्ययञ्च नोपलभे न समनुपश्यामि । सोऽहं भगवन्नुपादाननिरोध-
स्यायं व्ययञ्चाऽनुपलभमानोऽसमनुपश्यन् कस्य नामधेयं करिष्यामि
बोधिसत्त्व इति । अपि तु खलु पुनर्भगवंस्तदप्युपादाननिरोधना-
मधेयं न स्थितं न विष्ठितं नाऽधिष्ठितं । तत्कस्य हेतोरविद्यमा-
नत्वात्तस्य नामधेयस्य । एवं तन्नामधेयं न स्थितं न विष्ठितं नाऽ-
धिष्ठितं । भवनिरोधस्याऽहं भगवन्नायं व्ययञ्च नोपलभे न समनु-
पश्यामि । सोऽहं भगवन् भवनिरोधस्यायं व्ययञ्चाऽनुपलभमानोऽसम-
नुपश्यन् कस्य नामधेयं करिष्यामि बोधिसत्त्व इति । अपि तु
खलु पुनर्भगवंस्तदपि भवनिरोधनामधेयं न स्थितं न विष्ठितं
नाऽधिष्ठितं । तत्कस्य हेतोरविद्यमानत्वात्तस्य नामधेयस्य । एवं
तन्नामधेयं न स्थितं न विष्ठितं नाऽधिष्ठितं । जातिनिरोधस्याऽहं
भगवन्नायं व्ययञ्च नोपलभे न समनुपश्यामि । सोऽहं भगवन्
जातिनिरोधस्यायं व्ययञ्चाऽनुपलभमानोऽसमनुपश्यन् कस्य नामधेयं
करिष्यामि बोधिसत्त्वइति । अपि तु खलु पुनर्भगवंस्तदपि
जातिनिरोधनामधेयं न स्थितं न विष्ठितं नाऽधिष्ठितं । तत्कस्य

हेतोरविद्यमानत्वात्तस्य नामधेयस्य । एवं तन्नामधेयं न स्थितं न
विस्थितं नाऽधिष्ठितं । जरामरणनिरोधस्याहं भगवन्नायं व्ययं
नोपलभे न समनुपश्यामि । सोऽहं भगवन् जरामरणनिरोधस्यायं
व्ययस्यानुपलभमानोऽसमनुपश्यन् कस्य नामधेयं करिष्यामि बोधि-
सत्त्व इति । अपि तु खलु पुनर्भगवंस्तदपि जरामरणनिरोधनाम-
धेयं न स्थितं न विस्थितं नाऽधिष्ठितं । तत्कस्य हेतोरवि-
द्यमानत्वात्तस्य नामधेयस्य । एवं तन्नामधेयं न स्थितं न विस्थितं
नाऽधिष्ठितं ।

रागस्याहं भगवन्नायं व्ययं नोपलभे न समनुपश्यामि । सोऽहं भगवन् रागस्यायं व्ययस्यानुपलभमानोऽसमनुपश्यन् कस्य नामधेयं करिष्यामि बोधिसत्त्व इति । अपि तु खलु पुनर्भगवंस्तदपि राग-नामधेयं न स्थितं न विस्थितं नाऽधिष्ठितं । तत्कस्य हेतोरविद्यमानत्वात्तस्य नामधेयस्य । एवं तन्नामधेयं न स्थितं न विस्थितं नाऽधिष्ठितं । द्वेषस्याहं भगवन्नायं व्ययं नोपलभे न समनुपश्यामि । सोऽहं भगवन् द्वेषस्यायं व्ययस्यानुपलभमानोऽसमनुपश्यन् कस्य नामधेयं करिष्यामि बोधिसत्त्व इति । अपि तु खलु पुनर्भगवंस्तदपि द्वेषनामधेयं न स्थितं न विस्थितं नाऽधिष्ठितं । तत्कस्य हेतोरविद्यमानत्वात्तस्य नामधेयस्य । एवं तन्नामधेयं न स्थितं न विस्थितं नाऽधिष्ठितं । मोहस्याहं भगवन्नायं व्ययं नोपलभे न समनुपश्यामि । सोऽहं भगवन् मोहस्यायं व्ययस्यानुपलभमानोऽसमनुपश्यन् कस्य नामधेयं करिष्यामि बोधिसत्त्व इति । अपि तु खलु पुनर्भगवंस्तदपि मोहनामधेयं न स्थितं न विस्थितं नाऽधि-

ष्ठितं तत्कस्य हेतोः अविद्यमानत्वात्तस्य नामधेयस्य। एवं तन्नामधेयं
न स्थितं न विष्ठितं नाऽधिष्ठितं।

पुद्गलानामहं भगवन्नायं व्ययञ्च नोपलभे न समनुपश्यामि।
सोऽहं भगवन् पुद्गलानामायं व्ययञ्चानुपलभमानोऽसमनुपश्यन्
कस्य नामधेयं करिष्यामि बोधिसत्त्व इति। अपि तु खलु पुनर्भ-
गवंस्तदपि पुद्गलनामधेयं न स्थितं न विष्ठितं नाऽधिष्ठितं।
तत्कस्य हेतोरविद्यमानत्वात्तस्य नामधेयस्य। एवं तन्नामधेयं न
स्थितं न विष्ठितं नाऽधिष्ठितं। आत्मनोऽहं भगवन्नायं व्ययञ्च
नोपलभे न समनुपश्यामि। सोऽहं भगवन्नात्मन आयं व्ययञ्चाऽनुप-
लभमानोऽसमनुपश्यन् कस्य नामधेयं करिष्यामि बोधिसत्त्व इति।
अपि तु खलु पुनर्भगवंस्तदप्यात्मनामधेयं न स्थितं न विष्ठितं
नाऽधिष्ठितं। तत्कस्य हेतोरविद्यमानत्वात्तस्य नामधेयस्य। एवं
तन्नामधेयं न स्थितं न विष्ठितं नाऽधिष्ठितं। सत्त्वस्याऽहं भगव-
न्नायं व्ययञ्च नोपलभे न समनुपश्यामि। सोऽहं भगवन् सत्त्वस्यायं
व्ययञ्चाऽनुपलभमानोऽसमनुपश्यन् कस्य नामधेयं करिष्यामि बोधि-
सत्त्व इति। अपि तु खलु पुनर्भगवंस्तदपि सत्त्वनामधेयं न स्थितं
न विष्ठितं नाऽधिष्ठितं। तत्कस्य हेतोरविद्यमानत्वात्तस्य नाम-
धेयस्य। एवं तन्नामधेयं न स्थितं न विष्ठितं नाऽधिष्ठितं। जीवस्या-
ऽहं भगवन्नायं व्ययञ्च नोपलभे न समनुपश्यामि। सोऽहं भगवन्
जीवस्यायं व्ययञ्चाऽनुपलभमानोऽसमनुपश्यन् कस्य नामधेयं करिष्यामि
बोधिसत्त्व इति। अपि तु खलु पुनर्भगवंस्तदपि जीवनामधेयं
न स्थितं न विष्ठितं नाधिष्ठितं। तत्कस्य हेतोरविद्यमानत्वात्तस्य

नामधेयस्य। एवं तन्नामधेयं न स्थितं न विष्ठितं नाऽधिष्ठितं। जन्तोरहं भगवन्नायं व्ययञ्च नोपलभे न समनुपश्यामि। सोऽहं भगवन् जन्तोरायं व्ययञ्चाऽनुपलभमानोऽसमनुपश्यन् कस्य नामधेयं करिष्यामि बोधिसत्त्वइति। अपि तु खलु पुनर्भगवंस्तदपि जन्तु नामधेयं न स्थितं न विष्ठितं नाऽधिष्ठितं। तत्कस्य हेतोरविद्यमानत्वात्तस्य नामधेयस्य। एवं तन्नामधेयं न स्थितं न विष्ठितं नाऽधिष्ठितं। पोषस्याऽहं भगवन्नायं व्ययञ्च नोपलभे न समनुपश्यामि। सोऽहं भगवन् पोषस्यायं व्ययञ्चाऽनुपलभमानोऽसमनुपश्यन् कस्य नामधेयं करिष्यामि बोधिसत्त्वइति। अपि तु खलु पुनर्भगवंस्तदपि पोष नामधेयं न स्थितं न विष्ठितं नाऽधिष्ठितं। तत्कस्य हेतोरविद्यमानत्वात्तस्य नामधेयस्य। एवं तन्नामधेयं न स्थितं न विष्ठितं नाऽधिष्ठितं। पुरुषस्याऽहं भगवन्नायं व्ययञ्च नोपलभे न समनुपश्यामि। सोऽहं भगवन् पुरुषस्यायं व्ययञ्चाऽनुपलभमानोऽसमनुपश्यन् कस्य नामधेयं करिष्यामि बोधिसत्त्वइति। अपि तु खलु पुनर्भगवंस्तदपि पुरुष नामधेयं न स्थितं न विष्ठितं नाधिष्ठितं। तत्कस्य हेतोरविद्यमानत्वात्तस्य नामधेयस्य। एवं तन्नामधेयं न स्थितं न विष्ठितं नाऽधिष्ठितं। पुद्गलस्याऽहं भगवन्नायं व्ययञ्च नोपलभे न समनुपश्यामि। सोऽहं भगवन् पुद्गलस्यायं व्ययञ्चाऽनुपलभमानोऽसमनुपश्यन् कस्य नामधेयं करिष्यामि बोधिसत्त्वइति। अपि तु खलु पुनर्भगवंस्तदपि पुद्गल नामधेयं न स्थितं न विष्ठितं नाऽधिष्ठितं। तत्कस्य हेतोरविद्यमानत्वात्तस्य नामधेयस्य। एवं तन्नामधेयं न स्थितं न विष्ठितं नाऽधिष्ठितं।

मनुजस्याऽहं भगवन्नायं व्ययञ्च नोपलभे न समनुपश्यामि। सं
भगवन् मनुजस्यायं व्ययञ्चाऽनुपलभमानोऽसमनुपश्यन् कस्य नाम
करिष्यामि बोधिसत्त्वइति। अपि तु खलु पुनर्भगवंस्तदपि म
नामधेयं न स्थितं न विष्ठितं नाऽधिष्ठितं। तत्कस्य हेतोरवि
मानत्वात्तस्य नामधेयस्य। एवं तन्नामधेयं न स्थितं न वि
नाऽधिष्ठितं।

मानवस्याऽहं भगवन्नायं व्ययञ्च नोपलभे न समनुपश्यामि
सोऽहं भगवन् मानवस्यायं व्ययञ्चाऽनुपलभमानोऽसमनुपश्यन्
नामधेयं करिष्यामि बोधिसत्त्वइति। अपि तु खलु पुनर्भगवंस्त
मानव नामधेयं न स्थितं न विष्ठितं नाऽधिष्ठितं। तत्कस्य हे
रविद्यमानत्वात्तस्य नामधेयस्य। एवं तन्नामधेयं न स्थितं न वि
नाऽधिष्ठितं। कारकस्याऽहं भगवन्नायं व्ययञ्च नोपलभे न स
पश्यामि। सोऽहं भगवन् कारकस्यायं व्ययञ्चानुपलभमानोऽसम
पश्यन् कस्य नामधेयं करिष्यामि बोधिसत्त्वइति। अपि तु
पुनर्भगवंस्तदपि कारक नामधेयं न स्थितं न विष्ठितं नाऽधिष्ठि
तत्कस्य हेतोरविद्यमानत्वात्तस्य नामधेयस्य। एवं तन्नामधेयं
स्थितं न विष्ठितं नाऽधिष्ठितं। वेदकस्याऽहं भगवन्नायं व्य
नोपलभे न समनुपश्यामि। सोऽहं भगवन् वेदकस्यायं व्ययञ्चाऽनु
लभमानोऽसमनुपश्यन् कस्य नामधेयं करिष्यामि बोधिसत्त्वइ
अपि तु खलु पुनर्भगवंस्तदपि वेदक नामधेयं न स्थितं न वि
नाऽधिष्ठितं। तत्कस्य हेतोरविद्यमानत्वात्तस्य नामधेयस्य।
तन्नामधेयं न स्थितं न विष्ठितं नाऽधिष्ठितं।

ज्ञानकस्याऽहं भगवन्नायं व्ययञ्च नोपलभे न समनुपश्यामि। सोऽहं भगवन् ज्ञानकस्यायं व्ययञ्चाऽनुपलभमानोऽसमनुपश्यन् क नामधेयं करिष्यामि बोधिसत्त्वइति। अपि तु खलु पुनर्भगवंस्तद् ज्ञानक नामधेयं न स्थितं न विष्ठितं नाऽधिष्ठितं। तत्कस्य हेतो रविद्यमानत्वात्तस्य नामधेयस्य। एवं तन्नामधेयं न स्थितं न विष्ठि नाधिष्ठितं। पश्यकस्याऽहं भगवन्नायं व्ययञ्च नोपलभे न सम पश्यामि। सोऽहं भगवन् पश्यकस्यायं व्ययञ्चाऽनुपलभमानोऽसम पश्यन् कस्य नामधेयं करिष्यामि बोधिसत्त्वइति। अपि तु ख पुनर्भगवंस्तदपि पश्यक नामधेयं न स्थितं न विष्ठितं नाऽधिष्ठितं तत्कस्य हेतोरविद्यमानत्वात्तस्य नामधेयस्य। एवं तन्नामधेयं स्थितं न विष्ठितं नाऽधिष्ठितं।

दानपारमिताया अहं भगवन्नायं व्ययञ्च नोपलभे न सम पश्यामि। सोऽहं भगवन् दानपारमिताया आयं व्ययञ्चाऽनुपल मानोऽसमनुपश्यन् कस्य नामधेयं करिष्यामि बोधिसत्त्वइति। अ तु खलु पुनर्भगवंस्तदपि दानपारमिता नामधेयं न स्थितं विष्ठितं नाऽधिष्ठितं। तत्कस्य हेतोरविद्यमानत्वात्तस्य नामधेयस एवं तन्नामधेयं न स्थितं न विष्ठितं नाऽधिष्ठितं। शीलपारमिता अहं भगवन्नायं व्ययञ्च नोपलभे न समनुपश्यामि। सोऽहं भग शीलपारमिताया आयं व्यायञ्चाऽनुपलभमानोऽसमनुपश्यन् क नामधेयं करिष्यामि बोधिसत्त्वइति। अपि तु खलु पुनर्भगवंस्तद् शीलपारमिता नामधेयं न स्थितं न विष्ठितं नाऽधिष्ठितं। तत्क हेतोरविद्यमानत्वात्तस्य नामधेयस्य। एवं तन्नामधेयं न स्थि

न विष्ठितं नाऽधिष्ठितं। क्षान्तिपारमिताया अहं भगवन्नायं व्ययञ्च नोपलभे न समनुपश्यामि। सोऽहं भगवन् क्षान्तिपारमिताया आयं व्ययञ्चाऽनुपलभमानोऽसमनुपश्यन् कस्य नामधेयं करिष्यामि बोधिसत्त्व इति। अपि तु खलु पुनर्भगवंस्तदपि क्षान्तिपारमिता नामधेयं न स्थितं न विष्ठितं नाऽधिष्ठितं। तत् कस्य हेतोरविद्यमानत्वात्तस्य नामधेयस्य। एवं तन्नामधेयं न स्थितं न विष्ठितं नाऽधिष्ठितं। वीर्य्यपारमिताया अहं भगवन्नायं व्ययञ्च नोपलभे न समनुपश्यामि। सोऽहं भगवन् वीर्य्यपारमिताया आयं व्ययञ्चाऽनुपलभमानोऽसमनुपश्यन् कस्य नामधेयं करिष्यामि बोधिसत्त्व इति। अपि तु खलु पुनर्भगवंस्तदपि वीर्य्यपारमिता नामधेयं न स्थितं न विष्ठितं नाऽधिष्ठितं। तत् कस्य हेतोरविद्यमानत्वात्तस्य नामधेयस्य। एवं तन्नामधेयं न स्थितं न विष्ठितं नाऽधिष्ठितं। ध्यानपारमिताया अहं भगवन्नायं व्ययञ्च नोपलभे न समनुपश्यामि। सोऽहं भगवन् ध्यानपारमिताया आयं व्ययञ्चाऽनुपलभमानोऽसमनुपश्यन् कस्य नामधेयं करिष्यामि बोधिसत्त्व इति। अपि तु खलु पुनर्भगवंस्तदपि ध्यानपारमिता नामधेयं न स्थितं न विष्ठितं नाऽधिष्ठितं। तत् कस्य हेतोरविद्यमानत्वात्तस्य नामधेयस्य। एवं तन्नामधेयं न स्थितं न विष्ठितं नाऽधिष्ठितं। प्रज्ञापारमिताया अहं भगवन्नायं व्ययञ्च नोपलभे न समनुपश्यामि। सोऽहं भगवन् प्रज्ञापारमिताया आयं व्ययञ्चाऽनुपलभमानोऽसमनुपश्यन् कस्य नामधेयं करिष्यामि बोधिसत्त्व इति। अपि तु खलु पुनस्तदपि प्रज्ञापारमिता नामधेयं न स्थितं

न विष्ठितं नाऽधिष्ठितं। तत् कस्य हेतोरविद्यमानत्वात्तस्य नामधेयस्य। एवं तन्नामधेयं न स्थितं न विष्ठितं नाऽधिष्ठितं।

अध्यात्मशून्यताया अहं भगवन्नायं व्ययञ्च नोपलभे न समनुपश्यामि। सोऽहं भगवन्नध्यात्मशून्यताया आयं व्ययञ्च नोपलभे न समनुपश्यामि। सोऽहं भगवन्नध्यात्मशून्यताया आयं व्ययञ्चाऽनुपलभमानोऽसमनुपश्यन् कस्य नामधेयं करिष्यामि बोधिसत्त्व इति। अपि तु खलु पुनर्भगवंस्तदप्यध्यात्मशून्यतानामधेयं न स्थितं न विष्ठितं नाऽधिष्ठितं। तत् कस्य हेतोरविद्यमानत्वात्तस्य नामधेयस्य। एवं तन्नामधेयं न स्थितं न विष्ठितं नाऽधिष्ठितं। वहिर्द्धाशून्यताया अहं भगवन्नायं व्ययञ्च नोपलभे न समनुपश्यामि। सोऽहं भगवन् वहिर्द्धाशून्यताया आयं व्ययञ्चाऽनुपलभमानोऽसमनुपश्यन् कस्य नामधेयं करिष्यामि बोधिसत्त्व इति। अपि तु खलु पुनर्भगवंस्तदपि वहिर्द्धाशून्यता नामधेयं न स्थितं न विष्ठितं नाऽधिष्ठित। तत् कस्य हेतोरविद्यमानत्वात्तस्य नामधेयस्य। एवं तन्नामधेयं न स्थितं न विष्ठितं नाऽधिष्ठितं। अध्यात्मवहिर्द्धाशून्यताया अहं भगवन्नायं व्ययञ्च नोपलभे न समनुपश्यामि। सोऽहं भगवन्नध्यात्मवहिर्द्धाशून्यताया आयं व्ययञ्चाऽनुपलभमानोऽसमनुपश्यन् कस्य नामधेयं करिष्यामि बोधिसत्त्व इति। अपि तु खलु पुनर्भगवंस्तदप्यध्यात्मवहिर्द्धाशून्यता नामधेयं न स्थितं न विष्ठितं नाऽधिष्ठितं। तत् कस्य हेतोरविद्यमानत्वात्तस्य नामधेयस्य। एवं तन्नामधेयं न स्थितं न विष्ठितं नाऽधिष्ठितं। शून्यताशून्यताया अहं भगवन्नायं व्ययञ्च

नोपलभे न समनुपश्यामि। सोऽहं भगवन् शून्यताशून्यताया आयं व्ययञ्चाऽनुपलभमानोऽसमनुपश्यन् कस्य नामधेयं करिष्यामि बोधिसत्त्व इति। अपि तु खलु पुनर्भगवंस्तदपि शून्यताशून्यता नामधेयं न स्थितं न विष्ठितं नाऽधिष्ठितं। तत्कस्य हेतोरविद्यमानत्वात्तस्य नामधेयस्य। एवं तन्नामधेयं न स्थितं न विष्ठितं नाऽधिष्ठितं। महाशून्यताया अहं भगवन्नायं व्ययञ्च नोपलभे न समनुपश्यामि। सोऽहं भगवन् महाशून्यताया आयं व्ययञ्चाऽनुपलभमानोऽसमनुपश्यन् कस्य नामधेयं करिष्यामि बोधिसत्त्वइति। अपि तु खलु पुनर्भगवंस्तदपि महाशून्यता नामधेयं न स्थितं न विष्ठितं नाऽधिष्ठितं। तत्कस्य हेतोरविद्यमानत्वात्तस्य नामधेयस्य। एवं तन्नामधेयं न स्थितं न विष्ठितं नाऽधिष्ठितं। परमाऽर्थशून्यताया अहं भगवन्नायं व्ययञ्च नोपलभे न समनुपश्यामि। सोऽहं भगवन् परमाऽर्थशून्यताया आयं व्ययञ्चाऽनुपलभमानोऽसमनुपश्यन् कस्य नामधेयं करिष्यामि बोधिसत्त्व इति। अपि तु खलु पुनर्भगवंस्तदपिपरमाऽर्थशून्यताया नामधेयं न स्थितं न विष्ठितं नाऽधिष्ठितं। तत्कस्य हेतोरविद्यमानत्वात्तस्य नामधेयस्य। एवं तन्नामधेयं न स्थितं न विष्ठितं नाऽधिष्ठितं। संस्कृत शून्यताया अहं भगवन्नायं व्ययञ्च नोपलभे न समनुपश्यामि। सोऽहं भगवन् संस्कृतशून्यताया आयं व्ययञ्चाऽनुपलभमानोऽस मनुपश्यन् कस्य नामधेयं करिष्यामि बोधिसत्त्व इति। अपि तु खलु पुनर्भगवंस्तदपि संस्कृतशून्यता नामधेयं न स्थितं न विष्ठितं नाऽधिष्ठितं। तत् कस्य हेतोरविद्यमानत्वात्तस्य नामधेयस्य। एवं

तन्नामधेयं न स्थितं न विष्ठितं नाऽधिष्ठितं। अत्यन्तशून्यताया अहं भगवन्नायं व्ययञ्च नोपलभे न समनुपश्यामि। सोऽहं भगवन्नत्यन्त शून्यताया आयं व्ययञ्चाऽनुपलभमानोऽसमनुपश्यन् कस्य नामधेयं करिष्यामि बोधिसत्त्वइति। अपि तु खलु पुनर्भगवंस्तदप्यत्यन्त शून्यता नामधेयं न स्थितं न विष्ठितं नाऽधिष्ठितं। तत्कस्य हेतोरविद्यमानत्वात्तस्य नामधेयस्य। एवं तन्नामधेयं न स्थितं न विष्ठितं नाऽधिष्ठितं। अनवराऽग्रशून्यताया अहं भगवन्नायं व्ययञ्च नोपलभे न समनुपश्यामि। सोऽहं भगवन्ननवराऽग्रशून्यताया आयं व्ययञ्चानुपलभमानोऽसमनुपश्यन् कस्य नामधेयं करिष्यामि बोधिसत्त्व इति। अपि तु खलु पुनर्भगवंस्तदप्यनवराऽग्रशून्यता नामधेयं न स्थितं न विष्ठितं नाऽधिष्ठितं। तत्कस्य हेतोरविद्यमानत्वात्तस्य नामधेयस्य। एवं तन्नामधेयं न स्थितं न विष्ठितं नाऽधिष्ठितं। अनवकारशून्यताया अहं भगवन्नायं व्ययञ्च नोपलभे न समनुपश्यामि। सोऽहं भगवन्ननवकार शून्यताया आयं व्ययञ्चाऽनुपलभमानोऽसमनुपश्यन् कस्य नामधेयं करिष्यामि बोधिसत्त्वइति। अपि तु खलु पुनर्भगवंस्तदप्यनवकार शून्यता नामधेयं न स्थितं न विष्ठितं नाऽधिष्ठितं। तत्कस्य हेतोरविद्यमानत्वात्तस्य नामधेयस्य। एवं तन्नामधेयं न स्थितं न विष्ठितं नाऽधिष्ठितं। प्रकृतिशून्यताया अहं भगवन्नायं व्ययञ्च नोपलभे न समनुपश्यामि। सोऽहं भगवन् प्रकृतिशून्यताया आयं व्ययञ्चाऽनुपलभमानोऽसमनुपश्यन् कस्य नामधेयं करिष्यामि बोधिसत्त्वइति। अपि तु खलु पुनभगवंस्तदपि प्रकृतिशून्यता नामधेयं

न स्थितं न विस्थितं नाऽधिष्ठितं। तत्कस्य हेतोरविद्यमानत्वात्तस्य नामधेयस्य। एवं तन्नामधेयं न स्थितं न विष्ठितं नाऽधिष्ठितं। सर्व्वधर्म्मशून्यताया अहं भगवन्नायं व्ययञ्च नोपलभे न समनुपश्यामि। सोऽहं भगवन् सर्व्वधर्म्मशून्यताया आयं व्ययञ्चानुपलभमानोऽसमनुपश्यन् कस्य नामधेयं करिष्यामि बोधिसत्त्व इति। अपि तु खलु पुनर्भगवंस्तदपि सर्व्वधर्म्मशून्यता नामधेयं न स्थितं न विष्ठितं नाऽधिष्ठितं। तत्कस्य हेतोरविद्यमानत्वात्तस्य नामधेयस्य। एवं तन्नामधेयं न स्थितं न विष्ठितं नाऽधिष्ठितं। स्वलक्षणशून्यताया अहं भगवन्नायं व्ययञ्च नोपलभे न समनुपश्यामि। सोऽहं भगवन् स्वलक्षणशून्यताया आयं व्ययञ्चानुपलभमानोऽसमनुपश्यन् कस्य नामधेयं करिष्यामि बोधिसत्त्वइति। अपि तु खलु पुनर्भगवंस्तदपि स्वलक्षणशून्यता नामधेयं न स्थितं न विष्ठितं नाऽधिष्ठितं। तत्कस्य हेतोरविद्यमानत्वात्तस्य नामधेयस्य। एवं तन्नामधेयं न स्थितं न विष्ठितं नाऽधिष्ठितं।

अनुपलम्भशून्यताया अहं भगवन्नायं व्ययञ्च नोपलभे न समनुपश्यामि। सोऽहं भगवन्ननुपलम्भशून्यताया आयं व्ययञ्चाऽनुपलभमानोऽसमनुपश्यन् कस्य नामधेयं करिष्यामि बोधिसत्त्वइति। अपि तु खलु पुनर्भगवंस्तदप्यनुपलम्भशून्यता नामधेयं न स्थितं न विष्ठितं नाऽधिष्ठितं। तत् कस्य हेतोरविद्यमानत्वात्तस्य। एवं तन्नामधेयं न स्थितं न विष्ठितं नाऽधिष्ठितं। अभावशून्यताया अहं भगवन्नायं व्ययञ्च नोपलभे न समनुपश्यामि। सोऽहं भगवन्नभावशून्यताया आयं व्ययञ्चाऽनुपलभमानोऽसमनुपश्यन् कस्य नाम-

धेयं करिष्यामि बोधिसत्त्वइति। अपि तु खलु पुनर्भगवंस्तदप्य-भावशून्यता नामधेयं न स्थितं न विष्ठितं नाऽधिष्ठितं। तत्कस्य हेतोरविद्यमानत्वात्तस्य नामधेयस्य। एवं तन्नामधेयं न स्थितं न विष्ठितं नाऽधिष्ठितं। स्वभावशून्यताया अहं भगवन्नायं व्ययञ्च नोपलभे न समनुपश्यामि। सोऽहं भगवन् स्वभावशून्यताया आयं व्ययञ्चाऽनुपलभमानोऽसमनुपश्यन् कस्य नामधेयं करिष्यामि बोधि-सत्त्वइति। अपि तु खलु पुनर्भगवंस्तदपि स्वभावशून्यता नामधेयं न स्थितं न विष्ठितं नाऽधिष्ठितं। तत्कस्य हेतोरविद्यमानत्वात्तस्य नामधेयस्य। एवं तन्नामधेयं न स्थितं न विष्ठितं नाऽधिष्ठितं। अभावस्वभावशून्यताया अहं भगवन्नायं व्ययञ्च नोपलभे न समनु-पश्यामि। सोऽहं भगवन्नभावस्वभावशून्यताया आयं व्ययञ्चाऽनुपलभ-मानोऽसमनुपश्यन् कस्य नामधेयं करिष्यामि बोधिसत्त्वइति। अपि तु खलु पुनर्भगवंस्तदप्यभावस्वभावशून्यता नामधेयं न स्थितं न विष्ठितं नाऽधिष्ठितं। तत्कस्य हेतोरविद्यमानत्वात्तस्य नामधेयस्य। एवं तन्नामधेयं न स्थितं न विष्ठितं नाऽधिष्ठितं।

स्मृत्युपस्थानानामहं भगवन्नायं व्ययञ्च नोपलभे न समनु-पश्यामि। सोऽहं भगवन् स्मृत्युपस्थानानामायं व्ययञ्चाऽनुपलभ-मानोऽसमनुपश्यन् कस्य नामधेयं करिष्यामि बोधिसत्त्वइति। अपि तु खलु पुनर्भगवंस्तदपि स्मृत्युपस्थान नामधेयं न स्थितं न विष्ठितं नाऽधिष्ठितं। तत्कस्य हेतोरविद्यमानत्वात्तस्य नामधेयस्य; एवं तन्नामधेयं न स्थितं न विष्ठितं नाऽधिष्ठितं। सम्यक् प्रहाणानामहं भगवन्नायं व्ययञ्च नोपलभे न समनुपश्यामि। सोऽहं भगवन् सम्यक्

प्रहाणानामायं व्ययञ्चाऽनुपलभमानो ऽसमनुपश्यन् कस्य नामधेयं करिष्यामि बोधिसत्त्वइति। अपि तु खलु पुनर्भगवंस्तदपि सम्यक् प्रहाणनामधेयं न स्थितं न विष्ठितं नाऽधिष्ठितं। तत्कस्य हेतोरविद्यमानत्वात्तस्यनामधेयस्य। एवं तन्नामधेयं न स्थितं न विष्ठितं नाऽधिष्ठितं।

ऋद्धिपादानामहं भगवन्नायं व्ययञ्च नोपलभे न समनुपश्यामि। सोऽहं भगवन्नृद्धिपादानामायं व्ययञ्चाऽनुपलभमानोऽसमनुपश्यन् कस्य नामधेयं करिष्यामि बोधिसत्त्व इति। अपि तु खलु पुनर्भवंस्तदप्यृद्धिपादनामधेयं न स्थितं न विष्ठितं नाऽधिष्ठितं। तत्कस्य हेतोरविद्यमानत्वात्तस्य नामधेयस्य। एवं तन्नामधेयं न स्थितं न विष्ठितं नाऽधिष्ठितं। इन्द्रियाणामहं भगवन्नायं व्ययञ्च नोपलभे न समनुपश्यामि। सोऽहं भगवन्निन्द्रियाणामायं व्ययञ्चाऽनुपलभमानोऽसमनुपश्यन् कस्य नामधेयं करिष्यामि बोधिसत्त्वइति। अपि तु खलु पुनर्भगवंस्तदपीन्द्रिय नामधेयं न स्थितं न विष्ठितं नाऽधिष्ठितं। तत्कस्य हेतोरविद्यमानत्वात्तस्य नामधेयस्य। एवं तन्नामधेयं न स्थितं न विष्ठितं नाऽधिष्ठितं। बलानामहं भगवन्नायं व्ययञ्च नोपलभे न समनुपश्यामि। सोऽहं भगवन् बलानामायं व्ययञ्चाऽनुपलभमानोऽसमनुपश्यन् कस्य नामधेयं करिष्यामि बोधिसत्त्वइति। अपि तु खलु पुनर्भगवंस्तदपि बलनामधेयं न स्थितं न विष्ठितं नाऽधिष्ठितं। तत्कस्य हेतोरविद्यमानत्वात्तस्य नामधेयस्य। बोध्यङ्गानामहं भगवन्नायं व्ययञ्च नोपलभे न समनुपश्यामि। सोऽहं भगवन् बोध्यङ्गानामायं व्ययञ्चा-

ऽनुपलभमानोऽसमनुपश्यन् कस्य नामधेयं करिष्यामि बोधिसत्त्वइति। अपि तु खलु पुनर्भगवंस्तदपि बोध्यङ्गनामधेयं न स्थितं न विष्ठितं नाऽधिष्ठितं। तत्कस्य हेतोरविद्यमानत्वात्तस्य नामधेयस्य। एवं तन्नामधेयं न स्थितं न विष्ठितं नाऽधिस्थितं। आर्य्याष्टाङ्गमार्गस्याऽहं भगवन्नायं व्ययञ्च नोपलभे न समनुपश्यामि सोऽहं भगवन्नार्य्याष्टाङ्गमार्गस्यायं व्ययञ्चाऽनुपलभमानोऽसमनुपश्यन् कस्य नामधेयं करिष्यामि बोधिसत्त्व इति। अपि तु खलु पुनर्भगवंस्तदप्यार्य्याष्टाङ्गमार्गनामधेयं न स्थितं न विष्ठितं नाऽधिष्ठितं। तत्कस्य हेतोरविद्यमानत्वात्तस्य नामधेयस्य। एवं तन्नामधेयं न स्थितं न विष्ठितं नाऽधिष्ठितं। [1]शून्यताविमोक्षमुखस्याऽहं भगवन्नायं व्ययञ्च नोपलभे न समनुपश्यामि। सोऽहं भगवन् शून्यताविमोक्षमुखस्यायं व्ययञ्चाऽनुपलभमानोऽसमनुपश्यन् कस्य नामधेयं करिष्यामि बोधिसत्त्व इति। अपि तु खलु पुनर्भगवंस्तदपि शून्यताविमोक्षमुखनामधेयं न स्थितं न विष्ठितं नाऽधिष्ठितं। तत्कस्य हेतोरविद्यमानत्वात्तस्य नामधेयस्य। एवं तन्नामधेयं न स्थितं न विष्ठितं नाऽधिष्ठितं[2]। प्रणिहितविमोक्षमुखस्याऽहं भगवन्नायं व्ययञ्च नोपलभे न समनुपश्यामि। सोऽहं भगवन् प्रणिहितविमोक्षमुखस्यायं व्ययञ्चाऽनुपलभमानोऽसमनुपश्यन् कस्य नामधेयं करिष्यामि बोधिसत्त्वइति।

---

(१) क ख ग घ पुस्तकेषु-शून्य इति स्थाने स्थाने पाठः।

(२) आनिमित्तविमोक्षमुखस्य निर्देशोऽत्रयुक्तः सर्व्वत्र शून्यतानिमित्ताप्रणिहितविमोक्षमुखस्य स्थलान्तरेनिर्देशो दृश्यते। अत्र तु न लिखितः। लेखकस्य भ्रमेणापतित इत्यनुमीयते॥

अपि तु खलु पुनर्भगवंस्तदपि प्रणिहितविमोक्षमुखनामधेयं न स्थितं न विष्ठितं नाऽधिष्ठितं। तत्कस्य हेतोरविद्यमानत्वात्तस्य नामधेयस्य। एवं तं नामधेयं न स्थितं न विष्ठितं नाऽधिष्ठितं। चतुर्णामहं भगवन् ध्यानानामायं व्ययञ्च नोपलभे न समनुपश्यामि। सोऽहं भगवन् चतुर्णां ध्यानानामायं व्ययञ्चाऽनुपलभमानोऽसमनुपश्यन् कस्य नामधेयं करिष्यामि बोधिसत्त्वइति। अपि तु खलु पुनर्भगवंस्तदपि ध्याननामधेयं न स्थितं न विष्ठितं नाऽधिष्ठितं। तत् कस्य हेतोरविद्यमानत्वात्तस्य नामधेयस्य। एवं तन्नामधेयं न स्थितं न विष्ठितं नाऽधिष्ठितं। मैत्र्या अहं भगवन्नायं व्ययञ्च नोपलभे न समनुपश्यामि। सोऽहं भगवन् मैत्र्या आयं व्ययञ्चाऽनुपलभमानोऽसमनुपश्यन् कस्य नामधेयं करिष्यामि बोधिसत्त्व इति। अपि तु खलु पुनर्भगवंस्तदपि मैत्रीनामधेयं न स्थितं न विष्ठितं नाऽधिष्ठितं। तत्कस्य हेतोरविद्यमानत्वात्तस्य नामधेयस्य। एवं तन्नामधेयं न स्थितं न विष्ठितं नाऽधिष्ठितं। करुणाया अहं भगवन्नायं व्ययञ्च नोपलभे न समनुपश्यामि। सोऽहं भगवन् करुणाया आयं व्ययञ्चाऽनुपलभमानोऽसमनुपश्यन् कस्य नामधेयं करिष्यामि बोधिसत्त्वइति। अपि तु खलु पुनर्भगवंस्तदपि करुणानामधेयं न स्थितं न विष्ठितं नाऽधिष्ठितं। तत्कस्य हेतोरविद्यमानत्वात्तस्य नामधेयस्य। एवं तन्नामधेयं न स्थितं न विष्ठितं नाधिष्ठितं। मुदिताया अहं भगवन्नायं व्ययञ्च नोपलभे न समनुपश्यामि। सोऽहं भगवन् मुदिताया आयं व्ययञ्चाऽनुपलभमानोऽसमनुपश्यन् कस्य नामधेयं करिष्यामि बोधिसत्त्व इति। अपि तु

खलु पुनर्भगवंस्तदपि मुदितानामधेयं न स्थितं न विष्ठितं नाऽधिष्ठितं। तत्कस्य हेतोरविद्यमानत्वात्तस्य नामधेयस्य। एवं तन्नामधेयं न स्थितं न विष्ठितं नाऽधिष्ठितं। उपेक्षायाश्चाहं भगवन्नायं व्ययञ्च नोपलभे न समनुपश्यामि। सोऽहं भगवन्नु-पेक्षायाश्चायं व्ययञ्चाऽनुपलभमानोऽसमनुपश्यन् कस्य नामधेयं करिष्यामि बोधिसत्त्व इति। अपि तु खलु पुनर्भगवंस्तदप्युपेक्षा नामधेयं न स्थितं न विष्ठितं नाऽधिष्ठितं। तत्कस्य हेतोरविद्य-मानत्वात्तस्य नामधेयस्य। एवं तन्नामधेयं न स्थितं न विष्ठितं नाऽधिष्ठितं। चतसृणामहं भगवन्नाकृष्यसमापत्तीनामायं व्ययञ्च नोपलभे न समनुपश्यामि। सोऽहं भगवन्नायं व्ययञ्चाऽनुपलभ-मानोऽसमनुपश्यन् कस्य नामधेयं करिष्यामि बोधिसत्त्वइति। अपि तु खलु पुनर्भगवंस्तदप्याकृष्यसमापत्ति नामधेयं न स्थितं न विष्ठितं नाऽधिष्ठितं। तत्कस्य हेतोरविद्यमानत्वात्तस्य नामधेयस्य। एवं तन्नामधेयं न स्थितं न विष्ठितं नाऽधिष्ठितं। बुद्धाऽनुस्मृतेरहं भगवन्नायं व्ययञ्च नोपलभे न समनुपश्यामि। सोऽहं भगवन् बुद्धाऽनुस्मृतेरायं व्ययञ्चाऽनुपलभमानोऽसमनुपश्यन् कस्य नामधेयं करिष्यामि बोधिसत्त्वइति। अपि तु खलु पुनर्भगवंस्तदपि बुद्धा-ऽनुस्मृतिनामधेयं न स्थितं न विष्ठितं नाऽधिष्ठितं। तत्कस्य हेतोरविद्यमानत्वात्तस्य नामधेयस्य। एवं तन्नामधेयं न स्थितं न विष्ठितं नाऽधिष्ठितं। धर्माऽनुस्मृतेरहं भगवन्नायं व्ययञ्च नोपलभे न समनुपश्यामि। सोऽहं भगवन् धर्माऽनुस्मृतेरायं व्ययञ्चाऽनुप-लभमानोऽसमनुपश्यन् कस्य नामधेयं करिष्यामि बोधिसत्त्वइति।

अपि तु खलु पुनर्भगवंस्तदपि धर्म्माऽनुस्मृति नामधेयं न स्थितं न विष्ठितं नाऽधिष्ठितं। तत्कस्य हेतोरविद्यमानत्वात्तस्य नामधेयस्य एवं तन्नामधेयं न स्थितं न विष्ठितं नाऽधिष्ठितं। सङ्घाऽनुस्मृतेरहं भगवन्नायं व्ययञ्च नोपलभे न समनुपश्यामि। सोऽहं भगवन् सङ्घाऽनुस्मृतेरायं व्ययञ्चाऽनुपलभमानोऽसमनुपश्यन् कस्य नामधेयं करिष्यामि बोधिसत्त्व इति। अपि तु खलु पुनर्भगवंस्तदपि सङ्घाऽनुस्मृतिनामधेयं न स्थितं न विष्ठितं नाऽधिष्ठितं। तत्कस्य हेतोरविद्यमानत्वात्तस्य नामधेयस्य। एवं तन्नामधेयं न स्थितं न विष्ठितं नाऽधिष्ठितं।

शीलाऽनुस्मृतेरहं भगवन्नायं व्ययञ्च नोपलभे न समनुपश्यामि। सोऽहं भगवन् शीलाऽनुस्मृतेरायं व्ययञ्चाऽनुपलभमानोऽसमनुपश्यन्। कस्य नामधेयं करिष्यामि बोधिसत्त्व इति। अपि तु खलु पुनर्भगवंस्तदपि शीलाऽनुस्मृति नामधेयं न स्थितं न विष्ठितं नाऽधिष्ठितं। तत्कस्य हेतोरविद्यमानत्वात्तस्य नामधेयस्य। एवं तन्नामधेयं न स्थितं न विष्ठितं नाऽधिष्ठितं। त्यागाऽनुस्मृतेरहं भगवन्नायं व्ययञ्च नोपलभे न समनुपश्यामि। सोऽहं भगवन् त्यागाऽनुस्मृतेरायं व्ययञ्चाऽनुपलभमानोऽसमनुपश्यन् कस्य नामधेयं करिष्यामि बोधिसत्त्वइति। अपि तु खलु पुनर्भगवंस्तदपि त्यागाऽनुस्मृति नामधेयं न स्थितं न विष्ठितं नाऽधिष्ठितं। तत्कस्य हेतोरविद्यमानत्वात्तस्य नामधेयस्य। एवं तन्नामधेयं न स्थितं न विष्ठितं नाऽधिष्ठितं। देवताऽनुस्मृतेरहं भगवन्नायं व्ययञ्च नोपलभे न समनुपश्यामि। सोऽहं भगवन् देवताऽनुस्मृतेरायं व्ययञ्चाऽनुपलभमानोऽसमनु-

पश्यन् कस्य नामधेयं करिष्यामि बोधिसत्त्व इति । अपि तु खलु पुनर्भगवंस्तदपि कायगताऽनुस्मृतिनामधेयं न स्थितं न विष्ठितं नाऽधिष्ठितं । तत्कस्य हेतोरविद्यमानत्वात्तस्य नामधेयस्य । एवं तन्नामधेयं न स्थितं न विष्ठितं नाऽधिष्ठितं ।

उद्वेगाऽनुस्मृतेरहं भगवन्नायं व्ययञ्च नोपलभे न समनुपश्यामि । सोऽहं भगवन्नुद्वेगाऽनुस्मृतेरायं व्ययञ्चाऽनुपलभमानोऽसमनुपश्यन् कस्य नामधेयं करिष्यामि बोधिसत्त्वइति । अपि तु खलु पुनर्भगवंस्तदप्युद्वेगाऽनुस्मृतिनामधेयं न स्थितं न विष्ठितं नाऽधिष्ठितं तत्कस्य हेतोरविद्यमानत्वात्तस्य नामधेयस्य । एवं तन्नामधेयं न स्थितं न विष्ठितं नाऽधिष्ठितं । आलापाऽनुस्मृतेरहं भगवन्नायं व्ययञ्च नोपलभे न समनुपश्यामि । सोऽहं भगवन्नालापाऽनुस्मृतेरायं व्ययञ्चाऽनुपलभमानोऽसमनुपश्यन् कस्य नामधेयं करिष्यामि बोधिसत्त्वइति । अपि तु खलु पुनर्भगवंस्तदप्यालापाऽनुस्मृतिनामधेयं न स्थितं न विष्ठितं नाऽधिष्ठितं । तत्कस्य हेतोरविद्यमानत्वात्तस्य नामधेयस्य । एवं तन्नामधेयं न स्थितं न विष्ठितं नाधिष्ठितं । मरणाऽनुस्मृतेरहं भगवन्नायं व्ययञ्च नोपलभे न समनुपश्यामि । सोऽहं भगवन् मरणाऽनुस्मृतेरायं व्ययञ्चाऽनुपलभमानोऽसमनुपश्यन् कस्य नामधेयं करिष्यामि बोधिसत्त्वइति । अपि तु खलु पुनर्भगवंस्तदपि मरणाऽनुस्मृतिनामधेयं न स्थितं न विष्ठितं नाऽधिष्ठितं । तत्कस्य हेतोरविद्यमानत्वात्तस्य नामधेयस्य । एवं तन्नामधेयं न स्थितं न विष्ठितं नाऽधिष्ठितं । मांसचक्षुषोऽहं भगवन्नायं व्ययञ्च नोपलभे न समनुपश्यामि । सोऽहं भगवन्

मांसचक्षुषश्चायं व्ययञ्चाऽनुपलभमानोऽसमनुपश्यन् कस्य नामधेयं करिष्यामि बोधिसत्त्व इति। अपि तु खलु पुनर्भगवंस्तदपि मांसचक्षुर्नामधेयं न स्थितं न विष्ठितं नाऽधिष्ठितं। तत्कस्य हेतोरविद्यमानत्वात्तस्य नामधेयस्य। एवं तन्नामधेयं न स्थितं न विष्ठितं नाऽधिष्ठितं। दिव्यचक्षुषोऽहं भगवन्नायं व्ययञ्च नोपलभे न समनुपश्यामि। सोऽहं भगवन् दिव्यचक्षुषश्चायं व्ययञ्चाऽनुपलभमानोऽसमनुपश्यन् कस्य नामधेयं करिष्यामि बोधिसत्त्व इति। अपि तु खलु पुनर्भगवंस्तदपि दिव्यचक्षुर्नामधेयं न स्थितं न विष्ठितं नाऽधिष्ठितं। तत्कस्य हेतोरविद्यमानत्वात्तस्य नामधेयस्य। एवं तन्नामधेयं न स्थितं न विष्ठितं नाऽधिष्ठितं। प्रज्ञाचक्षुषोऽहं भगवन्नायं व्ययञ्च नोपलभे न समनुपश्यामि। सोऽहं भगवन् प्रज्ञाचक्षुषश्चायं व्ययञ्चाऽनुपलभमानोऽसमनुपश्यन् कस्य नामधेयं करिष्यामि बोधिसत्त्व इति। अपि तु खलु पुनर्भगवंस्तदपि प्रज्ञाचक्षुर्नामधेयं न स्थितं न विष्ठितं नाऽधिष्ठितं। तत्कस्य हेतोरविद्यमानत्वात्तस्य नामधेयस्य। एवं तन्नामधेयं न स्थितं न विष्ठितं नाऽधिष्ठितं। धर्म्मचक्षुषोऽहं भगवन्नायं व्ययञ्च नोपलभे न समनुपश्यामि। सोऽहं भगवन् धर्म्मचक्षुषश्चायं व्ययञ्चाऽनुपलभमानोऽसमनुपश्यन् कस्य नामधेयं करिष्यामि बोधिसत्त्व इति। अपि तु खलु पुनर्भगवंस्तदपि धर्म्मचक्षुर्नामधेयं न स्थितं न विष्ठितं नाऽधिष्ठितं। तत्कस्य हेतोरविद्यमानत्वात्तस्य नामधेयस्य। एवं तन्नामधेयं न स्थितं न विष्ठितं नाऽधिष्ठितं। बुद्धचक्षुषोऽहं भगवन्नायं व्ययञ्च नोपलभे न समनुपश्यामि। सोऽहं भगवन् बुद्धचक्षुषश्चायं व्ययञ्चाऽनुपलभ-

मानोऽसमनुपश्यन् कस्य नामधेयं करिष्यामि बोधिसत्त्व इति। अपि तु खलु पुनर्भगवंस्तदपि बुद्धचक्षुर्नामधेयं न स्थितं न विष्ठितं नाऽधिष्ठितं। तत्कस्य हेतोरविद्यमानत्वात्तस्य नामधेयस्य। एवं तन्नामधेयं न स्थितं न विष्ठितं नाऽधिष्ठितं।

षणामभिज्ञानामहं भगवन्नायं व्ययञ्च नोपलभे न समनुपश्यामि। सोऽहं भगवन् षणामभिज्ञानामायं व्ययञ्चाऽनुपलभमानोऽसमनुपश्यन् कस्य नामधेयं करिष्यामि बोधिसत्त्व इति। अपि तु खलु पुनर्भगवंस्तदपि षडभिज्ञानामधेयं न स्थितं न विष्ठितं नाऽधिष्ठितं। तत्कस्य हेतोरविद्यमानत्वात्तस्य नामधेयस्य। एवं तन्नामधेयं न स्थितं न विष्ठितं नाऽधिष्ठितं। दशानां तथागतबलानामहं भगवन्नायं व्ययञ्च नोपलभे न समनुपश्यामि। सोऽहं भगवन् दशानां तथागतबलानामायं व्ययञ्चाऽनुपलभमानोऽसमनुपश्यन् कस्य नामधेयं करिष्यामि बोधिसत्त्वइति। अपि तु खलु पुनर्भगवंस्तदपि दशतथागतबलनामधेयं न स्थितं न विष्ठितं नाऽधिष्ठितं। तत्कस्य हेतोरविद्यमानत्वात्तस्य नामधेयस्य। एवं तन्नामधेयं न स्थितं न विष्ठितं नाऽधिष्ठितं। चतुर्णां वैशारद्यानामहं भगवन्नायं व्ययञ्च नोपलभे न समनुपश्यामि। सोऽहं भगवन् चतुर्णां वैशारद्यानामायं व्ययञ्चाऽनुपलभमानोऽसमनुपश्यन् कस्य नामधेयं करिष्यामि बोधिसत्त्व इति। अपि तु खलु पुनर्भगवंस्तदपि वैशारद्यनामधेयं न स्थितं न विष्ठितं नाऽधिष्ठितं। तत्कस्य हेतोरविद्यमानत्वात्तस्य नामधेयस्य। एवं तन्नामधेयं न स्थितं न विष्ठितं नाऽधिष्ठितं। चतसृणां प्रतिसम्विदामहं भगवन्नायं व्ययञ्च नोपलभे

न समनुपश्यामि । सोऽहं भगवन् चतसृणां प्रतिसम्विदामाय
व्ययञ्चाऽनुपलभमानोऽसमनुपश्यन् कस्य नामधेयं करिष्यामि
बोधिसत्त्व इति । अपि तु खलु पुनर्भगवंस्तदपि प्रतिसम्विन्नामधेयं
न स्थितं न विष्ठितं नाऽधिष्ठितं। तत्कस्य हेतोरविद्यमानत्वात्तस्य
नामधेयस्य। एवं तन्नामधेयं न स्थितं न विष्ठितं नाऽधिष्ठितं।
महाकरुणाया अहं भगवन्नायं व्ययञ्च नोपलभे न समनुपश्यामि।
सोऽहं भगवन् महाकरुणायाआयं व्ययञ्चाऽनुपलभमानोऽसमनु-
पश्यन् कस्य नामधेयं करिष्यामि बोधिसत्त्व इति । अपि तु खलु
पुनर्भगवंस्तदपि महाकरुणानामधेयं न स्थितं न विष्ठितं नाऽधि-
ष्ठितं । तत्कस्य हेतोरविद्यमानत्वात्तस्य नामधेयस्य। एवं तन्नामधेयं
न स्थितं न विष्ठितं नाऽधिष्ठितं । अष्टादशाऽवेणिकबुद्धधर्म्माणामहं
भगवन्नायं व्ययञ्च नोपलभे न समनुपश्यामि । सोऽहं भगवन्नष्टा-
दशावेणिकबुद्धधर्म्माणामायं व्ययञ्चाऽनुपलभमानोऽसमनुपश्यन् कस्य
नामधेयं करिष्यामि बोधिसत्त्व इति । अपि तु खलु पुनर्भगवं-
स्तदप्यष्टादशावेणिकबुद्धधर्म्मनामधेयं न स्थितं न विष्ठितं नाऽधिष्ठितं।
तत्कस्य हेतोरविद्यमानत्वात्तस्य नामधेयस्य । एवं तन्नामधेयं न
स्थितं न विष्ठितं नाऽधिष्ठितं।

स्वप्नोपमानामहं भगवन् पञ्चानामुपादानस्कन्धानामायं व्ययञ्च
नोपलभे न समनुपश्यामि । सोऽहं भगवन् स्वप्नोपमानां पञ्चाना-
मुपादानस्कन्धानामायं व्ययञ्चाऽनुपलभमानोऽसमनुपश्यन् कस्य
नामधेयं करिष्यामि बोधिसत्त्व इति । अपि तु खलु पुनर्भगवंस्त-
दप्युपादानस्कन्धनामधेयं न स्थितं न विष्ठितं नाऽधिष्ठितं । तत्कस्य

हेतोरविद्यमानत्वात्तस्य नामधेयस्य। एवं तन्नामधेयं न स्थितं न विष्ठितं नाऽधिष्ठितं। मायोपमानामहं भगवन् पञ्चानामुपादानस्कन्धानामायं व्ययञ्च नोपलभे न समनुपश्यामि। सोऽहं भगवन् मायोपमानां पञ्चानामुपादानस्कन्धानामायं व्ययञ्चाऽनुपलभमानोऽसमनुपश्यन् कस्य नामधेयं करिष्यामि बोधिसत्त्व इति। अपि तु खलु पुनर्भगवंस्तदपि उपादानस्कन्धनामधेयं न स्थितं न विष्ठितं नाऽधिष्ठितं। तत्कस्य हेतोरविद्यमानत्वात्तस्य नामधेयस्य। एवं तन्नामधेयं न स्थितं न विष्ठितं नाऽधिष्ठितं। प्रतिश्रुत्कोपमानानामहं भगवन् पञ्चानामुपादानस्कन्धानामायं व्ययञ्च नोपलभे न समनुपश्यामि। सोऽहं भगवन् प्रतिश्रुत्कोपमानानां पञ्चानामुपादानस्कन्धानामायं व्ययञ्चाऽनुपलभमानोऽसमनुपश्यन् कस्य नामधेयं करिष्यामि बोधिसत्त्व इति। अपि तु खलु पुनर्भगवंस्तदप्युपादानस्कन्धनामधेयं न स्थितं न विष्ठितं नाऽधिष्ठितं। तत्कस्य हेतोरविद्यमानत्वात्तस्य नामधेयस्य। एवं तन्नामधेयं न स्थितं न विष्ठितं नाऽधिष्ठितं। प्रतिभासोपमानामहं भगवन् पञ्चानामुपादानस्कन्धानामायं व्ययञ्च नोपलभे न समनुपश्यामि। सोऽहं भगवन् प्रतिभासोपमानां पञ्चानामुपादानस्कन्धानामायं व्ययञ्चानुपलभमानो न समनुपश्यन् कस्य नामधेयं करिष्यामि बोधिसत्त्व इति। अपि तु खलु पुनर्भगवंस्तदप्युपादानस्कन्धनामधेयं न स्थितं न विष्ठितं नाऽधिष्ठितं। तत्कस्य हेतोरविद्यमानत्वात्तस्य नामधेयस्य। एवं तन्नामधेयं न स्थितं न विष्ठितं नाऽधिष्ठितं।

प्रतिबिम्बोपमानामहं भगवन् पञ्चानामुपादानस्कन्धानामायं

व्ययञ्च नोपलभे न समनुपश्यामि । सोऽहं भगवन् प्रतिबिम्बोपमा
पञ्चानामुपादानस्कन्धानामायं व्ययञ्चाऽनुपलभमानोऽसमनुपश्यन् क
नामधेयं करिष्यामि बोधिसत्त्व इति । अपि तु खलु पुनर्भगव
स्तदप्युपादानस्कन्धनामधेयं न स्थितं न विष्ठितं नाऽधिष्ठितं
तत्कस्य हेतोरविद्यमानत्वात्तस्य नामधेयस्य । एवं तन्नामधेयं
स्थितं न विष्ठितं नाऽधिष्ठितं । मरीच्युपमानामहं भगवन् पञ्चा
नामुपादानस्कन्धानामायं व्ययञ्च नोपलभे न समनुपश्यामि । सोऽह
भगवन् मरीच्युपमानां पञ्चानामुपादानस्कन्धानामायं व्ययञ्चा-
ऽनुपलभमानोऽसमनुपश्यन् कस्य नामधेयं करिष्यामि बोधिसत्त्व-
इति । अपि तु खलु पुनर्भगवंस्तदप्युपादानस्कन्धनामधेयं न स्थितं
न विष्ठितं नाऽधिष्ठितं । तत्कस्य हेतोरविद्यमानत्वात्तस्य नामधे-
यस्य । एवं तन्नामधेयं न स्थितं न विष्ठितं नाऽधिष्ठितं । *दक-
चन्द्रोपमानामहं भगवन् पञ्चानामुपादानस्कन्धानामायं व्ययञ्च
नोपलभे न समनुपश्यामि । सोऽहं भगवन् दकचन्द्रोपमानां पञ्चा-
नामुपादानस्कन्धानामायं व्ययञ्चानुपलभमानोऽसमनुपश्यन् कस्य
नामधेयं करिष्यामि बोधिसत्त्वइति । अपि तु खलु पुनर्भगवंस्त-
दप्युपादानस्कन्ध नामधेयं न स्थितं न विष्ठितं नाऽधिष्ठितं । तत्-
कस्य हेतोरविद्यमानत्वात्तस्य नामधेयस्य । एवं तन्नामधेयं न स्थितं
न विष्ठितं नाऽधिष्ठितं । निर्मितकोपमानामहं पञ्चानामुपादान-
स्कन्धानामायं व्ययञ्च नोपलभे न समनुपश्यामि । सोऽहं भगवन्

---

* उदकचन्द्र इति पाठोयुक्तः प्रतिभाति ।

निमित्तपर्यायमानां पञ्चानामुपादानस्कन्धानामायं व्ययञ्चाऽनुपलभमानोऽसमनुपश्यन् कस्य नामधेयं करिष्यामि बोधिसत्त्व इति। अपि तु खलु पुनर्भगवंस्तदप्युपादानस्कन्ध नामधेयं न स्थितं न विष्ठितं नाऽधिष्ठितं। तत्कस्य हेतोरविद्यमानत्वात्तस्य नामधेयस्य। एवं तन्नामधेयं न स्थितं न विष्ठितं नाऽधिष्ठितं। विविक्तस्याऽहं भगवन्नायं व्ययञ्च नोपलभे न समनुपश्यामि। सोऽहं भगवन् विविक्तस्यायं व्ययञ्चाऽनुपलभमानोऽसमनुपश्यन् कस्य नामधेयं करिष्यामि बोधिसत्त्व इति। अपि तु खलु पुनस्तदपि विविक्तनामधेयं न स्थितं न विष्ठितं नाऽधिष्ठितं। तत्कस्य हेतोरविद्यमानत्वात्तस्य नामधेयस्य। एवं तन्नामधेयं न स्थितं न विष्ठितं। नाऽधिष्ठितं।

शान्तस्याहं भगवन्नायं व्ययञ्च नोपलभे न समनुपश्यामि। सोऽहं भगवन् शान्तस्यायं व्ययञ्चाऽनुपलभमानोऽसमनुपश्यन् कस्य नामधेयं करिष्यामि बोधिसत्त्व इति। अपि तु खलु पुनर्भगवंस्तदपि शान्तनामधेयं न स्थितं न विष्ठितं नाऽधिष्ठितं। तत्कस्य हेतोरविद्यमानत्वात्तस्य नामधेयस्य। एवं तन्नामधेयं न स्थितं न विष्ठितं नाऽधिष्ठितं। अनुत्पादस्याऽहं भगवन्नायं व्ययञ्च नोपलभे न समनुपश्यामि। सोऽहं भगवन्ननुत्पादस्यायं व्ययञ्चाऽनुपलभमानोऽसमनुपश्यन् कस्य नामधेयं करिष्यामि बोधिसत्त्व इति। अपि तु खलु पुनर्भगवंस्तदप्यनुत्पाद नामधेयं न स्थितं न विष्ठितं नाऽधिष्ठितं। तत्कस्य हेतोरविद्यमानत्वात्तस्य नामधेयस्य। एवं तन्नामधेयं न स्थितं न विष्ठितं नाऽधिष्ठितं।

अनिरोधस्याऽहं भगवन्नायं व्ययञ्च नोपलभे न समनु
सोऽहं भगवन्ननिरोधस्यायं व्ययञ्चाऽनुपलभमानोऽसमनुपश्य
नामधेयं करिष्यामि बोधिसत्त्व इति। अपि तु खलु पुन
दप्यनिरोध नामधेयं न स्थितं न विष्ठितं नाऽधिष्ठितं।
हेतोरविद्यमानत्वात्तस्य नामधेयस्य। एवं तन्नामधेयं न स्थि
विष्ठितं नाऽधिष्ठितं। अप्रादुर्भावस्याऽहं भगवन्नायं व्ययञ्च नो
न समनुपश्यामि। सोऽहं भगवन् अप्रादुर्भावस्यायं व्ययञ्चाऽनु
मानोऽसमनुपश्यन् कस्य नामधेयं करिष्यामि बोधिसत्त्व इ
अपि तु खलु पुनर्भगवंस्तदप्यप्रादुर्भावनामधेयं न स्थितं न वि
नाऽधिष्ठितं। तत्कस्य हेतोरविद्यमानत्वात्तस्य नामधेयस्य। ए
तन्नामधेयं न स्थितं न विष्ठितं नाऽधिष्ठितं। अनभिसंस्कारस्य
भगवन्नायं व्ययञ्च नोपलभे न समनुपश्यामि। सोऽहं भगवन्न
संस्कारस्यायं व्ययञ्चाऽनुपलभमानोऽसमनुपश्यन् कस्य नामधेयं क
ष्यामि बोधिसत्त्वइति। अपि तु खलु पुनर्भगवंस्तदप्यनभिसंस्का
नामधेयं न स्थितं न विष्ठितं नाऽधिष्ठितं। तत्कस्य हेतोरवि
मानत्वात्तस्य नामधेयस्य। एवं तन्नामधेयं न स्थितं न विष्ठि
नाऽधिष्ठितं। असंक्लेशस्याऽहं भगवन्नायं व्ययञ्च नोपलभे न समनु
पश्यामि। सोऽहं भगवन्नसंक्लेशस्यायं व्ययञ्चाऽनुपलभमानोऽसमनु
पश्यन् कस्य नामधेयं करिष्यामि बोधिसत्त्वइति। अपि तु खलु
पुनर्भगवंस्तदप्यसंक्लेशनामधेयं न स्थितं न विष्ठितं नाऽधिष्ठितं
तत्कस्य हेतोरविद्यमानत्वात्तस्य नामधेयस्य। एवं तन्नामधेयं न
स्थितं न विष्ठितं नाऽधिष्ठितं। व्यवदानस्याऽहं भगवन्नायं

यस्य नोपलभे न समनुपश्यामि। सोऽहं भगवन् व्यवदानस्यायं दस्याऽनुपलभमानोऽसमनुपश्यन् कस्य नामधेयं करिष्यामि ाधिसत्त्वइति। अपि तु खलु पुनर्भगवंस्तदपि व्यवदान नामधेयं न इतं न विष्ठितं नाऽधिष्ठितं। तत्कस्य हेतोरविद्यमानत्वात्तस्य ामधेयस्य। एवं तन्नामधेयं न स्थितं न विष्ठितं नाऽधिष्ठितं।

धर्मधातोरहं भगवन्नायं व्ययस्य नोपलभे न समनुपश्यामि। ोऽहं भगवन् धर्मधातोरायं व्ययस्याऽनुपलभमानोऽसमनुपश्यन् स्य नामधेयं करिष्यामि बोधिसत्त्वइति। अपि तु खलु पुन- गवंस्तदपि धर्मधातुनामधेयं न स्थितं न विष्ठितं नाऽधिष्ठितं। त्कस्य हेतोरविद्यमानत्वात्तस्य नामधेयस्य। एवं तन्नामधेयं न स्थितं न विष्ठितं नाऽधिष्ठितं। तथागतस्याऽहंभगवन्नायं व्ययस्य ोपलभे न समनुपश्यामि। सोऽहं भगवन् तथागतस्यायं व्ययस्या- ुपलभमानोऽसमनुपश्यन् कस्य नामधेयं करिष्यामि बोधिसत्त्व इति। ापि तु खलु पुनर्भगवंस्तदपि तथागतनामधेयं न स्थितं न विष्ठितं ाऽधिष्ठितं। तत्कस्य हेतोरविद्यमानत्वात्तस्य नामधेयस्य। एवं न्नामधेयं न स्थितं न विष्ठितं नाऽधिष्ठितं। भूतकोटेरहं भगवन्नायं ्ययस्य नोपलभे न समनुपश्यामि। सोऽहं भगवन् भूतकोटेरायं ्ययस्याऽनुपलभमानोऽसमनुपश्यन् कस्य नामधेयं करिष्यामि बोधि- ात्त्वइति। अपि तु खलु पुनर्भगवंस्तदपि भूतकोटिनामधेयं न स्थितं न विष्ठितं नाऽधिष्ठितं। तत्कस्य हेतोरविद्यमानत्वात्तस्य ामधेयस्य। एवं तन्नामधेयं न स्थितं न विष्ठितं नाऽधिष्ठितं।

धर्मस्थितिताया अहं भगवन्नायं व्ययस्य नोपलभे न समनु-

पश्यामि। सोऽहं भगवन् धर्मस्थितिताया आयं व्ययञ्चाऽनुपलभ-
मानोऽसमनुपश्यन् कस्य नामधेयं करिष्यामि बोधिसत्त्वइति। अपि
तु खलु पुनर्भगवंस्तदपि धर्मस्थिति नामधेयं न स्थितं न विष्ठितं
नाऽधिष्ठितं। तत्कस्य हेतोरविद्यमानत्वात्तस्य नामधेयस्य। एवं
तन्नामधेयं न स्थितं न विष्ठितं नाऽधिष्ठितं। धर्मनियामताया
अहं भगवन्नायं व्ययञ्च नोपलभे न समनुपश्यामि। सोऽहं भगवन्
धर्मनियामताया आयं व्ययञ्चाऽनुपलभमानोऽसमनुपश्यन् कस्य
नामधेयं करिष्यामि बोधिसत्त्वइति। अपि तु खलु पुनर्भगवंस्तदपि
धर्मनियामता नामधेयं न स्थितं न विष्ठितं नाऽधिष्ठितं। तत्कस्य
हेतोरविद्यमानत्वात्तस्य नामधेयस्य। एवं तन्नामधेयं न स्थितं न
विष्ठितं नाऽधिष्ठितं। कुशलाऽकुशलानामहं भगवन्नायं व्ययञ्च
नोपलभे न समनुपश्यामि। सोऽहं भगवन् कुशलाऽकुशलानां
धर्माणामायं व्ययञ्चाऽनुपलभमानोऽसमनुपश्यन् कस्य नामधेयं
करिष्यामि बोधिसत्त्वइति। अपि तु खलु पुनर्भगवंस्तदपि
कुशलाऽकुशलनामधेयं न स्थितं न विष्ठितं नाऽधिष्ठितं। तत्कस्य
हेतोरविद्यमानत्वात्तस्य नामधेयस्य। एवं तन्नामधेयं न स्थितं न
विष्ठितं नाऽधिष्ठितं। लौकिकलोकोत्तराणामहं भगवन् धर्माणामायं
व्ययञ्च नोपलभे न समनुपश्यामि। सोऽहं भगवन् लौकिकलोको-
त्तराणां धर्माणामायं व्ययञ्चाऽनुपलभमानोऽसमनुपश्यन् कस्य नाम-
धेयं करिष्यामि बोधिसत्त्वइति। अपि तु खलु पुनर्भगवंस्तदपि
लौकिकलोकोत्तरनामधेयं न स्थितं न विष्ठितं नाऽधिष्ठितं।
तत्कस्य हेतोरविद्यमानत्वात्तस्य नामधेयस्य। एवं तन्नामधेयं न

...न्
...ऽनुपलभमानोऽसमनुपश्यन्
कारिष्यामि बोधिसत्त्वइति । अपि तु खलु पुन-
संज्ञाताऽसंज्ञात नामधेयं न स्थितं न विष्ठितं नाऽधि-
हेतोरविद्यमानत्वात्तस्य नामधेयस्य । एवं तन्नामधेयं
ष्ठितं नाऽधिष्ठितं ।
ं भगवन् धर्म्माणामायं व्ययस्य नोपलभे न
योऽहं भगवन् सास्रवाणां धर्म्माणामायं व्ययमा-
पश्यन् कस्य नामधेयं करिष्यामि बोधिसत्त्व-
खलु पुनर्भगवंस्तदपि सास्रवधर्मं नामधेयं न
नाऽधिष्ठितं । तत्कस्य हेतोरविद्यमानत्वात्तस्य
नामधेयं न स्थितं न विष्ठितं नाऽधिष्ठितं ।
ानहं धर्म्माणामायं व्ययञ्चनोपलभे न
भगवन्नतीताऽनागतप्रत्युत्पन्नानां धर्म्माणामायं
नुपश्यन् कस्य नामधेयं करिष्यामि
खलु पुनर्भगवंस्तदप्यतीताऽनागतप्रत्युत्पन्नानां
तं न विष्ठितं नाऽधिष्ठितं । तत्कस्य
धेयस्य । एवं तन्नामधेयं न स्थितं न

५८ ...

...नोपलभे
...यते ।

पश्यामि। सोऽहं भगवन् धर्मस्थितिताया आयं व्ययञ्चाऽनुपलभमानोऽसमनुपश्यन् कस्य नामधेयं करिष्यामि बोधिसत्त्वइति। अपि तु खलु पुनर्भगवंस्तदपि धर्मस्थिति नामधेयं न स्थितं न विष्ठितं नाऽधिष्ठितं। तत्कस्य हेतोरविद्यमानत्वात्तस्य नामधेयस्य। एवं तन्नामधेयं न स्थितं न विष्ठितं नाऽधिष्ठितं। धर्मनियामताया अहं भगवन्नायं व्ययञ्च नोपलभे न समनुपश्यामि। सोऽहं भगवन् धर्मनियामताया आयं व्ययञ्चाऽनुपलभमानोऽसमनुपश्यन् कस्य नामधेयं करिष्यामि बोधिसत्त्वइति। अपि तु खलु पुनर्भगवंस्तदपि धर्मनियामता नामधेयं न स्थितं न विष्ठितं नाऽधिष्ठितं। तत्कस्य हेतोरविद्यमानत्वात्तस्य नामधेयस्य। एवं तन्नामधेयं न स्थितं न विष्ठितं नाऽधिष्ठितं। कुशलाऽकुशलानामहं भगवन्नायं व्ययञ्च नोपलभे न समनुपश्यामि। सोऽहं भगवन् कुशलाऽकुशलानां धर्माणामायं व्ययञ्चाऽनुपलभमानोऽसमनुपश्यन् कस्य नामधेयं करिष्यामि बोधिसत्त्वइति। अपि तु खलु पुनर्भगवंस्तदपि कुशलाऽकुशलनामधेयं न स्थितं न विष्ठितं नाऽधिष्ठितं। तत्कस्य हेतोरविद्यमानत्वात्तस्य नामधेयस्य। एवं तन्नामधेयं न स्थितं न विष्ठितं नाऽधिष्ठितं। लौकिकलोकोत्तराणामहं भगवन् धर्माणामायं व्ययञ्च नोपलभे न समनुपश्यामि। सोऽहं भगवन् लौकिकलोकोत्तराणां धर्माणामायं व्ययञ्चाऽनुपलभमानोऽसमनुपश्यन् कस्य नामधेयं करिष्यामि बोधिसत्त्वइति। अपि तु खलु पुनर्भगवंस्तदपि लौकिकलोकोत्तरनामधेयं न स्थितं न विष्ठितं नाऽधिष्ठितं। तत्कस्य हेतोरविद्यमानत्वात्तस्य नामधेयस्य। एवं तन्नामधेयं न

ऽष्टाऽङ्गमार्गेण वा आर्य्यसत्यैर्वा ध्यानैर्वा अप्रमाणैर्वा आरूप्यसमापत्तिभिर्वा शून्यतानिमित्ताऽप्रणिहितविशेषैर्वा तथागतबलैर्वा वैशारद्यैर्वा प्रतिसम्विद्भिर्वा महामैत्र्या वा महाकरुणया वा आवेणिकबुद्धधर्म्मैर्वा यावद्देवधर्म्मप्रज्ञप्तिः। तथापि नाम भगवन् स्वप्न इति नाम केनचिद्वचनीयं। मायेति वा नाम केनचिद्वचणीयं प्रतिश्रुत्केति नाम प्रतिभास इति नाम केनचिद्वचनीयं। मरीचिकेति नाम केनचिद्वचनीयत। दकचन्द्र इति केनचिद्वचनीयं। तथागत इति केनचिद्वचनीयं। तद्यथापि नाम भगवन् आकाशमिति नाम केनचिद्वचनीयं। पृथिवीति नाम केनचिद्वचनीयं। आप इति नाम केनचिद्वचनीयं। तेज इति नाम केनचिद्वचनीयं। वायुरिति नाम केनचिद्वचनीयं। तथतेति नाम केनचिद्वचनीयं। अवितथतेति नाम केनचिद्वचनीयं।

अनन्यतथतेति नाम न केनचिद्वचनीयं। धर्म्मतथतेति नाम न केनचिद्वचनीयं। धर्म्मधातुरिति न केनचिद्वचनीयं। धर्म्मस्थितितेति न केनचिद्वचनीयं। भूतकोटिरिति नाम न केनचिद्वचनीयं। दानपारमितेति नाम न केनचिद्वचनीयं। शीलपारमितेति नाम न केनचिद्वचनीयं। क्षान्तिपारमितेति नाम न केनचिद्वचनीयं। वीर्य्यपारमितेति नाम न केनचिद्वचनीयं। ध्यानपारमितेति नाम न केनचिद्वचनीय। प्रज्ञापारमितेति नाम न केनचिद्वचनीयं।

शीलमिति नाम न केनचिद्वचनीयं। समाधिरिति नाम न केनचिद्वचनीयं। प्रज्ञेति नाम न केनचिद्वचनीयं। विमुक्तिरिति नाम न केनचिद्वचनीयं। विमुक्तिज्ञानदर्शनमिति नाम न केन-

चिद्वचनीयं । स्रोत आपन्न इति नाम न केनचिद्वचनीयं । स्रोत आपन्नः न केनचिद्वचनीयः। स्रोत आपन्नधर्म्मा इति नाम न केनचिद्वचनीयः । सकृदागामीति नाम न केनचिद्वचनीयं । सकृदागामिधर्म्मा इति नाम न केनचिद्वचनीयं। अनागामीति नाम न केनचिद्वचनीयं । अनागामिधर्म्मा इति नाम न केनचिद्वचनीयं । अर्हन्निति नाम न केनचिद्वचनीयं । अर्हद्धर्म्मा इति नाम न केनचिद्वचनीयं । प्रत्येकबुद्ध इति नाम न केनचिद्वचनीयं । प्रत्येकबुद्धधर्म्मा इति न केनचिद्वचनीयं । बोधिसत्त्व इति नाम न केनचिद्वचनीयं । बोधिसत्त्व धर्म्मा इति नाम न केनचिद्वचनीयं । सम्यक्सम्बुद्ध इति नाम न केनचिद्वचनीयं ।

कुशलेन वा ऽकुशलेन वा सावद्येन वा अनवद्येन वा नित्येन वा अनित्येन वा सुखेन वा दुःखेन वा आत्मना वा अनात्मना वा शान्तेन वा अशान्तेन वा विविक्तेन वा अविविक्तेन वा भावेन वा अभावेन वा । इममप्यहं भगवन्नर्थवशं प्रतीत्यैवं वदाम्येतदेव मे कौकृत्यं स्यात् योऽहं सर्व्वधर्म्माणामायञ्च व्ययञ्चाऽनुपलभमानोऽसमनुपश्यन् कस्य नामधेयं कुर्य्यां यदुत बोधिसत्त्व इति प्रज्ञापारमितेति वा । अपि तु खलु पुनर्भगवंस्तदपि नामधेयं नैवस्थितं न विस्थितं नाऽधिष्ठितं । तत्कस्य हेतोरविद्यमानत्वात्तस्य नामधेयस्य । एवं तन्नामधेयं न स्थितं न विस्थितं नाऽधिष्ठितं । सचेद्बोधिसत्त्वस्य महासत्त्वस्यैवं प्रज्ञापारमितायां भाष्यमाणायामेभिराकारैरेभिर्लिङ्गैरेभिर्निमित्तैरुपदिश्यमानायां चित्तं नाऽवलीयते न संलीयते । न विप्रतिसारी भवति मानसं नोत्त्रस्यति न संत्रस्यति न सन्त्रासमा-

पश्यति नियतं च योगिनस्तो [illegible]
देहिनस्तः [illegible] ।

पुनरपरं भगवन् योगिनश्चित [illegible]
रूपे नैव च व्याप्नोति । देहमानी नैव च [illegible]
न व्याप्नोति । शब्दादिषु नैव च व्याप्नोति । [illegible]
चक्षुषि नैव च व्याप्नोति । श्रोत्रे नैव च [illegible]
व्याप्नोति । जिह्वायां नैव च व्याप्नोति । [illegible]
नैव च व्याप्नोति । [illegible]
[illegible] नैव च व्याप्नोति । [illegible]
[illegible] नैव च व्याप्नोति । [illegible]
नैव च व्याप्नोति । [illegible]
व्याप्नोति । [illegible]
व्याप्नोति । [illegible]
व्याप्नोति । [illegible]
व्याप्नोति । [illegible]

[illegible]

अविद्यायां तेन न स्थातव्यं । संस्कारेषु तेन न स्थातव्यं । विज्ञाने तेन न स्थातव्यं । नामरूपे तेन न स्थातव्यं । षड़ायतने तेन न स्थातव्य । स्पर्शे तेन न स्थातव्यं । वेदनायां तेन न स्थातव्यं । तृष्णायां तेन न स्थातव्यं । उपादाने तेन न स्थातव्यं । जातौ तेन न स्थातव्यं । जरामरणे तेन न स्थातव्यं ।

तत्कस्य हेतो स्तथाहि भगवन् रूपं रूपेण शून्यं । या च रूपशून्यता न तद्रूपं नचाऽन्यत्ररूपाच्छून्यता । रूपमेव शून्यता शून्यतैवरूपं । वेदना वेदनया शून्या । या च वेदना शून्यता न सा वेदना । न चाऽन्यत्र वेदनायाः शून्यता । वेदनैव शून्यता । शून्यतैव वेदना । संज्ञा संज्ञया शून्यता । या च संज्ञायाः शून्यता न सा संज्ञा । न चाऽन्यत्रसंज्ञायाः शून्यता संज्ञैव शून्यता शून्यतैव संज्ञा । संस्काराः संस्कारैः शून्याः । या च संस्कारशून्यता न ते संस्काराः न चाऽन्यत्र संस्कारेभ्यः शून्यतासंस्कारा एव शून्यता शून्यतैव संस्काराः । विज्ञानं विज्ञानेन शून्यं । या च विज्ञानशून्यता तद्विज्ञानं । न चाऽन्यत्र विज्ञानाच्छून्यता विज्ञानमेव शून्यता शून्यतैव विज्ञानं । अनेन भगवन् पर्य्यायेण बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां चरता रूपे तेन न स्थातव्यं । वेदनायां तेन न स्थातव्यं । संज्ञायां तेन न स्थातव्यं । संस्कारेषु तेन न स्थातव्यं । विज्ञाने तेन न स्थातव्यं ।

तथाहि भगवन् चक्षुश्चक्षुषा शून्यं । या च चक्षुः शून्यता न तच्चक्षुः न चाऽन्यत्र चक्षुषः शून्यता । चक्षुरेव शून्यता शून्यतैव चक्षुः । श्रोत्रं श्रोत्रेण शून्यं । या च श्रोत्रशून्यता न तत् श्रोत्रं । न चाऽन्यत्र श्रोत्राच्छून्यता श्रोत्रमेव शून्यता शून्यतैव श्रोत्रं । घ्राणं घ्राणेन शून्यं । या च

घ्राणशून्यता न तद्घ्राणं। न चाऽन्यत्र घ्राणाच्छून्यता। घ्राणं
शून्यता शून्यतैव घ्राणं। जिह्वा जिह्वया शून्या। या च जिह्वाशून्
ता न सा जिह्वा न चाऽन्यत्र जिह्वायाः शून्यता जिह्वैव शून्य
शून्यतैव जिह्वा। कायः कायेन शून्यः। या च काय शून्यता न
कायः न चाऽन्यत्रकायाच्छून्यता। काय एव शून्यता शून्यतैव काय
मनो मनसा शून्यं। या च मनः शून्यता न तन्मनः। न चाऽन्यत्र मन
शून्यता मन एव शून्यता शून्यतैव मनः। रूपं रूपेण शून्यं। या
रूपशून्यता न तद्रूपं। न चाऽन्यत्र रूपाच्छून्यता रूपमेव शून्य
शून्यतैवरूपं। शब्दः शब्देन शून्यः। या च शब्दशून्यता न स शब्द
न चाऽन्यत्र शब्दाच्छून्यता। शब्द एव शून्यता शून्यतैव शब्द
गन्धोगन्धेन शून्यः। या च गन्धशून्यता न स गन्धः। न चाऽन्
गन्धाच्छून्यता गन्ध एव शून्यता शून्यतैव गन्धः। रसो रसेन शून
या च रस शून्यता न रसः। न चाऽन्यत्र रसाच्छून्यता। रस
शून्यता शून्यतैव रसः। स्पर्शः स्पर्शेन शून्यः। या च स्पर्शशून्यता
स स्पर्शः। न चाऽन्यत्र स्पर्शाच्छून्यता स्पर्श एव शून्यता शून्यतैव स्पर्श
धर्माधर्मैः शून्याः। या च धर्मशून्यता न ते धर्माः। न चाऽन्
धर्मेभ्यः शून्यता धर्मा एव शून्यता शून्यतैव धर्माः।

चक्षुर्विज्ञानं चक्षुर्विज्ञानेन शून्यं। या च चक्षुर्विज्ञानशून्
न तच्चक्षुर्विज्ञानं। न चाऽन्यत्र चक्षुर्विज्ञानाच्छून्यता। चक्षुर्विज्ञा
नेव शून्यता शून्यतैव चक्षुर्विज्ञानं। श्रोत्रविज्ञानं श्रोत्रविज्ञाने
शून्यं। या च श्रोत्रविज्ञान शून्यता न तत् श्रोत्रविज्ञानं। न चाऽन्
श्रोत्रविज्ञानाच्छून्यता। श्रोत्रविज्ञानमेव शून्यता शून्यतैव श्रो

विज्ञानं । घ्राणविज्ञानं घ्राणविज्ञानेन शून्यं । या च घ्राणविज्ञान शून्यता न तद्घ्राणविज्ञानं न चान्यत्र घ्राणविज्ञानाच्छून्यता । घ्राणविज्ञानमेव शून्यता शून्यतैव घ्राणविज्ञानं । जिह्वाविज्ञानं जिह्वाविज्ञानेन शून्यं । या च जिह्वाविज्ञान शून्यता न तज्जिह्वावि-ज्ञानं । न चाऽन्यत्र जिह्वाविज्ञानाच्छून्यता जिह्वाविज्ञानमेव शून्यता शून्यतैव जिह्वाविज्ञानं । कायविज्ञानं कायविज्ञानेन शून्यं । या च कायविज्ञानशून्यता न तत्कायविज्ञानं । न चाऽन्यत्र कायविज्ञा-नाच्छून्यता शून्यतैव कायविज्ञानं । मनोविज्ञानं मनोविज्ञानेन शून्यं । या च मनोविज्ञानशून्यता न तन्मनोविज्ञानं । न चाऽन्यत्र मनोविज्ञानाच्छून्यता । मनोविज्ञानमेव शून्यता शून्यतैव मनो-विज्ञानं ।

चक्षुः संस्पर्शः चक्षुः संस्पर्शेन शून्यः । या च चक्षुःसंस्पर्शशून्यता न स चक्षुः संस्पर्शः । न चाऽन्यत्र चक्षुःसंस्पर्शाच्छून्यता । चक्षुः संस्पर्श एव शून्यता शून्यतैव चक्षुःसंस्पर्शः । श्रोत्रसंस्पर्शः श्रोत्रसंस्पर्शेन शून्यः । या च श्रोत्रसंस्पर्श शून्यता न स श्रोत्रसंस्पर्शः । न चाऽन्यत्र श्रोत्र-संस्पर्शाच्छून्यता । श्रोत्रसंस्पर्श एव शून्यता शून्यतैव श्रोत्रसंस्पर्शः घ्राणसंस्पर्शो घ्राणसंस्पर्शेन शून्यः । या च घ्राणसंस्पर्श शून्यता तेन घ्राणसंस्पर्शः । न चाऽन्यत्र घ्राणसंस्पर्शाच्छून्यता । घ्राणसंस्पर्श एव शून्यता शून्यतैव घ्राणसंस्पर्शः । जिह्वासंस्पर्शो जिह्वासंस्पर्शेन शून्यः । या च जिह्वासंस्पर्शशून्यता न स जिह्वासंस्पर्शः । न चाऽन्यत्र जिह्वासंस्पर्शाच्छून्यता । जिह्वासंस्पर्श एव शून्यता शून्यतैव जिह्वा-संस्पर्शः । कायसंस्पर्शः कायसंस्पर्शेन शून्यः । या च कायसंस्पर्शशून्यता

न स कायसंस्पर्शः। न चाऽन्यत्र कायसंस्पर्शाच्छून्यता। कायसं
एव शून्यता शून्यतैव कायसंस्पर्शः। मनः संस्पर्शो मनःसंस्पर्शेन शून्
या च मनःसंस्पर्श शून्यता न स मनः संस्पर्शः। न चाऽन्यत्र
संस्पर्शाच्छून्यता। मनः संस्पर्श एव शून्यता शून्यतैव मनः संस्पर्शः

चक्षुः संस्पर्शप्रत्ययवेदना चक्षुःसंस्पर्शप्रत्ययवेदनया शून्या। य
चक्षुःसंस्पर्शप्रत्ययवेदना शून्यता न सा चक्षुःसंस्पर्शप्रत्यय वेदना
चाऽन्यत्र चक्षुःसंस्पर्शप्रत्ययवेदनाया शून्यता। चक्षुःसंस्पर्शप्रत्ययवेद
शून्यता शून्यतैव चक्षुःसंस्पर्शप्रत्यय वेदना। श्रोत्रसंस्पर्शप्रत्ययवेद
श्रोत्रसंस्पर्शप्रत्यय वेदनया शून्या। न चाऽन्यत्र श्रोत्र संस्पर्शप्रत
वेदनायाः शून्यता। श्रोत्रसंस्पर्शप्रत्यय वेदनैव शून्यता शून्
श्रोत्रसंस्पर्शप्रत्ययवेदना। घ्राणसंस्पर्श प्रत्ययवेदना घ्राणसंस्पर्शप्रत्य
वेदनया शून्य। या च घ्राणसंस्पर्श प्रत्ययवेदना शून्यता न
घ्राणसंस्पर्शप्रत्यय वेदना न चाऽन्यत्र घ्राणसंस्पर्शप्रत्ययवेदन
शून्यता। घ्राणसंस्पर्शप्रत्ययवेदनैव शून्यता शून्यतैव घ्राणसंस्पर्शप्रत
वेदना। जिह्वासंस्पर्शप्रत्ययवेदना जिह्वासंस्पर्शप्रत्ययवेदनया शून
धम् च जिह्वासंस्पर्शप्रत्ययवेदना शून्यता न सा जिह्वासंस्पर्शप्रत
धना। न चाऽन्यच जिह्वासंस्पर्शप्रत्ययवेदनायाः शून्यता। जि
र्शप्रत्ययवेदनैव शून्यता। शून्यतैव जिह्वासंस्पर्शप्रत्ययवेद
कायसंस्पर्शप्रत्ययवेदना कायसंस्पर्शप्रत्ययवेदनया शून्या। या
कायसंस्पर्शप्रत्ययवेदना शून्यता न सा कायसंस्पर्शप्रत्ययवेदना
चाऽन्यत्र कायसंस्पर्शप्रत्ययवेदनाया शून्यता। कायसंस्पर्शप्रत्ययवेद
शून्यता। शून्यतैव कायसंस्पर्शप्रत्ययवेदना। मनः संस्पर्शप्रत्ययवे

मनः संस्पर्शप्रत्ययवेदनया शून्या । या च मनःसंस्पर्शप्रत्ययवेदन
शून्यता न सा मनःसंस्पर्शप्रत्ययवेदना । न चाऽन्यत्र मनः संस्पर्शप्रत्यय
वेदनयाः शून्यता । मनः संस्पर्शप्रत्ययवेदनैव शून्यता । शून्यतै
मनः संस्पर्शप्रत्ययवेदना ।

पृथिवी धातुः पृथिवी धातुना शून्यः । या च पृथिवी धा
शून्यता न स पृथिवी धातुः । न चान्यत्र पृथिवी धातोः शून्यता
पृथिवी धातुरेव शून्यता शून्यतैव पृथिवी धातुः । अब्धातुरब्धातुन
शून्यः या चाऽब्धातु शून्यता न सोऽब्धातुः । न चाऽन्यत्राब्धातो
शून्यता । अब्धातुरेव शून्यता शून्यतैवाऽब्धातुः । तेजोधातुस्तेजधा-
तुना शून्यः । या च तेजोधातु शून्यता न स तेजोधातुः । न
चाऽन्यत्र तेजोधातोः शून्यता । तेजोधातुरेव शून्यता शून्यतैव
तेजोधातुः । वायुधातुर्वायुधातुना शून्यः । या च वायुधातु शून्यता
न स वायुधातुः । न चाऽन्यत्र वायुधातोः शून्यता । वायुधातुरेव
शून्यता शून्यतैव वायुधातुः । आकाशधातुराकाशधातुना शून्यः ।
या चाऽकाशधातु शून्यता न स आकाशधातुः । न चाऽन्यत्राकाश-
धातोः शून्यता । आकाशधातुरेव शून्यता । शून्यतैवाकाशधातुः ।
विज्ञानधातुर्विज्ञानधातुना शून्यः । या च विज्ञानधातु शून्यता
न स विज्ञानधातुः । न चाऽन्यत्र विज्ञानधातोः शून्यता । विज्ञान-
धातुरेव शून्यता शून्यतैव विज्ञानधातुः । अविद्याभगवन्नविद्यया
शून्या । या चाऽविद्याशून्यता न साऽविद्या । न चाऽन्यत्राऽविद्यायाः
शून्यता । अविद्यैव शून्यता शून्यतैवाऽविद्या । संस्काराः संस्कारैः
शून्याः । या च संस्कार शून्यता न ते संस्काराः । न चाऽन्यत्र

संस्कारेभ्यः शून्यता। संस्कारा एव शून्यता। शून्यतैव संस्कारा। विज्ञानं विज्ञानेन शून्यं। या च विज्ञान शून्यता न तद्विज्ञानं। न चाऽन्यत्र विज्ञानाच्छून्यता। विज्ञानमेव शून्यता शून्यतैव विज्ञानं।

नामरूपं नामरूपेण शून्यं। या च नामरूप शून्यता न तन्नामरूपं। न चाऽन्यत्र नामरूपाच्छून्यता। नामरूपमेव शून्यता शून्यतैव नामरूपं। षडायतनं षडायतनेन शून्यं। या च षडायतन शून्यता न तत् षडायतनं। न चाऽन्यत्र षडायतनाच्छून्यता। षडायतनमेव शून्यता शून्यतैव षडायतनं। स्पर्शः स्पर्शेन शून्यः। या च स्पर्शशून्यता न स स्पर्शः। न चाऽन्यत्र स्पर्शाच्छून्यता। स्पर्श एव शून्यता शून्यतैव स्पर्शः। वेदना वेदनया शून्या। या च वेदना शून्यता न सा वेदना। न चाऽन्यत्र वेदना शून्यता। वेदनैव शून्यता शून्यतैव वेदना। तृष्णा तृष्णाया शून्या। या च तृष्णा शून्या न सा तृष्णा। न चाऽन्यत्र तृष्णायाः शून्यता। तृष्णैव शून्यता शून्यतैव तृष्णा। उपादानमुपादानेन शून्यं या चोपादान शून्यता न तदुपादानं। न चाऽन्यत्रोपादानाच्छून्यता। उपादानमेव शून्यता शून्यतैवोपादानं। भवोभवे न शून्यः। या च भव शून्यता न स भवः। न चाऽन्यत्र भवाच्छून्यता। भव एव शून्यता शून्यतैव भवः। जातिर्जात्या शून्या। या च जाति शून्यता न सा जातिः। न चाऽन्यत्र जातेः शून्यता। जातिरेव शून्यता शून्यतैव जातिः। जरामरणं जरामरणेन शून्यं। या च जरामरण शून्यता न तत् जरामरणं। न चाऽन्यत्र जरामरणाच्छून्यता। जरामरणमेव शून्यता शून्यतैव जरामरणं।

अनेन भगवन् पर्य्यायेण बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां चरता अविद्यायां न स्थातव्यं । संस्कारेषु न स्थातव्यं । विज्ञाने न स्थातव्यं । नामरूपे न स्थातव्यं । षडायतने न स्थातव्यं । स्पर्शे न स्थातव्यं । वेदनायां न स्थातव्यं । तृष्णायां न स्थातव्यं । उपादाने न स्थातव्यं । जरामरणे न स्थातव्यं ।

पुनरपरं भगवन् बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां चरता दानपारमितायां न स्थातव्यं । तत्कस्य हेतोस्तथा हि दानपारमिता दानपारमितया शून्या । या च दानपारमिताशून्यता न सा दानपारमिता । न चाऽन्यत्र दानपारमितायाः शून्यता । दानपारमितैव शून्याता शून्यतैव दानपारमिता । पुनरपरं भगवन् बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां चरता शीलपारमितायां न स्थातव्यं । तत्कस्य हेतोस्तथा हि । शीलपारमिता शीलपारमितया शून्या । या च शीलपारमिताशून्यता न सा शीलपारमिता । न चाऽन्यत्र शीलपारमितायाः शून्यता । शीलपारमितैव शून्यता शून्यतैव शीलपारमिता । पुनरपरं भगवन् बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां चरता क्षान्तिपारमितायां न स्थातव्यं । तत्कस्य हेतोस्तथा हि । क्षान्तिपारमिता क्षान्तिपारमितया शून्या । या च क्षान्तिपारमिता शून्यता न सा क्षान्तिपारमिता । न चाऽन्यत्र क्षान्तिपारमितायाः शून्यता । क्षान्तिपारमितैव शून्यता शून्यतैव क्षान्तिपारमिता । पुनरपरं भगवन् बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां चरता वीर्य्यपारमितायां न स्थातव्यं । तत्कस्य हेतोस्तथा हि । वीर्य्यपारमिता वीर्य्यपारमितया शून्या । या च

वीर्य्यपारमिता शून्यता न सा वीर्य्यपारमिता। न चाऽन्यत्र वीर्य्यपारमिताया शून्यता। वीर्य्यपारमितैव शून्यता शून्यतैव वीर्य्यपारमिता। पुनरपरं भगवन् बोधिसत्त्वेन महासत्त्वेन प्रज्ञा-पारमितायां चरता ध्यानपारमितायां न स्थातव्यं। तत्कस्य हेतोस्तथा हि। ध्यानपारमिता ध्यानपारमितया शून्या। या च ध्यानपारमिता शून्यता न सा ध्यानपारमिता। न चाऽन्यत्र ध्यानपारमितायाः शून्यता। ध्यानपारमितैव शून्यता शून्यतैव ध्यानपारमिता। पुनरपरं भगवन् बोधिसत्त्वेन महासत्त्वेन प्रज्ञा-पारमितायां चरता प्रज्ञापारमितायां न स्थातव्यं। तत्कस्य हेतो-स्तथा हि। प्रज्ञापारमिता प्रज्ञापारमितया शून्या। या च प्रज्ञापारमिताशून्यता न सा प्रज्ञापारमिता। न चाऽन्यत्र प्रज्ञा-पारमितायाः शून्यता। प्रज्ञापारमितैव शून्यता शून्यतैव प्रज्ञा-पारमिता। अनेन भगवन् पर्य्यायेण बोधिसत्त्वेन महासत्त्वेन प्रज्ञा-पारमितायां चरता षट्सु पारमितासु न स्थातव्यं।

पुनरपरं भगवन् बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां चरता चतुर्षु स्मृत्युपस्थानेषु न स्थातव्यं। तत्कस्य हेतोस्तथा हि। भगवन् स्मृत्युपस्थानानि स्मृत्युपस्थानैः शून्यानि। या च भगवन स्मृत्युपस्थान शून्यता न तानि स्मृत्युपस्थानानि। न चाऽन्यत्र स्मृत्यु-पस्थानेभ्यः शून्यता। स्मृत्युपस्थानान्येव शून्यता शून्यतैव स्मृत्युपस्था-नानि। अनेन भगवन् पर्य्यायेण बोधिसत्त्वेन महासत्त्वेन प्रज्ञापार-तायां चरता स्मृत्युपस्थानेषु न स्थातव्यं। पुनरपरं भगवन् बोधि-सत्त्वेन महासत्त्वेन प्रज्ञापारमितायां चरता सम्यक्प्रहाणेषु न

बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां चरता ध्यानेषु न स्थातव्यं। पुनरपरं भगवन् बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां चरता चतुर्ष्वप्रमाणेषु न स्थातव्यं। तत्कस्य हेतोस्तथा हि। भगवन्नप्रमाणानि प्रमाणैः शून्यानि या च भगवन्नप्रमाणशून्यता न तान्य प्रमाणानि। न चाऽन्यत्राऽप्रमाणेभ्यः शून्यता अप्रमाणान्येव शून्यता शून्यतैवाऽप्रमाणानि। अनेन भगवन् पर्य्यायेण बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां चरता अप्रमाणेषु न स्थातव्यं। पुनरपरं भगवन् बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां चरता चतुर्ष्वारूप्यसमापत्तिषु न स्थातव्यं। तत् कस्य हेतोस्तथा हि। भगवन्नारूप्यसमापत्तय आरूप्यसमापत्तिभिः शून्याः। या च भगवन्नारूप्यसमापत्तिशून्यता न ता आरूप्यसमापत्तयः। न चाऽन्यत्रारूप्यसमापत्तिभ्यः शून्यता अन्यत्रारूप्यसमापत्तिशून्यता शून्यतैवारूप्यसमापत्तयः। अनेन भगवन् पर्य्यायेण बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां चरता आरूप्यसमापत्तिषु न स्थातव्यं।

विहारसमापत्तयो ऽनुपूर्व्वविहारसमापत्तिभिः शून्याः। या च भगवन्ननुपूर्वविहारसमापत्तिशून्यता नता अनुपूर्व्वविहारसमापत्तयः। न चाऽन्यत्राऽनुपूर्व्वविहारसमापत्तिभ्यः शून्यता अनुपूर्व्वविहारसमापत्तयएव शून्यता शून्यतैवाऽनुपूर्व्वविहारसमापत्तयः। अनेन भगवन् पर्य्यायेण बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां चरता अनुपूर्व्वविहारसमापत्तिषु न स्थातव्यं। पुनरपरं भगवन् बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां चरता शून्यतानिमित्ताऽप्रणिहितेषु न स्थातव्यं। तत् कस्य हेतोस्तथाहि। भगवन् शून्यतानिमित्ताप्रणिहितविमोक्षमुखानि शून्यतानिमित्ताऽप्रणिहितविमोक्षमुखैः शून्यानि। या च भगवन् शून्यतानिमित्ताप्रणिहितविमोक्षमुखशून्यता न तानि शून्यतानिमित्ताप्रणिहितविमोक्षमुखानि। नचाऽन्यत्रशून्यतानिमित्ताप्रणिहितविमोक्षमुखेभ्यः शून्यता शून्यतानिमित्ताऽप्रणिहितविमोक्षमुखान्येव शून्यता शून्यतेवशून्यतानिमित्ताऽप्राणिहितविमोक्षमुखानि। अनेन भगवन् पर्य्यायेण बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां चरता शून्यतानिमित्ताप्रणिहितविमोक्षमुखेषु न स्थातव्यं। पुनरपरं भगवन् बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां चरता दशतथागतबलेषु न स्थातव्यं। तत् कस्य हेतोस्तथाहि। भगवंस्तथागतबलानि तथागतबलैः शून्यानि। या च भगवंस्तथागतबलशून्यता न तानि तथागतबलानि। न चाऽन्यत्र तथागतबलेभ्यः शून्यता। तथागतबलान्येव शून्यता शून्यतैव तथागतबलानि। अनेन भगवन् पर्य्यायेण बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां चरता तथागतबलेषु न स्थातव्यं। पुनरपरं भगवन् बोधिसत्त्वेन महासत्त्वेन

विहारसमापत्तयो ऽनुपूर्व्वविहारसमापत्तिभिः शून्याः । या च भगवन्ननुपूर्वविहारसमापत्तिशून्यता नता अनुपूर्व्वविहारसमापत्तयः। न चाऽन्यत्राऽनुपूर्व्वविहारसमापत्तिभ्यः शून्यता अनुपूर्व्वविहारसमापत्तयएव शून्यता शून्यतैवाऽनुपूर्व्वविहारसमापत्तयः । अनेन भगवन् पर्य्यायेण बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां चरता अनुपूर्व्वविहारसमापत्तिषु न स्थातव्यं। पुनरपरं भगवन् बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां चरता शून्यतानिमित्ताऽप्रणिहितेषु न स्थातव्यं। तत् कस्य हेतोस्तथाहि। भगवन् शून्यतानिमित्ताप्रणिहितविमोक्षमुखानि शून्यतानिमित्ताऽप्रणिहितविमोक्षमुखैः शून्यानि । या च भगवन् शून्यतानिमित्ताप्रणिहितविमोक्षमुखशून्यता न तानि शून्यतानिमित्ताप्रणिहितविमोक्षमुखानि । नचाऽन्यत्रशून्यतानिमित्ताप्रणिहितविमोक्षमुखेभ्यः शून्यता शून्यतानिमित्ताऽप्रणिहितविमोक्षमुखान्येव शून्यता शून्यतैवशून्यतानिमित्ताऽप्रणिहितविमोक्षमुखानि। अनेन भगवन् पर्य्यायेण बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां चरता शून्यतानिमित्ताप्रणिहितविमोक्षमुखेषु न स्थातव्यं। पुनरपरं भगवन् बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां चरता दृशतथागतबलेषु न स्थातव्यं। तत् कस्य हेतोस्तथाहि । भगवंस्तथागतबलानि तथागतबलैः शून्यानि । या च भगवंस्तथागतबलशून्यता न तानि तथागतबलानि । न चाऽन्यत्र तथागतबलेभ्यः शून्यता। तथागतबलान्येव शून्यता शून्यतैव तथागतबलानि। अनेन भगवन् पर्य्यायेण बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां चरता तथागतबलेषु न स्थातव्यं। पुनरपरं भगवन् बोधिसत्त्वेन महासत्त्वेन

प्रज्ञापारमितायां चरता चतुर्षु वैशारद्येषु न स्यातव्यं। तत् कस्य हेतोस्तथाहि। भगवन् वैशारद्यानि वैशारद्यैः शून्यानि। या च भगवन् वैशारद्यशून्यता न तानि वैशारद्यानि। नचान्यत्र वैशारद्येभ्यः शून्यता। वैशारद्यान्येव शून्यता शून्यतैव वैशारद्यानि। अनेन भगवन् पर्य्यायेण वोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां चरता वैशारद्येषु न स्यातव्यं।

पुनरपरं भगवन् वोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां चरता चतसृषु प्रतिसम्वित्सु न स्यातव्यं। तत् कस्य हेतोस्तथाहि। भगवन् प्रतिसम्विदः प्रतिसम्विद्भिः शून्याः। या च प्रतिसम्विच्छून्यता नताः प्रतिसम्विदः। न चान्यत्र प्रतिसम्विद्भ्यः शून्यता प्रतिसम्विदएव शून्यता। शून्यतैव प्रतिसम्विदः। अनेन भगवन् पर्य्यायेण वोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां चरता प्रतिसम्वित्सु न स्यातव्यं। पुनरपरं भगवन् वोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां चरता महाकरुणायां न स्यातव्यं। तत् कस्य हेतोस्तथाहि। भगवन् महाकरुणा महाकरुणयाशून्या। या च महाकरुणाशून्यता न सा महाकरुणा। न चाऽन्यत्र महाकरुणायाः शून्यता। महाकरुणैव शून्यता, शून्यतैव महाकरुणा। अनेन भगवन् पर्य्यायेण वोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां चरता महाकरुणायां न स्यातव्यं। पुनरपरं भगवन् वोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां चरता अष्टादशावेणिकवुद्धधर्म्मे न स्यातव्यं। तत् कस्य हेतोस्तथाहि। भगवन् आवेणिकवुद्धधर्म्माः आवेणिकवुद्धधर्म्मैः शून्याः। या च भगवन्नावेणिकवुद्धधर्म्मशून्यता न ते आवेणिक-

बुद्धधर्म्माः । न चाऽन्यत्रावेणिकबुद्धधर्म्मेभ्यः शून्यता । आवेणिकबुद्ध-
धर्म्मा एव शून्यता शून्यतैवावेणिकबुद्धधर्म्माः । अनेन भगवन् पर्य्यायेण
बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां चरता आवेणिकबुद्धधर्म्मेषु
न स्थातव्यं ।

पुनरपरं भगवन् बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां
चरताऽक्षरेषु न स्थातव्यं । एकोदाहारेषु न स्थातव्यं । पृथग्-
युदाहारे न स्थातव्यं । तत् कस्य हेतोस्तथाहि । भगवन्नक्षराण्यक्षरैः
शून्या याचाक्षरशून्यता न तान्यक्षराणि । न चाऽन्यत्राक्षरेभ्यः
शून्यता अक्षराण्येव शून्यता । शून्यतैवाक्षराणि । अनेन भगवन्
पर्य्यायेण बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां चरता अक्षरेषु
न स्थातव्यं । पुनरपरं भगवन् बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमि-
तायां चरता अभिज्ञासु न स्थातव्यं । तत् कस्य हेतोस्तथाहि ।
भगवन्नभिज्ञा अभिज्ञाभिः शून्या । या चाभिज्ञाशून्यता न
ताअभिज्ञाः । न चाऽन्यत्राऽभिज्ञाभ्यः शून्यता अभिज्ञा एव शून्यता
शून्यतैवाभिज्ञाः । अनेन भगवन् पर्य्यायेण बोधिसत्त्वेन महासत्त्वेन
प्रज्ञापारमितायां चरता अभिज्ञासु न स्थातव्यं । पुनरपरं भगवन्
बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां चरता सर्व्वसमाधिमुखेषु
न स्थातव्यं । तत् कस्य हेतोस्तथाहि । भगवन् सर्व्वसमाधिमुखानि
सर्व्वसमाधिमुखैः शून्यानि । याच समाधिमुखशून्यता न तानि
समाधिमुखानि । नचाऽन्यत्र समाधिमुखेभ्यः शून्यता । समाधि-
मुखान्येव शून्यता शून्यतैव समाधिमुखानि । अनेन भगवन् पर्य्यायेण
बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां चरता सर्व्वसमाधिमुखेषु

न स्थातव्यं। पुनरपरं भगवन् बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां चरता सर्व्वधारणीमुखेषु न स्थातव्यं। तत् कस्य हेतोस्तथाहि। भगवन् धारणीमुखानि धारणीमुखैः शून्यानि। या च धारणीमुखशून्यता न तानि धारणीमुखानि। न चाऽन्यत्र धारणीमुखेभ्यः शून्यता। धारणीमुखान्येव शून्यता शून्यतैव धारणीमुखानि। अनेन भगवन् पर्य्यायेण बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां चरता धारणीमुखेषु न स्थातव्यं।

पुनरपरं भगवन् बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां चरता रूपमनित्यमिति न स्थातव्यं। तत्कस्य हेतोस्तथाहि। भगवन् रूपाऽनित्यता रूपाऽनित्यतया शून्या। या च रूपाऽनित्यताशून्यता न साऽरूपाऽनित्यता। न चाऽन्यत्र रूपाऽनित्यायाः शून्यता। रूपाऽनित्यतैव शून्यता। शून्यतैव रूपाऽनित्यता। अनेन भगवन् पर्य्यायेण बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां चरता रूपाऽनित्यतायां न स्थातव्यं। पुनरपरं भगवन् बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां चरता वेदनाऽनित्येति न स्थातव्यं। तत् कस्य हेतोस्तथाहि। भगवन् वेदनाऽनित्यता वेदनाऽनित्यतया शून्या। या च वेदनाऽनित्यता न सा वेदनाऽनित्यता। न चाऽन्यत्र वेदनाऽनित्यतायाः शून्यता। वेदनाऽनित्यतैव शून्यता शून्यतैव वेदनाऽनित्यता। अनेन भगवन् पर्य्यायेण बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां चरता वेदनाऽनित्यतायां न स्थातव्यं। *तेन प्रज्ञापारमितायां

* आदर्शपुस्तके पुनरपर मित्यादि पाठो न दृश्यते। अत्राऽपि स पाठः स्थातुमुचितः। एवं परत्रापि।

चरता संज्ञाऽनित्येति न स्थातव्यं। तत् कस्य हेतोस्तथाहि। भगवन् संज्ञाऽनित्यता संज्ञाऽनित्यतया शून्या। या च संज्ञाऽनित्यता शून्यता न सा संज्ञाऽनित्यता। न चाऽन्यत्र संज्ञानित्यतायाः शून्यता। संज्ञाऽनित्यतैव शून्यता शून्यतैव संज्ञाऽनित्यता। अनेन भगवन् पर्य्यायेण बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां चरता संज्ञाऽनित्येति न स्थातव्यं। तेन प्रज्ञापारमितायां चरता संस्कारा अनित्यादति न स्थातव्यं। तत् कस्य हेतोस्तथाहि। भगवन् संस्काराऽनित्यता संस्काराऽनित्यतया शून्या। या च संस्काराऽनित्यताशून्यता न सा संस्काराऽनित्यता। संस्काराऽनित्यतैव शून्यता शून्यतैवसंस्काराऽनित्यता। अनेन भगवन् पर्य्यायेण बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां चरता संस्कार अनित्या इति न स्थातव्यं। तेन प्रज्ञापारमितायां चरता विज्ञानमनित्यमिति न स्थातव्यं। तत् कस्य हेतोस्तथाहि। भगवन् विज्ञानाऽनित्यता विज्ञानाऽनित्यतया शून्या। या च भगवन् विज्ञानाऽनित्यता-शून्यता न सा विज्ञानाऽनित्यता। न चाऽन्यत्र विज्ञानाऽनित्यतायाः शुन्यता। विज्ञानाऽनित्यतैव शून्यता शून्यतैव विज्ञानाऽनित्यता। अनेन भगवन् पर्य्यायेण बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां चरता विज्ञानमनित्यमिति न स्थातव्यं।

पुनरपरं भगवन् बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां चरता रूपं दुःखमिति न स्थातव्यं। तत् कस्य हेतोस्तथाहि रूपदुःखता रूपदुःखतया शून्या। या च रूपदुःखताशून्यता न सा रूपदुःखता। न चाऽन्यत्र रूपदुःखतायाः शून्यता। रूपदुःखतैव

शून्यता शून्यतैव रूपदुःखता। अनेन भगवन् पर्य्यायेण बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां चरता रूपदुःखतायां न स्थातव्यं। पुनरपरं भगवन् बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां चरता वेदना दुःखेति न स्थातव्यं। तत् कस्य हेतोस्तथाहि। भगवन् वेदनादुःखता वेदनादुःखतया शून्या। या च वेदनादुःखताशून्यता न सा वेदनादुःखता। न चाऽन्यत्र वेदनादुःखतायाः शून्यता। वेदना दुःखतैव शून्यता शून्यतैव वेदनादुःखता। अनेन भगवन् पर्य्यायेण बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां चरता वेदनादुःखतायां न स्थातव्यं। पुनरपरं भगवन् बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां चरता संज्ञा दुःखेति न स्थातव्यं। तत् कस्य हेतोस्तथाहि। भगवन् संज्ञादुःखता संज्ञादुःखतया शून्या। या च संज्ञादुःखता शून्यता न सा संज्ञादुःखता। न चाऽन्यत्र संज्ञा दुःखतायाः शून्यता। संज्ञादुःखतैव शून्यता शून्यतैव संज्ञादुःखता। अनेन भगवन् पर्य्यायेण बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां चरता संज्ञादुःखतायां न स्थातव्यं। पुनरपरं भगवन् बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां चरता संस्कारा दुःखा इति न स्थातव्यं। तत् कस्य हेतोस्तथाहि। भगवन् संस्कारदुःखता संस्कारदुःखतया शून्या। या च संस्कारदुःखताशून्यता न सा संस्कारदुःखता। न चाऽन्यत्र संस्कारदुःखतायाः शून्यता। संस्कारदुःखतैव शून्यता शून्यतैव संस्कारदुःखता। अनेन भगवन् पर्य्यायेण बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां चरता संस्कारदुःखतायां न स्थातव्यं। पुनरपरं भगवन् बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमि-

तायां चरता विज्ञानं दुःखमिति न स्थातव्यं। तत् कस्य हेतो-स्तथाहि। भगवन् विज्ञानदुःखता विज्ञानदुःखतया शून्या। या च विज्ञानदुःखताशून्यता न सा विज्ञानदुःखता। न चाऽन्यत्र विज्ञान-दुःखतायाः शून्यता। विज्ञानदुःखतैव शून्यता शून्यतैव विज्ञान-दुःखता। अनेन भगवन् पर्य्यायेण बोधिसत्त्वेन महासत्त्वेन प्रज्ञा-पारमितायां चरता विज्ञानदुःखतायां न स्थातव्यं।

पुनरपरं भगवन् बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां चरता रूपमनात्मेति न स्थातव्यं। तत् कस्य हेतोस्तथाहि। भगवन् रूपाऽनात्मता रूपाऽनात्मतया शून्या। या च रूपाऽनात्मताशून्यता न सा रूपाऽनात्मता। न चाऽन्यत्र रूपाऽनात्मतायाः शून्यता। रूपाऽनात्मतैव शून्यता शून्यतैव रूपाऽनात्मता। अनेन भगवन् पर्य्यायेण बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां चरता रूप-मनात्मेति न स्थातव्यं। पुनरपरं भगवन् बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां चरता वेदनाऽनात्मेति न स्थातव्यं। तत् कस्य हेतोस्तथाहि। भगवन् वेदनाऽनात्मता वेदनाऽनात्मतया शून्या याच वेदनाऽनात्मताशून्यता न सा वेदनाऽनात्मता न चाऽन्यत्र वेदना-ऽनात्मतायाः शून्यता। वेदनाऽनात्मतैव शून्यता शून्यतैव वेदना-ऽनात्मता। अनेन भगवन् पर्य्यायेण बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां चरता वेदनाऽनात्मेति न स्थातव्यं। पुनरपरं भगवन् बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां चरता संज्ञाऽना-त्मेति न स्थातव्यं। तत् कस्य हेतोस्तथाहि। भगवन् संज्ञाऽनात्मता संज्ञाऽनात्मतया शून्या। या च संज्ञाऽनात्मताशून्यता न सा

संज्ञाऽनात्मता। न चाऽन्यत्र संज्ञाऽनात्मतायाः शून्यता। संज्ञाऽना-त्मतैव शून्यता शून्यतैव संज्ञाऽनात्मता। अनेन भगवन् पर्य्यायेण बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां चरता संज्ञाऽनात्मेति न स्थातव्यं। पुनरपरं भगवन् बोधिसत्त्वेन महासत्त्वेन प्रज्ञापार-मितायां चरता संस्कारा अनात्मान इति न स्थातव्यं। तत् कस्य हेतोस्तथाहि भगवन् संस्काराऽनात्मता संस्काराऽनात्मतया शून्या। या च संस्काराऽनात्मता शून्यता न सा संस्काराऽनात्मता। न चाऽन्यत्र संस्काराऽनात्मतायाः शून्यता। संस्काराऽनात्मतैव शून्यता शून्यतैव संस्काराऽनात्मता। अनेन भगवन् पर्य्यायेण बोधि-सत्त्वेन महासत्त्वेन प्रज्ञापारमितायां चरता संस्कारा अनात्मान इति न स्थातव्यं। पुनरपरं भगवन् बोधिसत्त्वेन महासत्त्वेन प्रज्ञापार-मितायां चरता विज्ञानमनात्मेति न स्थातव्यं। तत् कस्य हेतोस्त-थाहि। भगवन् विज्ञानाऽनात्मता विज्ञानाऽनात्मतया शून्या। या च विज्ञानाऽनात्मताशून्यता न सा विज्ञानाऽनात्मता। न चाऽन्यत्र विज्ञानाऽनात्मतायाः शून्यता। विज्ञानाऽनात्मतैव शून्यता। शून्य-तैवविज्ञानाऽनात्मता। अनेन भगवन् पर्य्यायेण बोधिसत्त्वेन महा-सत्त्वेन प्रज्ञापारमितायां चरता विज्ञानमनात्मेति न स्थातव्यं।

पुनरपरं भगवन् बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां चरता रूपं शान्तमिति न स्थातव्यं। तत्कस्य हेतोस्तथाहि भगवन् रूपशान्तता रूपशान्ततया शून्या। या च रूपशान्तता शून्यता न सा रूपशान्तता। न चाऽन्यत्र रूपशान्ततायाः शून्यता। रूप-शान्ततैव शून्यता। शून्यतैव रूपशान्तता। अनेन भगवन् पर्य्यायेण

बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां चरता रूपं शान्तमिति न स्थातव्यं।

पुनरपरं भगवन् बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां चरता वेदनाशान्तेति न स्थातव्यं। तत्कस्य हेतोस्तथाहि। भगवन् वेदनाशान्तता वेदनाशान्ततया शून्या। या च वेदनाशान्तता शून्यता न सा वेदनाशान्तता। न चाऽन्यत्र वेदनाशान्ततायाः शून्यता। वेदनाशान्ततैव शून्यता। शून्यतैव वेदनाशान्तता। अनेन भगवन् पर्य्यायेण बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां चरता वेदनाशान्तेति न स्थातव्यं।

पुनरपरं भगवन् बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां चरता संज्ञाशान्तेति न स्थातव्यं। तत्कस्य हेतोस्तथाहि भगवन् संज्ञाशान्तता संज्ञाशान्ततया शून्या। या च संज्ञाशान्तता शून्यता न सा संज्ञाशान्तता। न चाऽन्यत्र संज्ञाशान्ततायाः शून्यता। संज्ञाशान्ततैव शून्यता शून्यतैव संज्ञाशान्तता। अनेन भगवन् पर्य्यायेण बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां चरता संज्ञाशान्तेति न स्थातव्यं।

पुनरपरं भगवन् बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां चरता संस्काराःशान्त इति न स्थातव्यं। तत्कस्य हेतोस्तथाहि भगवन् संस्कारशान्तता संस्कारशान्ततया शून्या। या च संस्कारशान्तता शून्यता न सा संस्कारशान्तता। न चाऽन्यत्र संस्कारशान्ततायाः शून्यता। संस्कारशान्ततैव शून्यता। शून्यतैव संस्कारशान्तता। अनेन भगवन् पर्य्यायेण बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां चरता संस्काराः शान्त इति न स्थातव्यं।

पुनरपरं भगवन् बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां चरता। विज्ञानं शान्तमिति न स्थातव्यं। तत्कस्य हेतोस्तथाहि भगवन् विज्ञानशान्तता विज्ञानशान्ततया शून्या। या च विज्ञान-शान्तता शून्यता न सा विज्ञानशान्तता। न चाऽन्यत्र विज्ञान-शान्ततायाः शून्यता। विज्ञानशान्ततैव शून्यता। शून्यतैव विज्ञान शान्तता। अनेन भगवन् पर्य्यायेण बोधिसत्त्वेन महासत्त्वेन प्रज्ञापरमितायां चरता विज्ञानं शान्तमिति न स्थातव्यं।

पुनरपरं भगवन् बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां चरता रूपं शून्यमिति न स्थातव्यं। तत्कस्य हेतोस्तथाहि भगवन् रूपशून्यता रूपशून्यतया शून्या। या च रूपशून्यता न सा रूपशून्यता। न चाऽन्यत्र रूपशून्यतायाः शून्यता। रूपशून्यतैव शून्यता शून्यतैव रूपशून्यता। अनेन भगवन् पर्य्यायेण बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां चरता रूपं शून्यमिति न स्थातव्यं।

पुनरपरं भगवन् बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां चरता वेदनाशून्येति न स्थातव्यं। तत्कस्य हेतोस्तथाहि भगवन् वेदनाशून्यता वेदनाशून्यतया शून्या। या च वेदनाशून्यता न सा वेदनाशून्यता। न चाऽन्यत्र वेदनाशून्यतायाः शून्यता। वेदनाशून्यतैव शून्यता शून्यतैव वेदनाशून्यता। अनेन भगवन् पर्य्यायेण बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां चरता वेदनाशून्येति न स्थातव्यं।

पुनरपरं भगवन् बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां चरता संज्ञाशून्येति न स्थातव्यं। तत्कस्य हेतोस्तथाहि भगवन् संज्ञाशून्यता संज्ञाशून्यतया शून्या। या च संज्ञाशून्यता न सा

संज्ञाशून्यता। न चाऽन्यत्र संज्ञाःशून्यतायाः शून्यता। संज्ञाशून्यतैव शून्यता शून्यतैव संज्ञाशून्यता। अनेन भगवन् पर्य्यायेण बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां चरता संज्ञाशून्येति न स्थातव्यं।

पुनरपरं भगवन् बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां चरता संस्काराः शून्या इति न स्थातव्यं। तत्कस्य हेतोस्तथाहि भगवन् संस्कारशून्यता संस्कारशून्यतया शून्या। या च संस्कार-शून्यता न सा संस्कारशून्यता। न चाऽन्यत्र संस्कारशून्यतायाः शून्यता संस्कारशून्यतैव शून्यता। शून्यतैव संस्कारशून्यता। अनेन भगवन् पर्य्यायेण बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां चरता संस्काराः शून्य इति न स्थातव्यं।

पुनरपरं भगवन् बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां चरता विज्ञानशून्यमिति न स्थातव्यं। तत्कस्य हेतोस्तथाहि भगवन् विज्ञानशून्यता विज्ञानशून्यतया शून्या। या च विज्ञानशून्यता शून्यता न सा विज्ञानशून्यता। न चाऽन्यत्र विज्ञानशून्यतायाः शून्यता। विज्ञानशून्यतैव शून्यता शून्यतैव विज्ञानशून्यता। अनेन भगवन् पर्य्यायेण बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां चरता विज्ञानं शून्यमिति न स्थातव्यं।

पुनरपरं भगवन् बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां चरता रूपमानिमित्तमिति न स्थातव्यं। तत्कस्य हेतोस्तथाहि भगवन् रूपानिमित्तता रूपानिमित्ततया शून्या। या च रूपानिमित्तता शून्यता न सा रूपानिमित्तता। न चाऽन्यत्र रूपानिमित्ततायाः शून्यता। रूपानिमित्ततैव शून्यता। शून्यतैव रूपानिमित्तता।

अनेन भगवन् पर्य्यायेण बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां चरता रूपमानिमित्तमिति न स्थातव्यं।

पुनरपरं भगवन् बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां चरता वेदनानिमित्तमिति न स्थातव्यं। तत्कस्य हेतोस्तथाहि भगवन् वेदनानिमित्तता वेदनानिमित्ततया शून्या। या च वेदनानिमित्तता शून्यता न सा वेदनानिमित्तता। न चाऽन्यत्र वेदनानिमित्ततायाः शून्यता। वेदनानिमित्ततैव शून्यता। शून्यतैव वेदनानिमित्तता। अनेन भगवन् पर्य्यायेण बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां चरता वेदनानिमित्तमिति न स्थातव्यं।

पुनरपरं भगवन् बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां चरता संज्ञानिमित्तमिति न स्थातव्यं। तत्कस्य हेतोस्तथाहि भगवन् संज्ञानिमित्तता संज्ञानिमित्ततया शून्या। या च संज्ञा-निमित्तता शून्यता न सा संज्ञानिमित्तता। न चाऽन्यत्र संज्ञा-निमित्ततायाः शून्यता। संज्ञानिमित्ततैव शून्यता शून्यतैव संज्ञा-निमित्तता। अनेन भगवन् पर्य्यायेण बोधिसत्त्वेन महासत्त्वेन प्रज्ञा-पारमितायां चरता संज्ञानिमित्तमिति न स्थातव्यं।

पुनरपरं भगवन् बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां चरता संस्कारा आनिमित्तमिति न स्थातव्यं। तत्कस्य हेतोस्तथाहि संस्कारानिमित्तता संस्कारानिमित्ततया शून्या। या च संस्कारा-निमित्तता शून्यता न सा संस्कारानिमित्तता। न चाऽन्यत्र संस्कारानिमित्ततायाः शून्यता। संस्कारानिमित्ततैव शून्यता। शून्यतैव संस्कारानिमित्तता। अनेन भगवन् पर्य्यायेण बोधिसत्त्वेन

Prithivirāj Rāsa, (Text) Part II, Fasc. 1-5 @ /6/ each ... ...

Ditto (English) Part II, Fasc. 1 ... ...

Prākrta Lakṣaṇam, (Text) Fasc. 1 ... ...

Parāçara Smṛti, (Text) Vol. I, Fasc. 1-8; Vol. II, Fasc. 1-6; Vol. III, Fasc. 1-6 @ /6/ each ... ...

Parāçara, Institutes of (English) ... ...

Prabandhacintāmaṇi (English) Fasc. 1-3 @ /12/ each ...

*Sāma Veda Saṁhitā, (Text) Vols. I, Fasc. 6-10; II, 1-6; III, 1-7; IV, 1-6; V, 1-8, @ /6/ each Fasc. ... ...

Sāṅkhya Sūtra Vṛtti, (Text) Fasc. 1-4 @ /6/ each ... ...

Ditto (English) Fasc. 1-3 @ /12/ each ... ...

Sraddha Kriya Kaumudi, Fasc. 1-4 ... ...

Suçruta Saṁhitā, (Eng.) Fasc. 1 @ /12/ ... ...

*Taittereya Saṁhitā, (Text) Fasc. 14-45 @ /6/ each ... ...

Tāṇḍya Brāhmaṇa, (Text) Fasc. 1-19 @ /6/ each ...

Tantra Vartika (English) Fasc. 1 ... ...

Tattva Cintāmaṇi, (Text) Vol. I, Fasc. 1-9, Vol. II, Fasc. 2-10, Vol. III, Fasc. 1-2, Vol. IV, Fasc. 1, Vol. V, Fasc. 1-5, Part IV, Vol. II, Fasc. 1-12 @ /6/ each ... ...

Tattvarthadhigama Sutram, Fasc. 1 ... ...

Trikāṇḍa-Maṇḍanam, (Text) Fasc. 1-3 @ /6/ ...

Tul'si Sat'sai, (Text) Fasc. 1-5 @ /6/ each ...

Upamita-bhava-prapañca-kathā (Text) Fasc. 1-6 @ /6/ each

Uvāsagadasāo, (Text and English) Fasc. 1-6 @ /12/

Varāha Purāṇa, (Text) Fasc. 1-14 @ /6/ each ...

Varsa Kriya Kaumudi, Fasc. 1-6 @ /6/ ...

*Vāyu Purāṇa, (Text) Vol. I, Fasc. 2-6; Vol. II, Fasc. 1 [illegible]

Vidhana Parijata, Fasc. 1-4 ... ...

Visnu Smṛti, (Text) Fasc. 1-2 @ /6/ each ...

Vivādaratnākara, (Text) Fasc. 1-7 @ /6/ each ...

Vrhannāradiya Purāṇa, (Text) Fasc. 2-6 @ /6/ ...

Vrhat Svayambhu Purāṇa, Fasc. 1-6 ...

Tibetan Series

Pag-Sam Thi Śiṅ, Fasc. 1-4 @ 1/ each ...

Sher-Phyin, Vol. I, Fasc. 1-5; Vol. II, Fasc. 1-3; Vol. III, Fasc. [illegible] @ 1/ each ...

Rtogs brjod dpag hkhri Śiṅ (Tib. & Sans. Vol. I, Fasc. [illegible] Fasc. 1-5 @ 1/ each

Arabic and Persian Series

'Alamgirnamah, with Index, (Text) Fasc. 1-13 @ /6/ each

Al-Muqaddasi (English) Vol. I, Fasc. 1-3 @ /12/

Ain-i-Akbari, (Text) Fasc. 1-22 @ 1/ each

Ditto (English) Vol. I, Fasc. 1-7, Vol. II, Fasc. [illegible] Fasc. 1-5, @ 1/12/ each

Akbarnamah, with Index, (Text) Fasc. 1-37 @ 1/ each

Ditto English Fasc. 1-8 @ 1/ each

Arabic Bibliography, by Dr. A. Sprenger

Badshahnamah with Index, (Text) [illegible]

Catalogue of Arabic [illegible]

Catalogue of the Persian [illegible] Asiatic Society of Bengal [illegible]

Dictionary of Arabic Technical Terms [illegible]

[illegible]

Farhang-i-Rashidi, (Text) Fasc. 1-14 @ 1/ each

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

* [illegible]

LIST OF BOOKS FOR SALE

AT THE LIBRARY OF THE

Asiatic Society of Bengal,

No. 57, PARK STREET, CALCUTTA,

AND OBTAINABLE FROM

THE SOCIETY'S AGENTS, MESSRS. LUZAC & CO.,

46, Great Russell Street, London, W.C., and Mr. Otto Harrassowitz, Bookseller, Leipzig, Germany.

*Complete copies of those works marked with an asterisk * cannot be supplied—some of the Fasciculi being out of stock.*

BIBLIOTHECA INDICA.

Sanskrit Series.

	Rs.	
Advaita Brahma Siddhi, (Text) Fasc. 1-4 @ /6/ each ...	1	8
Advaitachinta Kaustubha, Fasc. 1	0	6
*Agni Purāṇa, (Text) Fasc. 1-14 @ /6/ each	4	2
Aitarēya Brāhmaṇa, Vol. I, Fasc. 1-5 and Vol. II, Fasc. 1-5; Vol. III, Fasc. 1-5, Vol. IV, Fasc. 1-5 @ /6/	7	8
Anu Bhāṣyam, (Text) Fasc. 2-5 @ /6/ each	1	8
Aphorisms of Sāṇḍilya, (English) Fasc. 1	0	12
Astasāhasrikā Prajñāpāramitā, (Text) Fasc. 1-6 @ /6/ each ...	2	4
Açvavaidyaka, (Text) Fasc. 1-5 @ /6/ each	1	14
Avadāna Kalpalatā, (Sans. and Tibetan) Vol. I, Fasc. 1-5; Vol. II. Fasc. 1-5 @ 1/ each	10	0
Bāla Bhaṭṭi, Vol. I, Fasc. 1	0	6
Baudhayana Srauta Sutra, Fasc. 1-2 @ /6/ each	0	12
*Bhāmatī, (Text) Fasc. 4-8 @ /6/ each	1	14
Bhāṭṭa Dīpikā Vol. I, Fasc. 1-4	1	8
Bṛhaddēvatā (Text) Fasc. 1-4 @ /6/ each	1	8
Bṛhaddharma Purāṇa, (Text) Fasc. 1-6 @ /6/ each	2	4
Bodhicaryavatara of Cantidevi, Fasc. 1-2	0	12
Catadusani, Fasc. 1	0	6
Catalogue of Sanskrit Books and MSS., Fasc. 1-4 @ 2/ each ...	8	0
Çatapatha Brāhmaṇa, Vol. I, Fasc. 1-7; Vol. II, Fasc. 1-2 ...	3	6
Çatasahasrika-prajnaparamita (Text) Part I, Fasc. 1-6 @ /6/ each ...	2	4
*Caturvarga Chintāmaṇi (Text) Vols. II, 1-25; III. Part I, Fasc. 1-18. Part II, Fasc. 1-10 @ /6/ each	19	14
Çlokavartika, (English) Fasc. 1-4	3	0
*Çrauta Sūtra of Āpastamba, (Text) Fasc. 4-17 @ /6/ each ...	5	4
Ditto Çānkhāyana, (Text) Vol. I, Fasc. 1-7; Vol. II, Fasc. 1-4; Vol. III, Fasc. 1-4 @ /6/ each	5	10
Çrī Bhāshyam, (Text) Fasc. 1-3 @ /6/ each	1	2
Dan Kriya Kaumudi, Fasc. 1-2	0	12
Gadadhara Paddhati Kālasāra, Vol I, Fasc. 1-6...	2	4
Kāla Mādhava, (Text) Fasc. 1-4 @ /6/ each	1	8
Kāla Viveka, Fasc. 1-6	2	4
Kātantra, (Text) Fasc. 1-6 @ /12/ each	4	8
Kathā Sarit Sāgara, (English) Fasc. 1-14 @ /12/ each	10	8
Kūrma Purāṇa, (Text) Fasc. 1-9 @ /6/ each	3	6
Lalita-Vistara, (English) Fasc. 1-3 @ /12/ each	2	4
Madana Pārijāta, (Text) Fasc. 1-11 @ /6/ each...	4	2
Mahā-bhāṣya-pradīpōdyōta, (Text) Fasc. 1-9 & Vol. II, Fasc. 1-11 @ /6/ each	7	8
Manuṭīkā Saṅgraha, (Text) Fasc. 1-3 @ /6/ each	1	2
Mārkaṇḍēya Purāṇa, (English) Fasc. 1-8 @ /12 each	6	0
*Mīmāmsā Darçana, (Text) Fasc. 7-19 @ /6/ each	4	14
Nyāyavārtika, (Text) Fasc. 1-6 @ /6/	2	4
*Nirukta, (Text) Vol. III, Fasc. 1-6; Vol. IV, Fasc. 1-8 @ /6/ each ...	5	4
Nityacarapaddhati Fasc. 1-7 (Text) @ /6/	2	10
Nityacarapradiph Fasc. 1-4	1	8
Nyayabinduṭikā, (Text)	0	10
Nyāya Kusumāñjali Prakaraṇa (Text) Vol. I, Fasc. 1-6 Vol. II, Fasc. 1-3 @ /6/ each	3	9

महासत्त्वेन प्रज्ञापारमितायां चरता संस्कारा आनिमित्तमिति न स्थातव्यं।

पुनरपरं भगवन् बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां चरता विज्ञान आनिमित्तमिति न स्थातव्यं। तत्कस्य हेतोस्तथाहि भगवन् विज्ञानानिमित्तता विज्ञानानिमित्ततया शून्या। या च विज्ञानानिमित्तता शून्यता न सा विज्ञानानिमित्तता। न चाऽन्यत्र विज्ञानानिमित्ततायाः शून्यता। विज्ञानानिमित्ततैव शून्यता शून्यतैव विज्ञानानिमित्तता। अनेन भगवन् पर्य्यायेण बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां चरता विज्ञानमानिमित्तमिति न स्थातव्यं।

पुनरपरं भगवन् बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां चरता रूपमप्रणिहितमिति न स्थातव्यं। तत्कस्य हेतोस्तथाहि भगवन् रूपाऽप्रणिहितता रूपाऽप्रणिहिततया शून्या। या च रूपाऽप्रणिहितता शून्यता न सा रूपाऽप्रणिहितता। न चाऽन्यत्र रूपाऽप्रणिहिततायाः शून्यता। रूपाऽप्रणिहिततैव शून्यता। शून्यतैव रूपाऽप्रणिहितता। अनेन भगवन् पर्य्यायेण बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां चरता रूपमप्रणिहितमिति न स्थातव्यं।

पुनरपरं भगवन् बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां चरताऽप्रणिहितेति न स्थातव्यं। तत्कस्य हेतोस्तथाहि भगवन् वेदनाऽप्रणिहितता वेदनाऽप्रणिहिततया शून्या। या च वेदनाऽप्रणिहितताशून्यता न सा वेदनाऽप्रणिहितता। न चाऽन्यत्र वेदनाऽप्रणिहिततायाः शून्यता। वेदनाऽप्रणिहिततैव शून्यता। शून्यतैव

वेदनाऽप्रणिहितता। अनेन भगवन् पर्य्यायेण बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां चरता वेदनाऽप्रणिहितेति न स्थातव्यं ।

पुनरपरं भगवन् बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां चरता संज्ञाऽप्रणिहितेति न स्थातव्यं। तत्कस्य हेतोस्तथाहि भगवन् संज्ञाऽप्रणिहिता संज्ञाऽप्रणिहिततया शून्या। या च संज्ञाऽप्रणिहितता शून्यता न सा संज्ञाऽप्रणिहितता। न चाऽन्यत्र संज्ञाऽप्रणिहितताया: शून्यता। संज्ञाऽप्रणिततैव शून्यता। शून्यतैव संज्ञाऽप्रणिहितता। अनेन भगवन् पर्य्यायेण बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां चरता संज्ञाऽप्रणिहितेति न स्थातव्यं।

पुनरपरं भगवन् बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां चरता संस्कारा: अप्रणिहिता इति न स्थातव्यं। तत्कस्य हेतोस्तथाहि भगवन् संस्काराऽप्रणिहितता संस्काराऽप्रणिहिततया शून्या। या च संस्काराऽप्रणिहितता शून्यता न सा संस्काराऽप्रणिहितता। न चाऽन्यत्र संस्काराऽप्रणिहितताया: शून्यता। संस्काराऽप्रणिहिततैव शून्यता। शून्यतैव संस्काराऽप्रणिहितता। अनेन भगवन् पर्य्यायेण बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां चरता संस्कारा अप्रणिहिता इति न स्थातव्यं।

पुनरपरं भगवन् बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां चरता विज्ञानमप्रणिहितमिति न स्थातव्यं। तत्कस्य हेतोस्तथाहि भगवन् विज्ञानाऽप्रणिहितता विज्ञानाऽप्रणिहिततया शून्या। या च विज्ञानाऽप्रणिहितता शून्यता। न सा विज्ञानाऽप्रणिहितता। न चाऽन्यत्र विज्ञानाऽप्रणिहितताया: शून्यता। विज्ञानाऽप्रणिहिततैव

शून्यता। शून्यतैव विज्ञानाऽप्रणिहितता। अनेन भगवन् पर्य्यायेण बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां चरता विज्ञानमप्रणिहितमिति न स्थातव्यं।

पुनरपरं भगवन् बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां चरता रूपं विविक्तमिति न स्थातव्यं। तत्कस्य हेतोस्तथाहि भगवन् रूपविविक्तता रूपविविक्ततया शून्या। या च रूपविविक्तता शून्यता न सा रूपविविक्तता। न चाऽन्यत्र रूपविविक्ततायाः शून्यता। रूपविविक्ततैव शून्यता शून्यतैव रूपविविक्तता। अनेन भगवन् पर्य्यायेण बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां चरता रूपं विविक्तमिति न स्थातव्यं।

पुनरपरं भगवन् बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां चरता वेदनाविविक्तेति न स्थातव्यं। तत्कस्य हेतोस्तथाहि भगवन् वेदनाविविक्तता वेदनाविविक्ततया शून्या। या च वेदनाविविक्तता शून्यता न सा वेदनाविविक्तता। न चाऽन्यत्र वेदनाविविक्ततायाः शून्यता। वेदनाविविक्ततैव शून्यता शून्यतैव वेदनाविविक्तता। अनेन भगवन् पर्य्यायेण बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां चरता वेदनाविविक्तेति न स्थातव्यं।

पुनरपरं भगवन् बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां चरता संज्ञाविविक्तेति न स्थातव्यं। तत्कस्य हेतोस्तथाहि भगवन् संज्ञाविविक्तता संज्ञाविविक्ततया शून्या। या च संज्ञाविविक्तता शून्यता न सा संज्ञाविविक्तता। न चाऽन्यत्र संज्ञाविविक्ततायाः शून्यता। संज्ञाविविक्ततैव शून्यता शून्यतैव संज्ञाविविक्तता। अनेन

भगवन् पर्य्यायेण बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां चरता संज्ञाविविक्तेति न स्थातव्यं।

पुनरपरं भगवन् बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां चरता संस्काराः विविक्तता इति न स्थातव्यं। तत्कस्य हेतोस्तथाहि। भगवन् संस्कारविविक्तता संस्कारविविक्ततया शून्या। या च संस्कारविविक्तता शून्यता न सा संस्कारविविक्तता। न चाऽन्यत्र संस्कारविविक्ततायाः शून्यता। संस्कारविविक्ततैव शून्यता। शून्यतैव संस्कारविविक्तता। अनेन भगवन् पर्य्यायेण बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां चरता संस्काराविविक्ता इति न स्थातव्यं।

पुनरपरं भगवन् बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां चरता विज्ञानं विविक्तमिति न स्थातव्यं। तत्कस्य हेतोस्तथाहि भगवन् विज्ञानविविक्तता विज्ञानविविक्ततया शून्या। या च विज्ञानविविक्तता शून्यता न सा विज्ञानविविक्तता। न चाऽन्यत्र विज्ञानविविक्ततायाः शून्यता। विज्ञानविविक्ततैव शून्यता। शून्यतैव विज्ञानविविक्तता। अनेन भगवन् पर्य्यायेण बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां चरता विज्ञानं विविक्तमिति न स्थातव्यं।

पुनरपरं भगवन् बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां चरता तथतायां न स्थातव्यं। तत्कस्य हेतोस्तथाहि भगवन् तथता तथतया शून्या। या च तथता शून्यता न सा तथता। न चाऽन्यत्र तथतायाः शून्यता। तथतैव शून्यता। शून्यतैव तथता। अनेन भगवन् पर्य्यायेण बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां चरता तथतायां न स्थातव्यं।

पुनरपरं भगवन् बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां चरता धर्म्मतायां न स्थातव्यं। तत्कस्य हेतोस्तथाहि भगवन् धर्म्मता धर्म्मतया शून्या । या च धर्म्मता शून्यता । न सा धर्म्मता । न चाऽन्यत्र धर्म्मतायाः शून्यता । शून्यतैव धर्म्मता । अनेन भगवन पर्य्यायेण बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां चरता धर्म्मतायां न स्थातव्यं ।

पुनरपरं भगवन् बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां चरता धर्म्मधातौ न स्थातव्यं। तत्कस्य हेतोस्तथाहि भगवन धर्म्मधातु धर्म्मधातुना शून्या। या च धर्म्मधातु शून्यता न स धर्म्मधातुः। न चाऽन्यत्र धर्म्मधातोः शून्यता। धर्म्मधातुरेव शून्यता। शून्यतैव धर्म्मधातुः। अनेन भगवन् पर्य्यायेण बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां चरता धर्म्मधातौ न स्थातव्यं।

पुनरपरं भगवन् बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां चरता धर्म्मनियामतायां न स्थातव्यं । तत्कस्य हेतोस्तथाहि भगवन् धर्म्मनियामता धर्म्मनियामतया शून्या। या च धर्म्मनियामता शून्यता न सा धर्म्मनियामता। न चाऽन्यत्र धर्म्मनियामतायाः शून्यता। धर्म्मनियामतैव शून्यता। शून्यतैव धर्म्मनियामता। अनेन भगवन् पर्य्यायेण बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां चरता धर्म्मनियामतायां न स्थातव्यं ।

पुनरपरं भगवन् बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां चरता भूतकोट्यां न स्थातव्यं। तत्कस्य हेतोस्तथाहि भगवन्। भूतकोटिर्भूतकोट्या शून्या। या च भूतकोटि शून्यता न सा

पोऽभिसंस्कारे चरति न चरति प्रज्ञापारमितायां। स चेद्भगवन् बोधिसत्त्वोमहासत्त्वः प्रज्ञापारमितायां चरन्ननुपायकौशलेनाहङ्कार-ममकारगतेन मानसेन श्रोत्रे तिष्ठति। श्रोत्रस्याऽभिसंस्कारे चरति न चरति प्रज्ञापारमितायां। स चेद्भगवन् बोधिसत्त्वोमहासत्त्वः प्रज्ञापारमितायां चरन्ननुपायकौशलेनाहङ्कारममकारगतेन मानसेन घ्राणे तिष्ठति। घ्राणस्याभिसंस्कारे चरति न चरति प्रज्ञापार-मितायां। स चेद्भगवन् बोधिसत्त्वोमहासत्त्वः प्रज्ञापारमितायां चरन्ननुपायकौशलेनाहङ्कारममकारगतेन मानसेन जिह्वायां तिष्ठति। स जिह्वाया अभिसंस्कारे चरति न चरति प्रज्ञा-पारमितायां। स चेद्भगवन् बोधिसत्त्वोमहासत्त्वः प्रज्ञापारमितायां चरन्ननुपायकौशलेनाहङ्कारममकारगतेन मानसेन काये तिष्ठति। स कायस्याभिसंस्कारे चरति न चरति प्रज्ञापारमितायां। स चेद्भगवन् बोधिसत्त्वोमहासत्त्वः प्रज्ञापारमितायां चरन्ननुपाय-कौशलेनाहङ्कारममकारगतेन मानसेन मनसि तिष्ठति। स मनसो-ऽभिसंस्कारे चरति न चरति प्रज्ञापारमितायां। तत्कस्य हेतोर्नह्यभिसंस्कारे चरन् बोधिसत्त्वोमहासत्त्वः प्रज्ञापारमितां परिगृह्णाति न प्रज्ञापारमितायोगमापद्यते। अपरिपूरयन् प्रज्ञा-पारमितां न निर्याति सर्व्वाकारज्ञतायां।

स चेद्भगवन् बोधिसत्त्वोमहासत्त्वः प्रज्ञापारमितायां चरन्ननु-पायकौशलेनाहङ्कारममकारगतेन मानसेन रूपे तिष्ठति। स रूपस्याऽभिसंस्कारे चरति न चरति प्रज्ञापारमितायां। स चेद्भगवन् बोधिसत्त्वोमहासत्त्वः प्रज्ञापारमितायां चरन्ननुपाय-

कौशलेनाहङ्कारममकारगतेन मानसेन शब्दे तिष्ठति। स शब्दस्याऽभिसंस्कारे चरति न चरति प्रज्ञापारमितायां। स चेद्भगवन् बोधिसत्त्वोमहासत्त्वः प्रज्ञापारमितायां चरन्ननुपायकौशलेनाहङ्कारममकारगतेन मानसेन गन्धे तिष्ठति। स गन्धस्याऽभिसंस्कारे चरति न चरति प्रज्ञापारमितायां। स चेद्भगवन् बोधिसत्त्वोमहासत्त्वः प्रज्ञापारमितायां चरन्ननुपायकौशलेनाहङ्कारममकारगतेन मानसेन रसे तिष्ठति। स रसस्याऽभिसंस्कारे चरति न चरति प्रज्ञापारमितायां। स चेद्भगवन् बोधिसत्त्वोमहासत्त्वः प्रज्ञापारमितायां चरन्ननुपायकौशलेनाहङ्कारममकारगतेन मानसेन स्पर्शे तिष्ठति। स स्पर्शस्याऽभिसंस्कारे चरति। न चरति प्रज्ञापारमितायां। स चेद्भगवन् बोधिसत्त्वोमहासत्त्वः प्रज्ञापारमितायां चरन्ननुपायकौशलेनाहङ्कारममकारगतेन मानसेन धर्म्मेषु तिष्ठति। स धर्म्माणामभिसंस्कारे चरति न चरति प्रज्ञापारमितायां। तत्कस्य हेतोस्तथाहि। अभिसंस्कारे चरन् बोधिसत्त्वोमहासत्त्वः प्रज्ञापारमितां परिगृह्णाति। न प्रज्ञापारमिता योगमापद्यते। अपरिपूरयन् प्रज्ञापारमितां न निर्याति सर्व्वाकारज्ञतायां।

स चेद्भगवन् बोधिसत्त्वोमहासत्त्वः प्रज्ञापारमितायां चरन्ननुपायकौशलेनाहङ्कारममकारगतेन मानसेन चक्षुर्व्विज्ञाने तिष्ठति। स चक्षुर्व्विज्ञानस्याभिसंस्कारे चरति न चरति प्रज्ञापारमितायां। स चेद्भगवन् बोधिसत्त्वोमहासत्त्वः प्रज्ञापारमितायां चरन्ननुपायकौशलेनाहङ्कारममकारगतेन मानसेन श्रोत्रविज्ञाने तिष्ठति। स श्रोत्रविज्ञानस्याभिसंस्कारे चरति न चरति प्रज्ञापारमितायां। स

चेद्भगवन् बोधिसत्त्वोमहासत्त्वः प्रज्ञापारमितायां चरन्ननुपायकौशल्ये-
नाहङ्कारममकारगतेन मानसेन घ्राणविज्ञाने तिष्ठति । स घ्राण-
विज्ञानस्याऽभिसंस्कारे चरति न चरति प्रज्ञापारमितायां । स
चेद्भगवन् बोधिसत्त्वोमहासत्त्वः प्रज्ञापारमितायां चरन्ननुपायकौशल्ये-
नाहङ्कारममकारगतेन मानसेन जिह्वाविज्ञाने तिष्ठति । स
जिह्वाविज्ञानस्याभिसंस्कारे चरति न चरति प्रज्ञापारमितायां ।
स चेद्भगवन् बोधिसत्त्वोमहासत्त्वः प्रज्ञापारमितायां चरन्ननुपाय-
कौशल्येनाहङ्कारममकारगतेन मानसेन कायविज्ञाने तिष्ठति । स
कायविज्ञानस्याभिसंस्कारे चरति न चरति प्रज्ञापारमितायां । स
चेद्भगवन् बोधिसत्त्वोमहासत्त्वः प्रज्ञापारमितायां चरन्ननुपाय-
कौशल्येनाहङ्कारममकारगतेन मानसेन विज्ञाने तिष्ठति । स
मनोविज्ञानस्याभिसंस्कारे चरति न चरति प्रज्ञापारमितायां ।
तत्कस्य हेतोस्तथाहि अभिसंस्कारे चरन् बोधिसत्त्वोमहासत्त्वः
प्रज्ञापारमितां परिगृह्णाति । न प्रज्ञापारमिता योगमापद्यते ।
अपरिपूरयन् प्रज्ञापारमितां न निर्याति सर्वाकारज्ञतायां ।

स चेद्भगवन् बोधिसत्त्वोमहासत्त्वः प्रज्ञापारमितायां चरन्ननु-
पायकौशल्येनाहङ्कारममकारगतेन मानसेन चक्षुः संस्पर्शे तिष्ठति ।
स चक्षुः संस्पर्शस्याभिसंस्कारे चरति न चरति प्रज्ञापारमितायां ।
स चेद्भगवन् बोधिसत्त्वोमहासत्त्वः प्रज्ञापारमितायां चरन्ननुपाय-
कौशल्येनाहङ्कारममकारगतेन मानसेन श्रोत्रसंस्पर्शे तिष्ठति । स
श्रोत्रसंस्पर्शस्याभिसंस्कारे चरति न चरति प्रज्ञापारमितायां ।
स चेद्भगवन् बोधिसत्त्वोमहासत्त्वः प्रज्ञापारमितायां चरन्ननुपाय-

कौशलेनाहङ्कारममकारगतेन मानसेन घ्राणसंस्पर्शे तिष्ठति । स घ्राणसंस्पर्शस्याऽभिसंस्कारे चरति न चरति प्रज्ञापारमितायां । स चेद्भगवन् बोधिसत्त्वोमहासत्त्वः प्रज्ञापारमितायां चरन्ननुपाय-कौशलेनाहङ्कारममकारगतेन मानसेन जिह्वासंस्पर्शे तिष्ठति । जिह्वासंस्पर्शस्याभिसंस्कारे चरति न चरति प्रज्ञापारमितायां । स चेद्भगवन् बोधिसत्त्वोमहासत्त्वः प्रज्ञापारमितायां चरन्ननुपाय-कौशलेनाहङ्कारममकारगतेन मानसेन कायसंस्पर्शे तिष्ठति । स कायसंस्पर्शस्याभिसंस्कारे चरति न चरति प्रज्ञापारमितायां । स चेद्भगवन् बोधिसत्त्वोमहासत्त्वः प्रज्ञापारमितायां चरन्ननुपाय-कौशलेनाहङ्कारममकारगतेन मानसेन मनःसंस्पर्शे तिष्ठति । स मनःसंस्पर्शस्याऽभिसंस्कारे चरति न चरति प्रज्ञापारमितायां । तत्कस्य हेतोस्तथाहि अभिसंस्कारे चरन् बोधिसत्त्वोमहासत्त्वः प्रज्ञापारमितां परिगृह्णाति । न प्रज्ञापारमिता योगमापद्यते । अपरिपूरयन् प्रज्ञापारमितां न निर्याति सर्व्वाकारज्ञतायां ।

स चेद्भगवन् बोधिसत्त्वोमहासत्त्वः प्रज्ञापारमितायां चरन्ननुपाय-कौशलेनाहङ्कारममकारगतेन मानसेन चक्षुःसंस्पर्शजायां वेदनायां तिष्ठति । स चक्षुःसंस्पर्शजाया वेदनाया अभिसंस्कारे चरति न चरति प्रज्ञापारमितायां । स चेद्भगवन् बोधिसत्त्वोमहासत्त्वः प्रज्ञापारमितायां चरन्ननुपायकौशलेनाहङ्कारममकारगतेन मानसेन श्रोत्रसंस्पर्शजायां वेदनायां तिष्ठति । स श्रोत्रसंस्पर्शजाया वेदनाया अभिसंस्कारे चरति न चरति प्रज्ञापारमितायां । स चेद्भगवन् बोधिसत्त्वोमहासत्त्वः प्रज्ञापारमितायां चरन्ननुपायकौशलेनाहङ्कार-

ममकारगतेन मानसेन घ्राणसंस्पर्शजायां वेदनायां तिष्ठति। स घ्राणसंस्पर्शजाया वेदनाया अभिसंस्कारे चरति न चरति प्रज्ञापारमितायां। स चेद्भगवन् बोधिसत्त्वो महासत्त्वः प्रज्ञापारमितायां चरन्ननुपायकौशलेनाहङ्कारममकारगतेन मानसेन जिह्वासंस्पर्शजायां वेदनायां तिष्ठति। स जिह्वासंस्पर्शजाया वेदनाया अभिसंस्कारे चरति न चरति प्रज्ञापारमितायां। स चेद्भगवन् बोधिसत्त्वो महासत्त्वः प्रज्ञापारमितायां चरन्ननुपायकौशलेनाहङ्कारममकारगतेन मानसेन कायसंस्पर्शजायां वेदनायां तिष्ठति। स कायसंस्पर्शजाया वेदनाया अभिसंस्कारे चरति न चरति प्रज्ञापारमितायां। स चेद्भगवन् बोधिसत्त्वो महासत्त्वः प्रज्ञापारमितायां चरन्ननुपायकौशलेनाहङ्कारममकारगतेन मानसेन मनःसंस्पर्शजायां वेदनायां तिष्ठति। स मनःसंस्पर्शजाया वेदनाया अभिसंस्कारे चरति न चरति प्रज्ञापारमितायां। तत्कस्य हेतोर्नह्यभिसंस्कारे चरन् बोधिसत्त्वो महासत्त्वः प्रज्ञापारमितां परिगृह्णाति न प्रज्ञापारमिता योगं समापद्यते। अपरिपूरयन् प्रज्ञापारमितां न निर्याति सर्व्वाकारज्ञतायां।

स चेद्भगवन् बोधिसत्त्वो महासत्त्वः प्रज्ञापारमितायां चरन्ननुपायकौशलेनाहङ्कारममकारगतेन मानसेन पृथिवीधातौ तिष्ठति। स पृथिवीधातोरभिसंस्कारे चरति न चरति प्रज्ञापारमितायां। स चेद्भगवन् बोधिसत्त्वो महासत्त्वः प्रज्ञापारमितायां चरन्ननुपायकौशलेनाहङ्कारममकारगतेन मानसेनाब्धातौ तिष्ठति। सोऽब्धातोरभिसंस्कारे चरति न चरति प्रज्ञापारमितायां। स चेद्भगवन्

बोधिसत्त्वोमहासत्त्वः प्रज्ञापारमितायां चरन्नुपायकौशलेना
ममकारगतेन मानसेन तेजोधातौ तिष्ठति । स तेजोधातौ
संस्कारे चरति न चरति प्रज्ञापारमितायां । स चे
बोधिसत्त्वोमहासत्त्वः प्रज्ञापारमितायां चरन्नुपायकौशलेनाह
ममकारगतेन मानसेन वायुधातौ तिष्ठति । स वायुधातौ
संस्कारे चरति न चरति प्रज्ञापारमितायां । स चे
बोधिसत्त्वोमहासत्त्वः प्रज्ञापारमितायां चरन्नुपायकौशलेनाह
ममकारगतेन मानसेनाकाशधातौ तिष्ठति । स आकाशध
रभिसंस्कारे चरति न चरति प्रज्ञापारमितायां । स चेद्
बोधिसत्त्वोमहासत्त्वः प्रज्ञापारमितायां चरन्नुपायकौशलेनाह
ममकारगतेन मानसेन विज्ञानधातौ तिष्ठति । स विज्ञानध
रभिसंस्कारे चरति न चरति प्रज्ञापारमितायां । तत्कस्य हे
नेष्वभिसंस्कारे चरन् बोधिसत्त्वोमहासत्त्वः प्रज्ञापारमितायां
गृह्णाति । न प्रज्ञापारमिता योगमापद्यते । अपरिपूरयन् प्र
पारमितां न निर्याति सर्वाकारज्ञतायां ।

स चेद्भगवन् बोधिसत्त्वोमहासत्त्वः प्रज्ञापारमितायां चर
नुपायकौशलेनाहङ्कारममकारगतेन मानसेन विद्यायां तिष्ठ
सोऽविद्याया अभिसंस्कारे चरति । न चरति प्रज्ञापारमिता
स चेद्भगवन् बोधिसत्त्वोमहासत्त्वः प्रज्ञापारमितायां चरन्नु
पायकौशलेनाहङ्कारममकारगतेन संस्कारेषु तिष्ठति । स संस्
काराणामभिसंस्कारे चरति । न चरति प्रज्ञापारमितायां । स चे
द्भगवन् बोधिसत्त्वोमहासत्त्वः प्रज्ञापारमितायां चरन्नुपायकौशले

हङ्कारममकारगतेन मानसेन नामरूपे तिष्ठति । स नामरूपस्याभिसंस्कारे चरति । न चरति प्रज्ञापारमितायां । स चेद्भगवन् बोधिसत्त्वोमहासत्त्वः प्रज्ञापारमितायां चरन्ननुपायकौशल्येनाहङ्कारममकारगतेन मानसेन षडायतने तिष्ठति । स षडायतनस्याभिसंस्कारे चरति । न चरति प्रज्ञापारमितायां । स चेद्भगवन् बोधिसत्त्वोमहासत्त्वः प्रज्ञापारमितायां चरन्ननुपायकौशल्येनाहङ्कारममकारगतेन मानसेन स्पर्शे तिष्ठति । स स्पर्शस्याभिसंस्कारे चरति । न चरति प्रज्ञापारमितायां । स चेद्भगवन् बोधिसत्त्वोमहासत्त्वः प्रज्ञापारमितायां चरन्ननुपायकौशल्येनाहङ्कारममकारगतेन मानसेन वेदनायां तिष्ठति । स वेदनाया अभिसंस्कारे चरति । न चरति प्रज्ञापारमितायां । स चेद्भगवन् बोधिसत्त्वोमहासत्त्वः प्रज्ञापारमितायां चरन्ननुपायकौशल्येनाहङ्कारममकारगतेन मानसेन तृष्णायां तिष्ठति । स तृष्णायां अभिसंस्कारे चरति । न चरति प्रज्ञापारमितायां । स चेद्भगवन् बोधिसत्त्वोमहासत्त्वः प्रज्ञापारमितायां चरन्ननुपायकौशल्येनाहङ्कारममकारगतेन मानसेनोपादाने तिष्ठति । स उपादानस्याभिसंस्कारे चरति । न चरति प्रज्ञापारमितायां । स चेद्भगवन् बोधिसत्त्वोमहासत्त्वः प्रज्ञापारमितायां चरन्ननुपायकौशल्येनाहङ्कारममकारगतेन मानसेन भवे तिष्ठति । स भवस्याभिसंस्कारे चरति । न चरति प्रज्ञापारमितायां । स चेद्भगवन् बोधिसत्त्वोमहासत्त्वः प्रज्ञापारमितायां चरन्ननुपायकौशल्येनाहङ्कारममकारगतेन मानसेन जातौ तिष्ठति । स जातेरभिसंस्कारे चरति । न चरति प्रज्ञापारमितायां । स चेद्भगवन्

बोधिसत्त्वो महासत्त्वः प्रज्ञापारमितायां चरन्ननुपायकौशलेनाहङ्कार-
ममकारगतेन मानसेन [illegible] । स [illegible]
संस्कारे चरति । न चरति प्रज्ञापारमितायां । [illegible]
[illegible] नाम बोधिसत्त्वो महासत्त्वः प्रज्ञापारमितां [illegible]
जानाति न प्रज्ञापारमितां परिगृह्णाति । अपरिगृह्णन् प्रज्ञा-
पारमितां न निर्याति सर्वाकारज्ञतायां ।

स चेद्भगवन् बोधिसत्त्वो महासत्त्वः प्रज्ञापारमितायां चरन्न-
नुपायकौशलेनाहङ्कारममकारगतेन मानसेन दानपारमितायां
तिष्ठति । स दानपारमिताया अभिसंस्कारे चरति । न
चरति प्रज्ञापारमितायां । स चेद्भगवन् बोधिसत्त्वो महासत्त्वः
प्रज्ञापारमितायां चरन्ननुपायकौशलेनाहङ्कारममकारगतेन मान-
सेन शीलपारमितायां तिष्ठति । स शीलपारमिताया अभि-
संस्कारे चरति । न चरति प्रज्ञापारमितायां । स चेद्भगवन्
बोधिसत्त्वो महासत्त्वः प्रज्ञापारमितायां चरन्ननुपायकौशलेनाहङ्का-
रममकारगतेन मानसेन क्षान्तिपारमितायां चरति । स
क्षान्तिपारमितायां अभिसंस्कारे चरति । न चरति प्रज्ञापार-
मितायां । स चेद्भगवन् बोधिसत्त्वो महासत्त्वः प्रज्ञापारमितायां
चरन्ननुपायकौशलेनाहङ्कारममकारगतेन मानसेन वीर्य्यपार-
मितायां तिष्ठति । स वीर्य्यपारमिताया अभिसंस्कारे चरति ।
न चरति प्रज्ञापारमितायां । स चेद्भगवन् बोधिसत्त्वो महासत्त्वः
प्रज्ञापारमितायां चरन्ननुपायकौशलेनाहङ्कारममकारगतेन मान-
सेन ध्यानपारमितायां तिष्ठति । स ध्यानपारमितायां अभि-

संस्कारे चरति। न चरति प्रज्ञापारमितायां। स चेद्भगवन् बोधिसत्त्वोमहासत्त्वः प्रज्ञापारमितायां चरन्ननुपायकौशलेनाहङ्कारममकारगतेन मानसेन प्रज्ञापारमितायां तिष्ठति। स प्रज्ञापारमितायां अभिसंस्कारेचरति। न चरति प्रज्ञापारमितायां। तत्कस्य हेतोर्नह्यभिसंस्कारे चरन् बोधिसत्त्वोमहासत्त्वः प्रज्ञापारमितां परिगृह्णाति। न प्रज्ञापारमिता योगमापद्यते। अपरिपूरयन् प्रज्ञापारमितां न निर्यातिसर्व्वाकारज्ञतायां।

स चेद्भगवन् बोधिसत्त्वोमहासत्त्वः प्रज्ञापारमितायां चरन्ननुपायकौशलेनाहङ्कारममकारगतेन मानसेनाध्यात्मशून्यतायां तिष्ठति। सोऽध्यात्मशून्यताया अभिसंस्कारे चरति। न चरति प्रज्ञापारमितायां। स चेद्भगवन् बोधिसत्त्वोमहासत्त्वः प्रज्ञापारमितायां चरन्ननुपायकौशलेनाहङ्कारममकारगतेन मानसेन बहिर्द्धाशून्यतायां तिष्ठति। स बहिर्द्धाशून्यताया अभिसंस्कारे चरति। न चरति प्रज्ञापारमितायां। स चेद्भगवन् बोधिसत्त्वोमहासत्त्वः प्रज्ञापारमितायां चरन्ननुपायकौशलेनाहङ्कारममकारगतेन मानसेनाध्यात्मबहिर्द्धाशून्यतायां तिष्ठति। सोऽध्यात्मबहिर्द्धाशून्यताया अभिसंस्कारे चरति। न चरति प्रज्ञापारमितायां। स चेद्भगवन् बोधिसत्त्वोमहासत्त्वः प्रज्ञापारमितायां चरन्ननुपायकौशलेनाहङ्कारममगतेन मानसेन शून्यताशून्यतायां तिष्ठति। स शून्यताशून्यतायां अभिसंस्कारे चरति। न चरति प्रज्ञापारमितायां। स चेद्भगवन् बोधिसत्त्वोमहासत्त्वः प्रज्ञापारमितायां चरन्ननुपायकौशलेनाहङ्कारममकारगतेन मानसेन महा-

शून्यतायां तिष्ठति। स महाशून्यताया अभिसंस्कारे चरति। न चरति प्रज्ञापारमितायां। स चेद्भगवन् बोधिसत्त्वोमहासत्त्वः प्रज्ञापारमितायां चरन्ननुपायकौशलेनाहङ्कारममकारगतेन मानसेन परमार्थशून्यतायां तिष्ठति। स परमार्थशून्यताया अभिसंस्कारे चरति। न चरति प्रज्ञापारमितायां। स चेद्भगवन् बोधिसत्त्वोमहासत्त्वः प्रज्ञापारमितायां चरन्ननुपायकौशलेनाहङ्कारममकारगतेन मानसेन संस्कृतशून्यतायां तिष्ठति। स संस्कृतशून्यताया अभिसंस्कारे चरति। न चरति प्रज्ञापारमितायां। स चेद्भगवन् बोधिसत्त्वोमहासत्त्वः प्रज्ञापारमितायां चरन्ननुपायकौशलेनाहङ्कारममकारगतेन मानसेनात्यन्तशून्यतायां तिष्ठति। सोऽत्यन्तशून्यताया अभिसंस्कारे चरति। न चरति प्रज्ञापारमितायां। स चेद्भगवन् बोधिसत्त्वोमहासत्त्वः प्रज्ञापारमितायां चरन्ननुपायकौशलेनाहङ्कारममकारगतेन मानसेनानवराग्रशून्यतायां तिष्ठति। सोऽनवराग्रशून्यताया अभिसंस्कारे-चरति। न चरति प्रज्ञापारमितायां। स चेद्भगवन् बोधिसत्त्वोमहासत्त्वः प्रज्ञापारमियायां चरन्ननुपायकौशलेनाहङ्कारममकारगतेन मानसेन प्रकृतिशून्यतायां तिष्ठति। स प्रकृतिशून्यताया अभिसंस्कारे चरति। न चरति प्रज्ञापारमितायां। स चेद्भगवन् बोधिसत्त्वोमहासत्त्वः प्रज्ञापारमितायां चरन्ननुपायकौशलेनाहङ्कारममकारगतेन मानसेन सर्व्वधर्म्मशून्यतायां तिष्ठति। स सर्व्वधर्म्मशून्यताया अभिसंस्कारे चरति। न चरति प्रज्ञापारमितायां। स चेद्भगवन् बोधिसत्त्वोमहासत्त्वः प्रज्ञापारमितायां

चरन्नुपायकौशलेनाहङ्कारममकारगतेन मानसेन स्वलक्षणशून्यतायां तिष्ठति। स स्वलक्षणशून्यताया अभिसंस्कारे चरति। न चरति प्रज्ञापारमितायां। स चेद्भगवन् बोधिसत्त्वोमहासत्त्वः प्रज्ञापारमितायां चरन्नुपायकौशलेनाहङ्कारममकारगतेन मानसेनाऽनुपलम्भशून्यतायां तिष्ठति। सोऽनुपलम्भशून्यताया अभिसंस्कारे चरति। न चरति प्रज्ञापारमितायां। स चेद्भगवन् बोधिसत्त्वोमहासत्त्वः प्रज्ञापारमितायां चरन्नुपायकौशलेनाहङ्कारममकारगतेन मानसेनाऽभावशून्यतायां तिष्ठति। सोऽभावशून्यताया अभिसंस्कारे चरति। न चरति प्रज्ञापारमितायां स चेद्भगवन् बोधिसत्त्वोमहासत्त्वः प्रज्ञापारमितायां चरन्नुपायकौशलेनाहङ्कारममकारगतेन मानसेन स्वभावशून्यतायां तिष्ठति। स स्वभावशून्यताया अभिसंस्कारे चरति न चरति प्रज्ञापारमितायां। स चेद्भगवन् बोधिसत्त्वोमहासत्त्वः प्रज्ञापारमितायां चरन्नुपायकौशलेनाहङ्कारममकारगतेन मानसेनाऽभावस्वभावशून्यतायां तिष्ठति। सोऽभावस्वभावशून्यताया अभिसंस्कारे चरति। न चरति प्रज्ञापारमितायां। तत्कस्य हेतोर्ण्ह्यभिसंस्कारे चरन् बोधिसत्त्वोमहासत्त्वः प्रज्ञापारमितां परिगृह्णाति। न प्रज्ञापारमितायोगमापद्यते। अपरिपूरयन् प्रज्ञापारमितां न निर्यातिसर्व्वाकारज्ञतायां।

स चेद्भगवन् बोधिसत्त्वोमहासत्त्वः प्रज्ञापारमितायां चरन्नुपायकौशलेनाहङ्कारममकारगतेन मानसेन स्मृत्युपस्थानेषु तिष्ठति। स स्मृत्युपस्थानानामभिसंस्कारे चरति। न चरति प्रज्ञापारमितायां।

तत्कस्य हेतोर्ह्यभिसंस्कारे चरन् बोधिसत्त्वोमहासत्त्वः प्रज्ञापारमित परिग्टह्लाति। न प्रज्ञापारमितायोगं समापद्यते। अपरिपूरयन् प्रज्ञापारमितां न निर्याति सर्व्वाकारज्ञतायां।

स चेद्भगवन् बोधिसत्त्वोमहासत्त्वः प्रज्ञापारमितायां चरन्नुपायकौशलेनाहङ्कारममकारगतेन मानसेन सम्यक्प्रहाणेषु तिष्ठति। स सम्यक्प्रहाणानामभिसंस्कारेचरति। न चरति प्रज्ञापारमितायां। तत्कस्य हेतोर्ह्यभिसंस्कारेचरन् बोधिसत्त्वोमहासत्त्वः प्रज्ञापारमितां परिग्टह्लाति। न प्रज्ञापारमितायोगं समापद्यते। अपरिपूरयन् प्रज्ञापारमितां न निर्यातिसर्व्वाकारज्ञतायां।

स चेद्भगवन् बोधिसत्त्वोमहासत्त्वः प्रज्ञापारमितायां चरन्नुपायकौशलेनाहङ्कारममकारगतेन मानसेन ऋद्धिपादेषु तिष्ठति। स ऋद्धिपादानामभिसंस्कारे चरति। न चरति प्रज्ञापारमितायां। तत्कस्य हेतोर्ह्यभिसंस्कारे चरन् बोधिसत्त्वोमहासत्त्वः प्रज्ञापारमितां परिग्टह्लाति। न प्रज्ञापारमितायोगं समापद्यते। अपरिपूरयन् प्रज्ञापारमितां न निर्यातिसर्व्वाकारज्ञतायां।

स चेद्भगवन् बोधिसत्त्वोमहासत्त्वः प्रज्ञापारमितायां चरन्नुपायकौशलेनाहङ्कारममकारगतेन मानसेनेन्द्रियेषु तिष्ठति। स इन्द्रियाणामभिसंस्कारे चरति न चरति प्रज्ञापारमितायां। तत्कस्य हेतोर्ह्यभिसंस्कारे चरन् बोधिसत्त्वोमहासत्त्वः प्रज्ञापारमितां परिग्टह्लाति। न प्रज्ञापारमितायोगं समापद्यते। अपरिपूरयन् प्रज्ञापारमितां न निर्यातिसर्व्वाकारज्ञतायां।

स चेद्भगवन् बोधिसत्त्वोमहासत्त्वः प्रज्ञापारमितायां चरन्ननुपायकौशलेनाहङ्कारममकारगतेन मानसेन बलेषु तिष्ठति। स बलानामभिसंस्कारे चरति। न चरति प्रज्ञापारमितायां। तत्कस्य हेतोर्ण्ह्यभिसंस्कारे चरन् बोधिसत्त्वोमहासत्त्वः प्रज्ञापारमितां परिगृह्णाति। न प्रज्ञापारमितायोगं समापद्यते। अपरिपूरयन् प्रज्ञापारमितां न निर्यातिसर्व्वाकारज्ञतायां।

स चेद्भगवन् बोधिसत्त्वोमहासत्त्वः प्रज्ञापारमितायां चरन्ननुपायकौशलेनाहङ्कारममकारगतेन मानसेनार्य्याष्टाङ्गमार्गे तिष्ठति। स आर्य्याष्टाङ्गमार्गस्याभिसंस्कारे चरति। न चरति प्रज्ञापारमितायां। तत्कस्य हेतोर्ण्ह्यभिसंस्कारे चरन् बोधिसत्त्वोमहासत्त्वः प्रज्ञापारमितां परिगृह्णाति। न प्रज्ञापारमितायोगं समापद्यते। अपरिपूरयन् प्रज्ञापारमितां न निर्यातिसर्व्वाकारज्ञतायां।

स चेद्भगवन् बोधिसत्त्वोमहासत्त्वः प्रज्ञापारमितायां चरन्ननुपायकौशलेनाहङ्कारममकारगतेन मानसेनार्य्यसत्येषु तिष्ठति। स आर्य्यसत्यानामभिसंस्कारे चरति। न चरति प्रज्ञापारमितायां। तत्कस्य हेतोर्ण्ह्यभिसंस्कारे चरन् बोधिसत्त्वोमहासत्त्वः प्रज्ञापारमितां परिगृह्णाति। न प्रज्ञापारमितायोगं समापद्यते। अपरिपूरयन् प्रज्ञापारमितां न निर्यातिसर्व्वाकारज्ञतायां।

स चेद्भगवन् बोधिसत्त्वोमहासत्त्वः प्रज्ञापारमितायां चरन्ननुपायकौशलेनाहङ्कारममकारगतेन मानसेन ध्यानेषु तिष्ठति। स ध्यानानामभिसंस्कारे चरति। न चरति प्रज्ञापारमितायां। तत्कस्य हेतोर्ण्ह्यभिसंस्कारे चरन् बोधिसत्त्वोमहासत्त्वः प्रज्ञापारमितां

परिगृह्णाति । न प्रज्ञापारमितायोगं समापद्यते । अ
प्रज्ञापारमितां न निर्यातिसर्व्वाकारज्ञतायां ।

स चेद्भगवन् बोधिसत्त्वोमहासत्त्वः प्रज्ञापारमितायां च
नुपायकौशलेनाहङ्कारममकारगतेन मानसेनाऽप्रमाणेषु तिष्ठ
सोऽप्रमाणानामभिसंस्कारे चरति । न चरति प्रज्ञापारमित
तत्कस्य हेतोर्ण्यभिसंस्कारे चरन् बोधिसत्त्वोमहासत्त्वः प्रज्ञा
मितां परिगृह्णाति । न प्रज्ञापारमितायोगं समापद्यते । अ
पूरयन् प्रज्ञापारमितां न निर्यातिसर्व्वाकारज्ञतायां ।

स चेद्भगवन् बोधिसत्त्वोमहासत्त्वः प्रज्ञापारमितायां च
नुपायकौशलेनाहङ्कारममकारगतेन मानसेनारूप्यसमापत्तिषु
ष्ठति । स आरूप्यसमापत्तीनामभिसंस्कारे चरति । न च
प्रज्ञापारमितायां । तत्कस्य हेतोर्ण्यभिसंस्कारे चरन् बोधि
महासत्त्वः प्रज्ञापारमितां परिगृह्णाति । न प्रज्ञापारमित
समापद्यते । अपरिपूरयन् प्रज्ञापारमितां न निर्यातिसर्व्वा
ज्ञतायां ।

स चेद्भगवन् बोधिसत्त्वोमहासत्त्वः प्रज्ञापारमितायां च
नुपायकौशलेनाहङ्कारममकारगतेन मानसेनाष्टसुविमोक्षेषु
ष्ठति । स विमोक्षाणामभिसंस्कारे चरति । न चरति प्रज्ञा
मितायां । तत्कस्य हेतोर्ण्यभिसंस्कारे चरन् बोधिसत्त्वोमहा
प्रज्ञापारमितां परिगृह्णाति । न प्रज्ञापारमितायोगं समापद्य
अपरिपूरयन् प्रज्ञापारमितां न निर्यातिसर्व्वाकारज्ञतायां ।

स चेद्भगवन् बोधिसत्त्वोमहासत्त्वः प्रज्ञापारमितायां च

नुपायकौशलेनाहङ्कारममकारगतेन मानसेन नवानुपूर्व्वविहार समापत्तिषु तिष्ठति। स नवानुपूर्व्वविहार समापत्तीनामभिसंस्कारे चरति। न चरति प्रज्ञापारमितायां। तत्कस्य हेतोर्यद्यभिसंस्कारे चरन् बोधिसत्त्वोमहासत्त्वः प्रज्ञापारमितां परिगृह्णाति। न प्रज्ञापारमितायोगं समापद्यते। अपरिपूरयन् प्रज्ञापारमितां न निर्यातिसर्व्वाकारज्ञतायां।

तत् किं मन्यसे सुभूते ऽन्यच्चक्षुर्विज्ञानमन्यामाया। आह। नोहीदं भगवन्। भगवानाह। तत् किं मन्यसे सुभूते ऽन्यत् श्रोत्रविज्ञानमन्यामाया। आह। नोहीदं भगवन्। भगवानाह। तत् किं मन्यसे सुभूते ऽन्यद्घ्राणविज्ञानमन्यामाया। आह। नोहीदं भगवन्। भगवानाह। तत् किं मन्यसे सुभूते ऽन्यज्जिह्वाविज्ञानमन्यामाया। आह। नोहीदं भगवन्। भगवानाह। तत् किं मन्यसे सुभूते ऽन्यत्कायविज्ञनमन्यामाया। आह। नोहीदं भगवन्। भगवानाह। तत् किं मन्यसे सुभूते ऽन्यन्मनोविज्ञानमन्यामाया। आह। नोहीदं भगवन्। भगवानाह। तत् किं मन्यसे सुभूते ऽन्यश्चक्षुःसंस्पर्शोऽन्यामाया। आह। नोहीदं भगवन्। भगवानाह। तत् किं मन्यसे सुभूते ऽन्यःश्रोत्रसंस्पर्शोऽन्यामाया। आह। नोहीदं भगवन्। भगवानाह। तत् किं मन्यसे सुभूते ऽन्याघ्राणसंस्पर्शोऽन्यामाया। आह। नोहीदं भगवन्। भगवानाह। तत् किं मन्यसे सुभूते ऽन्योजिह्वासंस्पर्शोऽन्यामाया। आह। नोहीदं भगवन्। भगवानाह। तत् किं मन्यसे सुभूते ऽन्यः कायसंस्पर्शोऽन्यामाया। आह। नोहीदं भगवन्। भगवामाह। तत् किं मन्यसे सुभूते ऽन्योमनःसंस्पर्शोऽन्यामाया। आह। नोहीदं भगवन्। भगवानाह। तत् किं मन्यसे सुभूते ऽन्याचक्षुःसंस्पर्शप्रत्ययवेदनाऽन्यामाया। आह। नोहीदं भगवन्। भगवानाह। तत् किं मन्यसे सुभूते ऽन्याश्रोत्रसंस्पर्शप्रत्ययवेदना अन्यामाया। आह। नोहीदं भगवन्। भगवानाह। तत् किं मन्यसे सुभूते ऽन्याघ्राणसंस्पर्शप्रत्ययवेदनाऽन्यामाया। आह। नोहीदं भगवन्। भगवानाह। तत् किं मन्यसे सुभूते ऽन्याजिह्वा-

संस्पर्शप्रत्ययवेदनान्यामाया। आह। नोहीदं भगवन्। भगवानाह। तत् किं मन्यसे सुभूते ऽन्या श्रोत्रसंस्पर्शप्रत्ययवेदना ऽन्यामाया। आह। नोहीदं भगवन्। भगवानाह। तत् किं मन्यसे सुभूते ऽन्या मनःसंस्पर्शप्रत्ययवेदना ऽन्यामाया। आह। नोहीदं भगवन्। भगवानाह। तत् किं मन्यसे सुभूते ऽन्यः पृथिवीधातुरन्यामाया। आह। नोहीदं भगवन्। भगवानाह। तत् किं मन्यसे सुभूते ऽन्योऽब्धातुरन्यामाया। आह। नोहीदं भगवन्। भगवानाह। तत् किं मन्यसे सुभूते ऽन्यस्तेजोधातुरन्यामाया। आह। नोहीदं भगवन्। भगवानाह। तत् किं मन्यसे सुभूते ऽन्योवायुधातुरन्यामाया। आह। नोहीदं भगवन्। भगवानाह। तत् किं मन्यसे सुभूते ऽन्य आकाशधातुरण्यामाया। आह। नोहीदं भगवन्। भगवानाह। तत् किं मन्यसे सुभूते ऽन्योविज्ञानधातुरन्यामाया। आह। नोहीदं भगवन्। भगवानाह। तत् किं मन्यसे सुभूते ऽन्याऽविद्याऽन्यामाया। आह। नोहीदं भगवन्। भगवानाह। तत् किं मन्यसे सुभूते ऽन्येसंस्काराः अन्यामाया। आह। नोहीदं भगवन्। भगवानाह। तत् किं मन्यसे सुभूते ऽन्यद्विज्ञानमन्यामाया। आह। नोहीदं भगवन्। भगवानाह। तत् किं मन्यसे सुभूते ऽन्यन्नामरूपमन्यामाया। आह। नोहीदं भगवन्। भगवानाह। तत् किं मन्यसे सुभूते ऽन्यत् षड़ायतनमन्यामाया। आह। नोहीदं भगवन्। भगवानाह। तत् किं मन्यसे सुभूते ऽन्यःस्पर्शो ऽन्यामाया। आह। नोहीदं भगवन्। भगवानाह। तत् किं मन्यसे सुभूते ऽन्यावेदनाऽन्यामाया। आह। नोहीदं भगवन्। भगवानाह।

त् किं मन्यसे सुभूते ऽन्यातृष्णाऽन्यामाया । आह । नोहीदं
भगवन् । भगवानाह । तत् किं मन्यसे सुभूते ऽन्यदुपादानमन्या-
माया । आह । नोहीदं भगवन् । भगवानाह । तत् किं मन्यसे
सुभूते ऽन्योभवोऽन्यामाया । आह । नोहीदं भगवन् । भगवानाह ।
तत् किं मन्यसे सुभूते ऽन्याजातिरन्यामाया । आह । नोहीदं
भगवन् । भगवानाह । तत् किं मन्यसे सुभूते ऽन्यत् जरामरण-
मन्यामाया । आह । नोहीदं भगवन् । भगवानाह । तत् किं
मन्यसे सुभूते ऽन्यादानपारमिताऽन्यामाया । आह । नोहीदं
भगवन् । भगवानाह । तत् किं मन्यसे सुभूते ऽन्याशील-
पारमिताऽन्यामाया । आह । नोहीदं भगवन् । भगवानाह । तत्
किं मन्यसे सुभूते ऽन्याक्षान्तिपारमिताऽन्यामाया । आह । नोहीदं
भगवन् । भगवानाह । तत् किं मन्यसे सुभूते ऽन्यावीर्यपारमिता-
ऽन्यामाया । आह । नोहीदं भगवन् । भगवानाह । तत् किं मन्यसे
सुभूते ऽन्याध्यानपारमिताऽन्यामाया । आह । नोहीदं भगवन् ।
भगवानाह । तत् किं मन्यसे सुभूते ऽन्याप्रज्ञापारमिताऽन्यामाया ।
आह । नोहीदं भगवन् ।

भगवानाह । तत् किं मन्यसे सुभूते ऽन्याऽध्यात्मशून्यता
ऽन्यामाया । आह । नोहीदं भगवन् । भगवानाह । तत् किं
मन्यसे सुभूते ऽन्याबहिर्धाशून्यता अन्यामाया । आह । नोहीदं
भगवन् । भगवानाह । तत् किं मन्यसे सुभूते ऽन्याऽध्यात्मबहिर्धा-
शून्यता अन्यामाया । आह । नोहीदं भगवन् । भगवानाह । तत्
किं मन्यसे सुभूते ऽन्याशून्यताशून्यता अन्यामाया । आह । नोहीदं

भगवन्। भगवानाह। तत् किं मन्यसे सुभूते ऽन्या महाशून्यता-ऽन्या माया। आह। नोहीदं भगवन्। भगवानाह। तत् किं मन्यसे सुभूते ऽन्या परमार्थशून्यताऽन्या माया। आह। नोहीदं भगवन्। भगवानाह। तत् किं मन्यसे सुभूते ऽन्या संस्कृतशून्यता-ऽन्या माया। आह। नोहीदं भगवन्। भगवानाह। तत् किं मन्यसे सुभूते ऽन्याऽसंस्कृतशून्यताऽन्या माया। आह। नोहीदं भगवन्। भगवानाह। तत् किं मन्यसे सुभूते ऽन्या अत्यन्तशून्यताऽन्या माया। आह। नोहीदं भगवन्। भगवानाह। तत् किं मन्यसे सुभूते ऽन्याऽनवराग्रशून्यता अन्या माया। आह। नोहीदं भगवन्। भगवानाह। तत् किं मन्यसे सुभूते ऽन्याऽनवकारशून्यताऽन्या माया। आह। नोहीदं भगवन्। भगवानाह। तत् किं मन्यसे सुभूते ऽन्या प्रकृतिशून्यताऽन्या माया। आह। नोहीदं भगवन्। भगवानाह। तत् किं मन्यसे सुभूते ऽन्या सर्व्वधर्म्मशून्यताऽन्या माया। आह। नोहीदं भगवन्। भगवानाह। तत् किं मन्यसे सुभूते ऽन्या-स्वलक्षणशून्यताऽन्या माया। आह। नोहीदं भगवन्। भगवानाह। तत् किं मन्यसे सुभूते ऽन्याऽनुपलम्भशून्यताऽन्या माया। आह। नोहीदं भगवन्। भगवानाह। तत् किं मन्यसे सुभूते ऽन्याऽभाव-शून्यताऽन्या माया। आह। नोहीदं भगवन्। भगवानाह। तत् किं मन्यसे सुभूते ऽन्या स्वभावशून्यताऽन्या माया। आह। नोहीदं भगवन्। भगवानाह। तत् किं मन्यसे सुभूते ऽन्याऽभावशून्यता-ऽन्या माया। आह। नोहीदं भगवन्।

भगवानाह। तत् किं मन्यसे सुभूते ऽन्यानि स्मृत्युपस्थानानि

अन्यामाया। आह। नोहीदं भगवन्। भगवानाह। तत् किं मन्यसे सुभूते ऽन्यानि सम्यक्प्रहाणानि अन्यामाया। आह। नोहीदं भगवन्। भगवानाह। तत् किं मन्यसे सुभूते ऽन्ये ऋद्धिपादाः अन्यामाया। आह। नोहीदं भगवन्। भगवानाह। तत् किं मन्यसे सुभूते ऽन्यानीन्द्रियाणि अन्यामाया। आह। नोहीदं भगवन्। भगवानाह। तत् किं मन्यसे सुभूते ऽन्यानि बलानि अन्यामाया। आह। नोहीदं भगवन्। भगवानाह। तत् किं मन्यसे सुभूते ऽन्यानि बोध्यङ्गानि अन्यामाया। आह। नोहीदं भगवन्। भगवानाह। तत् किं मन्यसे सुभूते ऽन्योऽष्टाङ्गमार्गोऽन्यामाया। आह। नोहीदं भगवन्। भगवानाह। तत् किं मन्यसे सुभूते ऽन्यान्यार्य्यसत्यानि अन्यामाया। आह। नोहीदं भगवन्। भगवानाह। तत् किं मन्यसे सुभूते ऽन्यानि ध्यानानि अन्यामाया। आह। नोहीदं भगवन्। भगवानाह। तत् किं मन्यसे सुभूते ऽन्यान्यप्रमाणानि अन्यामाया। आह। नोहीदं भगवन्। भगवानाह। तत् किं मन्यसे सुभूते ऽन्या आरूप्यसमापत्तयोऽन्यामाया। आह। नोहीदं भगवन्। भगवानाह। तत् किं मन्यसे सुभूते ऽन्यानि शून्यतानिमित्ताप्रणिहितविमोक्षमुखानि अन्यामाया। आह। नोहीदं भगवन्। भगवानाह। तत् किं मन्यसे सुभूते ऽन्या अभिज्ञा अन्यामाया। आह। नोहीदं भगवन्। भगवानाह। तत् किं मन्यसे सुभूते ऽन्ये समाधयोऽन्यामाया। आह। नोहीदं भगवन्। भगवानाह। तत् किं मन्यसे सुभूते ऽन्यानि धारणीमुखानि अन्यामाया। आह। नोहीदं भगवन्। भगवानाह। तत् किं मन्यसे

सुभूते ऽन्यानि तथागतबलानि अन्यामाया। आह। नोहीदं भगवन्। भगवानाह। तत् किं मन्यसे सुभूते ऽन्यानि वैशारद्यानि अन्यामाया। आह। नोहीदं भगवन्। भगवानाह। तत् किं मन्यसे सुभूते ऽन्या प्रतिसम्विदोऽन्यामाया। आह। नोहीदं भगवन्। भगवानाह। तत् किं मन्यसे सुभूते ऽन्यामहामैत्री अन्यामाया। आह। नोहीदं भगवन्। भगवानाह। तत् किं मन्यसे सुभूते ऽन्यामहाकरुणाऽन्यामाया। आह। नोहीदं भगवन्। भगवानाह। तत् किं मन्यसे सुभूते ऽन्येऽष्टादशावेणिकबुद्धधर्म्माः अन्यामाया। आह। नोहीदं भगवन्। भगवानाह। तत् किं मन्यसे सुभूते ऽन्यावोधिरन्यामाया। आह। नोहीदं भगवन्।

न भगवन्नन्यद्रुपमन्यामाया। रूपमेव माया मायैव रूपं। न भगवन्नन्यावेदनाऽन्यामाया। वेदनैव माया मायैव वेदना। न भगवन्नन्यासंज्ञाऽन्यामाया। संज्ञैव माया मायैव संज्ञा। न भगवन्नन्येसंस्कारा अन्यामाया। संस्कारा एव माया मायैव संस्काराः। न भगवन्नन्यद्विज्ञानमन्यमाया। विज्ञानमेव माया मायैव विज्ञानं। न भगवन्नन्यच्चक्षुरन्यामाया। चक्षुरेव माया मायैव चक्षुः। न भगवन्नन्यच्छ्रोत्रमन्यामाया। श्रोत्रमेव माया मायैव श्रोत्रं। न भगवन्नन्यद्घ्राणमन्यामाया। घ्राणमेव माया मायैव घ्राणं। न भगवन्नन्याजिह्वाऽन्यामाया। जिह्वैव माया मायैव जिह्वा। न भगवन्नन्यः कायोऽन्यामाया। काय एव माया मायैव कायः। न भगवन्नन्यन्मनोऽन्यामाया। मन एव माया मायैव मनः।

न भगवन्नन्यद्रूपमन्यामाया। रूपमेव माया मायैव रूपं।

न भगवन्नन्यः शब्दोऽन्यामाया । शब्द एव माया मायैव शब्दः । न भगवन्नन्योगन्धोऽन्यामाया । गन्ध एव माया मायैव गन्धः । न भगवन्नन्योरसोऽन्यामाया । रस एव माया मायैव रसः । न भगवन्नन्यः स्पर्शोऽन्यामाया । स्पर्श एव माया मायैव स्पर्शः । न भगवन्नन्ये धर्मा अन्यामाया । धर्मा एव माया मायैव धर्माः । न भगवन्नन्यचक्षुर्व्विज्ञानमन्या माया । चक्षुर्व्विज्ञानमेव माया मायैव चक्षुर्व्विज्ञानं । न भगवन्नन्यत् श्रोचविज्ञानमन्या माया । श्रोचविज्ञानमेव माया मायैव श्रोचविज्ञानं । न भगवन्नन्यद्घ्राण-विज्ञानमन्या माया । घ्राणविज्ञानमेव माया मायैव घ्राणविज्ञानं । न भगवन्नन्यज्जिह्वाविज्ञानमन्या माया । जिह्वाविज्ञानमेव माया मायैव जिह्वाविज्ञानं । न भगवन्नन्यत् कायविज्ञानमन्या माया । कायविज्ञानमेव माया मायैव कायविज्ञानं । न भगवन्नन्यन्मनो-विज्ञानमन्या माया । मनोविज्ञानमेव माया मायैव मनोविज्ञानं । न भगवन्नन्यश्चक्षुःसंस्पर्शोऽन्या माया । चक्षुःसंस्पर्श एव माया मायैव चक्षुःसंस्पर्शः । न भगवन्नन्यः श्रोचसंस्पर्शोऽन्यामाया । श्रोचसंस्पर्श एव माया मायैव श्रोचसंस्पर्शः । न भगवन्नन्यो घ्राणसंस्पर्शोऽन्या माया । घ्राणसंस्पर्श एव माया मायैव घ्राणसंस्पर्शः । न भगवन्नन्यो जिह्वा-संस्पर्शोऽन्या माया । जिह्वासंस्पर्श एव माया मायैव जिह्वासंस्पर्शः । न भगवन्नन्यः कायसंस्पर्शोऽन्या माया । कायसंस्पर्श एव माया मायैव कायसंस्पर्शः । न भगवन्नन्यो मनःसंस्पर्शोऽन्या माया । मनःसंस्पर्श एव माया मायैव मनःसंस्पर्शः । न भगवन्नन्या चक्षुःसंस्पर्शप्रत्यया वेदना-ऽन्यामाया । चक्षुःसंस्पर्शप्रत्यया वेदनैव माया मायैव चक्षुःसंस्पर्श-

प्रत्ययवेदना । न भगवन्नन्या श्रोत्रसंस्पर्शप्रत्ययवेदनाऽन्या माया । श्रोत्रसंस्पर्शप्रत्ययवेदनैव माया मायैव श्रोत्रसंस्पर्शप्रत्ययवेदना । न भगवन्नन्यो घ्राणसंस्पर्शप्रत्ययवेदनाऽन्या माया । घ्राणसंस्पर्शप्रत्यय-वेदनैव माया मायैव घ्राणसंस्पर्शप्रत्ययवेदना । न भगवन्नन्या जिह्वासंस्पर्शप्रत्ययवेदनाऽन्या माया । जिह्वासंस्पर्शप्रत्ययवेदनैव माया मायैव जिह्वासंस्पर्शप्रत्ययवेदना । न भगवन्नन्या कायसंस्पर्शप्रत्ययवेदना-ऽन्या माया । कायसंस्पर्शप्रत्ययवेदनैव माया मायैव कायसंस्पर्श-प्रत्ययवेदना । न भगवन्नन्या मनःसंस्पर्शप्रत्ययवेदना ऽन्या माया । मनःसंस्पर्शप्रत्ययवेदनैव माया मायैव मनःसंस्पर्शप्रत्ययवेदना ।

न भगवन्नन्यः पृथिवीधातुरन्या माया । पृथिवीधातुरेव माया मायैव पृथिवीधातुः । न भगवन्नन्योऽब्धातुरन्या माया । अब्धातुरेव माया मायैवाब्धातुः । न भगवन्नन्यस्तेजोधातुरन्या माया । तेजो-धातुरेव माया मायैव तेजोधातुः । न भगवन्नन्योवायुधातुरन्या माया । वायुधातुरेव माया मायैव वायुधातुः । न भगवन्नन्य आकाश-धातुरन्या माया । आकाशधातुरेव माया मायैवाकाशधातुः । न भगवन्नन्यो विज्ञानधातुरन्या माया । विज्ञानधातुरेव माया मायैव विज्ञानधातुः । न भगवन्नन्याऽविद्याऽन्या माया । अविद्यैव माया मायैवाविद्या । न भगवन्नन्य संस्काराः अन्या माया । संस्कारा एव माया मायैव संस्काराः । न भगवन्नन्यद्विज्ञानमन्या माया । विज्ञानमेव माया मायैव विज्ञानं । न भगवन्नन्यनामरूपमन्या माया । नामरूपमेव माया मायैव नामरूपं । न भगवन्नन्यत् षडायतनमन्या माया । षडायतनमेव माया मायैव षडायतनं ।

न भगवन्नन्यःस्पर्शोऽन्या माया। स्पर्श एव माया मायैव स्पर्शः। न भगवन्नन्या वेदनाऽन्या माया। वेदनैव माया मायैव वेदना। न भगवन्नन्या तृष्णाऽन्या माया। तृष्णैव माया मायैव तृष्णा। न भगवन्नन्यदुपादानमन्या माया। उपादान एव माया मायैवोपादानं। न भगवन्नन्योभवोऽन्या माया। भव एव माया मायैव भवः। न भगवन्नन्या जातिरन्या माया। जातिरेव माया मायैव जातिः। न भगवन्नन्यज्जरामरणमन्या माया। जरामरणमेव माया मायैव जरामरणं।

न भगवन्नन्या दानपारमिताऽन्या माया। दानपारमितैव माया मायैव दानपारमिता। न भगवन्नन्याशीलपारमिताऽन्यामाया। शीलपारमितैव माया मायैव शीलपारमिता। न भगवन्नन्या क्षान्तिपारमिताऽन्या माया। क्षान्तिपारमितैव माया मायैव क्षान्तिपारमिता। न भगवन्नन्या वीर्य्यपारमिताऽन्या माया। वीर्य्यपारमितैव माया मायैव वीर्य्यपारमिता। न भगवन्नन्या ध्यानपारमिताऽन्या माया। ध्यानपारमितैव माया मायैव ध्यानपारमिता। न भगवन्नन्या प्रज्ञापारमिताऽन्या माया। प्रज्ञापारमितैव माया मायैव प्रज्ञापारमिता।

न भगवन्नन्याऽध्यात्मशून्यताऽन्या माया। अध्यात्मशून्यतैव माया मायैवाध्यात्मशून्यता। न भगवन्नन्याबहिर्द्धाशून्यताऽन्या माया। बहिर्द्धाशून्यतैव माया मायैव बहिर्द्धाशून्यता। न भगवन्नन्याऽध्यात्मबहिर्द्धाशून्यताऽन्या माया। अध्यात्मबहिर्द्धाशून्यतैव माया मायैवाऽध्यात्मबहिर्द्धाशून्यता। न भगवन्नन्याशून्यताशून्यताऽन्यामाया।

शून्यताशून्यतैव माया मायैव शून्यता शून्यता। न भगवन्नन्या महाशून्यताऽन्या माया। महाशून्यतैव माया मायैव महाशून्यता। न भगवन्नन्या परमार्थशून्यताऽन्या माया। परमार्थशून्यतैव माया मायैव परमार्थशून्यता। न भगवन्नन्या संस्कृतशून्यताऽन्या माया। संस्कृतशून्यतैव माया मायैव संस्कृतशून्यता। न भगवन्नन्याऽसंस्कृत-शून्यताऽन्या माया। असंस्कृतशून्यतैव माया मायैवासंस्कृतशून्यता। न भगवन्नन्याऽत्यन्तशून्यताऽन्या माया। अत्यन्तशून्यतैव माया मायैवात्यन्तशून्यता। न भगवन्नन्यानवराग्रशून्यताऽन्यामाया। अनवराग्रशून्यतैव माया मायैवाऽनवराग्रशून्यता। न भगवन्नन्या-नवकारशून्यताऽन्या माया। अनवकारशून्यतैव माया मायैवानव-कारशून्यता। न भगवन्नन्या प्रकृतिशून्यताऽन्या माया। प्रकृति-शून्यतैव माया मायैव प्रकृतिशून्यता। न भगवन्नन्या सर्व्वधर्मशून्यता-ऽन्या माया। सर्व्वधर्मशून्यतैव माया मायैव सर्व्वधर्मशून्यता। न भगवन्नन्यास्वलक्षणशून्यताऽन्या माया। स्वलक्षणशून्यतैव माया मायैव स्वलक्षणशून्यता। न भगवन्नन्याऽनुपलम्भशून्यताऽन्या माया। अनुप-लम्भशून्यतैव माया मायैवानुपलम्भशून्यता। न भगवन्नन्याऽभाव-शून्यताऽन्या माया। अभावशून्यतैव माया मायैवाभावशून्यता। न भगवन्नन्या स्वभावशून्यताऽन्या माया। स्वभावशून्यतैव माया मायैव स्वभावशून्यता। न भगवन्नन्याऽभावस्वभावशून्यताऽन्या माया। अभावस्वभावशून्यतैव माया मायैवाभावस्वभावशून्यता।

न भगवन्नन्यानि स्मृत्युपस्थानान्यन्यामाया। स्मृत्युपस्थानान्येव माया मायैव स्मृत्युपस्थानानि। न भगवन्नन्यानि सम्यक्प्रहाणानि

[illegible] शाखा । [illegible] शाखा [illegible]

[illegible]

[illegible]

तथागतबलान्येव माया मायैव तथागतबलानि। न भगवन्नन्यानि वैशारद्यानि अन्यामाया। वैशारद्यान्येव माया मायैव वैशारद्यानि। न भगवन्नन्याः प्रतिसम्विदोऽन्यामाया। प्रतिसम्विद एव माया मायैव प्रतिसम्विदः। न भगवन्नन्यामहामैत्री अन्यामाया। महामैत्र्येव माया मायैव महामैत्री। न भगवन्नन्या महाकरुणा-ऽन्यामाया। महाकरुणैव माया मायैव महाकरुणा। न भगवन्नन्या ऽष्टादशावेणिकबुद्धधर्माः अन्यामाया। अष्टादशावेणिकबुद्धधर्मा एव माया मायैवाष्टादशावेणिकबुद्धधर्माः। न भगवन्नन्यच्छ्रोत आपत्तिफलमन्यामाया। श्रोत आपत्तिफलमेव माया मायैव श्रोत आपत्तिफलं। न भगवन्नन्यत्सकृदागामिफलमन्यामाया। सकृदा-गामिफलमेव माया मायैव सकृदागामिफलं। न भगवन्नन्यदना-गामिफलमन्यामाया। अनागामिफलमेव माया मायैवानागामि-फलं। न भगवन्नन्यदर्हत्त्वमन्यामाया। अर्हत्त्वमेव माया मायैवार्हत्त्वं। न भगवन्नन्याप्रत्येकबोधिरन्यामाया। प्रत्येकबोधिरेव माया मायैव प्रत्येकबोधिः। न भगवन्नन्यामार्गाकारज्ञताऽन्यामाया। मार्गाकारज्ञ-तैव माया मायैव मार्गाकारज्ञता। न भगवन्नन्यासर्व्वाकारज्ञता-ऽन्यामाया। सर्व्वाकारज्ञतैव माया मायैव सर्व्वाकारज्ञता।

तत् किं मन्यसे सुभूतेऽपि पुमायाया उत्पादो वा निरोधो वा। आह नोहीदं भगवन्। भगवानाह। तत् किं मन्यसे सुभूतेऽपि ऽनुमायायाः संक्लेशो वा व्यवदानं वा। आह नोहीदं भगवन्। भगवानाह। तत् किं मन्यसे सुभूते यस्य नोत्पादो न निरोधो न व्यवदानमपि स न प्रज्ञापारमितायां शिक्षिष्यते। सर्व्वाकारज्ञतायां

निर्यास्यति । सर्व्वाकारज्ञतामनुप्राप्स्यतीति । आह नोहीदं भगवन् । भगवानाह । तत् किं मन्यसे सुभूतेऽन्यैषा स संज्ञासमज्ञाप्रज्ञप्तिव्यवहारः। पञ्चसूपादानस्कन्धेषु यदुतबोधिसत्त्व इति । आह नोहीदं भगवन् । भगवानाह। तत् किं मन्यसे सुभूते संज्ञासमज्ञाप्रज्ञप्तिव्यवहारमात्रेण पञ्चानामुपादानस्कन्धानामुत्पादो वा निरोधो वा संक्लेशोवाव्यवदानं वोपलभ्यते । आह नोहीदं भगवन् । भगवानाह । तत् किं मन्यसे सुभूते यस्य न संज्ञा न समज्ञा न प्रज्ञप्तिर्न व्यवहारो न नाम न नामप्रज्ञप्तिर्न कायो न कायकर्म्म, न वाक् न वाक्कर्म्म, न मनो न मनःकर्म्मनोत्पादो न निरोधो न संक्लेशो न व्यवदानमपि नु स प्रज्ञापारमितायां शिक्षित्वा सर्व्वाकारज्ञतायां निर्यास्यति सर्व्वाकारज्ञतामनुप्राप्स्यतीति । आह नोहीदं भगवन् ।

भगवानाह । एवं खलु सुभूते बोधिसत्त्वोमहासत्त्वः प्रज्ञापारमितायां शिक्षित्वा सर्व्वाकारज्ञतायां निर्यास्यति । सर्व्वाकारज्ञतामनुप्राप्स्यत्यनुपलम्भयोगेन । आह । यथाहं भगवन् भगवतोभाषितस्यार्थमाजानामि । प्रज्ञापारमितायां शिक्षमाणेन बोधिसत्त्वेन महासत्त्वेन मायापुरुषेणेव शिक्षितव्यं । भवत्यनुत्तरायां सम्यक्सम्बोधौ । तत्कस्य हेतोस्तथाहि भगवन् सर्व्वे एते मायापुरुषावेदितव्याः । यदुतपञ्चस्कन्धाः ।

भगवानाह। तत् किं मन्यसे सुभूतेऽपि त्विमे पञ्चस्कन्धाः प्रज्ञापारमितायां शिक्षित्वा सर्व्वाकारज्ञतायां निर्यास्यन्ति। आह। नोहीदं भगवन् । तत्कस्य हेतोस्तथाहि भगवन्नभावस्वभावः पञ्चस्कन्धाः । स चाभावस्वभावोनोपलभ्यते । भगवानाह । तत् किं मन्यसे सुभूते

स्वप्नोपमाः पञ्चस्कन्धाः प्रज्ञापारमितायां शिक्षित्वा सर्व्वाकारज्ञतायां निर्यान्ति। आह नोहीदं भगवन्। तत्कस्य हेतोस्तथाहि भगवन्नभावस्वभावः पञ्चस्कन्धाः। स चाभावस्वभावो नोपलभ्यते। भगवानाह। तत् किं मन्यसे सुभूते मायोपमाः पञ्चस्कन्धाः प्रज्ञापारमितायां शिक्षित्वा सर्व्वाकारज्ञतायां निर्यान्ति। आह नोहीदं भगवन्। तत्कस्यहेतोस्तथाहि भगवन्नभावस्वभावाः पञ्चस्कन्धाः स चाभावस्वभावोनोपलभ्यते। भगवानाह। तत् किं मन्यसे सुभूते प्रतिश्रुत्कोपमाः पञ्चस्कन्धाः प्रज्ञापारमितायां शिक्षित्वा सर्व्वाकारज्ञतायां निर्यान्ति। आह नोहीदं भगवन्। तत्कस्य हेतोस्तथाहि भगवन्नभावस्वभावाः प्रतिश्रुत्काः स चाभावस्वभावोनोपलभ्यते। भगवानाह। तत् किं मन्यसे सुभूते प्रतिभासोपमाः पञ्चस्कन्धाः प्रज्ञापारमितायां शिक्षित्वा सर्व्वाकारज्ञतायां निर्यान्ति। आह नोहीदं भगवन्। तत्कस्य हेतोस्तयाहि भगवन्नभावस्वभावः प्रतिभासः स चाभावस्वभावो नोपलभ्यते। भगवानाह। तत् किं मन्यसे सुभूते उदकचन्द्रोपमाः पञ्चस्कन्धाः प्रज्ञापारमितायां शिक्षित्वा सर्व्वाकारज्ञतायां निर्यान्ति। आह नोहीदं भगवन्। तत्कस्य हेतोस्तथाहि भगवन्नभावस्वभाव उदकचन्द्रः स चाभावस्वभावोनोपलभ्यते। भगवानाह। तत् किं मन्यसे सुभूते मरीच्युपमाः पञ्चस्कन्धाः प्रज्ञापारमितायां शिक्षित्वा सर्व्वाकारज्ञतायां निर्यान्ति। आह नोहीदं भगवन्। तत्कस्य हेतोस्तथाहि भगवन्नभावस्वभावो मरीचिः स चाभावस्वभावोनोपलभ्यते। भगवानाह। तत् किं मन्यसे सुभूते निर्मितोपमाः पञ्चस्कन्धाः प्रज्ञापारमितायां शिक्षित्वा सर्व्वाकारज्ञतायां निर्यान्ति।

आह नोहीदं भगवन् । तत्कस्य हेतोस्तथाहि भगवन्नभावस्वभावो-
निर्म्मितः । स चाभावस्वभावोनोपलभ्यते । भगवानाह । तत् कि
मन्यसे सुभूते स्वप्नोपमं रूपं स्वप्नोपमा वेदना स्वप्नोपमा संज्ञा
स्वप्नोपमाः संस्काराः स्वप्नोपमं विज्ञानं । तत् षडिन्द्रियं ते पञ्चो-
पादानस्कन्धाः । ते चाऽध्यात्मशून्यतया नोपलभ्यन्ते वहिर्द्धाशून्यतया
नोपलभ्यन्ते । अध्यात्मवहिर्द्धाशून्यतया नोपलभ्यन्ते । शून्यताशून्यतया
नोपलभ्यन्ते । महाशून्यतया नोपलभ्यन्ते । परमार्थशून्यतया नोप-
लभ्यन्ते । संस्कृतशून्यतया नोपलभ्यन्ते । असंस्कृतशून्यतया नोप-
लभ्यन्ते । अत्यन्तशून्यतया नोपलभ्यन्ते । अनवराग्रशून्यतया नोप-
लभ्यन्ते । अनवकारशून्यतया नोपलभ्यन्ते । प्रकृतिशून्यतया नोप-
लभ्यन्ते । सर्व्वधर्म्मशून्यतया नोपलभ्यन्ते । स्वलक्षणशून्यतया नोप-
लभ्यन्ते । अनुपलम्भशून्यतया नोपलभ्यन्ते । अभावशून्यतया नोप-
लभ्यन्ते । स्वभावशून्यतया नोपलभ्यन्ते । अभावस्वभावशून्यतया
नोपलभ्यन्ते ।

मायोपमं सुभूते रूपं मायोपमा वेदना मायोपमा संज्ञा
मायोपमाः संस्काराः मायोपमं विज्ञानं । यच्च विज्ञानं तत्
षड़िन्द्रियं । तत् पञ्चोपादानस्कन्धाः । ते चाऽध्यात्मशून्यतया
नोपलभ्यन्ते । वहिर्द्धाशून्यतया नोपलभ्यन्ते । अध्यात्मवहिर्द्धाशून्यतया
नोपलभ्यन्ते । शून्यताशून्यतया नोपलभ्यन्ते । महाशून्यतया नोप-
लभ्यन्ते । परमार्थशून्यतया नोपलभ्यन्ते । संस्कृतशून्यतया नोप-
लभ्यन्ते । असंस्कृतशून्यतया नोपलभ्यन्ते । अत्यन्तशून्यतया नोप-
लभ्यन्ते । अनवराग्रशून्यतया नोपलभ्यन्ते । अनवकारशून्यतया नोप-

लभ्यन्ते । प्रकृतिशून्यतया नोपलभ्यन्ते । सर्व्वधर्म्मशून्यतया
लभ्यन्ते । स्वलक्षणशून्यतया नोपलभ्यन्ते । अनुपलम्भशून्
नोपलभ्यन्ते । अभावशून्यतया नोपलभ्यन्ते । स्वभावशून्यतया
लभ्यन्ते । अभावस्वभावशून्यतया नोपलभ्यन्ते ।

प्रतिश्रुत्कोपमं सुभूते रूपं प्रतिश्रुत्कोपमा वेदना प्रतिश्रुत्को
संज्ञा । प्रतिश्रुत्कोपमाः संस्काराः । प्रतिश्रुत्कोपमं विज्ञानं ।
षडिन्द्रियं तत्पञ्चोपादानस्कन्धास्ते चाऽध्यात्मशून्यतया नोपलभ्य
बहिर्द्धाशून्यतया नोपलभ्यन्ते । अध्यात्मबहिर्द्धाशून्यतया नोपलभ्
शून्यताशून्यतया नोपलभ्यन्ते । महाशून्यतया नोपलभ्यन्ते । परम
शून्यतया नोपलभ्यन्ते । संस्कृतशून्यतया नोपलभ्यन्ते । असंस्
शून्यतया नोपलभ्यन्ते । अत्यन्तशून्यतया नोपलभ्यन्ते । अनवर
शून्यतया नोपलभ्यन्ते । अनवकारशून्यतया नोपलभ्यन्ते । प्रकृ
शून्यतया नोपलभ्यन्ते । सर्व्वधर्म्मशून्यतया नोपलभ्यन्ते । स्वलक्
शून्यतया नोपलभ्यन्ते । अनुपलम्भशून्यतया नोपलभ्यन्ते । अभा
शून्यतया नोपलभ्यन्ते । स्वभावशून्यतया नोपलभ्यन्ते । अभावस्वभा
शून्यतया नोपलभ्यन्ते ।

प्रतिभासोपमं सुभूते रूपं प्रतिभासोपमा वेदना । प्रतिभास
पमा संज्ञा । प्रतिभासोपमाः संस्काराः । प्रतिभासोपमं विज्ञान
यच्च विज्ञानं तत् षडिन्द्रियं तत्पञ्चोपादानस्कन्धाः । ते चाऽध्यात
शून्यतया नोपलभ्यन्ते । बहिर्द्धाशून्यतया नोपलभ्यन्ते । अध्यात
बहिर्द्धाशून्यतया नोपलभ्यन्ते । शून्यताशून्यतया नोपलभ्यन्ते
महाशून्यतया नोपलभ्यन्ते । परमार्थशून्यतया नोपलभ्यन्त । संस्कृ

[illegible]नया नोपलभ्यन्ते । [illegible]नया नोपलभ्यन्ते । [illegible]
[illegible]नया नोपलभ्यन्ते । [illegible]नया नोपलभ्यन्ते । [illegible]
[illegible]नया नोपलभ्यन्ते । [illegible]नया नोपलभ्यन्ते । [illegible]
[illegible]नया नोपलभ्यन्ते । [illegible]नया नोपलभ्यन्ते । [illegible]
[illegible]नया नोपलभ्यन्ते । [illegible]नया नोपलभ्यन्ते । [illegible]
नया नोपलभ्यन्ते । [illegible]नया नोपलभ्यन्ते ।

[illegible]पमा संज्ञा । [illegible] । [illegible]
[illegible]नि । यथा [illegible]
[illegible]नया नोपलभ्यन्ते । [illegible]
[illegible]नया नोपलभ्यन्ते । [illegible]
[illegible]नया नोपलभ्यन्ते । [illegible]
[illegible]

[illegible]

बहिर्द्धाशून्यतया नोपलभ्यन्ते । शून्यताशून्यतया नोपलभ्यन्ते महाशून्यतया नोपलभ्यन्ते । परमार्थशून्यतया नोपलभ्यन्ते। संस्कृत शून्यतया नोपलभ्यन्त । असंस्कृतशून्यतया नोपलभ्यन्ते । अत्यन्त शून्यतया नोपलभ्यन्ते । अनवराग्रशून्यतया नोपलभ्यन्ते । अनवकार-शून्यतया नोपलभ्यन्ते । प्रकृतिशून्यतया नोपलभ्यन्ते । सर्व्वधर्म्म-शून्यतया नोपलभ्यन्ते । स्वलक्षणशून्यतया नोपलभ्यन्ते । अनुपलम्भ-शून्यतया नोपलभ्यन्ते । अभावशून्यतया नोपलभ्यन्ते । स्वभावशून्य-तया नोपलभ्यन्ते । अभावस्वभावशून्यतया नोपलभ्यन्ते ।

आह । माहैव भगवन्नवयान संप्रस्थितो बोधिसत्त्वोमहासत्त्व इमं निर्द्देशं श्रुत्वोत्त्रस्येत्सन्त्रासमापद्येत । भगवानाह । स चेत् सुभूते नवयानसंप्रस्थितो बोधिसत्त्वोमहासत्त्वो न प्रज्ञापारमितायामुपाय-कौशलो भवेत् । नैव कल्याणमित्रहस्तगतो भवेत् । उत्त्रस्येत् सन्त्रासमापद्येत । आह । कतमद्भगवन् बोधिसत्त्वस्य महासत्त्वस्य प्रज्ञापारमितायामुपायकौशलं । यत्र चरन् बोधिसत्त्वोमहासत्त्व इमं निर्द्देशं श्रुत्वा नोत्त्रस्यन्ति । न सन्त्रासमापद्येत ।

भगवानाह । इह सुभूते बोधिसत्त्वोमहासत्त्वः प्रज्ञापारमिता-यांश्चरन् सर्व्वाकारज्ञताप्रतिसंयुक्तेन चित्तेन रूपमनित्यमिति प्रत्य-वेक्षते । तच्च नोपलभते । वेदनामनित्येति प्रत्यवेक्षते नोपलभते । संज्ञामनित्येति प्रत्यवेक्षते नोपलभते । संस्काराननित्या इति प्रत्यवेक्षते नोपलभते । विज्ञानमनित्यमिति प्रत्यवेक्षते नोपलभते । इदं सुभूते बोधिसत्त्वस्य महासत्त्वस्य प्रज्ञापारमितायां चरत उपायकौशल्यं । पुनरपरं सुभूते बोधिसत्त्वोमहासत्त्वः प्रज्ञापार-

मितायां चरन् सर्व्वाकारज्ञताप्रतिसंयुक्तेन चित्तेन रूपं दुःखमिति प्रत्यवेक्षते तच्च नोपलभते। वेदनादुःखेति* संज्ञादुःखेति संस्काराः दुःखा इति विज्ञानं दुःखमिति प्रत्यवेक्षते तच्च नोपलभते। इदं बोधिसत्त्वस्य महासत्त्वस्य प्रज्ञापारमितायां चरत उपायकौशलं। पुनरपरं सुभूते बोधिसत्त्वोमहासत्त्वः प्रज्ञापारमितायां चरन् सर्व्वाकारज्ञताप्रतिसंयुक्तेन चित्तेन रूपमनात्मेति प्रत्यवेक्षते तच्च नोपलभते। वेदना अनात्मेति संज्ञा अनात्मेति संस्कारा अनात्मान इति विज्ञानमनात्मेति प्रत्यवेक्षते तच्च नोपलभते। इदं सुभूते बोधिसत्त्वस्य महासत्त्वस्य प्रज्ञापारमितायां चरत उपायकौशलं। पुनरपरं सुभूते बोधिसत्त्वोमहासत्त्वः प्रज्ञापारमितायां चरन् सर्व्वाकारज्ञता प्रतिसंयुक्तेन चित्तेन रूपं शान्तमिति प्रत्यवेक्षते तच्च नोपलभते वेदना शान्तेति संज्ञा शान्तेति संस्काराः शान्ता इति विज्ञानं शान्तमिति प्रत्यवेक्षते तच्च नोपलभते। इदं सुभूते बोधिसत्त्वस्य महासत्त्वस्य प्रज्ञापारमितायां चरतमुपायकौशलं। पुनरपरं सुभूते बोधिसत्त्वोमहासत्त्वः प्रज्ञापारमितायां चरन् सर्व्वाकारज्ञताप्रतिसंयुक्तेन चित्तेन रूपं शून्यमिति वेदनाशून्येति संज्ञाशून्येति संस्काराः शून्या इति विज्ञानं शून्यमिति प्रत्यवेक्षते तच्च नोपलभते। इदं सुभूते बोधिसत्त्वस्य महासत्त्वस्य प्रज्ञापार-मितायां चरत उपायकौशलं। पुनरपरं सुभूते बोधिसत्त्वोमहासत्त्वः

---

* ख। ग। घ। पुस्तके वेदना, संज्ञा, इत्यादिशब्दोत्तर दुःखादिशब्दात् परं प्रत्यवेक्षते तच्च नोपलभते इति लिखितं। एवं परत्रापि सर्व्वत्र-वेदनादिशब्दोत्तरानात्मादिशब्दात् परमपि।

प्रज्ञापारमितायां चरन् सर्व्वाकारज्ञता प्रतिसंयुक्तेन चित्तेन रूपमानिमित्तमिति वेदना आनिमित्तेति संज्ञा आनिमित्तेति संस्काराः आनिमित्ता इति विज्ञानमानिमित्तमिति प्रत्यवेक्षते तच्च नोपलभते। इदं सुभूते वोधिसत्त्वस्य महासत्त्वस्य प्रज्ञापारमितायां चरत उपायकौशलं।

पुनरपरं सुभूते वोधिसत्त्वोमहासत्त्वः प्रज्ञापारमितायां चरन् सर्वाकारज्ञता प्रतिसंयुक्तेन चित्तेन रूपमप्रणिहितमिति प्रत्यवेक्षते तच्च नोपलभते। वेदनाऽप्रणिहितेति प्रत्यवेक्षते तच्च नोपलभते। संज्ञाऽप्रणिहितेति प्रत्यवेक्षते तच्च नोपलभते। संस्काराः अप्रणिहि-तेति प्रत्यवेक्षते तच्च नोपलभते। विज्ञानमप्रणिहितमिति प्रत्यवेक्षते तच्च नोपलभते। इदं वोधिसत्त्वस्य महासत्त्वस्य प्रज्ञापारमितायां चरत उपायकौशलं। पुनरपरं सुभूते वोधिसत्त्वोमहासत्त्वः प्रज्ञा-पारमितायां चरन् सर्व्वाकारज्ञता प्रतिसंयुक्तेन चित्तेन रूपमनभि-संस्कारमिति प्रत्यवेक्षते तच्च नोपलभते। वेदनाऽनभिसंस्कारेति प्रत्यवेक्षते। तच्च नोपलभते। संज्ञाऽनभिसंस्कारेति प्रत्यवेक्षते तच्च नोपलभते। संस्कारा अनभिसंस्कारा इति प्रत्यवेक्षते तच्च नोप-लभते। विज्ञानमनभिसंस्कारमिति प्रत्यवेक्षते तच्च नोपलभते। इदं वोधिसत्त्वस्य महासत्त्वस्य प्रज्ञापारमितायां चरत उपायकौशलं। पुनरपरं सुभूते वोधिसत्त्वोमहासत्त्वः प्रज्ञापारमितायां चरन् सर्व्वाकारज्ञताप्रतिसंयुक्तेन चित्तेन रूपं विविक्तमिति प्रत्यवेक्षते तच्च नोपलभते। वेदनाविविक्तेति प्रत्यवेक्षते तच्च नोपलभते। संज्ञाविविक्तेति प्रत्यवेक्षते तच्च नोपलभते। संस्काराविविक्ता इति

प्रत्यवेक्षते तांश्च नोपलभते। विज्ञानं विविक्तमिति प्रत्यवेक्षते तच्च नोपलभते। इदं सुभूते बोधिसत्त्वस्य महासत्त्वस्य प्रज्ञापारमितायां चरत उपायकौशलं।

पुनरपि सुभूते बोधिसत्त्वोमहासत्त्वः प्रज्ञापारमितायां चरन् सर्व्वाकारज्ञता प्रतिसंयुक्तेन चित्तेन रूपमनित्याकारेण प्रत्यवेक्षते तच्च नोपलभते। वेदनामनित्याकारेण प्रत्यवेक्षते तच्च नोपलभते। संज्ञामनित्याकारेण प्रत्यवेक्षते तच्च नोपलभते। संस्कारानित्याकारेण प्रत्यवेक्षते तांश्च नोपलभते। विज्ञानमनित्याकारेण प्रत्यवेक्षते तच्च नोपलभते। इदं सुभूते बोधिसत्त्वस्य महासत्त्वस्य प्रज्ञापारमितायां चरत उपायकौशलं।

पुनरपरं सुभूते बोधिसत्त्वोमहासत्त्वः प्रज्ञापारमितायां चरन् सर्व्वाकारज्ञताप्रतिसंयुक्तेन चित्तेन रूपं दुःखाकारेण प्रत्यवेक्षते तच्च नोपलभते। वेदनां दुःखाकारेण प्रत्यवेक्षते तच्च नोपलभते। संज्ञां दुःखाकारेण प्रत्यवेक्षते तच्च नोपलभते। संस्कारान् दुःखाकारेण प्रत्यवेक्षते तांश्च नोपलभते। विज्ञानं दुःखाकारेण प्रत्यवेक्षते तच्च नोपलभते। इदं सुभूते बोधिसत्त्वस्य महासत्त्वस्य प्रज्ञापारमितायां चरत उपायकौशलं।

पुनरपरं सुभूते बोधिसत्त्वोमहासत्त्वः प्रज्ञापारमितायां चरन् सर्व्वाकारज्ञता प्रतिसंयुक्तेन चित्तेन रूपमनात्माकारेण प्रत्यवेक्षते तच्च नोपलभते। वेदनामनात्माकारेण प्रत्यवेक्षते तच्च नोपलभते। संज्ञामनात्माकारेण प्रत्यवेक्षते तच्च नोपलभते। संस्कारानात्माकारेण प्रत्यवेक्षते तांश्च नोपलभते। विज्ञानमनात्माकारेण

प्रत्यवेक्षते तच्च नोपलभते। इदं सुभूते वोधिसत्त्वस्य महासत्त्वस्य प्रज्ञापारमितायां चरत उपायकौशलं।

पुनरपरं सुभूते वोधिसत्त्वोमहासत्त्वः प्रज्ञापारमितायां चरन् सर्व्वाकारज्ञताप्रतिसंयुक्तैर्मनसिकारैः रूपं शान्ताकारेण प्रत्यवेक्षते तच्च नोपलभते। वेदनां शान्ताकारेण प्रत्यवेक्षते तच्च नोपलभते। संज्ञां शान्ताकारेण प्रत्यवेक्षते तच्च नोपलभते। संस्कारान् शान्ताकारेण प्रत्यवेक्षते तांश्च नोपलभते। विज्ञानं शान्ताकारेण प्रत्यवेक्षते तच्च नोपलभते। इदं सुभूते वोधिसत्त्वस्य महासत्त्वस्य प्रज्ञापारमितायां चरत उपायकौशलं।

पुनरपरं सुभूते वोधिसत्त्वोमहासत्त्वः प्रज्ञापारमितायां चरन् सर्व्वाकारज्ञताप्रतिसंयुक्तैर्मनसिकारैः रूपं शून्याकारेण प्रत्यवेक्षते तच्च नोपलभते। वेदनां शून्याकारेण प्रत्यवेक्षते तच्च नोपलभते। संज्ञां शून्याकारेण प्रत्यवेक्षते तच्च नोपलभते। संस्कारान् शून्याकारेण प्रत्यवेक्षते तांश्च नोपलभते। विज्ञानं शून्याकारेण प्रत्यवेक्षते तच्च नोपलभते। इदं वोधिसत्त्वस्य महासत्त्वस्य प्रज्ञापारमितायां चरत उपायकौशलं।

पुनरपरं सुभूते वोधिसत्त्वोमहासत्त्वः प्रज्ञापारमितायां चरन् सर्व्वाकारज्ञता प्रतिसंयुक्तैर्मनसिकारैरूपमानिमित्तमिति प्रत्यवेक्षते तच्च नोपलभते। वेदनामानिमित्ताकारेण प्रत्यवेक्षते तच्च नोपलभते। संज्ञामानिमित्ताकारेण प्रत्यवेक्षते तच्च नोपलभते। संस्कारानानिमित्ताकारेण प्रत्यवेक्षते तांश्च नोपलभते। विज्ञानमानिमित्ताकारेण प्रत्यवेक्षते तच्च नोपलभते। इदं सुभूते वोधिसत्त्वस्य महासत्त्वस्य प्रज्ञापारमितायां चरत उपायकौशलं।

पुनरपरं सुभूते बोधिसत्त्वो महासत्त्वः प्रज्ञापारमितायां चरन् सर्व्वाकारज्ञताप्रतिसंयुक्तैर्मनसिकारै रूपमप्रणिहितमिति प्रत्यवेक्षते तच्च नोपलभते। वेदनामप्रणिहिताकारेण प्रत्यवेक्षते तच्च नोपलभते। संज्ञामप्रणिहिताकारेण प्रत्यवेक्षते तच्च नोपलभते। संस्कारान् प्रणिहिताकारेण प्रत्यवेक्षते तच्च नोपलभते। विज्ञानमप्रणिहिताकारेण प्रत्यवेक्षते तच्च नोपलभते। इदं सुभूते बोधिसत्त्वस्य महासत्त्वस्य प्रज्ञापारमितायां चरत उपायकौशल्यं।

पुनरपरं सुभूते बोधिसत्त्वो महासत्त्वः प्रज्ञापारमितायां चरन् सर्व्वाकारज्ञता प्रतिसंयुक्तैर्मनसिकारै रूपमनभिसंस्काराकारेण प्रत्यवेक्षते तच्च नोपलभते। वेदनामनभिसंस्काराकारेण प्रत्यवेक्षते तच्च नोपलभते। संज्ञामनभिसंस्काराकारेण प्रत्यवेक्षते तच्च नोपलभते। संस्कारानभिसंस्काराकारेण प्रत्यवेक्षते तांश्च नोपलभते। विज्ञानमनभिसंस्काराकारेण प्रत्यवेक्षते तच्च नोपलभते। इदं सुभूते बोधिसत्त्वस्य महासत्त्वस्य प्रज्ञापारमितायां चरत उपायकौशल्यं।

पुनरपरं सुभूते बोधिसत्त्वो महासत्त्वः प्रज्ञापारमितायां चरन् सर्व्वाकारज्ञताप्रतिसंयुक्तैर्मनसिकारै रूपं विविक्ताकारेण प्रत्यवेक्षते तच्च नोपलभते। वेदनां विविक्ताकारेण प्रत्यवेक्षते तच्च नोपलभते। संज्ञां विविक्ताकारेण प्रत्यवेक्षते तच्च नोपलभते। संस्कारान् विविक्ताकारेण प्रत्यवेक्षते तांश्च नोपलभते। विज्ञानं विविक्ताकारेण प्रत्यवेक्षते तच्च नोपलभते। इदं सुभूते बोधिसत्त्वस्य महासत्त्वस्य प्रज्ञापारमितायां चरत उपायकौशल्यं।

तथा पुनः सुभूते बोधिसत्त्वस्य महासत्त्वस्यैवं प्रत्यवेक्षमाणस्यैवं भवत्यहं सर्वसत्त्वेभ्यो रूपमनित्यमिति धर्मं देशयिष्यामि तच्चाऽनुपलम्भयोगेन। रूपं दुःखमिति धर्मं देशयिष्यामि तच्चाऽनुपलम्भयोगेन। रूपमनात्मेति धर्मं देशयिष्यामि तच्चाऽनुपलम्भयोगेन। रूपं शान्तमिति धर्मं देशयिष्यामि तच्चाऽनुपलम्भयोगेन। रूपं शून्यमिति धर्मं देशयिष्यामि तच्चाऽनुपलम्भयोगेन। रूपमानिमित्तमिति धर्मं देशयिष्यामि तच्चाऽनुपलम्भयोगेन। रूपमप्रणिहितमिति धर्मं देशयिष्यामि तच्चाऽनुपलम्भयोगेन। रूपमनभिसंस्कारमिति धर्मं देशयिष्यामि तच्चाऽनुपलम्भयोगेन। रूपं विविक्तमिति धर्मं देशयिष्यामि तच्चाऽनुपलम्भयोगेन।

वेदनामनित्येति धर्मं देशयिष्यामि तच्चाऽनुपलम्भयोगेन। वेदनां दुःखेति धर्मं देशयिष्यामि तच्चाऽनुपलम्भयोगेन। वेदनामनात्मेति धर्मं देशयिष्यामि तच्चाऽनुपलम्भयोगेन। वेदनां शान्तेति धर्मं देशयिष्यामि तच्चाऽनुपलम्भयोगेन। वेदनां शून्येति धर्मं देशयिष्यामि तच्चाऽनुपलम्भयोगेन। वेदनामानिमित्तेति धर्मं देशयिष्यामि तच्चाऽनुपलम्भयोगेन। वेदनामप्रणिहितेति धर्मं देशयिष्यामि तच्चाऽनुपलम्भयोगेन। वेदनामनभिसंस्कारेति धर्मं देशयिष्यामि तच्चाऽनुपलम्भयोगेन। वेदनां विविक्तेति धर्मं देशयिष्यामि तच्चाऽनुपलम्भयोगेन।

संज्ञामनित्येति धर्मं देशयिष्यामि तच्चाऽनुपलम्भयोगेन। संज्ञां दुखेःति धर्मं देशयिष्यामि तच्चाऽनुपलम्भयोगेन। संज्ञामनात्मेति धर्मं देशयिष्यामि तच्चाऽनुपलम्भयोगेन। संज्ञां शान्तेति धर्मं देश-

यिष्यामि तच्चाऽनुपलम्भयोगेन। संज्ञां शून्येति धर्मं देशयिष्यामि तच्चाऽनुपलम्भयोगेन। संज्ञामानिमित्तेति धर्मं देशयिष्यामि तच्चाऽनुपलम्भयोगेन। संज्ञामप्रणिहितेति धर्मं देशयिष्यामि तच्चाऽनुपलम्भयोगेन। संज्ञामनभिसंस्कारेति धर्मं देशयिष्यामि तच्चाऽनुपलम्भयोगेन। संज्ञां विविक्तेति धर्मं देशयिष्यामि तच्चाऽनुपलम्भयोगेन।

संस्कारानानित्या इति धर्मं देशयिष्यामि तच्चाऽनुपलम्भयोगेन। संस्कारान् दुःखा इति धर्मं देशयिष्यामि तच्चाऽनुपलम्भयोगेन। संस्कारानात्मान इति धर्मं देशयिष्यामि तच्चाऽनुपलम्भयोगेन। संस्कारान् शान्ता इति धर्मं देशयिष्यामि तच्चाऽनुपलम्भयोगेन। संस्कारान् शून्या इति धर्मं देशयिष्यामि तच्चाऽनुपलम्भयोगेन। संस्कारानानिमित्ता इति धर्मं देशयिष्यामि तच्चाऽनुपलम्भयोगेन। संस्कारानप्रणिहिता इति धर्मं देशयिष्यामि तच्चाऽनुपलम्भयोगेन। संस्कारानभिसंस्कारा इति धर्मं देशयिष्यामि तच्चाऽनुपलम्भयोगेन। संस्कारानविविक्ता इति धर्मं देशयिष्यामि तच्चाऽनुपलम्भयोगेन।

विज्ञानमनित्यमिति धर्मं देशयिष्यामि तच्चाऽनुपलम्भयोगेन। विज्ञानं दुःखमिति धर्मं देशयिष्यामि तच्चाऽनुपलम्भयोगेन। विज्ञानमनात्मेति धर्मं देशयिष्यामि तच्चाऽनुपलम्भयोगेन। विज्ञानं शान्तमिति धर्मं देशयिष्यामि तच्चाऽनुपलम्भयोगेन। विज्ञानं शून्यमिति धर्मं देशयिष्यामि तच्चाऽनुपलम्भयोगेन। विज्ञानमानिमित्तमिति धर्मं देशयिष्यामि तच्चाऽनुपलम्भयोगेन। विज्ञानम-

प्रणिहितमिति धर्मं देशयिष्यामि। तच्चाऽनुपलम्भयोगेन। विज्ञान-मनभिसंस्कारमिति धर्मं देशयिष्यामि तच्चाऽनुपलम्भयोगेन। विज्ञानं विविक्तमिति धर्मं देशयिष्यामि तच्चाऽनुपलम्भयोगेन।

इयं सुभूते बोधिसत्त्वस्य महासत्त्वस्य दानपारमिता। येन बोधि-सत्त्वोमहासत्त्वो नोत्क्रम्यति। न सन्त्रस्यति। न सन्त्रासमापद्यते।

पुनरपरं सुभूते बोधिसत्त्वोमहासत्त्वः प्रज्ञापारमितायां चरन् यन्न श्रावकप्रत्येकबुद्धप्रतिसंयुक्तैर्मनसिकारैरूपमनित्याकारेण मन-सिकरोति तच्चानुपलम्भयोगेन। यन्न श्रावकप्रत्येकबुद्धप्रतिसंयुक्तैर्मन-सिकारैरूपमनित्याकारेण मनसिकरोति तच्चानुपलम्भयोगेन। यन्न श्रावकप्रत्येकबुद्धप्रतिसंयुक्तैर्मनसिकारैरूपं शान्ताकारेण मन-सिकरोति तच्चानुपलम्भयोगेन। यन्न श्रावकप्रत्येकबुद्धप्रतिसंयुक्तैर्म-नसिकारैरूपं शून्याकारेण मनसिकरोति तच्चानुपलम्भयोगेन। यन्न श्रावकप्रत्येकबुद्धप्रतिसंयुक्तैर्मनसिकारैरूपमानिमित्ताकारेण मनसिकरोति तच्चानुपलम्भयोगेन। यन्न श्रावकप्रत्येकबुद्धप्रति-संयुक्तैर्मनसिकारैरूपमप्रणिहिताकारेण मनसिकरोति तच्चानुपलम्भ-योगेन। यन्न श्रावकप्रत्येकबुद्धप्रतिसंयुक्तैर्मनसिकारैरूपमनभि-संस्काराकारेण मनसिकरोति तच्चानुपलम्भयोगेन। यन्न श्रावक-प्रत्येकबुद्धप्रतिसंयुक्तैर्मनसिकारैरूपं विविक्ताकारेण मनसिकरोति, तच्चानुपलम्भयोगेन।

यन्न श्रावकप्रत्येकबुद्धप्रतिसंयुक्तैर्मनसिकारैर्वेदनामनित्याकारेण मनसिकरोति तच्चानुपलम्भयोगेन। यन्न श्रावकप्रत्येकबुद्धप्रतिसंयुक्तै-र्मनसिकारैर्वेदनां दुःखाकारेण मनसिकरोति तच्चानुपलम्भयोगेन।

यत्र श्रावकप्रत्येकबुद्धप्रतिसंयुक्तैर्मनसिकारैर्वेदनामनात्माकारेण मनसिकरोति तच्चानुपलम्भयोगेन । यत्र श्रावकप्रत्येकबुद्धप्रतिसंयुक्तैर्मनसिकारैर्वेदनां शान्ताकारेण मनसिकरोति तच्चानुपलम्भयोगेन । यत्र श्रावकप्रत्येकबुद्धप्रतिसंयुक्तैर्मनसिकारैर्वेदनां शून्याकारेण मनसिकरोति तच्चानुपलम्भयोगेन । यत्र श्रावकप्रत्येकबुद्धप्रतिसंयुक्तैर्मनसिकारैर्वेदनामानिमित्ताकारेण मनसिकरोति तच्चानुपलम्भयोगेन। यत्र श्रावकप्रत्येकबुद्धप्रतिसंयुक्तैर्मनसिकारैर्वेदनामप्रणिहिताकारेण मनसिकरोति तच्चानुपलम्भयोगेन । यत्र श्रावकप्रत्येकबुद्धप्रतिसंयुक्तैर्मनसिकारैर्वेदनामनभिसंस्काराकारेण मनसिकरोति तच्चानुपलम्भयोगेन । यत्र श्रावकप्रत्येकबुद्धप्रतिसंयुक्तैर्मनसिकारैर्वेदनां विविक्ताकारेण मनसिकरोति तच्चानुपलम्भयोगेन ।

यत्र श्रावकप्रत्येकबुद्धप्रतिसंयुक्तैर्मनसिकारैः संज्ञामनित्याकारेण मनसिकरोति तच्चानुपलम्भयोगेन । यत्र श्रावकप्रत्येकबुद्धप्रतिसंयुक्तैर्मनसिकारैः संज्ञां दुःखाकारेण मनसिकरोति तच्चानुपलम्भयोगेन । यत्र श्रावकप्रत्येकबुद्धप्रतिसंयुक्तैर्मनसिकारैः संज्ञामनात्माकारेण मनसिकरोति तच्चानुपलम्भयोगेन। यत्र श्रावकप्रत्येकबुद्धप्रतिसंयुक्तैर्मनसिकारैः संज्ञां शान्ताकारेण मनसिकरोति तच्चानुपलम्भयोगेन । यत्र श्रावकप्रत्येकबुद्धप्रतिसंयुक्तैर्मनसिकारैः संज्ञां शून्याकारेण मनसिकरोति तच्चानुपलम्भयोगेन । यत्र श्रावकप्रत्येकबुद्धप्रतिसंयुक्तैर्मनसिकारैः संज्ञामानिमित्ताकारेण मनसिकरोति तच्चानुपलम्भयोगेन । यत्र श्रावकप्रत्येकबुद्धप्रतिसंयुक्तैर्मनसिकारैः संज्ञामप्रणिहिताकारेण मनसिकरोति तच्चानुपलम्भयोगेन। यत्र श्रावकप्रत्येक-

वुद्धप्रतिसंयुक्तैर्मनसिकारैः संज्ञामनभिसंस्काराकारेण मनसिकरोति तच्चानुपलम्भयोगेन। यत्र श्रावकप्रत्येकबुद्धप्रतिसंयुक्तैर्मनसिकारैः संज्ञां विविक्ताकारेण मनसिकरोति तच्चानुपलम्भयोगेन ।

यत्र श्रावकप्रत्येकबुद्धप्रतिसंयुक्तैर्मनसिकारैः संस्कारानानित्याकारेण मनसिकरोति तच्चानुपलम्भयोगेन। यत्र श्रावकप्रत्येकबुद्धप्रतिसंयुक्तैर्मनसिकारैः संस्कारान् दुःखाकारेण मनसिकरोति तच्चानुपलम्भयोगेन । यत्र श्रावकप्रत्येकबुद्धप्रतिसंयुक्तैर्मनसिकारैः संस्कारानना-त्माकारेण मनसिकरोति तच्चानुपलम्भयोगेन । यत्र श्रावकप्रत्येक-बुद्धप्रतिसंयुक्तैर्मनसिकारैः संस्कारान् शान्ताकारेण मनसिकरोति तच्चानुपलम्भयोगेन । यत्र श्रावकप्रत्येकबुद्धप्रतिसंयुक्तैर्मनसिकारैः संस्कारान् शून्याकारेण मनसिकरोति । तच्चानुपलम्भयोगेन । यत्र श्रावकप्रत्येकबुद्धप्रतिसंयुक्तैर्मनसिकारैः संस्कारानानिमित्ताकारेण मनसिकरोति तच्चानुपलम्भयोगेन । यत्र श्रावकप्रत्येकबुद्धप्रति-संयुक्तैर्मनसिकारैः संस्कारानप्रणिहिताकारेण मनसिकरोति तच्चा-नुपलम्भयोगेन । यत्र श्रावकप्रत्येकबुद्धप्रतिसंयुक्तैर्मनसिकारैः संस्का-राननभिसंस्काराकारेण मनसिकरोति तच्चानुपलम्भयोगेन । यत्र श्रावकप्रत्येकबुद्धप्रतिसंयुक्तैर्मनसिकारैः संस्कारान् विविक्ताकारेण मनसिकरोति तच्चानुपलम्भयोगेन।

यत्र श्रावकप्रत्येकबुद्धप्रतिसंयुक्तैर्मनसिकारैर्विज्ञानमनित्याकारेण मनसिकरोति तच्चानुपलम्भयोगेन । यत्र श्रावकप्रत्येकबुद्धप्रतिसंयुक्तै-र्मनसिकारैर्विज्ञानं दुःखाकारेण मनसिकरोति तच्चानुपलम्भयोगेन। यत्र श्रावकप्रत्येकबुद्धप्रतिसंयुक्तैर्मनसिकारैर्विज्ञानमनात्माकारेण

मनसिकरोति तच्चानुपलम्भयोगेन । यत्र श्रावकप्रत्येकबुद्धप्रति-संयुक्तैर्मनसिकारैर्व्विज्ञानं शान्ताकारेण मनसिकरोति तच्चानुप-लम्भयोगेन । यत्र श्रावकप्रत्येकबुद्धप्रतिसंयुक्तैर्मनसिकारैर्व्विज्ञानं शून्या-कारेण मनसिकरोति तच्चानुपलम्भयोगेन । यत्र श्रावकप्रत्येकबुद्ध-प्रतिसंयुक्तैर्मनसिकारैर्व्विज्ञानमानिमित्ताकारेण मनसिकरोति तच्चा-नुपलम्भयोगेन । यत्र श्रावकप्रत्येकबुद्धप्रतिसंयुक्तैर्मनसिकारैर्व्विज्ञानम-प्रणिहिताकारेण मनसिकरोति तच्चानुपलम्भयोगेन । यत्र श्रावक-प्रत्येकबुद्धप्रतिसंयुक्तैर्मनसिकारैर्व्विज्ञानमनभिसंस्काराकारेण मनसि-करोति तच्चानुपलम्भयोगेन । यत्र श्रावकप्रत्येकबुद्धप्रतिसंयुक्तैर्मन-सिकारैर्व्विज्ञानं विविक्ताकारेण मनसिकरोति तच्चानुपलम्भयोगेन ।

इयं सुभूते* बोधिसत्त्वस्य महासत्त्वस्यापराद्दृष्टाशीलपारमिता येन बोधिसत्त्वोमहासत्त्वो नोत्त्रस्यति न संत्रस्यति न सन्त्रासमापद्यते ।

पुनरपरं बोधिसत्त्वस्य महासत्त्वस्य प्रज्ञापारमितायां चरन्तो येषां धर्म्माणामनित्याकारेण दुःखाकारेणानात्माकारेण शून्याकारेणा-निमित्ताकारेणाप्रणिहिताकारेणानभिसंस्काराकारेण विविक्ताकारेण प्रत्यवेक्षतेक्षमनारोचनेयं बोधिसत्त्वस्य महासत्त्वस्य क्षान्तिपारमिता येन बोधिसत्त्वोमहासत्त्वो नोत्त्रस्यति न सन्त्रस्यति न सन्त्रासमापद्यते ।

पुनरपरं सुभूते बोधिसत्त्वोमहासत्त्वः प्रज्ञापारमितायां चरन् सर्व्वाकारज्ञताप्रतिसंयुक्तैर्मनसिकारैरूपमनित्यमिति प्रत्यवेक्षते तच्चा-नुपलम्भयोगेन । सर्व्वाकारज्ञताप्रतिसंयुक्तैर्मनसिकारैरूपं दुःखमिति प्रत्यवेक्षते तच्चानुपलम्भयोगेन । सर्व्वाकारज्ञताप्रतिसंयुक्तैर्मनसिकारै-

* एषएव पाठः ख, ग, घ, पुस्तकेऽपि दृश्यते । अयंस्तु न सङ्गच्छते ।

रूपमनात्मेति प्रत्यवेक्षते तच्चानुपलम्भयोगेन । सर्व्वाकारज्ञताप्रतिसंयुक्तैर्मनसिकारै रूपं शान्तमिति प्रत्यवेक्षते तच्चानुपलम्भयोगेन । सर्व्वाकारज्ञताप्रतिसंयुक्तैर्मनसिकारै रूपं शून्यमिति प्रत्यवेक्षते तच्चानुपलम्भयोगेन । सर्व्वाकारज्ञताप्रतिसंयुक्तैर्मनसिकारै रूपमानिमित्तमिति प्रत्यवेक्षते तच्चानुपलम्भयोगेन । सर्व्वाकारज्ञताप्रतिसंयुक्तैर्मनसिकारै रूपमप्रणिहितमिति प्रत्यवेक्षते तच्चानुपलम्भयोगेन । सर्व्वाकारज्ञताप्रतिसंयुक्तैर्मनसिकारै रूपमनभिसंस्कारमिति प्रत्यवेक्षते तच्चानुपलम्भयोगेन । सर्व्वाकारज्ञताप्रतिसंयुक्तैर्मनसिकारै रूपं विविक्तमिति प्रत्यवेक्षते तच्चानुपलम्भयोगेन ।

सर्व्वाकारज्ञताप्रतिसंयुक्तैर्मनसिकारैर्वेदनाऽनित्येति वेदनादुःखेति* वेदनाऽनात्मेति वेदनाशान्तेति वेदनाशून्येति वेदना आनिमित्तेति वेदनाऽप्रणिहितेति वेदनाऽनभिसंस्कारेति वेदनाविविक्तेति प्रत्यवेक्षते तच्चानुपलम्भयोगेन । सर्व्वाकारज्ञताप्रतिसंयुक्तैर्मनसिकारैः संज्ञाऽनित्येति संज्ञादुःखेति संज्ञा अनात्मेति संज्ञाशान्तेति संज्ञाशून्येति संज्ञा आनिमित्तेति संज्ञाऽप्रणिहितेति संज्ञाऽनभिसंस्कारेति संज्ञाविविक्तेति प्रत्यवेक्षते तच्चानुपलम्भयोगेन । सर्व्वाकारज्ञताप्रतिसंयुक्तैर्मनसिकारैः संस्कारा अनित्या इति संस्कारादुःखा इति संस्कारा अनात्मान इति संस्काराः शान्ता इति संस्काराः शून्या इति संस्काराः आनिमित्ता इति संस्कारा अप्रणिहिता इति संस्कारा अनभिसंस्कारा इति संस्काराः विविक्ता इति प्रत्यवेक्षते

* वेदनादिष्वपि सर्व्वाकारज्ञताप्रतिसंयुक्तैरित्यादिपदानां निर्देशोऽस्ति रूपवदिति ग्रन्थस्य रीत्यावगम्यते आदर्शपुस्तके तु तथानिर्देशो नास्ति ।

तथानुपलम्भयोगेन । सर्व्वाकारज्ञताप्रतिसंयुक्तैर्मनसिकारैर्विज्ञानम-
नित्यमिति विज्ञानं दुःखमिति विज्ञानमनात्मेति विज्ञानं शान्त-
मिति विज्ञानं शून्यमिति विज्ञानमानिमित्तमितिविज्ञानमप्रणि-
हितमिति विज्ञानमनभिसंस्कारमिति विज्ञानं विविक्तमितिप्रत्य-
वेक्षते तथानुपलम्भयोगेन । तद्यथा* तेषां सर्व्वाकारज्ञताप्रतिसंयुक्तानां
मनसिकाराणां मनुत्सर्जनता अनिक्षिप्तधुरता इयं बोधिसत्त्वस्य
महासत्त्वस्य वीर्य्यपारमिता येन बोधिसत्त्वोमहासत्त्वो नोत्त्रस्यति न
सन्त्रस्यति न सन्त्रासमापद्यते ।

पुनरपरं सुभूते बोधिसत्त्वोमहासत्त्वः प्रज्ञापारमितायां चरन्
सर्व्वाकारज्ञताप्रतिसंयुक्तैर्मनसिकारैरूपमनित्यमिति प्रत्यवेक्षते तथा-
नुपलम्भयोगेन । नच श्रावकप्रत्येकबुद्धप्रतिसंयुक्तानां मनसिकाराणा-
मवकाशं ददाति । तदन्येषाञ्चाकुशलमूलानां धर्म्माणां ये बोधेः
परिपन्थकराः ।

यदा बोधिसत्त्वोमहासत्त्वः प्रज्ञापारमितायां चरन् सर्व्वाकार-
ज्ञताप्रतिसंयुक्तैर्मनसिकारैरूपं दुःखमिति प्रत्यवेक्षते तथानुपलम्भ-
योगेन । न च श्रावकप्रत्येकबुद्धप्रतिसंयुक्तानां मनसिकाराणामवकाशं
ददाति तदन्येषाञ्चाकुशलमूलानां धर्म्माणां ये बोधेः परिपन्थकराः ।

यदा बोधिसत्त्वोमहासत्त्वः प्रज्ञापारमितायां चरन् सर्व्वाकार-
ज्ञताप्रतिसंयुक्तैर्मनसिकारैः रूपमनात्मेति प्रत्यवेक्षते तथानुपलम्भ-
योगेन । न च श्रावकप्रत्येकबुद्धप्रतिसंयुक्तानां मनसिकाराणामवकाशं
ददाति तदन्येषाञ्चाकुशलमूलानां धर्म्माणां ये बोधेः परिपन्थकराः ।

---

* इति [illegible]

यदा बोधिसत्त्वोमहासत्त्वः प्रज्ञापारमितायां चरन् सर्व्वाकारज्ञताप्रतिसंयुक्तैर्मनसिकारैरूपमनात्मेति प्रत्यवेक्षते तच्चानुपलम्भयोगेन । न च श्रावकप्रत्येकबुद्धप्रतिसंयुक्तानां मनसिकाराणामवकाशं ददाति न च तदन्येषाञ्चाकुशलमूलानां धर्माणां ये बोधेः परिपन्थकराः ।

यदा बोधिसत्त्वोमहासत्त्वः प्रज्ञापारमितायां चरन् सर्व्वाकारज्ञताप्रतिसंयुक्तैर्मनसिकारैरूपं शान्तमिति प्रत्यवेक्षते तच्चानुपलम्भयोगेन। न च श्रावकप्रत्येकबुद्धप्रतिसंयुक्तानां मनसिकाराणामवकाशं ददाति तदन्येषाञ्चाकुशलमूलानां धर्माणां ये बोधेः परिपन्थकराः

यदा बोधिसत्त्वोमहासत्त्वः प्रज्ञापारमितायां चरन् सर्व्वाकारज्ञताप्रतिसंयुक्तैर्मनसिकारैः रूपमानिमित्तमिति प्रत्यवेक्षते तच्चानुपलम्भयोगेन । न च श्रावकप्रत्येकबुद्धप्रतिसंयुक्तानां मनसिकाराणामवकाशं ददाति तदन्येषाञ्चाकुशलमूलानां धर्माणां ये बोधेः परिपन्थकराः ।

यदा बोधिसत्त्वोमहासत्त्वः प्रज्ञापारमितायां चरन् सर्व्वाकारज्ञताप्रतिसंयुक्तैर्मनसिकारैरूपमप्रणिहितमिति प्रत्यवेक्षते तच्चानुपलम्भयोगेन । न च श्रावकप्रत्येकबुद्धप्रतिसंयुक्तानां मनसिकाराणामवकाशं ददाति तदन्येषाञ्चाकुशलमूलानां ये बोधेः परिपन्थकराः ।

यदा बोधिसत्त्वोमहासत्त्वः प्रज्ञापारमितायां चरन् सर्व्वाकारज्ञताप्रतिसंयुक्तैर्मनसिकारैरूपमनभिसंस्कारमिति प्रत्यवेक्षते तच्चानुपलम्भयोगेन । न च श्रावकप्रत्येकबुद्धप्रतिसंयुक्तानां मनसिकारा-

णामवकाशं ददाति तदन्येषाञ्चाकुशलमूलानां धर्म्माणां ये बोधेः परिपन्थकराः।

यदा बोधिसत्त्वोमहासत्त्वः प्रज्ञापारमितायां चरन् सर्व्वाकारज्ञताप्रतिसंयुक्तैर्मनसिकारैरूपं विविक्तमिति प्रत्यवेक्षते तच्चानुपलम्भयोगेन। न च श्रावकप्रत्येकबुद्धप्रतिसंयुक्तानां मनसिकाराणामवकाशं ददाति तदन्येषाञ्चाकुशलमूलानां धर्म्माणां ये बोधेः परिपन्थकराः।

यदा बोधिसत्त्वोमहासत्त्वः प्रज्ञापारमितायां चरन् सर्व्वाकारज्ञताप्रतिसंयुक्तैर्मनसिकारैर्वेदनामनित्येति प्रत्यवेक्षते तच्चानुपलम्भयोगेन। न च श्रावकप्रत्येकबुद्धप्रतिसंयुक्तानां मनसिकाराणामवकाशं ददाति तदन्येषाञ्चाकुशलमूलानां धर्म्माणां ये बोधेः परिपन्थकराः।

यदा बोधिसत्त्वोमहासत्त्वः प्रज्ञापारमितायां चरन् सर्व्वाकारज्ञताप्रतिसंयुक्तैर्मनसिकारैर्वेदनां दुःखेति प्रत्यवेक्षते तच्चानुपलम्भयोगेन। न च श्रावकप्रत्येकबुद्धप्रतिसंयुक्तानां मनसिकाराणामवकाशं ददादि तदन्येषाञ्चाकुशलमूलानां धर्म्माणां ये बोधेः परिपन्थकराः।

यदा बोधिसत्त्वोमहासत्त्वः प्रज्ञापारमितायां चरन् सर्व्वाकारज्ञताप्रतिसंयुक्तैर्मनसिकारैर्वेदनामनात्मेति प्रत्यवेक्षते तच्चानुपलम्भयोगेन। न च श्रावकप्रत्येकबुद्धप्रतिसंयुक्तानां मनसिकाराणामवकाशं ददाति तदन्येषाञ्चाकुशलमूलानां धर्म्माणां ये बोधेः परिपन्थकराः।

यदा बोधिसत्त्वोमहासत्त्वः प्रज्ञापारमितायां चरन् सर्व्वाकारज्ञताप्रतिसंयुक्तैर्मनसिकारैर्वेदनां शान्तेति प्रत्यवेक्षते तच्चानुपलम्भयोगेन। न च श्रावकप्रत्येकबुद्धप्रतिसंयुक्तानां मनसिकाराणामवकाशं ददाति तदन्येषाञ्चाकुशलमूलानां धर्म्माणां ये बोधेः परिपन्थकराः।

यदा बोधिसत्त्वोमहासत्त्वः प्रज्ञापारमितायां चरन् सर्व्वाकार-ज्ञताप्रतिसंयुक्तैर्मनसिकारै रूपं शान्तमिति प्रत्यवेक्षते तच्चानुपलम्भ-योगेन । न च श्रावकप्रत्येकबुद्धप्रतिसंयुक्तानां मनसिकाराणामव-काशं ददाति न च तदन्येषाञ्चाकुशलमूलानां धर्म्माणां ये बोधेः परिपन्थकराः ।

यदा बोधिसत्त्वोमहासत्त्वः प्रज्ञापारमितायां चरन् सर्व्वाकार-ज्ञताप्रतिसंयुक्तैर्मनसिकारै रूपं शून्यमिति प्रत्यवेक्षते तच्चानुपलम्भ-योगेन। न च श्रावकप्रत्येकबुद्धप्रतिसंयुक्तानां मनसिकाराणामवकाशं ददाति तदन्येषाञ्चाकुशलमूलानां धर्म्माणां ये बोधेः परिपन्थकराः ।

यदा बोधिसत्त्वोमहासत्त्वः प्रज्ञापारमितायां चरन् सर्व्वा-कारज्ञताप्रतिसंयुक्तैर्मनसिकारैः रूपमानिमित्तमिति प्रत्यवेक्षते तच्चानुपलम्भयोगेन । न च श्रावकप्रत्येकबुद्धप्रतिसंयुक्तानां मनसि-काराणामवकाशं ददाति तदन्येषाञ्चाकुशलमूलानां धर्म्माणां ये बोधेः परिपन्थकराः ।

यदा बोधिसत्त्वोमहासत्त्वः प्रज्ञापारमितायां चरन् सर्व्वाकार-ज्ञताप्रतिसंयुक्तैर्मनसिकारै रूपमप्रणिहितमिति प्रत्यवेक्षते तच्चा-नुपलम्भयोगेन । न च श्रावकप्रत्येकबुद्धप्रतिसंयुक्तानां मनसि-काराणामवकाशं ददाति तदन्येषाञ्चाकुशलमूलानां ये बोधेः परिपन्थकराः ।

यदा बोधिसत्त्वोमहासत्त्वः प्रज्ञापारमितायां चरन् सर्व्वाकार-ज्ञताप्रतिसंयुक्तैर्मनसिकारै रूप[illegible]मिति प्रत्यवेक्षते तच्चा-नुपलम्भयोगेन । न च श्रावकप्रत्येकबुद्धप्रतिसंयुक्तानां मनसिकारा-

णामवकाशं ददाति तदन्येषाञ्चाकुशलमूलानां धर्म्माणां ये बोधेः परिपन्थकराः ।

यदा बोधिसत्त्वो महासत्त्वः प्रज्ञापारमितायां चरन् सर्व्वाकारज्ञताप्रतिसंयुक्तैर्मनसिकारै रूपं विविक्तमिति प्रत्यवेक्षते तच्चानुपलम्भयोगेन । न च श्रावकप्रत्येकबुद्धप्रतिसंयुक्तानां मनसिकाराणामवकाशं ददाति तदन्येषाञ्चाकुशलमूलानां धर्म्माणां ये बोधेः परिपन्थकराः ।

यदा बोधिसत्त्वो महासत्त्वः प्रज्ञापारमितायां चरन् सर्व्वाकारज्ञताप्रतिसंयुक्तैर्मनसिकारैर्वेदनामनित्येति प्रत्यवेक्षते तच्चानुपलम्भयोगेन । न च श्रावकप्रत्येकबुद्धप्रतिसंयुक्तानां मनसिकाराणामवकाशं ददाति तदन्येषाञ्चाकुशलमूलानां धर्म्माणां ये बोधेः परिपन्थकराः ।

यदा बोधिसत्त्वो महासत्त्वः प्रज्ञापारमितायां चरन् सर्व्वाकारज्ञताप्रतिसंयुक्तैर्मनसिकारैर्वेदनां दुःखेति प्रत्यवेक्षते तच्चानुपलम्भयोगेन । न च श्रावकप्रत्येकबुद्धप्रतिसंयुक्तानां मनसिकाराणामवकाशं ददादि तदन्येषाञ्चाकुशलमूलानां धर्म्माणां ये बोधेः परिपन्थकराः ।

यदा बोधिसत्त्वो महासत्त्वः प्रज्ञापारमितायां चरन् सर्व्वाकारज्ञताप्रतिसंयुक्तैर्मनसिकारैर्वेदनामनात्मेति प्रत्यवेक्षते तच्चानुपलम्भयोगेन । न च श्रावकप्रत्येकबुद्धप्रतिसंयुक्तानां मनसिकाराणामवकाशं ददाति तदन्येषाञ्चाकुशलमूलानां धर्म्माणां ये बोधेः परिपन्थकराः ।

यदा बोधिसत्त्वो महासत्त्वः प्रज्ञापारमितायां चरन् सर्व्वाकारज्ञताप्रतिसंयुक्तैर्मनसिकारैर्वेदनां शान्तेति प्रत्यवेक्षते तच्चानुपलम्भयोगेन । न च श्रावकप्रत्येकबुद्धप्रतिसंयुक्तानां मनसिकाराणामवकाशं ददाति तदन्येषाञ्चाकुशलमूलानां धर्म्माणां ये बोधेः परिपन्थकराः ।

यदा बोधिसत्त्वो महासत्त्वः प्रज्ञापारमितायां चरन् सर्व्वाकारज्ञताप्रतिसंयुक्तैर्मनसिकारैः संज्ञाऽनित्येति प्रत्यवेक्षते तच्चानुपलम्भयोगेन। न च श्रावकप्रत्येकबुद्धप्रतिसंयुक्तानां मनसिकाराणामवकाशं ददाति तदन्येषाञ्चाकुशलमूलानां धर्म्माणां ये बोधेः परिपन्थकराः।

यदा बोधिसत्त्वो महासत्त्वः प्रज्ञापारमितायां चरन् सर्व्वाकारज्ञताप्रतिसंयुक्तैर्मनसिकारैः संज्ञा दुःखेति प्रत्यवेक्षते तच्चानुपलम्भयोगेन। न च श्रावकप्रत्येकबुद्धप्रतिसंयुक्तानां मनसिकाराणामवकाशं ददाति न च तदन्येषाञ्चाकुशलमूलानां धर्म्माणां ये बोधेः परिपन्थकराः।

यदा बोधिसत्त्वो महासत्त्वः प्रज्ञापारमितायां चरन् सर्व्वाकारज्ञताप्रतिसंयुक्तैर्मनसिकारैः संज्ञाऽनात्मेति प्रत्यवेक्षते तच्चानुपलम्भयोगेन। न च श्रावकप्रत्येकबुद्धप्रतिसंयुक्तानां मनसिकाराणामवकाशं ददाति न च तदन्येषाञ्चाकुशलमूलानां धर्म्माणां ये बोधेः परिपन्थकराः।

यदा बोधिसत्त्वो महासत्त्वः प्रज्ञापारमितायां चरन् सर्व्वाकारज्ञताप्रतिसंयुक्तैर्मनसिकारैः संज्ञाशान्तेति प्रत्यवेक्षते तच्चानुपलम्भयोगेन। न च श्रावकप्रत्येकबुद्धप्रतिसंयुक्तानां मनसिकाराणामवकाशं ददाति तदन्येषाञ्चाकुशलमूलानां धर्म्माणां ये बोधेः परिपन्थकराः।

यदा बोधिसत्त्वो महासत्त्वः प्रज्ञापारमितायां चरन् सर्व्वाकारज्ञताप्रतिसंयुक्तैर्मनसिकारैः संज्ञाशून्येति प्रत्यवेक्षते तच्चानुपलम्भयोगेन। न च श्रावकप्रत्येकबुद्धप्रतिसंयुक्तानां मनसिकाराणामवकाशं ददाति तदन्येषाञ्चाकुशलमूलानां धर्म्माणां ये बोधेः परिपन्थकराः।

यदा बोधिसत्त्वो महासत्त्वः प्रज्ञापारमितायां चरन् सर्व्वाकारज्ञताप्रतिसंयुक्तैर्मनसिकारैः संज्ञा आनिमित्तेति प्रत्यवेक्षते तच्चानुपलम्भयोगेन । न च श्रावकप्रत्येकबुद्धप्रतिसंयुक्तानां मनसिकाराणामवकाशं ददाति तदन्येषाञ्चाकुशलमूलानां धर्म्माणां ये बोधेः परिपन्थकराः ।

यदा बोधिसत्त्वो महासत्त्वः प्रज्ञापारमितायां चरन् सर्व्वाकारज्ञताप्रतिसंयुक्तैर्मनसिकारैः संज्ञाऽप्रणिहितेति प्रत्यवेक्षते तच्चानुपलम्भयोगेन । न च श्रावकप्रत्येकबुद्धप्रतिसंयुक्तानां मनसिकाराणामवकाशं ददाति तदन्येषाञ्चाकुशलमूलानां धर्म्माणां ये बोधेः परिपन्थकराः ।

यदा बोधिसत्त्वो महासत्त्वः प्रज्ञापारमितायां चरन् सर्व्वाकारज्ञताप्रतिसंयुक्तैर्मनसिकारैः संज्ञाऽनभिसंस्कारेति प्रत्यवेक्षते तच्चानुपलम्भयोगेन । न च श्रावकप्रत्येकबुद्धप्रतिसंयुक्तानां मनसिकाराणामवकाशं ददाति तदन्येषाञ्चाकुशलमूलानां धर्म्माणां ये बोधेः परिपन्थकराः ।

यदा बोधिसत्त्वो महासत्त्वः प्रज्ञापारमितायां चरन् सर्व्वाकारज्ञताप्रतिसंयुक्तैर्मनसिकारैः संज्ञा विविक्तेति प्रत्यवेक्षते तच्चानुपलम्भयोगेन । न च श्रावकप्रत्येकबुद्धप्रतिसंयुक्तानां मनसिकाराणामवकाशं ददाति तदन्येषाञ्चाकुशलमूलानां धर्म्माणां ये बोधेः परिपन्थकराः ।

यदा बोधिसत्त्वो महासत्त्वः प्रज्ञापारमितायां चरन् सर्व्वाकारज्ञताप्रतिसंयुक्तैर्मनसिकारैः संस्कारा अनित्या इति प्रत्यवेक्षते तच्चा-

नुपलम्भयोगेन । न च श्रावकप्रत्येकबुद्धप्रतिसंयुक्तानां मनसिकारा-णामवकाशं ददाति तदन्येषाञ्चाकुशलमूलानां धर्म्माणां ये बोधेः परिपन्थकराः ।

यदा बोधिसत्त्वो महासत्त्वः प्रज्ञापारमितायां चरन् सर्व्वाकार-ज्ञताप्रतिसंयुक्तैर्मनसिकारैः संस्कारा दुःखा इति प्रत्यवेक्षते तच्चा-नुपलम्भयोगेन । न च श्रावकप्रत्येकबुद्धप्रतिसंयुक्तानां मनसिकारा-णामवकाशं ददाति तदन्येषाञ्चाकुशलमूलानां धर्म्माणां ये बोधेः परिपन्थकराः ।

यदा बोधिसत्त्वो महासत्त्वः प्रज्ञापारमितायां चरन् सर्व्वाकार-ज्ञताप्रतिसंयुक्तैर्मनसिकारैः संस्कारा अनात्मान इति प्रत्यवेक्षते तच्चा-नुपलम्भयोगेन । न च श्रावकप्रत्येकबुद्धानां मनसिकाराणामवकाशं ददाति तदन्येषाञ्चाकुशलधर्म्माणां ये बोधेः परिपन्थकराः ।

यदा बोधिसत्त्वो महासत्त्वः प्रज्ञापारमितायां चरन् सर्व्वाकार-ज्ञताप्रतिसंयुक्तैर्मनसिकारैः संस्काराः शान्ता इति प्रत्यवेक्षते तच्चा-नुपलम्भयोगेन । न च श्रावकप्रत्येकबुद्धप्रतिसंयुक्तानां मनसिकारा-णामवकाशं ददाति तदन्येषाञ्चाकुशलमूलानां धर्म्माणां ये बोधेः परिपन्थकराः ।

